वृत्तं प्रथय रामस्य यथा[3] ते नारदाच्छ्रुतम् । [३२उ

३५] रहस्यं[4] चे प्रकाश्यं[5] च यद्वृत्तं तस्य धीमतः ॥३५॥ [३३पू

रामस्य ससहायस्य राक्षसानां च सर्वशः । [३३उ

३६] वैदेह्याश्चैव यद्[6] वृत्तं प्रकाशं[7] यदि वा रहः ॥३६॥ [३४पू

तच्चाप्यविदितं[8] सर्वं वेदितं[9] ते भविष्यति ।[10] [३४उ

३७] सराष्ट्रेण[11] सदारेण[11] राज्ञा दशरथेन यत्[12] ॥३७॥ [N

आसितं भाषितं चैव[13] गतं[14] यच्चाप्यनुष्ठितम्[15] ।[16]

३८] यच्चाप्य[17]विदितं किञ्चिद् विदितं ते भविष्यति ॥[18]३८॥[N

---

१. ब ट त ल प्र प भ—ऋषिसत्तम ।

२. ल—श्लोके वामस्य । प्र- लोकरामस्य । प भ—लोके रामस्य ।

३. प—यदा ।

४. प्र—रहश्चैव ।

५. ज ट त प्र भ—प्रकाशं ।

६. ल—वार्तातं ।

७. कै—प्रकाश्यं ।

८. कै—तथाप्य० ।

प्र भ—तच्चाप्यविदितं सर्वं । प—यद्वाप्यविदितं किंचिद् ।

९. प्र प भ—विदितं ।

१०. प—अयं श्लोकार्धः ३८ श्लोकस्योत्तरार्धेन संबद्धः ।

११. ल प्र प भ—सदारेण सराष्ट्रेण ।

१२. प—च ।

१३. ट—नास्ति ।

१४. ल भ—मतं । प—मन्त्रं ।

१५. प—चाप्यनुतिष्ठितं ।

१६. ट नास्ति ।

१७. ट—तथाप्य० ।

१८. प्र— सर्वं विदितमेतत्ते मत्प्रसादा [द्] भविष्यति ।

न ते वागनृता काचिदत्र काव्ये[1] भविष्यति ।[2]
३९] कुरु[3] रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ॥३९॥ [३५
यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
४०] तावद् रामायणकथा लोकेषु विचरिष्यति ॥४०॥ [३६
यावद्रामस्य[4] च[5] कथा[6] त्वत्कृता[7] प्रचरिष्यति ।[8]
N] तावदूर्ध्वमधश्च त्वं मल्लोके[9] विचरिष्यसि[10] ॥४१॥ [३७
इत्युक्त्वा भगवान् ब्रह्मा तत्रैवान्तरधीयत[11] ।
४१] ततः सशिष्यो[12] वाल्मीकिर्विस्मयं परमं ययौ ॥४२॥ [३८
तस्य[13] शिष्यास्ततः सर्वे गुरोः श्लोकमिमं तदा ।
४२] मुहुर्मुहुः प्रीयमाणाः प्राहुश्च[14] भृशविस्मिताः ॥४३॥ [३९
समाक्षरैश्चतुर्भिर्यः[15] पादैर्गीतो महात्मना[16] ।

१. भ—कार्ये ।

२. ट—नास्ति ।

३. रा—कुते ।

४. प—०ष्वमक० ।

५. ल प्र प भ—प्रचरिष्यति ।

६. ज त ल ट—यावच्च रामस्य क० ।
भ—यावद्रामायणकथा । रा—सराष्ट्रेण सदारेण ।

७. ज त—त्वत्कथा ।

८. प—नास्ति ।

९. ज त ल प भ ट—मल्लोकेषु । प्र—स्वर्गलोके ।

१०. ट—चरिष्यति । ज—विचरिष्यति ; ल प्र प भ—निवत्स्यसि ।

११. प्र—०रधीयते ।

१२. त—सशष्टो ।

१३. भ—ततः शिष्यास्तस्य ।

१४. प्र प भ—जगुः । ल—जंतुः (जगुः?) ।

१५. प्र—०रैश्चतुर्भिश्च ।

१६. स ल—महात्मनः ।

४३] सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागमत् ॥४४॥ [४०
तस्य बुद्धिरभूत्तत्र वाल्मीकेरथ धीमतः ।
४४] कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्यहम् ॥४५॥ [४१
धर्मकामार्थसंबद्धं बहुचित्रार्थविस्तरम् ।
४५] समुद्रमिव रम्यार्थं श्लोकेष्वतिरसायणम् ॥४६॥ [N
उदारवृत्तार्थपदैर्मनोरमैस्ततः स रामस्य चकार कीर्तिमान् ।
४६] समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारमग्र्यधीः ॥४७

इत्यार्षे रामायणे आदिकाण्डे ब्रह्मागमनं नाम द्वितीयः सर्गः ॥२॥

---

१. क रा ब-ऽनुध्याहरणात् । २. प्र प भ-०मागतः । ३. प-०केर्भावितात्मनः ।

४. प—श्लोकैरीदृशं, अतः परमधिकः पाठः—

कृत्स्नं रामायणं काव्यमेव वै प्रकरोम्यहम् ।

जगौ स भगवान् कृत्स्नमेतद्द्विजं निशाम्य वै ॥

५. करवाम्यं । इत्यपपाठः । ६. प्र प भ—रत्नाढ्यं ।

७. ज—श्लोकैः श्रतिरसायणं ।

त ल भ ट— लोकेश्रतिरसायणम । प्र प—लोकश्रातिरसायणं ।

८. ल—उदर्थवृतार्थप० । प्र—उदारवृतानुप० । प—उदानवृतार्थप० ।

रा—उदारवृतान्तप० । ९. ल प्र प भ—मनोहरैः । १०. भ—कीर्तनं ।

११. प्र—श्लोकपदैर्य० ।

१२. ल प भ—०मुदारधीमुनिः । प्र—-मुदारधीः परं । रा—०मग्रधीः ।

१३. रा ज त- रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसाहस्र्यां संहितायां ।

ट—रामायणे वाल्मीकीये चतुर्विंशतिसाहस्र्यां संहितायां ।

प—वाल्मीकीये रामायणे ।

१४. ज प—बालकाण्डे । प्र—नास्ति ।

१५. ल—ब्रह्माभिगमनं नाम । प्र—नास्ति ।

१६. ब त भ—सर्गः ।

प्राप्तराज्यस्य रामस्य वाल्मीकि[1]र्भगवानृषिः ।
१] चकार चरितं चित्रं विचित्रपदमर्थवत् ॥१॥ [१
पवित्रं वैष्णवं दिव्यमिदमाख्यानमुत्तमम्[2] ।
२] वेदैश्चतुर्भिः समित[3]मितिहासं पुरातनम् ॥२॥ [N
श्रावयामास वै विप्रान् सुव्रतान् नियतेन्द्रियान् ।
३] धौम्यमाण्डव्यकुशिकान् सार्ष्टिष्णेनान्[4] सकोहलान्[5] ॥३॥ [N
[6]तौ तु चेक्ष्वाकुदायादौ मुनिवेशौ[7] कुशीलवौ ।
४] धन्यं[8] यशस्यमायुष्यं परं[9] स्वस्त्ययनं महत् ॥४॥ [N
कृतां[10] च तत्त्वतः[11] कीर्तिं[12] राघवस्य महात्मनः ।
५] इहैवार्थश्च[13] धर्मश्च[14] निखिलेनोपपद्यते ॥[15] ५॥ [N

---

१. ल—वाल्मीकिर्भ० ।
२. रा—०मुत्तमः । इत्यसत् पाठः ।
३. ज—संमित० । ट प्र भ—सहित० ।
४. ल—सांष्ट्रिषेणान् । रा—सृष्टिषणे० ।
प्र—सार्ष्यिसेणान् । प भ—सार्ष्टिषे० ।
५. प्र—सकोशलान् । भ—सकोसलान् ।
६. ल—भाव वेक्ष्वाकु० । प रा—तौ चवेक्ष्वाकु० ।
प्र—तौ चैवेक्ष्वाकुदायादा ।
७. प्र—मुनिवेशो । ज—मुनिर्वेशौ ।
८. क—धान्यं ।
९. ल प्र प भ—स्वर्ग्यं ।
१०. रा ज ब ट त—कृतं । ल प्र प—कृता । भ—कृत्वा ।
११. ज ब ट त—तन्वता । भ—तद्वतः ।
१२. ल—कीर्ती । प्र प—कीर्तिः ।
१३. भ—कामश्च ।
१४. ट—वणवनीतिश्च वर्तते । त ०लेनोपलभ्यते ।
प्र—कामश्च परिकीर्तितः ।
१५. प—इहवार्थश्च निखिलो धर्मश्चैवोपलभ्यते ।

दण्डनीतिश्च विपुला त्रयीवार्ता च कृत्स्नशः ।[१]

६] य इदं शृणुयान् नित्यं यश्चेदं[२] परिकीर्तयेत्[३] ॥६॥ [N

इह भोगान् वरान् प्राप्य देवैर्गच्छति तुल्यताम् ।

७] इक्ष्वाकूणामिदं चैव[५] जनकस्य च धीमतः ॥७॥ [N

पुलस्त्यस्य च देवर्षेः कीर्तनं समुदाहृतम् ।

८] अश्वमेधावसानेऽस्यै राघवस्य महात्मनः ॥८॥ [N

कथितं पुष्टि[६]जननमिदमाख्यानमादितः ।

९] अत्र[७] धर्मार्थसंयुक्तं पापानां[८] नाशनं[९] शुभम् ॥९॥ [N

आदिकाण्ड[१०]मिदं प्रोक्तं विस्तरश्चास्य[११] कथ्यते ।

१०] प्रथमं[१२] नारदप्रश्नो[१३] नदीगमनमेव च ॥१०॥ [N

पृ११] ब्रह्मणो दर्शनं चैव वरप्राप्तिश्च[१४] वर्णनम्[१५] ।[१५]

१. ट—नास्ति ।

२. भ—यश्चैनं ।

३. ट—परिकल्पयेत् । ल—परिकीर्तितम् ।

४. प—रम्यं ।

५. त ल प्र प भ ट—च ।

६. ल प—तुष्टि० । प्र—तुष्ट० ।

७. ल—यत्र धर्मा० । प—सर्वधर्मा० । प्र—धर्मकामार्थ० ।

८. प—पावनानां च । ल—पापानां पावनं ।

९. प—पावनम् ।

१०. ल प—०काण्डमिह ।

११. रा भ—विस्तारश्चा० । प्र—विस्तार चा० ।

१२. प—वाल्मीके ।

१३. रा—नारदं प्रश्नो । प्र—नारदः प्रश्नो ।

१४. ल प्र प भ—वरप्राप्तिश्च पुष्कला ।

१५. ल प्र प भ—अतः परमधिकः पाठः—

श्लोकानां परिमाणं च यत्रैतत् परिकीर्त्यते ।

अयोध्यावर्णनं चैव राज्ञो दशरथस्य च ।

अमात्यवर्णनं चैव कौसल्यायाश्चवर्णनं ।

के—उत्तरपार्श्वे पुनर्विन्यासः ।

पुत्रार्थं च नरेन्द्रस्य मन्त्रेणे[1] समुदाहृतम् ।
१३] अश्वमेधक्रिया चैव वरप्राप्तिश्च[2] पुष्कला[3] ॥१३॥ [N
भागार्थिनां च देवानामागमः परिकीर्तितः ।
१४] रावणस्य वधोपाये[4] मन्त्रोऽथ परिकीर्तितः ॥१४॥ [N
दिव्या च पायसोत्पत्तिः पुत्रजन्म नृपस्य च ।
१५] अंशावतरणं चैव[6] सुराणां समुदाहृतम्[5] ॥१५॥ [N
कौसल्यायां[8] च रामस्य कैकेय्यां भरतस्य च ।
१६] यमयोश्च सुमित्रायां संभवः[9] समुदाहृतः[10] ॥१६॥ [N
वानराणां च सर्वेषामुत्पत्तिः परिकीर्तिता ।
१७] ततो[7] दशरथस्येह विश्वामित्रेण सङ्गमः ॥१७॥ [N
प्रदानं चैव रामस्य रक्षणं[11] च[12] महाक्रतोः[13] ।
१८] लक्ष्मणानुगमश्चैव[14] विद्याप्राप्तिश्च पुष्कला ॥१८॥ [N

---

१. कै ल रा—मन्त्रेण । प्र प भ—मन्त्रणं । ज ब ट त-सत्रेण ।

२. ल—वरप्राप्तिस्तु पुष्कला । प—राज्ञो दशरथस्य च ।

३. ल प भ—समुदाहृतः ।

४. भ—वधोपायमन्त्रणं । ट त—वधोपाये मन्त्रणं ।
प्र प—वधोपायमन्त्रणं । ल समुरुद्यतम ।

५. त ट—समुदाहृतः । ल प्र प भ—समुदाहृतम ।

६. ल चात्र । प—चापि ।

७. ट—नास्ति ।

८. प्र प भ—कौश० ।

९. ल—संभवा ।

१०. ल—समुदाहृतम् ।

११. ल प्र प भ—राज्ञो ।

१२. ज त ल प भ—रक्षणार्थं । प्र—रक्षणार्थो ।

१३. प्र—महाव्रतं ।

१४. त—०णानुगतश्चै० ।

अनङ्गाश्रमवासश्च ताटकावनदर्शनम्[1] ।
१९] ताटकानिधनं[2] चैवं अस्त्रलाभश्च कीर्त्यते ॥१९॥ [N
सिद्धाश्रमनिवासश्च सत्ररक्षणमेव च ।
२०] सुबाहोर्मरणं[3] चात्रे[4] मारीचस्य च भर्त्सनम्[5] ॥२०॥ [N
विश्वामित्रस्य चैवर्षेः[6] स्ववंशपरिकीर्तनम् ।
२१] गङ्गायाः संभवश्चैवं[7] पवित्रः परिकीर्तितः ॥२१॥ [N
दिव्यगर्भविपतनं[8] कार्तिकेयस्य संभवः ।
२२] विशालस्य च राजर्षे[9] धर्मस्य[10] परिकीर्तनम् ॥२२॥ [N
अहल्याशापनिर्मोक्षो[11] मिथिलायांश्च[12] दर्शनम् ।
२३] दर्शनं यज्ञवाटस्य मैथिलस्य च दर्शनम् ॥[13]२३॥[14] [N
[15]चरितं चैव कार्त्स्न्येन कौशिकस्य महात्मनः ।
२४] कथितं चात्र रामस्य शतानन्देन धीमता ॥२४॥ [N
धनुषो भेदनं चैव कन्यायाश्च निवेदनम् ।[14]

---

१. ल—ताराकावनद० । प्र प भ—ताडकावनद० ।
२. ज—ताटकायाश्च निधनं । ल—ताराकायाश्च निधनं । त प्र प भ—ताडकायाश्च निधनं ।
३. ज त ल प भ—०र्निधनं ।
४. रा प्र—चैव ।
५. भ—भर्त्सनां ।
६. रा त ल भ—देवर्षेः । प्र—राजर्षेः ।
७. ल प्र प भ—प्रभवश्चैव ।
८. प्र—०गर्भावतरणं ।
९. ल—देवर्षेर् ।
१०. ल प्र प भ—वंशस्य ।
११. ज त ल प्र प भ—०शापमोक्षश्च ।
१२. के रा ब—मैथिलस्य च ।
१३. के रा ब—नास्ति ।
१४. प—नास्ति ।
१५. के ब—दर्शनं ।

२५] राज्ञो दशरथस्येह जनकस्य च सङ्गमः[1] ॥२५॥ [N

सीतादीनां च कन्यानां विवाहः समुदाहृतः ।

२६] वधूर्गृहीत्वा[2] नृपतेर्यानं दशरथस्य च ॥२६॥ [N

समागमश्च रामस्य जामदग्न्येन धीमता ।

२७] जामदग्न्यस्य लोकानां वधश्चै[3] परिकीर्तितः[4] ॥२७॥ [N

अयोध्यासंप्रवेशश्च प्रवासो भरतस्य च ।

२८] अयोध्यावासिनां चैव प्रमोदः परिकीर्त्यते ॥२८॥ [N

इत्येतत् प्रथमं काण्डमादिकाण्डमिहोच्यते[5] ।

२९] सर्गाश्चैवं[6] चतुःषष्टिः श्लोकानां चैवं[7] कीर्त्यते ॥२९॥ [N

द्वे सहस्रे शतान्यष्टौ श्लोकाः पञ्चाशदेव तु ।

३०] बालचर्या च[8] यत्रोक्ता राघवस्य महात्मनः ॥३०॥ [N

N] काण्डः १ श्लोकाः २८५० सर्गाः ६४ ॥ [N

अतः परं द्वितीयं तु[9] अयोध्याकाण्डसंज्ञितम् ।

३१] यत्राभिषेकसङ्कल्पो व्याघातश्चैव वर्ण्यते[10] ॥३१॥ [N

---

१. ल—सम्भवः । इत्यपपाठः ।

२. रा ब—वधूं ।

३. ज त ल प भ—वधश्चात्रानुकीर्तितः ।

प्र—रोधस्य परिकीर्तिताः ।

४. ल प भ—परिकीर्तितः ।

५. प—०काण्डमिवोच्यते ।

६. ट—सर्गाश्चात्र । प—सर्गाना[णां] च ।

७. ट प्र—चात्र ।

८. ल प्र प भ—हि ।

९. प्र प भ—तद् ।

१०. ज त ल प्र प भ ट—कीर्त्यते ।

कैकेय्यनुनयश्चैव[1] शोको दशरथस्य च ।
३२] वनप्रयाणं रामस्य लक्ष्मणानुगमस्तदा[2] ॥३२॥ [N
विषादः प्रकृतीनां च तथैव च विसर्जनम् ।
३३] निषादाधिपसंवासः[3] सूतस्य[4] च विसर्जनम्[4] ॥३३॥ [N
गङ्गायाश्चाभिसन्तारो भारद्वाजस्य दर्शनम् ।[5]
३४] वास्तुकर्मनिवेशश्च चित्रकूटे महागिरौ ॥३४॥ [N
उपावृत्ते सुमंत्रे[6] च[7] राज्ञो मोहागमः पुनः[8] ।
३५] स्वशापकथनं चैव स्वर्गप्राप्तिर्नृपस्य च ॥३५॥ [N
भरतागमनं तूर्णं तथा राजगृहादपि ।
३६] रामप्रसादनं चार्थं[9] भरतस्य[10] महात्मनः ॥३६॥ [N
गमनं कीर्त्यते चैव[11] भारद्वाजस्य[12] चाश्रमे ।[13]
३७] दर्शनं चैव रामस्य पितुश्च सलिलाक्रिया ॥३७॥ [N

१. कै रा त—कैकेय्यानुन० । ल—कैकेय्यश्चनय० ।
ज प्र—कैकेय्यमुन० । प—कैकेय्यनुमतश्चैव ।
२. ल प भ—०णानुगतिस्तथा । रा ज त प्र ट —०णानुगमस्तथा ।
३. ज त ल प्र प भ—०पसंवादः ।
४. ल—नास्ति ।
५. ल प्र भ—अतः परमधिकः पाठः—
भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ।
६. कै—सुमित्रे ।
७. रा—तु ।
८. ल प भ—परः । ट—ततः ।
९. ज त ट—रामप्रसादनार्थे च । ल प्र प भ—रामप्रसादनार्थं च ।
१०. ट—भरतागमनं तथा ।
११. ल प्र प भ—वासो ।
१२. रा ब ज प्र प ट—भरद्वाजस्य ।
१३. ट—नास्ति ।

३८] प्रसादनं च रामस्य बहुशः परिकीर्त्यते[1] ।
जाबालेर्यत्र वाक्यानि वामदेवस्य[2] चोभयोः ॥३८॥[3] [N
३९] इक्ष्वाकूणां च वंशस्य कीर्तनं समुदाहृतम् ।[4]
प्रतिज्ञां[5] चैवं रामस्य[6] गमने कोसलान् प्रति ॥३९॥ [N
४०] पादुकाहरणं चैवं[7] भरतस्य[8] विसर्जनम्[9] ।
नन्दिग्रामप्रवेशश्च मातॄणां च विसर्जनम् ॥[8]४०॥[10] [N
४१] अयोध्यासंप्रवेशश्च शत्रुघ्नस्य महात्मनः ।
काण्डं द्वितीयमित्युक्तमयोध्याकाण्डसंज्ञितम् ॥४१॥ [N
४२] अशीतिः संख्यया[11] सर्गाः श्लोकानां चात्र कीर्त्यते[12] ।
त्रीणि श्लोकसहस्राणि नव श्लोकशतानि च ।
४३] श्लोकानां द्वे शते चैव पुनः[13] श्लोकाश्च सप्ततिः ॥४२॥ [N
] काण्डः[14] २ सर्गाः ८० श्लोकाः ४१७०[15] ॥[16] [N

---

१. ज त ल प भ—परिकीर्तितं ट—परिकीर्तितः ।
२. ल भ—रामदेवस्य चो० । इत्यपपाठः । ट—वंशस्य कथनं तथा ।
३. प्र—नास्ति ।
४. ट नास्ति ।
५. ल प भ—अप्रतिज्ञा च । प्र—स्वप्रातिज्ञा च ।
६. ल—धर्मस्य ।
७ भ—चापि ।
८. के—भरतस्यागमः पुनः ।
९. त—नास्ति ।
१०. ल—अतः परमधिकः पाठः—
प्रसादनं च रामस्य बहुशः परिकीर्तितम् ।
११. ल—संज्ञया ।
१२. ट—कीर्तनम् ।
१३. ल प्र प भ—भूयः ।
१४. त - अयोध्याकाण्डः ।
१५. त—४३७० ।
१६. ल प्र प भ ट—नास्ति ।

अतः परं[1] तृतीयं तु आरण्यकमिति स्मृतम् ।
४४] यत्र रामो महाबाहुर्दण्डकं[2] प्राविशद्वनम् ॥४३॥ [N
अनसूयासमस्यां[3] चाप्यङ्गरागस्य[4] चार्पणम् ।
४५] विराधदर्शनं चैव वधश्च समुदाहृतः ॥[5] ४४॥ [N
ऋषीणां दर्शनं चैव मैथिल्याश्चैव[6] सान्त्वनम् ।[5]
४६] शरभङ्गाश्रमप्राप्तिर्महेन्द्रस्य[7] च दर्शनम् ॥४५॥ [N
सुतीक्ष्णाश्रमसंप्राप्तिः[8] संवादः सह सीतया ।
४७] मन्दकर्णेश्च कथितं शक्रस्य च[9] विसर्जनम् ॥४६॥[5] [N
इल्वलस्य[10] च संवादः कीर्तनं च दुरात्मनः ।[5]
४८] अगस्त्याश्रमवासश्च[11] तथा[12] संपरिकीर्तितः[12] ॥४७॥ [N
दर्शनं पञ्चवट्यास्तु[13] जटायोश्चैव दर्शनम् ।[14]

---

१. ल भ—काण्डं । प्र प—काण्ड० ।

२. ट—०र्दण्डकान् ।

३. ल प्र प—अनुसूया० । ट—०यासमस्यां ।

४. ट प्र प—च अङ्गरागस्य ।

५. ट—नास्ति ।

६. भ—वैदेह्याश्चापि । ल प्र—मैथिल्याश्चापि ।

७. ट—शरभङ्गाश्रमे वासं वासवस्य ।

८. ल—सतीक्ष्णस्याश्रमप्राप्तिः । भ—सुतीक्ष्णस्याश्रमप्राप्तिः ।

९. प्र प—यत्र शक्रवि० । रा ल—यत्र शक्रुर्वि० ।

१०. रा—इल्वलस्य ।

११. रा—०श्रमसंवासः ।

१२. ट—अगस्त्याच्च विसर्जनम् ।

१३. ज त ल प्र प भ—पञ्चवट्याश्च ।

१४. ट—समागमं कबंधेन वासं पंचवटे तथा ।

४९] जनस्थाननिवासश्च शिशिरस्य च वर्णनम् ॥[1] ४८॥ [N
स्मरणं भरतस्यार्थं[2] कैकेय्याश्चैव गर्हणम् ।[1]
५०] संवादः[3] शूर्पणखयां विरूपकरणं तथा ॥४९॥ [N
खरस्य च वधो घोरो दूषणत्रिशिरोवधः ।[5]
५१] लङ्काप्रवेशो राक्षस्याः शूर्पनख्याः प्रकीर्तितः ॥[1] ५०॥ [N
सीताया लोभनं चैव रावणस्यानुशब्दितम्[6] ।
५२] मारीचाश्रमसंप्राप्ती रावणस्य दुरात्मनः ॥५१॥[1] [N
मारीचश्च मृगो भूत्वा वैदेहीं समलोभयत् ।
५३] लोभयित्वा च वैदेहीं राघवस्यापकर्षणम्[7] ॥५२॥[1] [N
मारीचस्य वधश्चैव लक्ष्मणस्य[8] विगर्हणम्[8] ।[8]
५४] सीतायां[10] हरणं[10] चैव सौमित्रेश्चात्र[11] सङ्गमः[11] ॥५३॥[12] [N

१. ट—नास्ति ।

२. प—भरतस्यापि ।

३. ट—हासः ।

४. ल प भ—शूर्पनख्याश्च । ट—शूर्पनखायाश्च । कै रा ज ब त—०नखया ।

५. ज त—खरदूषणयोश्चैव वधस्त्रिशिरसस्तथा ।
ट—वधं खरत्रिशिरसोः कथनं रावणस्य च ।

६. प्र—रावणस्य च श० ।

७. ज त—राघवस्याभिक० ।

८. भ—लक्ष्मणस्यापकर्षणम् ।
०स्यापगर्हणमिति दक्षिणपार्श्वे पुनर्विन्यस्तः पाठः ।

९. ज—नास्ति ।

१०. प—सीताप्रहरणं ।

११. ज त ल—संकरश्च महात्मनः ।
ब रा—सत्कारश्च महात्मनः । प—लक्ष्मणस्य च संगतः ।

१२. ट—मारीचप्रावनाशं च वैदेहीहरणं तथा ।
प्र प भ—अतः परमधिकः पाठः—
जटायुषो वधश्चासीत् सीतायाश्च प्रदेशनम् ।
लक्ष्मणस्य च संवादो राघवेण महात्मना ॥
कै—उत्तरपार्श्वे पुनर्विन्यासः ।

हृतां च जानकीं मत्वा विलापो राघवस्य च।[1]
५६] जटायोर्दर्शनं चैव सत्कारश्च महात्मनः ॥[2]५४॥[3] [N
गृध्रराजस्य[4] रामेण कृता चैव जलक्रिया[5] ।
५७] कबन्धस्य वधः प्रोक्तः स्वर्गप्राप्तिस्तु[6] पुष्कला ॥[7]५५॥ [N
कबन्धस्य च वाक्येन सुग्रीवान्वेषणं परम्[8] ।
५८] शबरीदर्शनं[9] चैव पम्पायां[10] परिदेवनम्[11] ॥५६॥[12] [N
इति काण्डं[13] तृतीयं[13] तु[14] आरण्यकमिति स्मृतम् ।
५९] सर्गाणां तु[15] शतं चैव सर्गाश्चैव चतुर्दश ॥५७॥ [N
चत्वारीह सहस्राणि श्लोकानां कथितानि[16] वै ।

---

१. ट—जटायोर्निधनं चैव विलापो राघवस्य च ।

२. ट—नास्ति ।

३. ज त भ—नास्ति ।

४. ज त—खगराजस्य । प्र—गजराजस्य ।

५. कै—अञ्जलिक्रियेति शोधितः पाठः ।

६. ज त प्र प भ—०प्राप्तिश्च ।

७. ट—कबंधदर्शनं [चैव] कबंधस्य वधं तथा ।

८. ज त—ततः ।

९. ट—शबर्या द० ।

१०. ज त ट—पंपायाः ।

११. रा प—परिवेदनम् ।
ज त—चैव दर्शनम् । ट—दर्शनं तथा ।

१२. ट—अतः परमधिकः पाठः—
विलापं चैव पंपायां राघवस्य महात्मनः ।

१३. रा प्र प—काण्डतृतीयं ।

१४. प—तद् ।

१५. ज त प्र ट—च ।

१६. ज त प्र प भ ट—कीर्तितानि च ।

६०] शतं चैवात्र विज्ञेयं श्लोकाः पञ्चाशदेव[1] तु ॥५८॥ [N
N] काण्डः ३ सर्गाः ११४ श्लोकाः ४१५०[2] ॥[3] [N
अतः[4] काण्डं चतुर्थं तु कैष्किन्धिकमिति[5] स्मृतम् ।
६१] ऋष्यमूकगिरिप्राप्ती[6] राघवस्य[7] महात्मनः[8] ॥५९॥ [N
हनुमद्दर्शनं चैव संवादश्चात्र[9] कीर्त्यते ।
६२] आरोहणं च शैलस्य ऋष्यमूकस्य कीर्तितम् ॥६०॥[10] [N
रामसुग्रीवसख्यं[11] च वालिपौरुषकीर्तनम् ।
६३] सप्ततालविभेदश्च प्रत्ययोत्पादनं तथा[12] ॥६१॥[13] [N
वालिसुग्रीवयुद्धं च[14] वालिनो वध एव च ।[13]
६४] अन्तःपुरविलापश्च ताराकारुण्यमेव[15] च॥६२॥[16] [N

---

१. त—पञ्चदशेव ।
२. त–४३५० ।
३. ल प्र प भ—नास्ति ।
४. ज त ट—अतः परं प्रवक्ष्यामि ।
प्र—चतुर्थं तु ततः काण्डम् ।
५. कै ब ल—कैष्किन्दिक० । प–किष्किन्धमिति संज्ञितम् ।
ट प—किष्किन्धाकाण्डसंज्ञितम् । प्र–किष्किन्ध्यां परिकीर्त्यते ।
६. ट—ऋष्यमूकाभिगमनं ।
७. ज—रामस्य च । ट—सुग्रीवेण ।
८. ट—समागमः ।
९. प्र प भ—०दश्चैव ।
१०. ट—नास्ति ।
११. कै—०सन्ध्यं ।
१२. कै—हरेः ।
१३. ट—प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ।
वालिप्रमथनं राज्ये सुग्रीवप्रतिपादनम् ॥
१४. प्र—तु ।
१५. कै—०ण्य एव ।
१६. ट—ताराविलापशमनं वर्षरात्रिनिवासनम् ।

सुग्रीवस्याभिषेकश्च [1]करणं चाश्रमस्य च ।
६५] विलापो राघवस्यात्र लक्ष्मणेन च सान्त्वनम् ।।६३।।[2] [N
प्रावृड्विलापश्चैवात्र शरद्वर्णनमेव च ।
६६] विलापश्चैव शरदि समयस्य च लंघनम् ।।६४।।[3] [N
सुग्रीवं प्रति रामस्य कोपो यत्र च कीर्तितः[4] ।
६७] रामस्य कोपं विज्ञाय लक्ष्मणस्य[5] च संभ्रमः ।।६५।।[6] [N
[7]प्रशमो लक्ष्मणस्याथ दौत्येन गमनं तथा[8] ।
६८] सुग्रीवस्य यथा चात्र गमनं राघवाश्रमे[9] ।।६६।।[10] [N
[11]प्रसादनं च रामस्य वानराणां च संग्रहः[12] ।
६९] पृथिव्या [13]वर्णनं [14]सर्वं सुग्रीवेण महात्मना ।।[15] ६७।। [N
प्रस्थापनं वानराणामङ्गुलीयस्य चार्पणम् ।
७०] हनुमत्प्रभृतीनां च विन्ध्यपर्वतलंघनम् ।।६८।।[15] [N

---

१. प्र—वालिपुत्रसमर्पणम् ।
२. ट—नास्ति ।
३. ट—नास्ति ।
४. ज त प भ—प्रकीर्तितः ।
५. प—लक्ष्मणेन ।
६. ट—कोपं राघवसिंहस्य बालामामुपसंग्रहं ? ।
७. प्र—प्रेषणं ।
८. त प्र प—तथा ।
९. प भ—०श्रमम् ।
१०. ट—नास्ति ।
११. त—प्रसादेन ।
१२. ज त—सङ्गमः ।
१३. ज त—वरणं ।
१४. ज त प्र प भ—चैव ।
१५. ट—दिक्षु प्रस्थापनं चैव पृथिव्याश्च निवेदनम् ।

स्वयंप्रभागुहायाश्च[1] प्रवेश इह कीर्तितः[2] ।[15]
७१] अप्रवृत्तौ च वैदेह्या विषादगमनं महत् ॥६९॥ [N
प्रायोपवेशनं चात्र वानराणां महात्मनाम् ।
७२] दर्शनं चात्र[3] सम्पातेर्गृध्रराजस्य धीमतः ॥७०॥[4] [N
N] निवेदनं[5] च लङ्काया गृध्रराजेन धीमता[6] ।
चतुर्थमेतत् काण्डं तु[7] कैष्किन्धिकमिति[8] स्मृतम्[9] ॥७१॥ [N
७३] सर्गाश्चैवात्र विज्ञेयाश्चतुःषष्टिस्तु संख्यया[10] ।
श्लोकानां द्वे सहस्रेण[11] अष्टौ श्लोकशतानि च ।
७४] श्लोकानां च शतं ज्ञेयं पञ्चविंशतिरेव च[12] ॥७२॥ [N
N] कांडः ४ सर्गाः ६४ श्लोकाः २९२५ ॥[13] [N
अतः परं प्रवक्ष्यामि काण्डं सुन्दरसंज्ञितम् ।

---

१५. ट—अङ्गुलीयप्रदानं च तथैव विलदर्शनम् ।
१. प्र—०गुहायाञ्च ।
२. ज त प्र— परिकीर्तितः । प—इह कीर्त्यते ।
३. भ—चैव ।
४. ट—प्रायोपवेशनं चैव सम्पातेश्चैव दर्शनम् ।
५. त—निदर्शनं ।
६. ज त ट—कीर्तितम् ।
७. प—वै ।
८. ब—कैष्किन्दिक० । ज त प्र भ—कैष्किन्ध्य० ।
ल—किष्किंदा० । प ट—किष्किधा० ।
९. ज त ल प्र प भ ट—संज्ञितम् ।
१० ज त ल—संज्ञया ।
११. ज ब त ल प भ ट—सहस्रे च ।
१२. रा—वा ।
१३. प्र प भ नास्ति ।

७५] हनुमत्प्लवनं[1] यत्र[2] सुरसायाश्च[3] दर्शनम् ॥७३॥ [N
मैनाकस्य[4] गिरेश्चैव दर्शनं परिकीर्तितम् ।
७६] निधनं सिंहिकायाश्च लङ्कादर्शनमेव च ॥७४॥ [N
प्रवेशश्चैव[5] लङ्कायां[6] वर्णनं विचयस्तथा[7] ।
७७] मार्गणं चैव वैदेह्या रावणान्तःपुरे शुभे ॥७५[8]॥ [N
N] दर्शनं पुष्पकस्येह आपानस्य च दर्शनम्[9] ।[10]
दर्शनं[11] राक्षसेन्द्रस्य रावणस्य दुरात्मनः ॥७६॥ [N
७८] विचयः[12] पुष्पकस्येह जानक्याश्चैव मार्गणम् ।
अदर्शने[13] च[13] वैदेह्याः शोकोपगमनं तथा ॥७७॥ [N
७९] प्रविश्याशोकवनिकां वैदेह्याश्चैव दर्शनम् ।
प्रवेशो रावणस्येह[14] रक्षसः प्रमदावनम्[15] ॥७८॥ [N
८०] प्रलोभनं च सीताया रावणस्य च भर्त्सनम् ।

---

१. ल—हनुमल्लंघनं । कै—०प्लवणं । रा—०मल्लवणं ।
२. ज त प्र ट—चैव ।
३. ल—स्वरसायाश्च । ज त ट—सिंहिकायाश्च ।
४. प्र—मेनाकस्य ।
५. ब—प्रवेश एव ।
६. प्र—लङ्कायां ।
७. कै—विजय० । प्र—मिचय० ।
८. ट—नास्ति ।
९. ब रा ल—रक्षसां प्रमदावनम् ।
१०. ट—नास्ति ।
११. ज त—प्रवेशः । ट—प्रवेशे ।
ब रा ल—नास्ति । कै—दक्षिणपार्श्वे अपरहस्तेन पुनर्विन्यासः ।
१२. प्र—निचयः । भ—विजयः ।
१३. प्र—अदर्शनं च । ज त ट—अदर्शनेन ।
१४. कै—राक्षसेन्द्रस्य ।
१५. प्र—०दावने ।

पू८१] तर्जनं राक्षसीनां च हनुमद्दर्शनं तथा ॥७९॥[3] [N

चूडामणिप्रदानं च प्रतिसन्देश एव च ।

८२] वनप्रभङ्गः क्रूराणां राक्षसीनां च गर्जनम् ॥[6]८०॥ [N

पू८३] किंकराणां वधश्चैव मन्त्रिपुत्रवधस्तथा ।[8]

कीर्तितं दुर्गयुद्धं च हनुमन्मेघनादयोः ॥८१॥[3] [N

८४] ब्रह्मास्त्रेण च बन्धो वै[10] मारुतेः परमाद्भुतः ।

निवेदनं च दूतस्य भर्त्सनं च हनूमतः ॥८२॥[11] [N

८५] लाङ्गूलोद्दीपनं चैव लङ्कादाहस्तथैव च ।[10]

सीताया हर्षणं भूयः प्रत्यागमनमेव च ॥८३॥ [N

८६] जाम्बवत्प्रमुखैश्चैव हरिभिः सह संगमः ।

तथा मधुवनप्राप्तिर्मधूनां च विलोपनम् ॥८४॥ [N

---

१. भ—तर्जितं । प्र—गर्जितं ।

२. ब—राक्षसानां ।

३. ट—नास्ति ।

ज त प्र प भ—अतः परमधिकः पाठः—

अभिज्ञानप्रदानं च सीतासम्भाषणं तथा ।

४. ज रा त प्र प भ—राक्षसानां ।

५. ज त प्र भर्त्सनम् । प भ—तर्जनम् ।

६. ट—मणिप्रदानं सीताया वनभङ्गं तथैव च ।

७. रा—किंकरीयां ।

८. ट—राक्षसीविद्रवं चैव किङ्कराणां वधं तथा ।

९. ज त प्र प—द्वन्द्वयुद्धं ।

१०. रा—संबन्धो । प–०स्य ।

११. ट—ग्रहणं वानरेन्द्रस्य लङ्कादाहाभिमर्दनम् ।

१२. त प भ—०प्रदीपनं ।

१३. ज त प्र प भ—दर्शनं ।

१४. प—सङ्गमस्तथा ।

१५. ज त—विलुंठनम् । ब–विक्षोभनम् । प–विक्षेपनम् । भ–विनाशनम्

८७] दर्शनं देवमार्गस्य भङ्गो मधुवनस्य च।
अंगदप्रमुखानां च हरीणां रामदर्शनम् ॥८५॥ [N

८८] हनूमतः परिष्वंगो राघवेण महात्मना ।
प्रवृत्तिश्चैव सीताया मणिदानं तथैव च ॥८६॥ [N

८९] लंकाया दर्शनं चैव दर्शनं रावणस्य च ।
सीताया दर्शनं चैव प्रतिसंन्देश एव च ॥८७॥ [N

९०] दुर्गकर्मविधानं च राक्षसानां विचेष्टितम् ।
अशोकवनिकाभङ्गं दुर्गस्य च विनाशनम् ॥८८॥ [N

९१] यत्रैतत्तं कथयामास हनूमान् राघवाय वै ।
यत्र सुग्रीवसहितो राघवः सहलक्ष्मणः ॥८९॥ [N

९२] महता हरिसैन्येन प्रययौ दक्षिणामुखः।
सर्वे च सहिता यत्र निविष्टाः सागरं प्रति ॥९०॥ [N

---

१. रा ब ल--संगो ।

२. ब—राक्षसानां विचेष्टितम् ।

अयं हि पाठः ८८ श्लोकस्य द्वितीयः पादः ।

हनूमत इत्यादिर्दुर्गकर्मेत्यन्तो मध्यस्थः पाठो नास्ति ।

प—कपीनां राम० ।

३. ट—प्रतिप्रयाणमेवाऽपि मधूनां भक्षणं तथा ।

४. कै—हनुमतः ।

५. ट—राघवाश्वासनं चापि मणिनिर्यातनं तथा ।

६. प—राघवस्य ।

७. रा ल ट—नास्ति । कै—पश्चिमेपार्श्वेऽपरहस्तेन पुनार्विन्यासः ।

८. ल—०र्गकन्दा० ।

९. त प—०काभङ्गो ।

१०. ट—नास्ति ।

११. ज त—यदेतद् ।

१२. ज त ट—०तास्तत्र ।

९३] इत्येतत् सुन्दरं काण्डं पञ्चमं परिकीर्तितम् ।
सर्गाणामत्र संख्या च काण्डे सुन्दरसंज्ञिते[3] ॥९१॥ [N
९४] चत्वारिंशत् त्रयश्चैव सर्गाश्च समुदाहृताः ।
पू९५] श्लोकानां द्वे सहस्रे च चत्वारिंशच्च पंच च ॥९२॥ [N
N] कांडः ५ सर्गाः ४३ श्लोकाः २०४५ ॥ [N
उ९५] अतः परं तु षष्ठं च युद्धकाण्डमिति स्मृतम् ।
यत्र रामो महाबाहुः सागरं समुपस्थितः ॥९३॥ [N
९६] यत्र लङ्कां जिगमिषु मंत्रयामास राघवः ।
प्राप्तं च राघवं श्रुत्वा मन्त्रयामास रावणः ॥[15] ९४॥ [N
९७] शमार्थी यत्र रामेण ज्येष्ठमाह विभीषणः ।
मुच्यतां मैथिली[17] राजन् स्वस्त्यस्तु नगरस्य नः[18] ।

---

१. ज त प्र प ट—पंचमं ।

२. ज त प्र प ट—सुन्दरं ।

३. ल—संज्ञिके ।

४. ज त प्र प ट—सर्गाः सम्यगु० ।

५ ल—सहस्रं ।

६. रा—पंचक ।

७. त—सुन्दरकांडं । ल प्र प भ—नास्ति ।

८. ल प्र प भ—नास्ति ।

९. प्र प भ—नास्ति ।

१०. प्र भ ट—च ।

११. त—षष्ठे ।

१२. प्र भ—तु ; प—वै ।

१३. रा—समरं ।

१४. ल प्र—लङ्काजिग० ।

१५. ट—नास्ति ।

१६. प्र—समर्थी । भ—शमार्थ[र्थे ?] ।

१७. ज त—जानकी ।

१८. प्र—च ।

९८] एतद्धि परमं श्रेयो विपरीतो[1]ऽनयो भवेत् ॥९५॥[2] [N
एवमुक्तो दशग्रीवः क्रोधसंरक्तलोचनैः[3] ।
९९] जघान यत्र पादेन भ्रातरं वै विभीषणम् ॥९६॥[2] [N
रावणं च परि[4]त्यज्य चतुर्भिः सचिवैः सह ।
१००] आगच्छद्राघवाभ्यांशं[5] गदापाणिर्विभीषणः ॥९७॥[6] [N
अभिषिक्तश्च रामेण लंकाराज्ये विभीषणः ।[7]
१०१] सागरात्तोयमादाय प्रयतेन[8] महात्मना ॥[9] ९८॥ [N
यत्र रामस्य संरम्भः समुद्रस्य च दर्शनम् ।
१०२] नलसेतुक्रिया चैव सागरानुमते तथा ॥९९॥[10] [N
तरणं चैव घोरस्य सागरस्य महात्मनः[11] ।
१०३] सुवेलो[12]सादनं चैव चारभणिधिरेव च ॥१००॥[13] [N

---

१. ज त ल प्र प—विपरीतेऽन० ।
२. ट—नास्ति ।
३. रा—क्रोधः संरक्त० ।
४. प्र—परिसंत्यज्य । ज त–संपरि० । ल–तु परि० ।
५. प्र प भ—०वाभ्यासं ।
ज ब–पुनः शोधनरूपेण शकारस्थाने सकारः कृतः । रा–०वाभिशं ।
६. ट—विभीषणेन संसर्गःवधोपाय निवेदनम् ।
अत्रान्यैः सह कथाव्यत्यय इति मूलेन विवेचनीयम् ।
७. ज ब रा त ल —नास्ति । क्वे.–उत्तरपार्श्वेऽपरहस्तेन पुनर्विन्यासः ।
८. ज त प्र—प्रयत्नेन । प–०यमादायाप्रतेन ।
९. प्र—अतः परमधिकः पाठः—
यत्र···सङ्गतोसौ महात्मना । ट—नास्ति ।
१०. ट—संग्रामं च समुद्रस्य नले सेतोश्च बंधनम् ।
११. ज त—महाद्भुतम् ।
१२. ल—०क्कासादरं ।
१३. ट—नास्ति ।

शुकसारणवाक्यं च वानरानीकदर्शनम् ।
१०४] मन्त्रणं राक्षसेन्द्रस्य मायारामशिरः क्रिया ॥१०१॥ [N
वाक्यानि सरमायाश्च सीताऽऽश्वासनमेव च ।
१०५] यत्र माल्यवतो वाक्यं लङ्कायां गुप्तिरेव च ॥१०२॥ [N
मन्त्रणं राघवबले चराणां च प्रवेशनम् ।
१०६] सुवेलारोहणं चैव तथा लंकाऽवरोधनम् ॥१०३॥ [N
समारंभश्च युद्धस्य द्वन्द्वयुद्धप्रवर्तनम् ।
१०७] सप्तघ्नयज्ञकोपाधिविधो यत्राशु शब्दितः ॥१०४॥ [N
रात्रियुद्धविधानं च शरबन्धस्तथैव च ।
१०८] सुपर्णदर्शनं चैव अस्त्रबन्धस्य मोक्षणम् ॥१०५॥ [N

१. प्र—शुक्रसारण० ।
२. रा—०रानेकद० ।
३. ट—नास्ति ।
४. प—सीतानंदनमेव० ।
६. प्र—तत्र ।
५. प्र—वाक्यवतो । प—माल्यावता ।
७. ज ब त ल प भ—चाराणां ।
८. ब—प्रहर्षणम् ।
९. ट—प्रभावं च समुद्रस्य रौद्रं लङ्कोपमर्दनम् ।
१०. प—यत्रारंभ० । त ज—आरम्भश्चैव ।
११. प्र—युद्धञ्च ।
१२. प—०द्धप्रवर्तने ।
१३. रा ब ल ट—नास्ति । कै—पुनरपरहस्तेनोत्तरपार्श्वे विन्यासः ।
१४. रा ब ल प्र भ—०यज्ञकोपादिवधो ।
प—सुप्तघ्नयज्ञकोपादिवधो ।
१५. ज त—नास्ति ।
१६. ज त—सर्पबंधस्त० ।
१७. प्र—शरबन्धविमोक्षणम् ।

धूम्राक्षस्य वधश्चैव तथैवाकम्पनस्य[1] च ।
१०९] प्रहस्तस्य वधश्चैव प्रभङ्गो[2] रावणस्य च ॥१०६॥[3] [N
दुर्गकर्मविधानं च कुंभकर्णप्रबोधनम् ।
११०] दर्शनं कुंभकर्णस्य संप्रश्नो रावणस्य[4] च ॥ १०७॥[3] [N
निर्याणं कुंभकर्णस्य वानराणां च संभ्रमः ।
१११] सुग्रीवग्रहणं चैव प्रमोक्षश्चात्र कीर्त्यते ॥१०८॥ [N
वधश्च कुंभकर्णस्य राघवात् समुदाहृतः ।[5]
११२] नरकान्त[6]वधश्चात्र देवान्तक[7]वधस्तथा ॥१०९॥[8] [N
महापार्श्व[9]वधश्चात्र अतिकाय[10]वधस्तथा ।
११३] मेघनादास्त्रमोह[11]श्च ससैन्ये राघवे तथा ॥११०॥ [N
ओषध्यानयना[12]च्चापि प्रबोध[13]श्च हनूमतो[14] ।

---

१. प्र—०वानस्यकस्य ।
२. प्र—नास्ति ।
३. ट—नास्ति ।
४. ज त ल प्र प—राघवस्य ।
५. ट—अत आरभ्य ११२ श्लोकान्तस्य पाठस्य स्थानेऽयं पाठो विज्ञेयः—
कुम्भकर्णस्य च वधं मेघनादवधं तथा ।
अतः परञ्चेत्यपि पाठः—रावणस्य विनाशं च सीतावाप्तिं तथैव च ।
अत्रायं पाठो विचारणीयः ॥
६. ज त—नरान्तकवधश्चैव ।
प्र प भ—नरांतकवधश्चात्र । रा—नरकांतवधश्चैव ।
७. ब—देवकान्तक० ।
८. ज त प्र प भ—अतः परमधिकः पाठः—
महोदरवधश्चैव वधस्त्रिशिरसस्तथा ।
९. प—महायश्रवधश्चात्र । त भ—०श्वैवधश्चैव ।
१०. त—अग्निकायव० । भ—अतिपार्श्वव० ।
११. ल—मेघनाशास्त्रमोहश्च । रा—मेघनादास्तमोहाश्च ।
ज त—मेघनादास्त्रमोक्षश्च ।
१२. कै ल—ओषध्यानयनाश्चापि । रा ज ब त—०ध्यानयनश्चापि ।
प्र—०नयनश्चापि । प—ओषध्यानयनं चापि ।
१३. ज त—संप्रबोधो ।
१४. ळ—हनूमतः ।

११४] उल्कामिहारयुद्धं[1] च वधः कुंभनिकुंभयोः ॥१११॥ [N

मकराक्षवधश्चात्र[2] निर्गमो[3] रावणेः[4] पुनः ।

११५] मायासीतावधश्चात्र मेघनादवधस्तथा ॥११२॥ [N

क्रोधश्च राक्षसेन्द्रस्य तथाऽनिष्टानकं[5] महत् ।

११६] रावणस्य च निर्याणं विरूपाक्षवधस्तथा ॥११३॥[6] [N

पृ११७] मत्तस्यापि वधश्चात्र[7] उन्मत्तवधं[8] एव च ।

राघवस्य[9] च वाक्यानि भर्त्सनं रावणस्य च ॥११४॥ [N

११८] रामरावणयोश्चैव अस्त्रयुद्धं[10] महात्मनोः[11] ।

लक्ष्मणस्य वधश्चैव विलापो राघवस्य[12] च ॥११५॥ [N

११९] ओषध्यानयनं[13] चैव लक्ष्मणोत्थानमेव[14] च ।[15]

---

१. ज त—उल्कानीहारयु० । प्र—उल्कामिहारयु० ।
प—उल्कानीतार यु० । भ—उल्काभीहारयु० ।

२. ज रा त—०धश्चैव ।

३. ब—निर्गमं ।

४. ज त प—रावणस्य च ।

५. प्र—०रिष्टानकं । भ—निस्सारणकं ।

६. रा ब—नास्ति । कै-पूर्वपार्श्वेऽपरहस्तेन विन्यासः ।
ट—अतः परं ११८ श्लोकान्तः पाठो नास्ति ।

७. ज—वधश्चैव ।

८. त—तन्मत्र० ।

९. त—रावणस्य ।

१०. ज त प्र भ—शस्त्रयुद्धं ।

११. रा ब—महात्मनः ।

१२. ज त—रावणस्य ।

१३. रा भ—औषध्यान० । प—ऊषध्यान० ।

१४. प्र—सक्ष्मणोत्था० ।

१५. ज त—अतः परमधिकः पाठः—
मंदोदर्यास्तथा केशाकर्षणं चांगदेन च ।

प्र[1]दानं दे[2]वराजेन रथस्य च महात्मना[3] ॥११६॥ [N
१२०] मा[4]तलेर्दर्शनं चैव शक्रवाक्यनिवेदनम् ।
संग्रामे राक्षसेन्द्र[5]स्य प्रभङ्गो रावणस्य च ॥११७॥ [N
१२१] सारथेर्भर्त्सनं चैव रा[6]वणेन दुरात्मना ।
देवानां विग्र[7]हश्चैव ग[8]गने दानवैः सह ॥११८॥ [N
१२२] द्वैरथं[9] च महाघोरं स[10]प्ताहं क्षितिकंपनम् ।
वधश्च राक्षसेन्द्रस्य त्रिषु लोकेषु विश्रुतः ॥११९॥ [N
१२३] इति ष[11]ष्ठमिदं काण्डं युद्धकाण्डमिति स्मृतम्[12] ।
स[13]र्गाणां तु[14] श[15]तं ज्ञेयं पञ्चसर्गास्तथैव च ॥१२०॥ [N
१२४] काण्डे ह्यस्मिंस्तथा संख्या श्लोकानां चा[16]त्र शब्द्य[17]ते ।[18]

---

१. त—प्रधानं ।
२. कै—दैवराजेन । प्र प—देवराज्येन ।
३. ब ल—महात्मनः । रा—महात्मनाः ।
४. प—मातुले द० ।
५. त—राक्षस्येंद्र० ।
६. रा—राबणेन ।
७. प्र—विग्रहश्चैव ।
८. रा—गमने । ज—गह्वने । प्र—गगणे ।
९. त—द्वैरथे । प्र—द्वैरथश्च ।
१०. प्र—सप्ताहभूमिकम्पनं । ज त ट—०हं भूमिकं० ।
११. कै रा ज ब त ल—षष्टमिदं । प्र—षष्टिमिदं ।
१२. भ—श्रुतं ।
१३. प—सर्गानां ।
१४. ज त प्र ट—च ।
१५. प—सतं ।
१६. ज त—चैव । प्र प भ—चापि ।
१७. ल—शस्यते ।
१८. ट—नास्ति ।

पू१२५] चत्वार्यत्र सहस्राणि पञ्च श्लोकशतानि च ॥१२१॥[2] [N

N] काण्डं ६ सर्गाः १०८ श्लोकाः ४५०० ॥[4] [N

उ१२५] अतस्त्वभ्युदयं नाम सोत्तरं संप्रचक्षते ।[5]

यत्र रावणनारीणां[6] विलापः समुदाहृतः ॥१२२॥ [N

१२६] विभीषणाभिषेकश्च[7] सत्कारो[8] रावणस्य च ।[9]

हनुमत्संप्रवेशश्च[10] मैथिल्याश्चैव दर्शनम् ॥१२३॥ [N

१२७] सीताया निर्गमश्चैव रामेण च समागमः ।

भर्त्सनं चैव सीताया राघवेण[11] महात्मना ॥१२४॥ [N

१२८][12] परित्यागं च[12] वैदेह्यास्तथा[13] चाग्निप्रवेशनम्[13] ।

अग्निप्रवेशे च तदा[14] अदाहं[15] परमाद्भुतम्[15] ॥१२५॥ [N

---

१. ज त प भ ट—चत्वार्येव । प्र—चत्वार्येव ।

२. ट—अतः परमधिकः पाठः—

पुनस्तूर्यसहस्राणि युद्धकाण्डे निदर्शिताः ।

३. त—युद्धकांडं ।

४. ल प्र प भ—नास्ति ।

५. ब त ल प्र प ट—संप्रचक्ष्यते ।

६. ज त प्र प भ ट—०णदाराणां ।

७. ट—०भिषेकश्च ।

८. कै व ल—संकरो राव० ।

ज त—न्यक्कारो रावण० । ट-पुष्पकारोहणं तथा ।

९. ट—अत आरभ्य १३१श्लोकस्य पूर्वार्द्धान्तः पाठो नास्ति ।

१०. प्र प भ—हनूमत्सं० ।

११. रा ल ज—राघवेन ।

१२. ज त प्र भ—०त्यागश्च ।

१३. प—सीतायास्त० । ज त प्र—तथैवाग्निप्र० ।

१४. ज त प—तथा ।

१५. ज त प—अदाहः परमाद्भुतः । प्र—अदाहः परमाद्भुतः ।

१२९] ब्रह्मादीनां[1] च सर्वेषां देवानामिह दर्शनम् ।
वृषध्वजस्य देवस्य दर्शनं चात्र कीर्त्यते ॥ १२६ ॥ [N

१३०] पितामहाद्[2] वरश्चापि पितुर्दर्शनमेव[3][4] च ।
कैकेय्याः शापनाशश्च तुष्टिर्दशरथस्य च ॥१२७॥ [N

१३१] शक्राद्वरस्य[5] संप्राप्तिर्हरीणां प्रतिजीवनम्[6] ।
रत्नानां[7] संविभागश्च राक्षसेन्द्रेण धीमता ॥१२८॥ [N

१३२] पुष्पकारोहणं चैव राघवस्य महात्मनः ।
वानराणां च सर्वेषां राक्षसानां तथैव च ॥१२९॥[8] [N

१३३] प्रतियानं च कथितं विस्तरेण महात्मना ।[8]
भारद्वाजाश्रमप्राप्तिर्ऋषेर्दर्शनमेव[9] च ॥१३०॥ [N

१३४] नन्दिग्रामप्रवेशश्च गुरूणां चैव दर्शनम् ।
अयोध्यायां[10] प्रवेशश्च व्रतस्य[11] च समापनम् ॥[12] १३१॥ [N

१३५] अभिषेकश्च रामस्य प्रसादो[13] नगरस्य च ।[14]

---

१. ज त—विष्ण्वादीनां ।

२. ल—पितामहवरश्चात्र ।
प भ—पितामहाद् वरश्चात्र । प्र–पितामहाद् वरः प्राप्तिः ।

३. त- पितृदर्शनमेव ।

४. भ—पितुर्दश० ।

५. प—शक्राद् वरस्य देवस्य ।

६. ज त—जीवनं तथा ।

७. प—रत्नानां ।

८. ज—नास्ति ।

९. ज त प्र भ—भरद्वाजाश्रम० ।

१०. ज त प्र प—अयोध्यासंप्रवे० ।

११. ल—भ्रतस्य ।

१२. ट—अयोध्यायां च गमनं भरतेन समागमं ।

१३. ज त प्र प भ—प्रमोदो ।

१४. ट—रामाभिषेकाभ्युदयो हरिरक्षोविसर्जनं ।

यौ[1]वराज्यप्रदानं च भरतस्य महात्मनः[2] ॥१.३२॥[3] [N
१.३६]मुनीनां[4]मिह संप्राप्तिरुत्पत्तिश्चैव रक्षसाम्[5] ।
त्रैलोक्यविजयाख्यानमहल्याकीर्तनं तथा ॥१.३३॥[3] [N
१.३७]सीतावि[6]वासनं चैव लक्ष्मणेन महात्मना ।[7]
वाल्मीक्याश्रमसं[8]प्राप्ति मैथि[17]ल्यां[9]श्चात्र कीर्त्यते[10] ॥[3]१.३४॥[N
१.३८]कुशीलवसमुत्पत्तिरिक्ष्वाकुकुलवृद्धये ।
लवणस्य[11] वधश्चात्र शत्रुघ्नेन[12] प्रकीर्तितः[12] ॥१.३५॥ [N
१.३९]शम्बूकस्य[13] वधश्चात्र[14] कुम्भयोनिसमागमः ।[15]
अलङ्कारस्य[16] संप्राप्तिः[17] श्वेतोपाख्यानमेव च [3]॥१.३६॥ [N
१.४०]अश्वमेधसमारम्भो गीतश्रवणमेव च ।

---

१. ब—यौवराज्ये प्र० । प—यौवराज्यं प्रदानं ।

२. प्र—महात्मना ।

३. ट—नास्ति ।

४. ज—मुनीनां चैव ।

५. ज त—रत्तसः । प राक्षसाम् । ल --राक्षसम् ।

६. प्र—०निर्वासनं ।

७. ट—सीतायाश्च परित्यागं रञ्जनं प्रकृतेस्तथा ।

८. ज प्र प भ—वाल्मीकाश्र० ।

९. रा ब ल भ—०ल्याश्चानु ।

१०. ल—कीर्तते ।

११. रा ल—लवनस्य ।

१२. रा ब ल—नास्ति ।

१३. त—शम्भूकस्य । ज—शम्बुकस्य । प्र—शम्बुकश्च । रा ब ल—नास्ति ।

१४. रा ब ल—नास्ति ।

१५. ट—अगस्त्यप्रमुखानां च महर्षीणां समागमः ।

१६. त—अहंकारस्य ।

१७. कै—१३४ श्लोकस्य-मैथि०--इत्यारभ्य १३६ श्लोकस्य-संप्राप्तिरित्यन्तस्य पश्चिमपार्श्वे पुनरपरहस्तेन विन्यासः ।

काव्यस्य गाने विज्ञेयौ स्वपुत्रौ तौ कुशीलवौ॥१३७॥ [N
१४१] वाल्मीकेश्चैव वाक्यानि विलापो राघवस्य च ।
रसातलप्रवेशश्च वैदेह्याः परमाद्भुतः ॥१३८॥ [N
१४२] राघवस्य च संरंभो दर्शनं परमेष्ठिनः ।
कालदुर्वाससोः प्राप्तिः सन्त्यागो लक्ष्मणस्य च ॥१३९॥ [N
१४३] सुहृदां चैव घोराणां वानराणां महात्मनाम् ।
महाप्रस्थानगमनं स्वर्गप्राप्तिस्तु पुष्कला ॥१४०॥ [N
१४४] इत्याभ्युदयिकं काण्डं संभविष्यं सहोत्तरम् ।
नवतिः संख्यया सर्गाः श्लोकानां चात्र कीर्त्यते ॥१४१॥ [N

---

१. ज प्र प भ—चान्ते । त–कान्ते । ल–रागे ।

२. ज त प्र प भ—विज्ञाय ।

३. ज त—तौ सुपुत्रौ । रा—सुपुत्रौ तौ ।
ब—सुपुत्रौ तु । ल—सुमुद्रौ तौ ।

४. ज त—वाक्यान्ते ।

५. कै रा ज ब त ल प्र प—परमेष्टिनः ।

६. कै रा त प्र—सत्यागो ।

७. ज त ल प्र प भ—पौराणां ।

८. ज त प्र प—राघवाणां ।

९. ज त प्र प भ—प्राप्तिश्च ।

१०. ट—११६ त आरभ्य नास्ति ।
अधिकश्चायं पाठः—
अनागतं च यत् किञ्चित् रामस्य वसुधातले । प्रासरा ……।

११. ज त—इत्याभ्युदयकं । ट–एतदभ्युदयिकं । भ–इत्याभ्युद्दयिकं ।

१२. भ—काण्डमभविष्यं ।

१३. त—सहोतुरम् । ल प्र—महोत्तरम् ।

१४. भ—अतः परमधिकः पाठः—
इति वै सप्तमं कांडं सभाविष्यमिहोत्तरम् ।

१५. रा ज ब प ट—नवतिसंख्यया ।

१६. त—मर्गाः । प–स्वर्गाः ।

१७. ज त—शब्यते । ट—पठ्यते ।

१४५]त्रीणि श्लोकसहस्राणि नैव श्लोकशतानि च ।[1]
षष्टिः श्लोकास्तथा ज्ञेयाः काण्डेऽस्मिन् परिसंख्यया॥१४२॥[2]
१४६]सर्गाणां षट् शैतानीह विंशतिश्चैव संख्यया ।[4]
इत्येतद्रामसम्बद्धमाख्यानमृषिसंयतम् ॥१४३॥ [N
१४७]चतुर्विंशतिसाहस्रं सर्वपापभयापहम् ।
आख्यानं रुचिरं दिव्यं कृतं वाल्मीकिना स्वयम् ।
१४८]धन्यं यशस्यमायुष्यं पुत्रीयं पुष्टिवर्धनम् ॥१४४॥ [N
पठेदिमां पर्वणि यः समाहितः
१४९] कथां शुचिर्दाशरथेर्महात्मनः ।
विमुच्यतेऽसौ कलुषेण मानवः
सुखेन गच्छेच्च मृतोऽपि सद्गतिम् ॥१४५॥ [N
इत्यार्षे रामायणे[14] आदिकाण्डे[15] अनुक्रमणिकाऽध्यायः[16] ॥३॥
काण्डं ७ सर्गाः ९० श्लोकाः ३३६० ॥[17]

---

१. ज त प्र ट—तावन्त्येव शतानि ।
२. त—अतः परमधिकः पाठः—
सुन्दरकाण्डं ७ । सर्गाः ६० । श्लोकाः ३९६० । ट—३३६० ।
ज—कांड ७ । सर्ग ९ । श्लोक ३३६० ।
३. के—षट्कृतानीह । ४. प्र ट—नास्ति ।
५. ज—०सत्तमः । त—०सत्तमम् । प्र—०संस्तुतं ।
रा— ०संयुतम् । प—०संस्कृतम् ।
६. त—पंचविंशतिसा० । ७. ज त—सर्वपापप्रणाशनम् ।
८. के रा ब ल प्र प भ—वैष्णवं । ९. ज ल—प्रजीयं । त—पूजीयं ।
१०. त—पठेद्यमां । ल—पठेदिमं । ११. ज त ल—शुचेर्दाश० ।
१२. रा ज ब त भ—सुखं च । प्र ल—सुखं स० । १३. प्र—सद्गतिः ।
१४. रामायणे महर्षिवाल्मीकीये । १५. भ—नास्ति ।
१६. ज त ल—अनुक्रमणिकाध्याये तृतीयः सर्गः ।
प्र—अनुक्रमणिकानाम तृतीयः सर्गः ।
प—अनुक्रमणिकासर्गः ४ । भ—अनुक्रमणिका ३ ।
१७. ज त ल प्र प भ—नास्ति ।

श्रुत्वा पूर्वं[1] काव्यबीजं देवर्षेर्नारदादृषिः[2] ।
१] लोकादन्विष्य[3] भूयश्च चरितं चरितव्रतः ॥१॥ [१
पू२] उपस्पृश्योदकं सम्यङ्[4] मुनिः स्थित्वा[5] कृतांजलिः ।[6] [२पू
तपोबलेन चान्विष्य चरितं[7] भूरितेजसः ॥२॥ [N
३] जन्म रामस्य सुमहद् वीर्यं सर्वानुकूलताम्[8] ।
लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यवाक्यताम्[9] ॥३॥[10] [१०
४] मिथिलागमनं[11] चैव धनुषश्चैव[12] भेदनम् । [११उ

---

१. ल—पूर्णं ।

२. ज त ल—०दान्मुनिः ।

३. ज त—लोकमन्विष्य । ल—श्लोकमन्विष्य ।

४. ल—सस्यं ।

५. प—मुनिस्तथा ।

६. ज त ल प्र—अतः परमधिकः पाठः—

प्राचीनाग्रेषु दर्भेषु काव्यस्यान्वेषयन् गतिम् ।
प— ,, ,, ०स्यान्वेषणे मतिम् ॥

७. ज त ल—चरितेन च तेजसा ।

८. ज त ल—चैवानुकूलताम् । भ— सत्त्वानुरूपतां ।

९. प्र—सत्यशीलताम् ।

१०. प्र—अतः परमधिकः पाठः—

विश्वामित्रस्य चरितं मन्त्रलंभं तथैव च ।
ताडकायाश्च निधनं यज्ञ··········
नाना चित्राः कथाश्चान्या विश्वामित्रमहामुनेः ।

११. प—मैथिल्याग० ।

१२. प्र—धनुषश्च विभेदनम् ।

रामरामविवादं च गुणं दशरथस्य च ।।४।। [१२पू

५] नाना चित्राः कथाश्चान्यां विश्वामित्रमहामुनेः । [११उ

तथाऽभिषेकं रामस्य कैकेय्या दुष्टभावनम् ।।५।। [१२पू

६] व्याघातश्चाभिषेकस्य राघवस्य विवासनम् ।

राज्ञः शोकं विलापं च मोहं मरणमेव च ।।६।। [१३

७] प्रकृतीनां विषादं च तथैव च विसर्जनम् ।

निषादाधिपसंवादं सूतस्य च विसर्जनम् ।।७।। [१४

८] गङ्गायाश्चैव सन्तारं भारद्वाजस्य दर्शनम् ।

भारद्वाजाभ्यनुज्ञानं चित्रकूटस्य दर्शनम् ।।८।। [१५

९] वास्तुकर्मनिवेशं च भरतागमनं तथा ।

प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ।।९।। [१६

---

१. ज त ल प्र—०मविवादश्च ।

२. ज त ल प्र—भयं । प—प्रीतिं । भ—वाक्यं ।

३. प्र—अयं श्लोकः ४र्थश्लोकात्पूर्वं विज्ञेयः ।

४. प—कथाश्चापि ।

५. ज त ल प्र प—दुष्टभावतां । भ—दुष्टभावना ।

६. कै रा ब—व्याघातश्चाभि० । प—०श्च भिषेकश्च ।

७. ज—रामस्य सुमहात्मनः । त ल—रामस्य च महात्मनः ।

८. ज—विवादं च । त—विषादाश्च । ल—विषादं च ।

९. भ—विषादश्च ।

१०. प—अतः परमधिकः पाठः—

तमसायां विवासं च प्रजानां च निवर्तनं ।

११. रा ज त ल—निवर्तनं । प्र—निवर्तते ।

१२. ज ब त ल प्र प भ—भरद्वाजस्य ।

१३. प—नास्ति ।

१४. त ल प्र—भरद्वाजाभ्यनुज्ञानात् । प—भरद्वाजाभ्यनुज्ञा च ।
भ—भरद्वाजाभ्यनुज्ञां च ।

१५. ज—नास्ति ।

१६. ज त ल—आश्वासनं ।

१७. कै ज त ल प भ—०क्रियाम् । प्र—सलिलं क्रियाम् ।

१०] पादुकस्याभिषेकं[1] च नन्दिग्रामनिवेशनम्[2] ।
दण्डकारण्यगमनं सुतीक्ष्णेन[3] समागमम्[3] ।।१०।।[4] [१७

११] अनसूयासमस्यां च अङ्गरागस्य चार्पणम् ।
शरभङ्गाश्रमाभ्याशं[5] वासवस्य च दर्शनम् ।।[6]११।। [१८

१२] अगस्त्याश्रमवासं[7] च अगस्त्यस्य[9] विसर्जनम् ।
समागमं विराधेन[8] वासं पञ्चवटे तथा ।।१२।।[9] [१९

१३] ह्रासं शूर्पणखायाश्च[10] विरूपकरणं[11] तथा ।
वधं खरत्रिशिरसोः कथनं[12] रावणस्य च ।।१३।। [२०

१४] मारीचस्य[13] विनाशश्च[13] वैदेह्या[14] हरणं[14] तथा ।

---

१. ज त प भ—पादुकास्वभिषेकं । ल—०कासु भि० ।
प्र—०काद्यभिषेकञ्च ।
२. ज त ल—०मप्रवेशनम् ।
३. प्र—विराधस्य वधं तथा ।
४. प्र—अतः परमधिकः पाठः—
दर्शनं शरभङ्गस्य सुतीक्ष्णेन समागमे ।
५. ज त ल—शरभङ्गाश्रमे वासं । ब—०ङ्गाश्रामावासं ।
भ—शरभङ्गाश्रमाभ्यासे ।
६. प—नास्ति ।
७. ज त ल प्र भ—अगस्त्याद्य ।
८. ज—कबंधेन । ल—कबंधेन । त—विबंधेन ।
९. प्र—दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा ।
विसर्जनमगस्त्याद्य वासं पञ्चवटे तथा ।
१०. कै रा ल त प—शूर्पनखा० ।
११. प्र—विरूपकरणम् ।
१२. प—व्युत्स्थानं ।
१३. ज ल—मारीचिप्रविनाशं च । त—मारीचिप्रविनाशे च ।
१४. ज त ल प्र—वैदेहीहरणं ।

जटायुषो वधश्चैवं विलापो राघवस्य च ॥१४॥[1] [२१

१५] कबन्धग्रहणं चैव कबन्धस्य वधं तथा ।[2]
शबर्या दर्शनं चैव पम्पाया दर्शनं तथा ॥१५॥

१६] विलापं चैव पम्पायां राघवस्य महात्मनः ।[8] [२२
ऋष्यमूकाभिगमनं सुग्रीवेण समागमम् ॥१६॥

१७] प्रत्ययोत्पादनं चैवं वालिसुग्रीवविग्रहम् । [२३
वालिप्रमथनं राज्ये सुग्रीवप्रतिपादनम् ॥१७॥

१८] ताराविलापसमये वर्षारात्रिनिवासनम् । [२४

---

१. ज त ल प्र प भ—जटायोर्निधनं चैव ।

२. ज त ल प्र भ—विलापं । प—कबन्धस्य ।

३. प—च दर्शनं । ज—रागवस्य च ।

४. ब रा—नास्ति ।

प—सीतायाश्च प्रलोभं च मारीचस्य वधं तथा ।
वैदेह्या हरणं चैव शोको वै राघवस्य च ॥
गृध्रराजेन संभासं धर्मज्ञेन महात्मना ।
जटायोर्निधनं चैव कवंधस्य च दर्शनम् ॥

५. ज त—कवंधदर्शनं । ल—कवंधदर्शनं ।

६. ल—शर्वर्या द० । भ—शबर्या द० ।

७. प—हनू [मद् ?] दर्शनं तथा ।

८. प्र—नास्ति ।

९. त—ऋषिमूकाभि० ।

१०. रा—सुग्रीवेन ।

११. ज त ल प्र प भ—सख्यं ।

१२. ज ब त ल प्र प भ— वालिसु० ।

१३. ज ब त प्र भ—वालिप्र० । प—वालिप्रथमनं ।

१४. सुग्रीवस्याभिषेचनं ।

१५. ज त ल प—ताराविलापशमनं । प्र—०लापं समयं । भ—लापसमयं ।

१६. ल भ—वर्षारात्रनि० । प—वर्षारात्रीनि० ।

कोपं राघवसिंहस्य बलानामुपसङ्ग्रहम्[1] ॥१८॥

१९] दिशः[2] प्रस्थापनं चैव पृथिव्याश्च[3] निवेदनम्[3] । [२५

अंगुलीयप्रदानं[4] च तथैव[5] बिलदर्शनम्[6] ॥१९॥

२०] प्रायोपवेशनं चैव सम्पातेश्चैव दर्शनम्[7] ।[8] [२६

पर्वतारोहणं चैव सागरस्य च लंघनम् ॥२०॥ [२७पू

२१] सिंहिकादर्शनं[9] चैव लङ्कानिलयदर्शनम् ।[10]

रात्रिप्रवेशो[11] लङ्कायां चिन्ता[12] हनुमतस्तथा ॥२१॥ [२८

२२] आपानभूमिगमनं[13] अवरोधस्य[14] दर्शनम् ।[15] [२९पू

१. रा ज त—बालानामुप० ।

२. ज त ल—दिक्षु ।

३. प—पृथिव्याश्चैव वर्णनं ।

४. प्र—अंगुरीयप्र० ।

५. प्र—ऋष्यस्य ।

६. रा—बलिदर्शनं ।

७. त—लंकानिलयदर्शनम् । भ्रमान्मध्यस्थं पाठं त्यक्त्वा २१श्लोक-द्वितियपादेन संबंधः कृतः ।

८. प्र—अतः परमधिकः पाठः—

समुद्रवचनाच्चैव मैनाकस्य च दर्शनं ।

राक्षसीतर्जनं छायाग्राहिण्याश्चैव दर्शनं ॥

९. प्र—सिंहकायाश्च निधनं ।

१०. रा ब त प भ—नास्ति । के—उत्तरपार्श्वे पुनर्विन्यासः ।

११. ज त ल—रात्रौ प्रवेशं । रा प्र—रात्रिप्रवेशं ।

प—रात्रिप्रवेशन० । भ—रात्रिप्रवेशो ।

१२. ल प—चिंतां । त—चित्तां ।

१३. रा ब—आपानुभूमिग० ।

१४. रा—अवरोदस्य ।

१५. प्र—अतः परमधिकः पाठः—

दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् ।

अशोकवनिकायानं[1] सीतायाश्चापि[2] दर्शनम् ॥[3]२२॥ [३०पू

२३] राक्षसीदर्शनं[4] चैव[5] राघवस्य च दर्शनम् । [२९उ

संभाषणं च मैथिल्या अभिज्ञानस्य चार्पणम् ॥२३॥ [३०उ

२४] मणिप्रदानं[6] सीताया वनभङ्गं[7] तथैव च । [३१उ

राक्षसीविद्रवं चैव किङ्कराणां निबर्हणम्[8] ॥२४॥

२५] अमात्यपुत्रनिधनं सेनापतिवधं तथा [३२

अक्षस्य निधनं चापि निर्याणेन्द्रजितस्तथा[9] ॥२५॥

२६] ग्रहणं वानरेन्द्रस्य लङ्कादाहाभिमर्दनं[10] । [३३

प्रतिप्रयाणमे[11]चापि[12] मधूनां भक्षणं तथा ॥२६॥

२७] राघवाश्वासनं चापि मणिनिर्यातनं तथा । [३४

संगमं च समुद्रस्य नलसेतोश्च बन्धनम्[13] ॥२७॥[14]

---

१. ज त—अशोकवनिकायां च ।

२. ज त प—सीतायाश्चैव ।

३. ल—नास्ति ।

४. त प्र प—राक्षसीतर्जनं चापि ।

५. ज—नास्ति ।

६. त—मणिप्रधानं ।

७. ज त प्र प—वनभङ्गं ।

८. ज त प—वधं तथा ।

९. ज प—निर्यातेन्द्रजि० । त–निर्यात्रेन्द्रजि० । प्र—निर्यानेन्द्रजि० ।

१०. भ—०हाभिमर्शनं । ल—लङ्कादाहे…… ।

११. ल—प्रतिप्लवणमे० ।

१२. प—वापि ।

१३. प—दर्शनं । ल—नास्ति ।

१४. रा—अतः परमधिकः पाठः—

प्रतिप्रयाणमे ।

२८] तरणं च समुद्रस्य रौद्रलोकोपरोधनम् ।[3] [३५
विभीषणेन संसर्गो वधोपायनिवेदनम् ॥२७॥
२९] कुम्भकर्णस्य च वधं मेघनादवधं तथा । [३६
रावणस्य विनाशं च सीताऽवाप्तिं तथैव च ॥२८॥
३०] विभीषणाभिषेकं च पुष्पकारोहणं तथा ।[8] [३७
अयोध्यायां च गमनं भरतेन समागमम् ॥[10]२९॥
३१] रामाभिषेकाभ्युदयं हरिरक्षोविसर्जनम् ।[12]
सीतायाश्च परित्यागं प्रकृतीनां च रञ्जनम् ॥३०॥ [३८

१. त - प्रभावं च स० । प्र—प्रतारञ्च स० । ल—नास्ति ।
२. त प्र प—रौद्रं लङ्कोपरो० ।
३. ज ल—नास्ति ।
४. के रा—संसंगो । ज त ल प्र—संसर्ग । प—संतु संसर्गी वधो(पा)यनि० ।
५. प—वधं घोरं ।
६. प्र—शोकं राक्षसयोषितां ।
७. प्र—सीतात्यागं तथैव च ।
८. प्र—अतः परमधिकः पाठः —

ब्रह्मादिदेवतानाञ्च दर्शनं वचनं तथा ।
सीतायाः प्रत्ययं चैव सीताप्राप्तिमरे(:)पुर ॥
जीवनं वानराणाञ्च पुष्पकारोहणन्तथा ।

९. प—अयोध्यागमनं चैव । भ—अयोध्यायाश्च ग० ।
१०. प्र—अयोध्यायाश्च गमनं भरद्वाजसमागमं ।
प्रेषणं वदु [वायु] पुत्रस्य भरतेन समागमे ॥
११. ज ल—०षेकाभ्युदयो ।
१२. त—नास्ति ।
ज ल प—अतः परमाधिकः पाठः—
अगस्त्यप्रमुखानां च महर्षीणां समागमं ।
प्र—अगस्त्यप्रभृतीनाञ्च ,, ,,
राक्षसानां समुत्पत्ती रावणस्य जयं ततः ॥
१३. ज त ल—रंजनं प्रकृतेस्तथा ।

३३] अनागतं च[1] यत्किञ्चिद्रामस्य वसुधातले । [३९पू
प्राप्तराज्यस्य[2] रामस्य चरितं यच्च[3] धीमतः ॥३१॥[4] [N
३४] अभ्यागमम्[5]ऋषीणां च शत्रुघ्नस्य विसर्जनम् ।[6]
वनप्रसूतिं[7] सीताया लवणस्य रणे वधम् ॥३२॥[8] [N
३५] कालदुर्वाससोः प्राप्तिं लक्ष्मणस्य विसर्जनम् ।
स्थापयित्वा सुतान् राज्ये यथा रामो दिवं गतः ॥३३॥[9] [N

---

१ त--तु ।

२. प--आप्तराजस्य । ब--प्राप्तं राज्यस्य ।

३. ज त ल--तस्य ।

४. ज त ल प--अतः परमधिकः पाठः--

तच्चकारोत्तरे कांडे चरितं भगवानृषिः ।

५. प्र--अभ्यागतमृ० ।

६. ज त ल--नास्ति ।

७. ज त ल प्र प भ--वने प्रसूतिं ।

८. प्र--अतः परमधिकः पाठः--

मथुरायां निवासश्च मैथिल्यानयनं तथा ।
यज्ञस्यान्ते च सीतायाः प्रत्ययस्य निदर्शनं ॥
भूमौ प्रवेशं सीतायाः सन्तापं राघवस्य च ।

प--मथुराया निवेशं च यज्ञारंभस्तथैव च ।
यज्ञांते चैव सीतायाः पातालगमनं तथा ॥

९. प्र--अतः परमधिकः पाठः--

ऋक्षवानरगोपुच्छैः पौरजानपदैरपि ।
एतत् सुतपसा दृष्ट्वा निखिलेन महामतिः ।
चरितं सत्यसंधस्य सर्वं काव्ये चकार ह ॥
ततः पुनरहः किञ्चिदुपश्लोकायते मुनिः ।
तं ब्रह्मा संप्रहस्यैव श्लोक इत्यब्रवीद् वचः ॥
ततः शिष्याश्च वृद्धाश्च सर्वे चान्ये तपस्विनः ।
अभिवाद्य महात्मानमृषिं वाक्यं व्यचारयन् ।

३६] त्रैलोक्यदर्शी तत् सर्वं तपोयोगबलेन च ।[1]
दद‍र्श चैव प्रत्यक्षं पाणावामलकं यथा ॥३४॥ [N
३७] दृष्ट्वा चानन्तरं चक्रे रामस्य चरितं महत् ।
धर्मकामार्थसंयुक्तं पुण्यश्रवणकीर्तनम् ॥३५॥ [N
३८] श्रुतिरत्नचयाकीर्णं काव्यसागरमद्भुतम् ।
कृत्वा चैवमशेषेण काव्यं रामायणाह्वयम् ॥३६॥ [N

पादबद्धश्चतुष्पादः शोकः श्लोकत्वमागतः ॥
तस्य बुद्धिरियं जाता वाल्मीकेर्भावितात्मनः ।
कृत्स्नं रामायणं काव्यं स्वयमेव करोम्यहम् ॥
प्रथमं ब्रह्मणा प्रोक्तं नारदस्य च दर्शनम् ।
श्रुत्वा स वक्त्र [द्गु ?] मात्रं हि धर्मात्मा धर्मसंहितम ॥
व्यक्तमन्विष्य भूयो वै यद् वृत्तं तत्ततः ।
गुणग्रामस्य रामस्य राज्ञो दशरथस्य च ॥
सभार्यस्य सराष्ट्रस्य शा [सा ?] न्तः पुरजनस्य च ।
हसितं भाषितं यच्च गतं यच्चाप्यनुष्ठितं ॥
तत् सर्वं धर्मवीर्य्येण यथावत् संप्रपश्यति ।
भरतस्य यथा वृत्तं शत्रुघ्नस्य च धीमतः ॥
वसिष्ठश्च [स्य ?] सुमन्तोश्च वामदेवस्य चैव हि ।
विश्वामित्रस्य देवर्षेः राज[र्षे]र्जनकस्य च ॥
रक्षसां वानराणां च यथा वीर्यं विचेष्टितं ।
सीतासहायेन किञ्चित् कथितं वसता वने ॥
महासत्वेन रामेण लक्ष्मणेन च धीमता ।
ततः पश्यति तत्सर्वं वाल्मीकिर्योगमास्थितः ॥

१. कै ब भ—त्रैकाल्यदर्शी ।
२. प्र—अतः परमधिकः पाठः—
तत् सर्वं सर्वतोऽन्विष्य रामवृत्तान्तमात्मवान् ।
३. रा—मणावाम० ।
४. ज त ल—धर्मार्थकामसं० ।
५. रा ब– ०त्नमयाकीर्णं । त— ०त्नमयाकीर्णं ।

३९] चिन्तयामास क इदं लोकेऽस्मिन्प्रथयिष्यति । [४.३उ
अथ चिन्तयतस्तस्य महर्षेर्भावितात्मनः ॥३७॥
४०] तदा जगृहतुः पादौ मुनिवेषधरौ वने । [४.४
वाल्मीकिशिष्यौ तरुणौ रूपौदार्यगुणान्वितौ ॥३८॥
४१] कुशीलवाविति ख्यातौ सीतारामाङ्गसंभवौ । [४.५
स तौ मूर्धन्युपाघ्राय वाल्मीकि भगवानृषिः ॥३९॥ [N
४२] उवाचेदं तदा वाक्यं प्रणतावग्रतः स्थितौ ।
आर्षं रामायणं काव्यमिदं तावन्मया कृतम् ॥४०॥ [N
४३] गृह्यतां मन्नियोगेन पुण्यश्रवणकीर्तनम् । [N
पौलस्त्यवधसंयुक्तं धर्मकामार्थसंहितम् ॥४१॥ [४.७उ
४४] पाठे गेये च मधुरं प्रमाणैस्त्रिभिरुज्ज्वलम् ।
तन्त्रगीतैश्च मधुरैरन्वितं सप्तभिः स्वरैः ॥४२॥ [४.८

१. त ल—ततौ । ज—तु तौ । प—मुने ।
२. प्र—अतः परमधिकः पाठः—

राजपुत्रौ यशस्विनौ ।
भ्रातरौ स्वरसम्पन्नौ ददर्शाश्रमवासिनौ ॥
स तु...विनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।

३. त ल—०गवान् मुनिः ।
४. प्र—प्रोवाचेदं ।
५. ज त ल—ततो ।
६. ज—प्रणतावग्रतौ ।
७. ज—गृहीतं । त ल प्र— गृह्णीतं ।
८. ज—०र्थसंविधं ।
९. प्र—पाठ्यं ।
१०. ग—योगे ।
११. ज त ल प्र प भ—०स्त्रिभिरन्वितं ।
१२. ज त ल प्र प भ—तन्त्रीगीतैश्च ।
१३. कै—मधुरमंधितं । ग घ—मधुरमान्वितं ।

४५] जातिभिः सप्तभिर्युक्तं श्रोत्रश्रुतिमनोहरम् । [४.८
श्रृंगारवीरबीभत्सरौद्रहास्यभयानकैः ॥४३॥
४६] करुणाद्भुतशान्तैश्च युक्तं काव्यरसैरपि । [४.९
एवमुक्त्वा तु तौ बालौ भगवानपिसत्तमः ॥४४॥
४७] सम्यगध्यापयामास काव्यं रामकथाऽऽश्रयम् ।
वागविधेयं ततस्ताभ्यां कृतं तच्च विशेषतः ॥४५॥ [N
४८] पुण्यं रामायणं काव्यं तदा तौ मुनिरब्रवीत ।
गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि ॥४६॥ [N
४९] राजर्षीणां पुण्यकृतां साधूनां च समागमे ।
गुरुणैवमनुज्ञातौ ततस्तौ देवरूपिणौ ॥४७॥ [N
५०] कुशीलवौ राजपुत्रौ प्रकृत्या मधुरस्वरौ ।
रूपानुरूपौ रामस्य बिम्बाद्बिम्बमिवोद्धृतौ ॥४८॥ [४.११

१. ल प्र—श्रोतुः श्रुतिम० । प—मनः श्रुतिसुखावहं ।
२. प्र—०त्सरौद्रश्च सभयानकः ।
भ—श्रृङ्गारवीरकरुणाहास्यरौद्रभ० ।
३. प्र—करुणाद्भुतहास्यैश्च । भ—बीभत्साद्भुतशा० ।
४. ज त ल प्र—च ।
५. ज त ल—भगवान् मुनिसत्तमः ।
६. भ—रामायणाश्रयं ।
७. ज त ल—सदा ताभ्यां । ब— कृतस्ताभ्यां ।
प्र—तदा ताभ्यां । प—यदा ताभ्यां ।
८. प्र—तच्चाप्यशेषतः ।
९. ज—रामायणे ।
१०. प्र—रामपुत्रौ । प—रामसुतौ ।
११. रा त—मधुरस्वनौ ।
१२. ज ल—अनुरूपौ च । त—अनुरूपस्य । रूपानुरामो ।
१३. ज—०म्बमिवोद्यतौ । बिम्बाद्बिम्बमिवोदितौ ।
ल—० म्बमिवेद्धृतौ । प्र—०म्बमिवाहृतौ । प—सूर्यबिम्बादि० ।

५१] वेदेवेदाङ्गेतिहासशास्त्रेषु परिनिष्ठितौ ।[3] [N
जगतुस्तौ ततः काव्यं मधुरं मधुरस्वरौ ॥४९॥
५२] यथोपदिष्टमृषिणा सन्निधौ ब्रह्मवादिनाम् । [४.१३
तयोर्ब्रह्माऽभवत् प्रीतः सेन्द्राश्च सुरसत्तमाः ॥५०॥ [N
५३] गन्धर्वाः पन्नगाश्चैव पतङ्गाश्च महर्षिभिः । [N
तौ कदाचित् समेतानामृषीणां देवरूपिणौ ॥५१॥
५४] काव्यं रामायणं मध्ये सहितावभ्यगायताम् । [४.१४

१ प्र—०दाङ्गेतिहासे शा० । प—०दाङ्गेतिहासपुराण० ।
२. ल—०निष्ठतौ । प्र—०निष्ठुतौ ।
३. प्र—अतः परमधिकः पाठः—
तौ तु गन्धर्वतत्त्वज्ञौ [ौ ?] स्थानमार्च्छनकोविदौ ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ ॥
४. त—जगतौ तु ।
५. ज त ल प्र प भ—तदा ।
६. रा ज त ल —मधुरस्वनौ ।
७. त ज—अथोपदि० ।
८. प्र—ब्रह्मवादिना ।
९. प्र भ—०पतगाश्चैव । प—०श्चाप्सरसश्चैव ।
१०. ज ल—पतगाश्च । प्र प भ—पतगाश्च ।
११. ज त ल—महर्षयः ।
१२. ज त ल—चैव सन्निधौ ।
१३. प्र—अतः परमधिकः पाठः—
काव्यं तज्जगतुः प्रीतौ कुमारौ कलमञ्जुलं ।
श्रुत्वा च मुनयः सर्वे परं विस्मयमागताः ॥
हर्षविस्मयसम्पन्नैर्नेत्रैरनिमिषैरिव ।
समीयुस्तत्र तत् काव्यं श्रोतुकामाः सहस्रशः ॥
१४. ज त ल—नाम ।
१५. रा—सहिता चभ्यगा० । ज—सहितमभ्यगा० ।
के ब त ल—संहितावभ्यगा० । प्र—संहितातुभ्यगायता ।

शृण्वतां[1] तु तदा काव्यमृषीणां हर्षसंभवः ।।५२।।

५५] सहसाऽभून्महाशब्दः साधु साध्विति शंसताम्[2] । [४.१५

सुप्रीतमनसश्चैव मुनयो धर्मवत्सलाः ।।५३।।

५६] शशंसु भ्रातरौ[3] तत्र गायन्तौ तौ[4] कुशीलवौ । [४.१६

अहो भावानुगं[5] काव्यमहो गीतमविस्तरम्[6] ।। [7]५४।। [४.१७पू

५७] अहो[8] भगवता[9] सम्यग् रामस्य चरितं महत् । [N

चिरंवृत्तमिव[10] ह्येतत् प्रत्यक्षमिव दर्शितम्[11] ।।५५।। [४.१७उ

५८] संस्कृतं मधुरं चैव समाक्षरपदक्रमम ।

प्रयोक्ताराविमौ चापि[12] सम्यगस्य[13] कुशीलवौ ।।५६।। [N

५९] कुमारौ देवगर्भाभौ तरुणौ मधुरस्वरौ[14] ।

अहो द्रव्यमहो[15] स्वाद्यमहो[16] गीतमविस्तरम्[17] ।।५७।। [N

१. प—तच्छृण्वतां ।

२. प्र—संसता ।

३. ब त—भ्रातरं ।

४. ज त ल प्र—तौ ।

५. भ—भावानुसंगेयमहो ।

६. प्र—गीतमहो स्वरम । प—गीतं सुविस्तरं ।

७. ज त ल—नास्ति ।

८. रा—अतो ।

९. प्र प—भगवतः ।

१०. प्र प भ—चिरवृत्तमपि ।

११. प्र भ—दृश्यते ।

१२. रा ब—चास्य ।

१३. प्र—सम्यगत्र ।

१४. रा त—०रस्वनौ ।

१५. ब ल—श्राव्य० । रा त प्र भ—श्रव्य० । प—प्रापमहत् ? ।

१६. प्र—काव्यमहो ।

१७. ज त ल—गीतं सुविस्तरं । प—गीतमविस्तरं ।

युक्तं च मधुरं चैव परया स्वरसम्पदा । [४.१८उ
६०] पदवृत्तसमायुक्तं तालतानसमन्वितम् ॥५८॥ [N
संरक्तं चापि रक्तं च परया स्वरसम्पदा । [४.१९उ
६१] एवं प्रशस्यमानौ तौ श्लाघ्यमानौ महर्षिभिः ॥५९॥
भूयो रक्ततरं साधु मधुरं चाप्यगायताम् । [४.१९
६२] ताभ्यां प्रीतो मुनिः कश्चित् पानीयकलशं ददौ ॥६०॥
कश्चिद् वनफलं स्वादु वल्कलं कश्चिदीप्सितम् । [४.२०

१. ज त ल--रक्तं । प्र--व्यक्तं ।

२. प--सुरसंपदा ।

३. कै--पदवृत्तं समायुक्तं । रा--पदव्रतसमायुक्तं ।
ज त ल प्र--पदसंधिसमायुक्त ।

४. ज त ल--तालभाव० प्र--तालमान० ।

५. रा--सुरसम्पदा । प्र--स्वादुसंपदा ।

६. ज त ल--नास्ति ।

७. ज--प्रशंस्यमानौ ।

८. ज ब प--तु ।

९. रा--श्लाघ्यमाणौ । प--गीयमानौ ।

१०. रा ब--रक्तांतरं । प्र--ऽप्यनन्तरं ।

११. ज ल--स्वादु । त--स्वाद्य ।

१२. प्र--प्रीतः कश्चिन्मुनिस्ताभ्यां ।

१३. प्र--वन्यफलं । प--वण्यफलं ।

१४. प्र--अतः परं दाक्षिणात्यसम्मतोऽधिकः पाठः--
अन्यः कृष्णाजिनमदात् यज्ञसूत्रं तथापरः ।
कश्चित् कमण्डलुं प्रादात् मौञ्जीमन्यो महामुनिः ॥
बृषीमन्यस्तदा प्रादात् कौपीनमपरो मुनिः ।
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ॥
काषायमधुरं वस्त्रं चीरमन्यो ददौ मुनिः ।
जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः ॥
यज्ञभाण्डमृषिः कश्चित् काष्ठभारं तथापरः ।

६३] एवं पूर्वमिदं काव्यं मुनिभिः प्रतिपूजितम् ।।६१।। [N
जीवंभूतं मनुष्याणां कवीनामुपजीवनम् । [४.२६उ
६४] प्रशस्यमानौ तावेतौ कदाचिद् देवरूपिणौ ।।६२।।
राजधानीषु राज्ञां च समीपेष्वभ्यगायताम् । [४.२८
६५] अथाश्वमेधे रामोऽपि तावुपश्रुत्य गायनौ ।।६३।। [N
सत्कृत्यैवानयामास पुरुषैराप्तकारिभिः । [14]

औदुम्बरीं वृषीमन्यः स्वस्ति केचित्तदावदन् ।।
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ।
ददुश्चैवं वरान् सर्वे मुनयः सत्यवादिनः ।।
आश्चर्यमिदमाख्यातं मुनिना संप्रकीर्तितम् ।
परं कवीनामाधारं समाप्तं च यथाक्रमं ।।

१. रा—वाक्यं ।
२. प—ऋषिभिः ।
३. ज त ल प्र प भ—बीजभूतं ।
४. ज—कवीनामार्षमद्भुतं । त—कवीणामार्षमद्भुतं ।
ल—कवीनां मतमद्भुतम् ।
५. प—प्रशंस्यमानौ ।
६. रा ब त भ—तावेव । ज ल प्र भ—तावेवं ।
७. के—तद्विगीयताम् इति पुनरपरहस्तेन विन्यासः ।
वस्तुतस्तु तत्रापि देवरूपिणाविस्येव मौलिकः पाठः कीटभुक्तोऽपि दृष्टिपथमवतरत्येव ।
८. रा—राजधानेषु ।
९. ज ल—० ष्वप्यगायतां । त—० ष्वपि गायतां ।
१०. प—अश्वमेधे ।
११. प्र—राज्ञोऽपि ।
१२. प्र—तावुभावुपगायकौ ।
१३. ज त ल—सत्कृतावानयामास । प्र—सत्कृत्यानाययामास ।
१४ प—अतः परमधिकः पाठः—
पूजयामास पूतात्मा सत्कारैस्तावलंकृतौ ।

६६] तांविदं जगतुस्तत्र काव्यं रामप्रचोदितौ ॥६४॥ [N
कर्मान्तरेषु विप्राणां रामलक्ष्मणसन्निधौ ।
६७] शत्रुघ्नभरतादीनामन्येषां च महीक्षिताम् ॥६५॥ [N
वसिष्ठात्रिपुरोगानां सन्निधौ ब्रह्मवादिनाम् । [N
६८] रामस्तत्रासने शुभ्रे शुद्धास्तरणसंवृते ॥६६॥ [४.३०पू
उपविश्य तु शुश्राव तदाऽऽत्मचरितं महत् ।
६९] आर्षं रामायणं सार्धं भ्रातृभि भरतादिभिः ॥६७॥
पू७०] पौरजानपदैश्चैव वृतः शतसहस्रशः । [४.३०उ
दृष्ट्वाऽर्थ रूपसम्पन्नौ तावुभौ वीणितौ ततः ॥६८॥
७१] उवाच लक्ष्मणं रामः सर्वांश्चैव सभासदः । [४.३१
श्रूयतामिदमाख्यानमेतयो र्देववर्चसोः ।

१. प—तावुभौ ।
२. प्र—वशष्टत्रि० । प—वशिष्टात्रि० ।
३. त—०तत्राश्रने । प्र— ०तत्राशने ।
४. ज त—स्पर्ध्यास्तरणसंयुते ।
ल—स्मत्यास्तरणसंयुतं । प्र—स्पर्ध्यस्तर० ।
प—मृद्वास्तरणसं० ।
५. प—काव्यं ।
६. प—भरतात्मभिः ।
७. प—अतः परमधिकः पाठः—
तान्त्रगार्नायसदृशो[ौ?] कुमारौ देवरूपिणौ ।
८. त प्र—दृष्ट्वा तु ।
९, प्र—विनीतौ । भ—भ्रातरौ ।
१०. ज त ल—गायनौ तदा । प्र-तावुभौ ततः ।
प—चीरवाससौ । वीणिनौ तदा ।
११. प—सर्वं चैव ।
१२. ज त ल—नास्ति ।
१३. ज त ल प्र प भ—०ख्यानमनोदं० ।

७२] विचित्रार्थपदं सम्यग्गायतो मधुरस्वरम् ॥६९॥ [४.३२

इमौ हि बालौ नृपलक्षणान्वितौ
कुशीलवावेव तपोवनाश्रयौ ।

७३] ममेतिवृत्तं किल गेयमद्भुतं
महर्षिवाल्मीकिकृतं प्रगायतः ॥७०॥ [४.३५

ततस्तु तौ राघवसंप्रचोदितौ-
वगायतां काव्यमिदं यथाक्रमम् ।

स चापि रामः सहितैः समाहितैर्

७४] बभूव तत्रार्पितचेतनस्तदा ॥७१॥ [४.३६

इत्यार्षे[13] रामायणे[14] आदिकाण्डे काव्यसंक्षेपो[15]
नाम चतुर्थः सर्गः ॥ ४ ॥

---

१. ज—विचित्रार्थमिदं ; त—विचित्रार्थं पदं ।

२. रा—०गायंतोर्म० । त—०गायंतोर्म० ।

३. ल—०र्दधुरस्वयम् । प्र प—मधुरश्वरं ।

४. प्र—अतः परं दाक्षिणात्यसम्मतोऽधिकः पाठः—
तन्त्रीलयवदत्यर्थविश्रुतार्थमगायतां ।
ह्लादयत् सर्वगात्राणि मनांसि हृदयानि च ॥
श्रोत्राश्रयसुखं ज्ञेयं तदुभौ जनसंसदि ।

५. रा ज त—नृपलक्ष्मणान्वितौ ।

६. ज त—कुशो लवश्चैव । ल प्र भ—कुशीलवो चैव ।

७. प्र—महातपस्विनौ ।

८. रा—गेयमद्भु० । प्र—गीतमद्भु० ।

९. ज प्र—प्रगास्यतः । त ल—प्रगास्यताम् । भ—प्रगायतौ ।

१०. ज त ल—०प्रचोदितौ प्रगाय० । रा—०दितौ वगाय० ।

११. ज त ल—सहितः । प भ—सह तैः ।

१२. ज त ल—सभागतै० । प्र—समागतै० । प—सभासदै० ।

१३. कै—नास्ति ।

१४. त—श्रीरामायणे बालकांडे । ज ल —०णे बालकांडे ।

१५. प्र प—काव्योपसंक्षेपो । भ—कथासंक्षेपो ।

*

सागरान्ता मही येषामासीद्वीर्यार्जिता किल ।[1]
१] आमनो[2]ः पुण्यकीर्तीनां राज्ञाममिततेजसाम्[3] ॥१॥[4] [१
सगरः[5] पूर्वजो येषां सागरो येन खानितः ।
२] षष्टिः[6] पुत्रसहस्राणि यं यान्तं पृष्ठतोऽन्वयुः[7] ॥२॥ [२
इक्ष्वाकूणामिदं तेषां वंशे[8] कीर्तिविवर्धनम् ।
३] निबद्धं पुण्यकीर्तीनां रामायणमिति श्रुतम्[9] ॥३॥ [३
[10]तदिदं श्रूयतामार्षं[11] पुण्यं पापभयापहम् ।
४] धर्म[12]कामार्थसंयुक्तं श्रुतिस्मृत्युपबृंहितम् ॥४॥ [४

---

१. ज त ल प्र प ट—अतः पूर्वमधिकः पाठः—

ततस्तौ स्वरसंपन्नौ कुमारौ तत्र संसदि ।
अगायतां नवं काव्यं रामायणमिति स्मृतम् ॥

भ—पुस्तकस्य पश्चिमपार्श्वेऽपरहस्तेन विन्यासः ।

२. ज त ल ट—आशानां । के रा ब—आरमनः ।

३. प्र—०ज्ञामितितते० ।

४. प—अतः परमधिकः पाठः—

प्रजापतिमुपादाय नरेन्द्राणां यशस्विनां ।

५. रा त प्र—सागरः ।

६. त प्र प भ—षष्टिपुत्रस० ।

७. ज ट—पृष्ठतो ययुः ।

८. त—वंश ।

९. ज त ल ट—स्मृतं ।

१०. ल—उदिदं ।

११. भ—श्रयतामाद्यं ।

१२. त ल प्र ट—धर्मार्थकामसंयुक्तं ।

कोसलो[1] नाम मुदितः स्फीतो जनपदो महान् ।
१] निविष्टः सरयूतीरे पशुधान्यसमृद्धिमान्[2] ॥१॥ [५
अयोध्या नाम तत्रासीन्नगरी लोकविश्रुता ।
२] मनुना मानवेन्द्रेण यत्नेन[3] परिनिर्मिता[4] ॥२॥ [६
आयता दश च[5] द्वे[6] च योजनानि[7] महापुरी ।
३] श्रीमती त्रीणि विस्तीर्णा[8] नानासंस्थानशोभिता[9] ॥३॥ [७
सुविभक्तान्तरद्वारा[10] सुविभक्तमहापथा[11] ।
४] शोभिता राजमार्गेण जलसंसिक्तरेणुना ॥[12]४॥ [८
नानावणिग्जनोपेता नानारत्नविभूषिता[13] ।
५] महाशालाऽन्विता[14] दुर्गा उद्यानप्रवरैर्युता[15] ॥५॥ [९

---

१. प्र प भ—कोशलो ।
२. ज त ल प्र ट—०धनर्धिमान् ।
३. ज त ल प्र ट—पुरैव । प—पुरा ।
४. प—समभिनिर्मिता ।
५. प—पक्कं च [पंच च ?] ।
६. रा—त्वं च ।
७. ट—जोजनानि ।
८. ज त ल ट—चातिविस्तीर्णा ।
९. ज त ल ट—रत्नसंस्थानशो० । प्र—नवसंस्था० ।
१०. त—०न्तरधारा । प्र—०क्तान्तरपथा ।
११. प्र—सुविभक्तापरायणा ।
१२. प—राजमार्गेण महता विस्तीर्णेनोपशोभिते [ता ?] ।
१३. रा—नानावर्णवि० ।
१४. ज त ल प्र ट—महाशालावृता ।
१५. ज ल—उद्यानास्तरणान्वि० । त—उद्यानास्तोरणा० ।
ट—ह्यद्यानास्तरणावृता । प—उद्यानप्रवैरवृता ।

दुर्गगम्भीरपरिखां नानाऽऽयुधसमन्वितां ।

६] कपाटतोरणयुतां उपेता धन्विभिः सदा ॥ ६॥ [१०

राजा दशरथो नाम महात्मा राष्ट्रवर्धनः ।

७] तां पुरीं पालयामास स्वपुरीं मघवानिव ॥७॥ [९

दृढद्वारप्रतोलीकां सुविभक्तान्तरापणाम् ।

८] नानायन्त्रायुधवतीं नानाशिल्पिगणैर्युताम् ॥ ८॥

पृ९] शतघ्नीपरिखोपेतामुच्छ्रितध्वजतोरणाम् । [११उ

१. ज त ल—अतिगम्भीरप० ट—अतिगंभीरपरिषा ।

प—दुर्गगंभीरपरिषा ।

२. त—नानायुद्धस०

३. कै ज ल प्र ट—कवाटतोरण० । ज—कथातटोरणयथा ।

४. ह्युपेता । ल—तमेता । ट—चोपेता ।

५. प—कपाटतोरणवती हर्म्यप्रासादसंकुला ।

६. ज त ल ट—धर्मात्मा ।

७. ल—स्वः पुरीं ।

८. त ल ट—सुविभक्ततरापणां । ज—सुविभक्ततरायणां ।

प्र प—सुविभक्तांतरायणां ।

९. ज त ल ट—०शिल्पिगणान्विताम् । प्र—शिल्पगुणान्विताम् ।

भ—शिल्पिगणायुताम् ।

१०. ज त ल—अतः परमधिकः पाठः—

हस्त्यश्वरथसंपूर्णां नानायानसमाकुलाम् ।

नानापार्थिवभृत्यैश्च वणिग्भिश्चोपशोभिताम् ॥

प्र—सूतमागधसंबाधां श्रीमतीमतुलप्रभाम् ।

११. प्र प भ—शतघ्नीपरिघोपताम्रु० ।

१२. प—अतः परमधिकः पाठः—

सूतमागधसंयुक्तब्रह्मघोषनिनादिता ।

प्र—वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम् ।

हस्त्यश्वरथसंपूर्णां नानायानसमाकुलां ।

नानापार्थिवभृत्यैश्च वणिग्भिश्चोपशोभितां ॥

नानारत्नचयाकीर्णां धनधान्यसमन्विताम्[1] ॥[2]९॥[3]

१०] देवताऽऽयतनैश्चैव विमानैरिव[4] शोभिताम्[5] ।

सभोद्यानप्रपाभिश्च[6] रुचिराभिरलङ्कृताम् ॥१०॥ [N

११] [7]विभक्तमहाहर्म्यां नरनारीगणान्विताम्[8] ।

बृहच्छूरार्यपुरुषैराकीर्णाम[9]मरोपमैः ॥[10] [11]११॥ [N

भ—पुस्तकस्योत्तरपार्श्वे पुनरपरहस्तेनेत्थं पाठविन्यासः—

हस्त्यश्वरथसंपूर्णां नानायानसमाकुलां ।

नानापथिकभूतैश्च वणिग्भिः ·· ····शोभितां ।

निधानशतसंबाधां सर्वैश्च विभवैर्युतां ।

१. रा—०न्यसमान्विता ।

२. प—अतः परमधिकः पाठः—

हस्त्यश्वरथसंपूर्णा नानायानसभाकुला ।

नानापार्थिवभृत्यैश्च वणिग्भिश्चोपशोभितां ।

निधानशतसंबाधां गर्वैश्च विभवैर्युतां ।

३. ज त ल—नास्ति ।

४. प्र—विमाने [ने ?] रभिशो० ।

ज त ल ट—विमानैरुपशो० ।

५. ज त ल—अतः परमधिकः पाठः—

निधानशतसंबाधां सर्वैश्च विभवैर्युतां ।

अत्र श्लोके पूर्वार्धापरार्धपादविपर्यासः ।

६. रा ज त ल ट—सभोद्यानप्रभाभिश्च ।

प्र—महोद्यानप्र० । प—सभोद्यानाश्रियाभिश्च ।

७. ज त ल प्र ट—प्रविभक्तमहावेश्मां । भ—सुविभक्तम० ।

८. ट—नरनारीसमाकुलां ।

९. ज त भ—विद्वच्छूरार्यपु० । प्र प—विद्वद्भिरार्यपु० ।

१०. ज—संकीर्णा० ।

११. ट—नास्ति ।

प—अतः परमधिकः पाठः—

योधैरग्निमरुत्तुल्ले [ल्ये ?] राहवेष्वनियन्त्रभिः ।

गुप्तां पुरुषसिंहैश्च सिंहैरिव गिरेर्गुहां ॥

१२] प्ररोहमिव[1] रत्नानां प्रतिष्ठानमिव श्रियः ।
महाप्रासाद[2]शिखरैः शैलाग्रैरिव शोभिताम्[3] ॥१२॥ [N

१३] विमानचयसम्बाधामिन्द्रस्येवामरावतीम् ।[4] [१५
अष्टापदपदालेख्यैः रम्यामालिखितामिव ॥१३॥ [N

१४] नानारत्नचया[5]च्छन्नां हृष्टपुष्टजनायुताम्[6] ।
अविच्छिन्ना[7]न्तरगृहां समभूमिनिवेशिताम् ॥[8] १४॥ [M

१५] मृदङ्गवेणुवीणानां रम्यैः शब्दै[9]र्विनादिताम् ।
नित्योत्सवसमाजाढ्यां नित्यहृष्टजनायुताम्[10] ॥[11] १५॥ [N

१६] ब्रह्मघोषस्वनवतीं धनुः स्वनविनादिताम्[12] ।
वरान्नपानसलिलां[13] शालितण्डुलभोजनाम् ॥१६॥ [N

१७] धूपमाल्यहविर्गन्धैर्हृद्यै[14]श्चैवाधिवासिताम् ।

१. ज त ल प्र प ट—आरोहमिव । भ—आरोहमिव ।
२. ज त ल प्र—महाप्रसाद० ।
३. ज त ल ट—शैलाग्रैरुपशो० । प—शृगैश्चोपशो० ।
४. प—विमानमिव सिद्धानां तपसाधिगतं भुवि ।
५. ज त ल प्र प भ—नानारत्नचयैश्छ० । ध—०नमयाच्छन्नां ।
६. ज त ल प्र—जनैर्युतां ।
७. ज त ल—अविच्छिन्नान्तरगृहां ।
८. ट—नास्ति । कै—पुस्तकस्य पूर्वपार्श्वे पश्चादपरहस्तेन विन्यासः ।
९. ज त प्र—शब्दैर्निनादितां ।
१०. त ल—नित्यपुष्टजनैर्युतां । प्र—नित्यहृष्टजनैर्यु० ।
११. ज—नास्ति ।
१२. ज त ल ट—धनुः शब्दनिनादितां । रा—धनुः स्वननिवादिनाम् ।
१३. ज त ल ट—वरान्नपानकलिलां ।
प्र—०पानकलिला । प—नानान्नपानसलिला ।
१४. ज त ल प्र प ट भ—हृद्यैश्चाप्यधिवासितां ।

लोकपालोपमैः शूरैः सर्वशास्त्रार्थपारगैः ॥१७॥ [N

१८] गुप्तां योधशतैश्चापि नागैर्भोगवतीमिव ।

स्वयं चैवेन्द्रकल्पेन पुरीं देवपुरोपमाम् ॥१८॥ [N

१९] गुप्तामिक्ष्वाकुनाथेन राज्ञा दशरथेन च ।

वराग्निर्वद्भि गुणवद्भिरन्विताम्

द्विजोत्तमैर्वेदषडङ्गपारगैः ।

सहस्रशः सत्यतपोदमान्वितै-

२०] महर्षिकल्पैर्यतिभिर्यतात्मभिः ॥१९॥ [२३

इत्यार्षे रामायणे बालकाण्डे अयोध्यावर्णनं
नाम पंचमः सर्गः ॥५॥

१. ज त ल ट—सर्वशास्त्रविशारदैः ।
प—सर्व्वशस्त्रास्त्रपारगैः ।

२. ज त ल प—०भोगवती यथा ।

३. कै—चैवेन्द्रब्रह्मेण ।

४. ज ल प्र ट—पुरी ।

५. ज त ल प्र ट—देवपुरोपमा ।

६. ज ल प्र ट—सुगुप्तेक्ष्वाकु० । त—स्वगुप्तेक्ष्वा० ।

७. ज त ल प्र ट—सा ।

८. ज त ल प्र प ट—वराग्निमद्भि० ।

९. ज त ल प्र ट—०गुणवद्भिरन्विता ।

१०. ज ल ट—०वेदतदङ्गया० ।
ल—०वेदतरंग० (वेदाङ्ग० इत्यपरहस्तेन) ।

११. ज त ल ट—सहस्रशः । प्र प भ—सहस्रदेः ।

१२. ज व त ल प्र प ट भ—तपोदमान्वितः ।

१३. ज त ल ट—०र्महात्मभिः ।

पुर्यां[1] तस्यामयोध्यायां[2] वेदवेदाङ्गपारगः ।
१] दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥१॥ [१
इक्ष्वाकूणामतिरथो यज्वा धर्मभृतां वरः ।
२] महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥२॥ [२
बलवान् विजितामित्रो नीतिमान्[3] विजितेन्द्रियः[4] ।
३] धनधान्यैश्च[5] विविधैः शक्रवैश्रवणोपमः[6] ॥३॥ [३
आदिराजो मनुरिव[7] प्रजानां परिरक्षिता ।
४] राजा दशरथो नाम बभूव त्रिदशोपमः[8] ॥४॥ [४
तेन सत्याभिसन्धेन त्रिवर्गमनुपश्यता ।
५] पालिताऽभूत्[9] पुरी श्रेष्ठा[10] शक्रेणेवामरावती[11] ॥५॥ [५
हृष्टपुष्टजने तस्मिन् पुरे नैवाबहुश्रुतः ।

---

१. प्र—तस्यां । ट—पुण्यां ।
२. प्र—पूर्यामयोध्यायां ।
३. प्र—सत्यवाग्वि ।
४. रा—नियतेन्द्रियः ।
५. ज त ल—धनधान्यादिविभवैः ।
६. त—०श्चक्रवैश्रव० । ट—०रिन्द्रवैश्रव० ।
७. प्र—मुनिरिव ।
८. व—त्रिदिवोपमः ।
९. प—पालिता सा ।
१०. ज त प्र ट—साथ । ल—नाथ ।
११. व—शक्रस्येवमरा० । त—शक्रेणैवा० ।

६] कश्चिदासीन् नरो नोऽपि कश्चिदन्यायवृत्तिमान् ॥[२]६॥ [६
न चाल्पविभवैः[३] कश्चिदासीत्तत्र जनैः[४] पुरे ।
७] न चाप्यासीदसन्तुष्टः कुटुम्बी तत्र कश्चन ॥७॥ [७
न कदर्यः कश्चिदासीन् नानृती[५] न शठोऽपि वा ।
८] न मानी न च संरंभी न नृशंसो[६] न कुत्सितः[७] ॥८॥ [८
नामहात्मा न[८] पिशुनो न परस्वोपजीवकः[९] ।
९] न चावर्षसहस्रायुर्नदीनो[१०] नाबहुभजः[११] ॥९॥[१२] [N
नराः स्वदारनिरता नार्यश्चासन् पतिव्रताः ।
१०] सुव्रता वृत्तिमन्तश्च[१३] नरा[१४] आसंस्तथा[१४] स्त्रियः ॥१०॥ [९.
नाकुण्डली नामुकुटी नास्रग्वी नाविलेपनी ।

१. ज—वापि ।
२. त—नास्ति ।
३. रा प्र प भ—चाल्पनिचयः ।
४. ज ल ट—पुरे नरः । त—पुरे नवः ।
५. रा—नानृते । ल—नाव्रती ।
६. ट—नृशंसी ।
७. ज त प्र ट—कत्थनः । ल—क्रत्सनः ।
८. प्र—नाप्युशनो ।
९. ब—परस्वोपजीविनः । ल—परं वोपजीवकः ।
प ट—परस्वोपजीविकाः ।
१०. प्र—०र्नामर्षी । कै प भ—०र्नामर्यी ।
११. कै प भ—नाबहुश्रुतः ।
१२. रा—नास्ति ।
१३. प्र भ—धृतिमंतश्च ।
१४. प्र प—नराश्चासं० ।
१५. ज त ल ट—नामाल्यो ।

११] नच[1] दुष्प्रकृतिर्नासीद्दरिद्रो[2] वा पुरोत्तमे ॥११॥ [१०
नामृष्टभूषणधरो[3] न चाप्यासीदनिष्कधृक्[4] ।
१२] नाहस्ताभरणोपेतो नानृती[5] न च नास्तिकः ॥१२॥ [११
नानाहिताग्निर्नायज्वा विप्रो नाप्यसहस्रदः ।
१३] कश्चिन्नासीदयोध्यायां[6] सद्वृत्तरहितो[7] जनः[8] ॥१३॥ [१२
स्वकर्मनिरताश्चासन्[9] सर्वे तत्र द्विजालयः ।
१४] यज्ञाध्ययननिष्ठाश्च[10] विरताश्च प्रतिग्रहात् ॥१४॥ [१३
न नास्तिको नास्तिकवाङ्[11] न कश्चित् क्रोधनो नरः ।
१५] न सूचको[12] न चाशक्तो नाशुचिस्तत्र चाप्यभूत् ॥१५॥[13] [१४
नामृष्टभुङ्[14] न चादाता नासुगन्धो[15] न चानृजुः[16] ।[17]

१. ज त ट—रक्तवस्त्रावृतो नासी० ।
ल—रक्तवस्त्रावृतो नाभू० ।
प्र—नाचारुप्रावृतो नासी० ।
२. प—न कश्चित्तत्र पुरुषः कश्चिद् दरिद्रपुरोत्तमे ।
३. ट—०भूषणधनो ।
४. ब रा—०निष्कधृत् । ज त ल ट—नैवाप्यासीच्च निष्टरः ।
५. ज त ल प्र ट—नानृजुर्न ।
६. रा प भ—कश्चिदासीदयोध्यायां ।
७. कै ब—अश्रीमान् न महाशनः ।
८. ज त ल ट—नास्ति ।
९. रा—सुकर्मनिरतश्चासन् ।
१०. प भ—०यननित्याश्च ।
११. प्र—नानृतवाक् । प भ—नानृतवान् । भ—०तवाक् ।
१२. प भ—न सूयको ।
१३. ब—नास्ति । कै—पुस्तके ऽपरहस्तेन पुनर्विन्यासः ।
१४. ब—चाऋष्टभुङ् ? ।
१५. प्र प—नासुगन्धो० ।
१६. प—नवानृजुः ।
१७. कै—अतः परमधिकः पाठः—
न च वर्षसहस्रायुर्न दीनो नाबहुप्रजः । ज त ल ट—नास्ति ।

१६] न दुःखी पुरुषः कश्चिन्न चासीदनलङ्कृतः ॥१६॥ [N
चारुचातुर्यमाधुर्यशीलाचारगुणान्वितः ।
१७] नार्यश्चासन्नयोध्यायां मृष्टाभरणभूषिताः ॥१७॥ [N
नानात्मवान् न च कृशो न विरूपो न चालसः ।
१८] कश्चिदासीदयोध्यायां नाश्रीमान् नामहात्मवान् ॥१८॥ [N
न दीनो नापि चोद्विग्नो नातुरो न भयाकुलः । [१५उ
१९] द्रष्टुं शक्यो ह्ययोध्यायां नापि राजन्यभक्तिमान् ॥१९॥ [१६उ
वर्णश्रेष्ठान् पूजयन्तः पितॄन् देवातिथींस्तथा । [N
२०] आसन् दीर्घायुषस्तत्र नराः सत्यपरायणाः ॥२०॥ [१८
ब्रह्म पर्यचरन् क्षत्रं वैश्याः क्षत्रमनुव्रताः ।
N] शूद्राश्चैवापि वर्णास्त्रीन् शुश्रूषन्तोऽनसूयवः ॥२१॥ [१९
आसीत् क्षत्रं ब्रह्ममुखं विट्शूद्रं राजभक्तिमत् ।
२१] न योनिसङ्करश्चापि तत्र नाचारसंकरः ॥[15]२२॥ [N

१. ज त ल प्र ट भ—रूपचातुर्य० ।
२. रा प्र भ—मृष्टाभरणवाससः । प—मृषाभरणवाससः ।
३. ज त प ट—बालिशः । ल—बाशिलः ।
४. ज त ल ट—न महाशनः ।
५. ज—न क्रशो । त ल—नातरो ।
६. ज प्र प भ—भयातुरः ।
७. ल—शक्तो ।
८. ज त ल प्र ट—वर्णज्येष्ठान् ।
९. रा—पूरयन्तः ।
१०. प्र प ट—पितृदेवातिथींस्तथा । भ—देवातिथीनपि ।
११. रा—ब्रह्मचर्यचरत् । प—ब्रह्मचर्यवर० ।
१२. प्र—क्षत्रं वैश्यस्तथैव च । इत्यपरहस्तेन ।
१३. ज त ल प्र ट—नास्ति ।
१४. ल—चाननसंकरः ।
१५. प—श्लोके पूर्वापरार्द्धव्यत्ययः ।

एवमिक्ष्वाकुनाथेन पालिता साऽभवत् पुरी ।
२२] यथा पुरस्तान्मनुना मानवेन्द्रेण भूरियम् ॥ २३॥[1] [२०
योधानामग्निवर्णानां[2] संयुगेष्वनिवर्तिनाम्[3] ।
२३] गुप्ता पुरी सहस्रैः सा सिंहैरिव गिरेर्गुहा ॥२४॥ [२१
पू२४] कांभोजदेशजैश्चापि[4] हयैर्हरिहयोपमैः[5] ॥२५॥[6] [२२पू
विन्ध्यपर्वतजैश्चापि[7] गजैर्हैमवतैस्तथा[8] ।
२५] सत्त्ववीर्यगुणोपेतैः[9] शूरैरव्यालचेष्टितैः[10] ॥[11] २६॥ [२३
पू२६] पद्माञ्जनकुलोद्भूतै[12] भद्रमन्द्रमृगान्वयैः[13] ।[14]

१. प—श्लोके पूर्वापरार्धव्यत्ययः ।

२. ज त ल प्र प भ—०मग्निकल्पानां । ट—०कल्पाणां ।

३. प्र—०ष्वनुवर्तिनां । त ०पु निवर्तिनां ।

४. प्र प ट—कांबोजदे० । भ -कबोजदे० ।
ज—०जदेशजैरिव । प त ल प्र ट—०जैश्चैव ।

५. प्र—हयैर्वानायुजैस्तथा । प—हयैर्वाणायुजैस्तथा ।
(अत्र वाणजैरिति संभाव्यते)

६. प्र प—अतः परमधिकः वङ्गसम्मतः पाठः—
नदीजैर्वाह्लिजैश्चैव कीर्णा हरिहयोपमैः ।

७. प्र—०तजैश्चैव ।

८. प्र—नागैर्हैमजैस्तथा । प भ—नागैर्हैम० ।

९. प्र—सत्यवीर्यगु० ।

१०. प—शूरैरचलसन्निभैः ।

११. ज त ल ट—नास्ति ।

१२. रा प—कुलोपेतै० ।

१३. कै—'भद्रमद्रमृगान्वयै' रित्यपरहस्तेन पुनर्विन्यासः ।
व—'०जद्रमंद्रमृगान्वयै' रित्यपरहस्तेन पुनर्विन्यासः ।

१४. ज त ल प ट—नास्ति ।

प्र—अतः परमधिकः वङ्गशाखीयः पाठः—
ऐरावतकुलीनैश्च वामनैरपि च द्विपैः [पैः?] ।
भद्रैर्मन्द्रैर्भद्रमन्द्रैर्मृगमन्द्रैश्च संयुता ॥

३२७] सा पुरी बहुभिः कीर्णा तथाऽऽसीद्गन्धहस्तिभिः ॥२७॥[२४
सा योजनद्वयं भूमेः सत्यनाम्नी प्रकाशते ।
२८] सा पुरी यत्र राजाऽऽसीद्राजा दशरथस्तथा ॥ २८॥ [२६
तां सत्पथां वै दृढतोरणार्गलां
महर्द्धिभि र्वेश्मशतैरलङ्कृताम् ।
पुरीं सभोद्यानवतीमनुत्तमां
२९] स कोशलेन्द्रो नृपति र्व्यपालयत् ॥२९॥ [२८

इत्यार्षे रामायणे दशरथसौराज्यवर्णनं
नाम [षष्ठः] सर्गः ॥ ६ ॥

१. ब—रथासी० । प भ—तदासी० प्र—तदासीद्द्वंद्वहस्तिभिः
२. ज त प्र ट—आयोजनाद्वा भूयो वा ।
ल—आयोजना वा भूयो वा ।
प—आयोजनत्वाद् भूमेः सा ।
भ—सा योजने द्वे तु भूमेः ।
३. ज ब त ल ट—सातिधामा । प्र—सत्यधामा ।
४. ज ब त ल ट—व्यकाशत । ट—व्यकाशयत् । प—प्रकाश्यते ।
५. प्र भ—राजासीत्पुरा ।
६. कै—०'थो महान् ' इत्यपरहस्तेन पुनर्विन्यासः ।
रा प्र—दशरथोनघः । भ—०थो नृपः ।
७. प—तस्यां दशरथो राजा वस्तोप्पतिरिवावसत् ।
ज त ल ट—नास्ति ।
८. रा—सत्यवादी ।—सत्यधाम्नी । प भ—सत्यनाम्नीं ।
९. ज त ल ट—दृढतोरणाकुलां ।
त—दृढतोरणां कुलां । प—दृढतोरणयोजनार्गलां ।
१०. ट—महर्षिभि० । प—गृहैर्विचित्रैरुपशोभितान्तरा ।
११. ल—पुरीं सभोग्यानव० ।
प—प्रियसामोद्यानव० ।
१२. प्र भ—कोशलेन्द्रो नृ० ज त ल ट—०ह्यपाल० ।
प—शशास वै शक्रसमो नराधिपः ।

मन्त्रिणावृत्विजौ चैव तस्यास्तामृषिसत्तमौ ।
१] वसिष्ठो वामदेवश्च वेदवेदाङ्गपारगौ ॥१॥ [४
अष्टावन्ये बभूवुश्च तस्यामात्या महीपतेः ।
२] शुचयश्चानुरक्ताश्च नित्यं प्रियहिते रताः ॥२॥ [२
धृष्टिर्जयन्तो विजयः सिद्धार्थोऽर्थार्थसाधकः ।

१. प्र—अतः पूर्वं दाक्षिणात्यसम्मतोऽधिकः पाठः—
तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मन[ः]
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रता[ः]
अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकार्येषु नित्यशः ।
धृष्टिर्जयन्तो विजयः सिद्धार्थोऽत्यर्थसाधकः ।
अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमो महान् ।
२. प्र—ऋत्व [त्वि ?] जौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ।
(अयं हि पाठः दाक्षिणात्यसम्मतः)
३. प्र प—वशिष्ठो ।
४. प्र—मन्त्रिणश्च तथापरे । दाक्षिणात्यसम्मतः पाठः ।
५. प्र—अतः परमधिकः दाक्षिणात्यसम्मतः पाठः—
नयज्ञोऽप्यथ जावालिः काश्यपोऽप्यथ गौतमः ।
मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विज [ः] ॥
एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्विकाः ।
६. प भ—शुचयस्त्वनुरक्ताश्च ।
७. प—सत्यप्रिय० ।
८. प्र—नास्ति ।
९. प—धृष्टिर्ज० । ज त ट—वृष्टिर्ज० ।
१०. प—०र्थोऽप्यर्थ० ।

३] अशोको धर्मपालश्च सुमन्त्रश्चाष्टमोऽभवत् ॥३॥ [२
ह्रीमन्तो विनयोपेता नीतिज्ञा विजितेन्द्रियाः । [६पू
४] मतिमन्तः सावहिता राजनिर्देशकारिणः ॥४॥[3]
तेजः क्षमा-वयः-प्राप्ताः स्मितपूर्वाभिभाषिणः । [७
५] अलुब्धा धृतिमन्तश्च सत्यधर्मपरायणाः ॥५॥ [N
नैषामविदितं किञ्चित्स्वेषु चैव परेषु च ।
६] चिकीर्षितं भवेद्राज्ञो मित्रोदासीनविद्विषाम् ॥६॥ [८
धर्माचारविवेकज्ञाः सर्वत्र समदर्शिनः । [N
७] कोशसङ्ग्रहणे युक्तास्तथा बलपरिग्रहे ॥७॥ [११पू
पुत्रेऽपि च प्राप्तदोषे धर्मतो दण्डपातिनः । [१०उ
८] अद्रोग्धारश्च धर्मेण शत्रोरप्यकृतागसः ॥८॥ [११उ
प्रागतज्ञानविज्ञाना पितृपैतामहोचिताः ।
९] रक्षितारश्च वर्णानां नित्यं विषयवासिनाम् ॥९॥ [१२

१. प—सुमंत्रो मन्त्रकोविदः । ट—सुमित्रश्चाष्टमो० ।
२. त ल—०मन्तस्त्ववहिता ।
ज प्र ट—०मन्तः स्ववहिता० ।
भ—०मन्तः सुविहिता० ।
३. प—अयं श्लोकः १२ श्लोकात्परं विज्ञेयः ।
४. ट—तेजोवयः कृपाप्राप्ताः ।
५. त—०भिभाषणः । प्र—०पूर्वाविभाषिणः ।
६. ट—चैवापरेषु ।
७. ज त ल प्र प ट भ—ह्यचिकीर्षितं ।
८. त—दंडतो धर्मपातिनः ।
९. अद्रोग्धारः स्वधर्मेण ।
१०. ज त ल—आगतानागतज्ञानाः ।
प्र प भ—आगतज्ञा० । ट—आगतानागत० ।
११. प—०तामहोहिताः । ट—०तामहोद्धिताः ।

कोशसङ्ग्रहणे[1] युक्ता ब्रह्मस्वस्याविहिंसकाः[2] ।
१०] अतीक्ष्णचण्डा नेतारः[3] परार्थबलपौरुषाः[4] ॥१०॥ [१३
परस्परेणाविरुद्धाः प्रीतिमन्तः प्रियंवदाः ।
११] परापवादविरता[5] गुणाढ्या[6] नच गर्विताः ॥११॥ [N
आर्यवेषाः[7] सुमनसो[8] नच सन्दिग्धनिश्चयाः ।
१२] नरेन्द्रवचनासक्ताश्चेतसा[9] तत्परायणाः ॥[10][11] १२॥ [N
सुगुणेषु[12] परिख्याता नामरूपगुणान्वयैः[13] ।

१. प्र—कोशसंरक्षणे ।

२. प्र—०स्यारहिंसकाः । प--स्यापि हिं० । भ--०स्याविहिं० ।

३. ज ट—अतीक्ष्णदंडा वेत्तारः ।
त ल प्र—अतीक्ष्णदंडवेत्तारः । ब—अतीक्ष्णदंडनेतारः ।

४. ज ल ट--०बलपौरुपम् । प--०स्मा बलपौरुषे ।
भ--परात्मबलपौरुप ।

५. त--परापवादविरुद्धाः ।

६. ज त ल ट—पुण्याढ्या ।

७. ज त ल ट--आर्यवेशाः ।

८. ज त ट--सुवचसो । ल--सत्यवाचो ।

९. ज त ल प्र भ--नरेन्द्रवचनासक्तचेतसः ।
ट · नरेन्द्रवचनासक्तमानसः ।

१०. ज त ल ट—सत्पराक्रमाः ।

११. प—नास्ति ।

१२. श ज ल प—स्वगुणेषु परि० । त—स्वगुणेष्वपरि० ।
प्र--स्वगुणेष्वपि विख्याता ।
ट--स्वगुणेपूपविख्याता ।

१३. ज त ल ट—नामरूपगुणान्विताः ।
प्र—नास्ति ।

१३] परराज्येऽपि विख्याता नयबुद्धिगुणांशुभिः ॥१३॥ [N
आसंस्तदाऽनुसंरक्ताः सर्वे वर्णाः स्वकर्मभिः ।
१४] नासीत् पुरे वा राष्ट्रे वा तस्करो नाऽशुचिर्नरः ॥१४॥[१४उ
न दुष्टः कश्चिदप्यासीत् परदाराभिमर्षकः ।
१५] कृत्स्नमासीदनुद्विग्नं राष्ट्रं तैः परिपालितम् ॥१५॥ [१५
प्रशस्तमेवमासीत् तद्राष्ट्रं पुरवनानि च । [N
१६] अमात्यैरीदृशैस्तैस्तु राजा दशरथोऽन्वितः ॥१६॥ [१९उ
धर्मतः पालयामास पृथिवीमनुरञ्जयन् ।
अवेक्षमाणश्चारेण महीं सूर्य इवांशुभिः ॥१७॥ [२०
१७] नाध्यगच्छत् क्वचित् कश्चिदैक्ष्वाकः शत्रुमात्मनः ॥१८॥[२२पू

१. ज त ल ट--परराष्ट्रेषु ।
प्र—नास्ति ।
२. ज त—मयबुद्धिगुणाः शुभाः । ल—नयबुद्धिगणा शुः ।
ट—मवबुद्धिगुणा शुभाः । भ—नामबुद्धिगु० ।
३. त ल—आसंस्तदनुसं० । प्र—आसंस्तत्र गृहीतास्ते ।
४. ज त—सुकर्मसु । ल प ट--स्वकर्मसु ।
५. रा—नाशुचिर्नराः । प्र प—नाशुचिर्नरः । भ ट—वाशुचिर्नरः ।
ट—वाशुचि० ।
६. भ--सर्वमासीदनु० ।
७. त—तं ।
८ प्र—प्रशस्तं सर्वमेवासीद्राष्ट्रे परबलानि च ।
प—प्रसस्तं सर्वमेवासीद्राष्ट्रेषु नगरेषु च ।
९. ज त ल ट—नास्ति ।
१०. कै रा ज भ—अवेक्ष्यमाण० ।
११. रा—नाप्रगच्छत् । प्र—नाधिगच्छेत् ।
१२. रा प्र—किञ्चिदिक्ष्वाकुः । व—कश्चिदक्ष्वाकः ।
प--तुल्यं विशिष्टं । भ—कश्चिदक्ष्वाकुः ।
ट—कंचिदक्ष्वाकुः ।

तैर्मन्त्रिभि र्भर्तृहितै निविष्टैर्[1]
विद्वद्भिराप्तैः कुशलैः समर्थैः[2] ।
स पार्थिवो दीप्तिमवाप युक्तस्[3]
१८] तेजोमयैर्गोभिरिवाम्बरेऽर्कः[4] ॥१९॥ [२४

इत्यार्षे रामायणे आदिकाण्डे[5] अमात्यवर्णनं
नाम सप्तमः सर्गः ॥७॥

---

१. ज त ल प ट—०र्भर्तृहिते ।
२. प्र—समस्तै [:]
३. कै—युक्तैस् ।
४. ज त ल ट—तेजोमयैरर्क इवांशुसंघः ।
५. ज त ल प्र०—बालकांडे ।

तस्य धर्मप्रधानस्य धर्मज्ञस्य महात्मनः ।
१] सुतार्थं तप्यमानस्य नाभूद्वंशकरः सुतः ॥ १॥ [१
तस्य चिन्तयतो बुद्धिरुत्पन्नेयं महामतेः ।
२] सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् ॥२॥ [२
सुनिश्चितां गतिं कृत्वा यष्टव्ये वसुधाधिपः ।
३] मन्त्रिभिः सह संमंत्र्य तैः स्वामिहितकारिभिः ॥३॥ [३
तत्राब्रवीदिदं राजा सुमन्त्रं मन्त्रिसत्तमम् ।
४] शीघ्रमानय सर्वांस्त्वं वसिष्ठप्रमुखान् गुरून् ॥४॥ [४
एवमुक्तो नृपतिना सुमन्त्रो वाक्यमब्रवीत् ।
५] नरेन्द्र श्रूयतां तावत्-पुराणे यन्मया श्रुतम् ॥५॥ [६.१
सनत्कुमारो भगवान् पुरा कथितवान् कथाम् ।
६] भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम् ॥६॥ [६.२

१. रा ज—नासीद्वंशकरः ।

२. ट—तस्य धर्मप्रधानस्य नाभूद् वंशकरः सुतः ।

३. प—०रुत्पन्नैवं महात्मनः ।

४. प—स्वामिनो हितकारिभिः ।

५. कै—भद्रंस्त्वां ।

६. ल प ट—द्विजान् ।

७. कै ब—सुमन्त्री ।

८. त ल ट—यथावत् प्रोक्तवान् पुरा ।

९. ब—भविष्ये ।

अस्तीह कश्यपसुतो विभाण्डक[1] इति श्रुतः ।
७] ऋष्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ॥७॥ [९.३
स वने नित्यसंवृद्धो[2] मुनिपुत्रो वनेचरः ।
८] नान्यं[3] प्रज्ञास्यते कश्चिन्मानवं[4] पितृवर्जितम् ॥८॥ [९.४
तस्य[5] नूनं ब्रह्मचर्यं भविष्यति महात्मनः ।
९] लोकेषु प्रथितं चोग्रं[6] तपस्तस्य भविष्यति ॥९॥ [९.५
तपोरतस्य तस्यैवं[7] कालः समभिवर्तस्यति[8] ।
१०] अग्निं शुश्रूषमाणस्य पितरं च यशस्विनः[9] ॥१०॥ [९.६
एतस्मिन्नेव काले तु लोमपादः[10] प्रतापवान् ।
११] अङ्गेषु प्रथितो राजा भविष्यति महाबलः ॥११॥ [९.७
तस्य[11] व्यतिक्रमभवा भविष्यत्यतिदारुणा ।
१२] अनावृष्टिर्जनपदे क्षयार्थं[12] बहुवार्षिकी ॥१२॥ [९.८

---

१. प—विभाण्डकमिति ।

२. त ल ट—जातु संवृद्धो ।

३. रा ज ब भ—नान्यत् ।

४. ट—किञ्चिन्मानवं ।

५. ल—तस्याच्छिन्नं । ट—तस्याच्छिद्रं ।

६. भ—चापि ।

७. ल ट—तस्यैव ।

८. ज ल—समतिवत्स्यति । त—सम्प्रतिवत्स्यति ।
ट—समतिवर्त्स्यति । भ—समाभिवर्तते ।

९. ज भ— यशस्विनं । त ट ल—तपस्विनः ।
प—तपस्विनं ।

१०. ल—लोपपादः (?) ।

११. प—तस्याप्यतिक्रमभवा ।

१२. कै ब—क्षया च ।

अनावृष्ट्या तया राजा तदा संपरिकर्षितः[1] ।
१३] वक्ष्यंति[2] ज्ञानिनो विप्रानन्नावृष्टिप्रतिक्रियाम् ॥१३॥ [९.९
भवन्तः श्रुतिदृष्टार्थौ[3] लोकवृत्तान्तवेदिनः[4] ।
१४] ममाज्ञां दातुमर्हन्ति यथावत्प्रशमेदियम् ॥१४॥ [९.१०
ते नमाज्ञापयिष्यन्ति श्रुतवेदान्तवेदिनः[5] ।
१५] विभाण्डकसुतं राजन् सर्वोपायैस्त्वमानय ॥१५॥ [९.११
आनाय्य च महाराजं[6] ऋष्यशृङ्गमृषेः सुतम् ।
१६] प्रयच्छास्मै सुतां शान्तां विधिना सुसमाहितः ॥१६॥ [९.१२
तेषामेतद्वचः[7] श्रुत्वा स राजा चिन्तयिष्यति ।
१७] येनोपायेन[8] वै शक्य[9] इहानेतुमिति प्रभुः ॥१७॥ [९.१३
स निश्चयं यदा[10] राजा स्वयं नाधिगमिष्यति ।
१८] तदाऽमात्यान् समाहूय प्रतिवक्ष्यति निश्चयम् ॥१८॥ [९.१४
पुरोहितं[11] जनांश्चान्यान्मन्त्रनिश्चयकोविदान् ।[12]

---

१. रा—तदा स परिकल्पितः । ज प—तदा स परिक० ।
ल ट—स तदा परिक० । म—तथा स परि० ।
२. ज ल ट—प्रक्ष्यति । त—प्रकृति० । प—प्रवृत्ति० ।
३. श्रुतिदृष्टान्ते । भ—श्रुतिसम्पन्ना ।
४. लॆ—लोकदृष्टान्तवेदिनः ।
५. प—ब्र[ा?]ह्मणा ब्रह्मवादिनः ।
६. कै ज ब—महाराजन् । त ल ट—महातेजा ।
प—महाराजा ।
७. प—तेषां तद्ववचनं ।
८. प ट भ—केनोपायेन । कै—शोधनरूपेण यकारस्थाने ककारः कृतः ।
९. ट भ—शक्यमिहानेतुमिति ।
१०. ब प भ—तदा ।
११. ब—पुरोहितां ।
१२. ट—पुरोहितानां चान्यानां मन्त्रनिश्चयकोविदान् (म्?)

१९] ते चापि पृष्टा नैवास्य प्रतिपत्स्यन्ति निश्चयम् ॥१९॥[1] [N
पुरोहितममात्यांश्च प्रेषयामास यत्नतः ।[3]
२०] आनयध्वं महाभागमृष्यश्रृङ्गं सुसत्कृतम् ॥२०॥[5] [N
ते तु राज्ञो वचः श्रुत्वा व्यथिता विक्लवाननाः ।
२१] न गच्छेम ऋषेर्भीता अनुनेष्यन्ति ते नृपम् ॥२१॥ [९.१५
वक्ष्यन्ति चिन्तयित्वा ते तस्योपायान् बहूंस्ततः ।
२२] वयं तमानयिष्यामो न च दोषो भविष्यति ॥२२॥[9] [९.१६
वेश्याभि मुनिवेषाभिरानेष्यामः ऋषेः सुतम् ।
२३] भोजयित्वाऽभ्युपायेन स्वां पुरीं पितुराश्रमात् ॥२३॥ [N
भविष्यति ततो वृष्टिस्तस्य राज्ञो महात्मनः ।
२४] तस्याभ्यागमनादेव ऋषिपुत्रस्य धीमतः ॥२४॥[14] [N

१. प ट—अतः परमधिकः पाठः—
यदा तदा स्वयं राजा मन्त्रिणस्तत्र वक्ष्यति ।
२. प—प्रेषयिष्यति ।
३. ट—नास्ति ।
४. व—॰गमृषिश्रृङ्गं ।
५. ट—आनयध्वं यत्नात्तस्मादृष्य श्रृङ्गमृषेः सुतम् ।
६. ट—च ।
७. इति वक्ष्यन्ति ।
८. ट—बहूंस्तथा ।
९. भ—पश्चिमपार्श्वेऽतः परमधिकः पाठः—
इति तेषां वचः श्रुत्वा भूयः स पृथिवीपतिः ।
तृतीयेऽहनि निश्चित्य मन्त्रिभिर्मन्त्रनिश्चयम् ॥
१०. प—वेश्याभिर्मुनिवेष्याभिरानयिष्यन्ति ।
११. प ट भ—लोभयित्वाभ्युपायेन ।
१२. प—वृष्टी राष्ट्रे तस्य ।
१३. ट—वर्षिष्यति ततो देवस्तस्य राष्ट्रे महीपतेः ।
१४. रा ज ल प भ—मुनिपुत्रस्य ।

स राजा विधिवत्[1] कन्यां[शान्तां]तस्मै प्रदास्यति ।
२६] स्वकां[2] दुहितरं भार्यां रूपौदार्यगुणान्विताम् ॥२५॥ [N
एवं स[3] तस्य[3] जामाता भविष्यति महायशाः[4] ।
२७] लोमपादस्य राजर्षेर्ऋष्यशृङ्गः प्रतापवान् ॥२६॥ [N
राज्ञो दशरथस्यापि स पुत्रानभिकांक्षितान्[5] ।
२८] विधास्यति[6] महायज्ञे[7] हविर्हुत्वा[8] हुताशने ॥२७॥ [N
सनत्कुमाराद्वचनमिति[9] वै[10] संश्रुतं मया[10] ।
२९] ऋषिमध्ये[11] कथयतस्तथा[11] तदिति मे मतम् ॥२८॥[12] [N
अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत । [६.१२पू
३१] तस्य पुण्यात्मनः सर्वो[13] ब्रह्मचर्यव्रतस्य हि[14] ॥२९॥ [N

---

१. ट—विधिवच्छांतां ।

२. कै—स्वकीं । अपरहस्तेन विन्यासः ।

३. ट—तस्य स० ।

४. ट—महातपाः ।

५. भ—०नभिकांक्षति ।

६. विधास्यते ।

७. ट—महातेजा० । भ-महायज्ञं ।

८. हविर्हुत्वाध्वराग्निषु ।

९. ज—सनत्कुमारव० । प-शनत्कुमारवचनमिति ।

१०. ब—चैवं श्रुतं मया । त-चैव मया श्रुतं ।
प—तत्र संश्रुतं मया । ट-चैवं मया श्रुतं ।

११. ल—ऋषिमध्ये कथयतस्ततस् ।

१२. भ—अतः परमधिकः वङ्गसम्मतः पाठः—

मन्त्रिभिः सहितश्चैव तथा स कृतवांस्तदा ।
अंगराजो महाप्राज्ञो लोमपादो महायशाः ॥

१३. भ—सर्वा ।

१४. ज ल प ट—ह । भ—च ।

आनीतिर्ऋष्यशृङ्गस्य विस्तरेण ममोच्यताम् ।[1] [६.१९उ
३२] मृगैः सार्धं प्रवृद्धस्य कौमारब्रह्मचारिणः ॥३०॥ [N
सुमन्त्रो नोदितो राज्ञा प्रोवाचेदं वचस्तदा ।[2]
६.१] आनीति ऋष्यशृङ्गस्य येनोपायेन मन्त्रिभिः ॥३१॥[१०.१
लोमपादं तमूचुस्ते सहामात्यपुरोहिताः ।
६.२] उपायोऽत्र निरापायो योऽस्माभिः परिचिन्तितः ॥३२॥[१०.२
ऋष्यशृंगो वनचरस्तपस्यध्ययने रतः ।
६.३] अनभिज्ञः स नारीणां विषयाणां सुखस्य च ॥३३॥[१०.३
इन्द्रियार्थैरभिरतै नरचित्तप्रमाथिभिः ।
६.४] पुरमावाहयिष्यामः क्षिप्रं च प्रविधीयताम् ॥३४॥ [१०.४
गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलङ्कृताः । [१०.५पू
६.५] उपायज्ञाः कलाज्ञाश्च वैशिकोपरिनिष्ठिताः ॥३५॥ [N
रहस्युपेत्य ता एवमानयन्तु शुभव्रतम् ।[1]
६.६] लोभयित्वा यथा योगं येनोपायेन शक्यते ॥३६॥ [N

---

१. रा—ममोचिताम् ।
२. प—नास्ति ।
३. ज ल भ—वचस्ततः ।
४. प—अनीत ऋष्यश्रृङ्गोऽभूद् । भ—आनीतिमृष्यश्र० ।
५. प—सहामात्यं पुरोहिताः ।
भ—सहामात्यपुरोहितं ।
६. भ—तपस्येकरसे ।
७. ज—गुरुः ।
८. रा प—सुषस्य ।
९. प—०र्थैरभिमते० ।
१०. रा—०मावाहयिष्यामि । प—पुरं तमानयि० ।
११. प—वैशिके परि० । भ—वैसिके परि० ।
१२. प—रहस्युपेत्योपायेन आनयंतु पतिव्रतं ।

श्रुत्वा तथेदं राजा[1] स प्रत्युवाच पुरोहितम् ।
६.७] मन्त्रिणश्च स धर्मात्मा तथा चक्रुश्च ते तदा ॥[2] ३७॥[१०.६
पू९.१०] वारमुख्याश्च[3] ता गत्वा वनं प्रतिभयं महत् । [१०.६
N] ऋषिपुत्रस्य धीरस्य नित्यमाश्रम[4]वासिनः ॥३८॥ [१०.७उ
पित्रा स नित्यं निर्दिष्टो[5] नातिचक्राम आश्रमात्[6] ।[१०.८
N] आश्रमस्याविदूरस्था यत्नं कुर्वन्ति दर्शने ॥३९॥ [१०.७पू
उ९.११] विभाण्डकभयोपेता[7] लतागुल्मसमावृताः ।
चारयित्वा[8] तु तमृषिमाश्रमादभिनिर्गतम् ॥४०॥[N
९.१२] तस्य संदर्शने नष्टा[9] ऋषिपुत्रान्तिकं ततः[10] ।[11] [N
उ९.२०] न तेन जन्मप्रभृति दृष्टपूर्वो[12] वनेचरः ॥४१॥

१. ज प भ—तं राजा । ल—राजा च ।

२. प—अतः परमधिको वङ्गसम्मतः पाठः—

फलवन्तश्च ये वृक्षाः समूलविटपास्तथा ।
रोपयित्वा बृहन्नौषु सुरभीणि स पार्थिवः ॥
पानानि च सुगन्धीनि फलान्यास्वादवन्ति च ।
सुसमृद्धास्तथा नौभिः प्रयाता यत्र वै मुनिः ॥

३. कै ब ल—वारमुख्यश्च । ज—वधूमुख्यश्च ।

४. ज—नित्यमश्रमिणस्तथा ।

५. ज प भ—संदिष्टो ।

६. ज प—नौभिर्निर्याति चाश्रमात् ।

७. त ल प भ—विभाण्डकभयोद्विग्ना ।

८. ज प—वारयित्वा ।

९. प—तस्थुर्ऋषिपुत्रस्य तास् ।

१०. भ—गताः ।

११. भ—पुस्तके ऽतः परं वङ्गशाखीयस्य रामायणस्य नवमसर्गस्थ १३ श्लोकात् २० श्लोकस्योत्तरार्द्धपर्यन्तः पाठः फेनाप्युद्धृत्यो. त्तरपार्श्वे विन्यस्तः । स च तत्रैव द्रष्टव्यः ।

१२. प—दृष्टं पूर्वं ।

पू९.२१] स्त्री वा[1] पुमान् वा यच्चान्यत्सर्वं नगरराष्ट्रकम् । [१०.९
ऋते पितुर्ऋषिश्रेष्ठात्[2] स जगाम यदृच्छया ॥४२॥
N] वैभाण्डकिस्तत्र ताश्च प्राप चैव पुराङ्गनाः[3] ।
ततः कदाचित् तं देशमाजगाम यदृच्छया ॥[4]४३॥
दृष्ट्वैव च सुचार्वङ्ग्यस्तास्तदा[5] तनुमध्यमाः । [१०.१०
N] ताश्चित्रवेषाभरणा गायन्त्यो मधुरस्वराः॥४४॥[१०.११पू
उ९.२१] तं देशमुपसंगम्य[6] जातकौतूहलो मुनिः ।
पू९.२२] विभाण्डकसुतो जिष्णुस्तस्थौ[7] विस्मितमानसः ॥[8]४५॥[N
ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् । [१०.११उ
कस्त्वं[9] किं[10] वर्तसे चेह ज्ञातुमिच्छामहे वयम् ॥४६॥
९.२४] एकश्च विजने घोरे वने चरसि शंस नः ।[11] [१०.१२

---

१. ज—नास्ति ।

२. रा—पितृऋषिश्रे० ।

३. ज भ—वराङ्गनाः ।

४. रा ब प—नास्ति । के—उत्तरपार्श्वे ऽपरहस्तेन ।

५. ज प—सुचार्वङ्गीस्तास्तदा ।

६. प—तद्देशमुपशं ।

७. प—धीमांस्तस्थौ ।

८. प—अतः परमधिको वङ्गसम्मतः पाठः—
ताश्च तं विस्मितं दृष्ट्वा जगुष्कलपदाक्षरम् ।
गीतं मधुरभाषिण्यो जहसुश्चायतेक्षणाः ।
अब्रुवंश्चैनमभ्यासमागम्य मदविह्वलाः ।

९. प—कस्य सुतश्चासि ।

१०. प—तं । भ—तत् ।

११. प—अतः परमधिकः वङ्गसम्मतः पाठः—
ज्ञातुं त्वां वयमिच्छाम तत्त्वमाचक्ष्व नः प्रभो ।

९.२५] अदृष्टपूर्वास्[1]तास्तेन काम्यरूपधराः स्त्रियः ॥[2] ४७॥
हार्दात्तस्य मतिर्जाता व्याख्यातुं पितरं ततः । [१०.१३
९.२६] विभाण्डको मम पिता पुत्रस्तस्याहमौरसः ॥४८॥
ऋष्यशृङ्ग इति ख्यातं[3] नाम कर्म च मे[4] भुवि । [१०.१४
९.२७] इहाश्रमपदेऽस्माकं समीपे[5] शुभदर्शनाः ॥[6] ४९॥
करिष्येऽतिथिपूजां वः सर्वेषां विधिपूर्वकम् । [१०.१५
९.२९] ऋषिपुत्रवचः श्रुत्वा सर्वासामभवन्मतिः ॥[9] ५०॥[१०.१६
तत्राश्रमपदं[10] द्रष्टुं जग्मुः सर्वाश्च[7] तत्र ह ।[8] [१०.१६
९.३०] गतानां तत्र वै पूजां चक्रे वैभाण्डिकस्ततः[11] ॥५१॥
इदमर्घ्यमिदं पाद्यमिदं मूलं फलं[12] च नः[13] । [१०.१७
९.३१] प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः ॥ ५२॥

---

१. प—अदृष्टपूर्वास्ता दृष्ट्वा चारुरूपधराः ।

२. प—अतः परमधिको वङ्गसम्मतः पाठः—
ऋषिपुत्रस्तदात्मानमाख्यातुमुपचक्रमे ।

३. कै रा ज व ल भ—ख्यातो ।

४. रा—मे प्रथितं ।

५. भ—समीपं ।

६. ज—इहाश्रमपदैः साकं समीपैः शुभदर्शनैः ।

७. ज ल—सर्वासां । प—सर्वाश्च ।

८. प—ताश्च तत्र ह ।

९. प—नास्ति ।

१०. ज ल—तमाश्रमपदं ।

११. कै—वैभण्डिकिस्ततः । ज—वैभाण्डिकिस्तदा ।
ल प भ—वैभांडकिस्तदा ।

१२. व—मूलफलं ।

१३. रा—चरुः ।

१४. प—अतः परमधिको वङ्गसम्मतः पाठः—
ऋषिशापभयोद्विग्ना गमनाय मतिं दधुः ।

उ६.३२] गीतमाधुर्यभाषिण्यो जहसुश्चायतेक्षणाः ।[1] [2]
फलान्याश्रमजातानि यदि रोचन्ति वै द्विज[3] ॥५३॥
६.३३] अस्माकमपि मुख्यानि फलानीमानि सन्ति वै ।
N] प्रतिगृह्णाण भद्रं ते भक्षयैतानि मा चिरम् ॥[4][5]५४॥[१०.१९
अथास्मै प्रददुःस्वादून् मोदकानं फलसन्निभान् ।[१०.२०उ
६.३४] अन्यांश्च विविधान् भक्ष्यान् मधूनि मधुराणि च॥[6]५५॥[N
तानास्वाद्य[7] स तेजस्वी फलानीति त्वमन्यत ।
N] अनाचाराणि[8] दीर्घाणि वने[9] वननिवासिनाम्॥५६॥[१०.२१
N] ततस्तु तं समालिङ्ग्य सर्वा हर्षसमुत्सुकाः[10] ।[11] [१०.२०पू
उ६.३५] परिषस्वजिरे[12] चैनं हसन्त्यो मदविह्वलाः ॥५७॥[N
पू६.३६] परिपस्पृशिरे चैनं पीनैरुरसिजैः सुखैः[13] ।[14] [N

१. ज—गीतं माधु० ।
२. प—अतः परमधिकः पाठः—
अथैनमूचुर्भीताश्च स्मयमाना इदं वचः ।
३. ज—द्विजाः ।
४. प—नास्ति ।
५. प—पूजां च ।
६. प—अतः परमधिकः वङ्गसम्मतः पाठः—
तीर्थोदकमिदं तावत् पीयतामिति भूसुर ।
७. ज ल प भ—तान्यास्वाद्य ।
८. कै प भ—अनास्वादितपूर्वाणि । ज—०णि दुर्गाणि ।
९. भ—वनं ।
१०. प—सहर्षं च समुत्सुकाः ।
११. ल—अतः परं ४३ श्लोकस्य प्रथमः पादः पुनरावर्तितः ।
१२. ज—परिषष्वजिरे ।
१३. प—मुहुः ।
१४. प—अतः परमधिकः वङ्गसम्मतः पाठः—
मधूनि च सुगन्धीनि पीत्वा प्रमुदितोऽभवत् ।
सुकुमारैश्च तैरङ्गैस्ताभिः स्पृष्टो व्यमुह्यत ॥
स्पृहया[मा]स तासां च स्पर्शस्य ललितस्य च ।

आपृच्छ्य च[1] तदा विप्रं व्रतचर्यां निवेद्य च ॥५८[१०.२२पू
६.४०] स्वमाश्रमपदं तस्य व्यपदिश्याविदूरतः[2] ।
N] गच्छन्ति स्मापदेशेन भीतास्तस्य पितुः स्त्रियः ॥५९[१०.२२उ
पू९.४१] तासु[3] प्रतिगतास्वेव ऋष्यशृङ्गः समुत्सुकः ।
N] अस्वस्थहृदयस्तत्र दुःखं संपरिवर्तते[4] ॥६०॥ [१०.२३
N] संस्मरन्नथ तं देशं[5] स जगाम स्त्रियस्तथा ।
उ६.४१] तद्गतेनैव मनसा न[6] निद्रामभिगच्छति[7] ॥६१॥ [N
अथ सायंतने काले न्यवर्तत विभाण्डकः ।[8]

१. ब—तां ।
२. भ—व्यपदिश्य विदूरतः ।
३. ज—तास्वप्रतिगता० । प—०गतास्वेवमृष्य० ।
४. ब प--स्म परिवर्तते ।
५. प—देशमाजगामाथ वीर्यवान् ।
६. ज—नो ।
७. ज ल भ—निद्रामधिग० । प—निद्रामभ्यगच्छत ।
८. प—६२ श्लोकात् ६६ श्लोकान्तस्य पाठस्य स्थाने ऽयं पाठो विशेषः ।
अथाजगाम भगवान् काश्यपः स्वनिवेशनम् ।
ध्यायमानश्च तं दृष्ट्वा ऋष्यशृंगं समुत्सुकं ॥
पप्रच्छ काश्यपः पुत्रं कस्मान्मा नाभिनन्दसि ।
चिन्तासागरमध्यस्थमद्य त्वां तात लक्षये ॥
नह्यीदृशं तापसानां रूपं भवति कर्हिचित् ।
शीघ्रमाचक्ष्व मे पुत्र किमिदं विकृतं कृतम् ॥
एवमुक्तः काश्यपेन प्रोवाच पितरं तदा ।
भगवन्निह मे दृष्टाः पुरुषाः शुभलोचनाः ॥
सुकुमारैरुरासिजैः पीनैरप्यद्भुतोपमैः ।
परिपस्पृशिरे मां च गाढमालिंग्य सर्वशः ॥
गायन्ति सुकुमाराणि मनोज्ञानि मुहुर्मुहुः ।
क्रीडन्ति चाद्भुताकारैर्नयनभ्रूविचेष्टितैः ॥
अब्रवीद् भगवान् श्रुत्वा ऋष्यशृंगवचस्तदा ।

N] तदाश्रमं विलोक्यैव प्राह चास्वस्थमानसम् ॥६२॥ [N
N] पुत्रं च क्रोधताम्राक्षः कोऽप्यागत इहाश्रमम् ।
एवं पृष्टस्तदा तेन ऋष्यशृङ्गः सगद्गदम् ॥६३॥ [N
ब्रूते स्म पितरं पूज्यं भोः पितः श्रूयतां वचः ।
९.४५] तवाश्रमपदं प्राप्ताः शुचयो ब्रह्मचारिणः ॥६४॥ [N
शिखाविशिष्टा मुनयः प्रदीप्तानलतेजसः ।
N] तेभ्योऽददं पितः पाद्यमर्घ्यं चैवं महामुने ॥६५॥ [N
९.४६] ते मां सस्वजिरे स्नेहात् प्रीत्या वै ब्रह्मचारिणः ।
अथापरेऽहनि तदा आजग्मुर्वै पुनस्ततः ॥६६॥ [N
मनोज्ञा रूपवत्यश्च हृष्टास्ताश्चारुमध्यमाः । [N

रक्षांस्येतेन रूपेण तपसो नाशनाय वै ॥
विस्रंभस्ते न कर्तव्यस्तेषु पुत्र कथंचन ।
एवमुक्त्वा ऋष्यशृंगं समाश्वास्य च कश्यपः ॥
उपित्वा रजनीमेकामरण्यं स जगाम ह ।
अथापेरद्युस्तं देशं आजगाम ततस्त्वरम् ॥
मनोज्ञरूपास्ता यत्र दृष्ट्वा वै चारुमध्यमाः ।

१. ज—तदाश्रमे ।
२. रा ज ल भ—पुत्रं ।
३. रा भ—चुक्रोध ता० ।
४. रा—इवाश्रमम् ।
५. रा ल—स ।
६. भ—पूज्यं ।
७. कै रा ज ल भ—वृद्धाः ।
८. भ—प्रदीप्तानललोचनाः ।
९. रा—तेभ्यो ददां । ज—तेभ्यो ददौ । तेभ्यो दद्यां ।
१०. भ—चैवं ।
११. भ—अतः परमधिकः पाठो वंगशाखायाः नवमसर्गस्य ४८—५० श्लोकेषु द्रष्टव्यः ।
१२. ज—पुनस्तदा ।

९.६१उ] ताश्च दृष्ट्वा समायान्तं कश्यपस्यात्मजात्मजम् ॥६७॥
प्रत्युद्गम्याब्रुवन् सर्वाः प्रहसन्त्य इदं वचः ।[1] [१०.२५
९.६२] एह्याश्रमपदं रम्यं पश्यास्माकमपि प्रभो ॥६८॥
तत्राप्येष विधिः श्रीमान् विशेषेण भविष्यति ।[१०.२६
९.६३] श्रुत्वा तु वचनं तासां सर्वासां हृदयङ्गमम् ॥[4]६९॥
गमनाय मतिं चक्रे तं च निन्युस्तदा स्त्रियः । [१०.२७
९.५४] [6]तं आनीयमाने वै तस्मिन् विप्रे महात्मनि ॥७०॥[2]
९.६५ पू] प्रहृष्टः सहसा देवो भगवान् पाकशासनः । [१०.२८
९.६६ पू] वर्षणामृतकल्पेन विषयं स्वं नराधिपः ॥७१॥[11]

१. ज—प्रहसंत ।
२. प—प्रत्युद्गताब्रुवन् सर्वा आजग्मुर्वै पुनस्तदा ।
मनोज्ञरूपवत्यश्च प्रहसन्त्य इदं वचः ॥
३. भ—परपास्मा० ।
४. भ—श्रीमानस्मिन्विप्रे महात्मनि । मध्यस्थं पाठं त्यक्त्वा ७०श्लोकस्य चतुर्थेन पादेन सम्बन्धः ।
५. भ—नास्ति ।
६. रा ज ल प—तत । व- हत (?) ।
७. प—शरात्मनि ।
८. ज ब भ—प्रवृष्टः । प—प्रविष्टः ।
९. ज—किमयं । प—विषये ।
१०. प—तस्य भूपतेः ।
११. प—अतः परमधिकः पाठः—
विभाण्डकश्च संध्यायां निवृत्तश्च वनांतरात् ।
वर्ण्य मूलं फल चाप्य भारार्तः सोऽविशत्तदा ॥
शून्यमावसथं दृष्ट्वा पुत्रदर्शनलालसः ।
परिश्रान्तस्तथैवासीदकृत्वा पादधावनम् ॥
चुक्रोध च ततस्तत्र सर्वतः स विलोकयन् ।
न चापश्यत् सुतं तत्र काश्यपो भगवानृषिः ।

९.६५] मेने प्रत्युद्गतश्चैव शिरसाऽभिप्रणम्य तम् । [१०.२९
९.६६पू] अर्घ्यं[1] च प्रददौ तस्मै पूजां कृत्वा च[2] शास्त्रतः ॥७२॥
९.६७उ] वव्रे प्रसादं विप्रेन्द्रान्नै[3] विप्रं मन्युराविशत् । [१०.३०
अन्तःपुरं प्रवेश्यैनं[4] कन्यां दत्त्वा यथाविधि[5] ॥७३॥
९.६८] शान्तां शान्तेन मनसा राजा हर्षमवाप सः । [१०.३१
एवं स न्यवसत्[6] तत्र सर्वकामैः सुपूजितः ॥७४॥
९.६९] ऋष्यशृङ्गो महातेजाः शान्तया सह वीर्यवान् । [१०.३२

निजाश्रमाच्च निःक्रान्तस्तदान्वेष्टुं सुतं ततः ॥
निःक्रम्य च वनात्तस्माद्विषयं च जगाम सः ।
श्रीमांस्तु परिपप्रच्छ गोकुलानि च सर्वशः ॥
कस्यैष विषयः सौम्यो ग्रामाश्च बहुगोकुलाः ।
ऋषेर्वचनमाज्ञाय सर्वे ते गोनुजीविनः ॥
बद्धाञ्जलिपुरा भूत्वा विनयेनाचचक्षिरे ।
अंगेषु प्रथितो राजा लोमपाद इतिश्रुतः ॥
तेनाभिदत्ता ब्रह्मर्षे ग्रामा ह्येते सगोकुलाः ।
पूजार्थमुपसंगम्य विभाण्डकसुतस्य वै ॥
एवमुक्तस्तु स ऋषिर्दृष्ट्वा ध्यानेन चक्षुषा ।
भविष्यमेतद् ज्ञात्वा च प्रीतात्मा स न्यवर्तत ॥
ऋषिपुत्रोपि धर्मात्मा विषयं प्राप्य वै तदा ।
मेघनादेन महता कृत्वा सतिमिरं नभः ॥
महाजलौघवर्षेण राजधानीमुपाययौ ।
वर्षेण चागतं विप्रं विषयं स्वं नराधिपः ॥

१. प—अर्घं ।
२. प—यथाविधि । जल भ—तु शास्त्रतः ।
३. रा—विप्रेन्द्रो न । प भ—विप्रेन्द्रान्मा ।
४. भ—प्रवेश्यैवं ।
५. ज ल—यथाविधिम् ।
६. ज—स न्यवसंस्तत्र ।

९.६६] ऋष्यशृङ्गो महातेजाः शान्तया सह वीर्यवान्[1]॥७५॥[१०.३२
संपूज्यमानः परया मुदान्वितो
महर्षिपुत्रो नरदेवसद्मनि ।
उवास तस्मिन् सह शान्तया सुखी
N] पुरे महेन्द्रस्य यथा बृहस्पतिः ॥[2]७६॥ [N

इत्यार्षे रामायणे आदिकाण्डे ऋष्यशृङ्गाभिगमनं
नामाष्टमः सर्गः ॥ ८ ॥

---

१ प—भार्यया ।

२ प—सर्वमेतदशेषेण श्रुत्वा ब्रह्मर्षिसत्तमः ।
जगाम तपसे चैव सुप्रीतेनांतरात्मना ।

भूय एवं च राजेन्द्र शृणु मे वचनं हितम् ।
१] यथा स धर्मप्रवरः कथयामास धर्मवित् ॥१॥ [१
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ।
२] नाम्ना दशरथो वीरः श्रीमान् सत्यप्रतिश्रवः ॥२॥ [२
सख्यं तस्याङ्गराजेन भविष्यति महात्मनः ।
३] कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥३॥ [३
अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः ।
४] स राजानं दशरथं प्रार्थयिष्यति भूमिपः ॥४॥ [४
अनपत्योऽस्मि धर्मज्ञ कन्येयं मम दीयताम् ।
५] शान्तां शान्तेन मनसा पुत्रार्थी वरवर्णिनीम् ॥५॥ [५
ततो राजा दशरथो मनसा ऽभिविचिन्त्य ताम् ।
६] दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः ॥६॥ [६
प्रतिगृह्य तु तां कन्यां स राजा विगतज्वरः ।

---

१. ल प भ—एव ।

२. प भ—देवप्रवरः ।

३. ज ब—स धार्मिकः ।

४. रा—सत्यपरिश्रवाः । ब—०श्रवः । भ—सत्यपराक्रमः ।

५. प—सुधार्मिकः । अस्य स्थाने महात्मन इति पुनर्विन्यस्तः पाठः ।

६. भ—पुत्रार्थे ।

७. भ—वरवर्णिनी ।

८. प—प्रकृत्या । प—करुणात्मकः ।
रा ज ब—०न्त्य तम् । भ-०न्त्य तत् ।

९. रा—दास्यामेतां ।

७] नगरं यास्यति क्षिप्रं प्रहृष्टेनान्तरात्मना[2] ॥७॥ [७

पू८] कन्यां तामृष्यशृङ्गाय प्रदास्यति स वीर्यवान् ।

N] सत्यप्रतिश्रवो[1] राजा स च शुद्धो भविष्यति ॥८॥ [N

तं च राजा दशरथो यष्टुकामः कृताञ्जलिः ।

९] ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति[2] धर्मवित् ॥९॥ [८

यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ।[3]

१०] लप्स्यते च[4] स[4] तं[4] कामं द्विजमुख्याद्विशांपतिः ॥१०॥ [९

सुताश्चास्य भविष्यन्ति चत्वारो ऽमिततेजसः ।

११] वंशप्रतिष्ठानकराः सर्वलोकेषु विश्रुताः ॥११॥ [१०

एवं स देवप्रवरः पूर्वं कथितवान् कथाम् ।

१२] सनत्कुमारो भगवान् पुरा देवयुगे[5] प्रभुः ॥१२॥ [११

पू१३] सत्त्वं[6] मन्त्रवंशो[6] मूलं त्वमानय[7] सुसत्कृतम्[8] ।[9]

---

१. भ——०तिश्रुवो ।

२. ल——प्रहृष्टेनान्तरात्मना ।

३. ल——पुस्तके ऽयं पाठ उत्तरपार्श्वे ऽपरहस्तेन विन्यस्तः ।
मूले त्वयं पाठः——कन्यां तामृष्यश्रृङ्गाय प्रदायस्य शेश्वरः

४. ल——सततं । भ–स च तं ।

५. प——देवपुरो ।

६. प——मनुजशार्दूल ।

७. रा प भ——तमानय । ल——समानय ।

८. ज——स्वसत्कृतं ।

९. प——अतः परमधिकः पाठः——
विभांडकसुतं गत्वा वरयित्वात्मनो गुरुन् ।
इति श्रुत्वा दशरथः सुमंत्रस्य सुमंत्रिणः ॥
वशिष्टमुपगम्यैव इदं वचनमब्रवीत् ।
सुमंत्रो पञ्चदत्येव तमनुज्ञातुमर्हसि ॥
वशिष्टोपि च तच्छ्रुत्वा तथेति प्रत्यपद्यत ।

N] स्वयमेव महाराज सभृत्यबलवाहनः ॥१३॥ [१२
सूतस्य वचनं श्रुत्वा राजा संपूर्णमानसः । [१३
१४] अनुमान्य वसिष्ठं च सूतवाक्यं निवेद्य च ॥१४॥
पू१६] वसिष्ठेनाभ्यनुज्ञातो राजा दशरथस्तदा ।
उ१७] सोऽन्तःपुरात् सहामात्यः प्रययौ यत्र स द्विजः ॥१५॥[१४
पू१८] वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ।
N] व्यतिचक्राम तं देशं यत्रासौ मुनिपुङ्गवः ॥१६॥ [१५
उ१८] लोमपादपुरं प्राप्य प्रविवेश सुपूजितः । [N
तत्राससाद राजा तु लोमपादनिवेशनम् ॥१७॥
१९] ऋषेः पुत्रं ददर्शासौ दीप्यमानमिवानलम् । [१६
ततो राजा लोमपादः पूजां तस्य चकार ह ॥१८॥
२०] सखित्वात् तस्य राज्ञश्च प्रहृष्टेनान्तरात्मना । [१७
स एवं सत्कृतस्तेन वसंस्तत्र नरर्षभः ॥१९॥

---

१. प—गत्वा सबलवाहनः ।
२. प—स तस्य ।
३. रा—तु ।
४. प—न्यवेदयत् ।
५. भ—नास्ति ।
६. प—वशिष्ठेना० ।
७. प—अतः परमधिकः पाठः—
सुमंत्रवचनात्तूर्णं प्रयातुमुपचक्रमे ।
ऋष्यश्रृङ्गं वरयितुं लोमपादस्य वै पुरं ॥
८. प—सान्तःपुरः । ज—सोन्तः पुरः ।
९. प—०निवेशने ।
१०. प भ—ऋषिपुत्रं ।
११. ल—च कारयेत् । प-चकार सः ।
१२. ज ब भ—तत्र ।

२१] सप्ताष्टं[1] दिवसान् राजा ततो वचनमब्रवीत् । [१६
शान्ता तव सुता वीर सह[2] भर्त्रा विशांपते ॥२०॥
२२] मदीयं नगरं यातु कार्यं हि महदुर्ध्यतम्[3] । [२०
तथेति राजा संश्रुत्य गमनं तस्य धीमतः[4] ॥२१॥ [२१पू
२३] लोमपादोऽगमद् वक्तुं ऋषिपुत्राय धीमते ।
सख्यं[5] सांबन्धिकं[6] चैव तत्सर्वं प्रत्यवेदयत् ॥२२॥ [N
२४] अयं राजा[7] दशरथः सखा मे दयितः सुहृत् ।
अपत्यार्थं समानेन दत्तेयं वरवर्णिनी[8] ॥२३॥ [N
२५] याचमानस्य[9] मे ब्रह्मन् शान्ता प्रियतराऽऽत्मनः[10] ।
सोऽयं ते श्वसुरो विप्र[11] यथैवाहं[12] तथा नृपः ॥२४॥ [N
२६] शरणार्थमनुप्राप्तः[13] पुत्रार्थं[14] द्विजसत्तमं[15] ।

---

१. रा ज ल भ—सप्तासदि० । प—सप्ताष्टौ दि० ।

२. व—तव ।

३. ल—सहदुश्यतम् (?)

४. कै—विधीयतां । इत्यपरहस्तेन विन्यासः ।

५. कै—साध्यं । साध्यमित्यस्य स्थाने केनापि सख्यमिति संशोध्य कृतम् ।

६. प—सांबंधकं ।

७. प—अङ्गराजा ।

८. ल—वरवर्णितम् । प—वरवर्णिना ।

९. कै—याच्यमानस्य ।

१०. ज—प्रयतमात्मनः । प भ—०प्रियतरा मम ।

११. प—ब्रह्मण ।

१२. प—यथा वाहं ।

१३. प—शरणं त्वामनुप्राप्तः ।

१४. भ—पुत्रार्थे ।

१५. प—[illegible] ।

पुत्रकाममिमं तात सफलं[1] कर्तुमर्हसि ॥२५॥ [N

२७] तारयैनमितो गत्वा शान्तया सह भार्यया । [N

पू२८] ऋषिपुत्रोऽथ तच्छ्रुत्वा तथेत्याह नृपं तदा ॥२६॥ [२२पू

N] गच्छेति[2] विप्रवचनाद् राजोवाच ततो[3] नृपम् ।[4] [N

उ२८] ऋषिणा[5] चाभ्यनुज्ञातः प्रययौ सह भार्यया ॥२७॥ [२२उ

तावन्योन्यं च कुशलं संपृष्ट्वाश्लिष्य[6] चोरसा[7] । [२३पू

२९] गमने मतिमादध्ने[8] राजा[9] दशरथस्तदा ॥२८॥

सोऽनुज्ञातो दशरथस्तेन राज्ञा महीपतिः ।

३०] प्रययौ स्वां पुरीं वीरः[10] शान्तामादाय सत्वरम् ॥२९॥

३१] ततो राजा दशरथः प्रेषयामास वै तदा । [२४

३२] क्रियतां[11] नगरं सर्वं[12] शीघ्रमेव स्वलङ्कृतम् ॥३०॥ [२५पू

पू३५] ततः प्रहृष्टाः पौरास्तु[13] श्रुत्वा राजानमागतम्[14] ।

उ३३] तथा चक्रुश्च तत्सर्वं राज्ञा यत्प्रेषितं तदा ॥३१॥ [२६

ततः[15] स्वलङ्कृतं राजा नगरं प्रविवेश ह ।

---

१. ज—सकलं ।

२. प—गत्वेति ।

३. प—तथा ।

४. भ—नास्ति ।

५. प—नृप[पे?]णैवाभ्यनुज्ञतः

६. प—पृष्ट्वा संश्लिष्य ।

७. ब—चेतसा ।

८. प—०धत्त ।

९. प—राजा स मतिं तदा ।

१०. प भ—प्रहृष्टात्मा ।

११. रा—म्रियतां ।

१२. रा—सर्वे ।

१३. प—पौरास्ते ।

१४. प—राजानुशासनं ।

१५. रा प भ—ततस्त्वलंकृतः ।

३४] शङ्खदुन्दुभिनिर्घोषैः[1] पुरस्कृत्य द्विजर्षभम् ॥३२॥ [२७
ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजम् ।
N] प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्मणा[2] ॥३३॥ [२८
अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा तु शास्त्रतः ।
३६] कृतकृत्यं तदाऽऽत्मानं मेने तस्यागमात् प्रभुः ॥३४॥ [२९
अन्तःपुराणि सर्वाणि दृष्ट्वा शान्तां तथागताम् ।
३७] सह भर्त्रा विशालाक्षीं प्रत्यानन्दन्[3] मुदा[4] ततः ॥३५॥ [३०
संपूज्यमान स्तुतिभिर्यथा[5] राजा[6] विशेषतः ।
N] उवास तत्र ससुखं[7] किञ्चित्कालं द्विजर्षभः ॥३६॥ [३१
उपास्यमानः शुशुभे शान्तया दिव्यरूपया ।
N] अरुन्धत्या यथा युक्तो वसिष्ठो[8] ब्रह्मणः सुतः ॥३७॥[9] [N
अथ काले बहुतिथे कस्मिंश्चित् सुमनोहरे ।
११.१] वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽगमत्[10] ॥३८॥ [१२.१
ततः प्रसाद्य शिरसा तं विप्रं देववर्णिनम्[11] ।
११.२] यज्ञार्थं[12] वरयामास सन्तानार्थं च बुद्धिमान् ॥३९॥ [१२.१

---

१. ब—शंखदुन्दुभि० ।
२. प—०णेन्द्रकर्मकृत् ।
३. प भ—प्रत्यनन्दन् ।
४. ज भ—मुदा युताः । प—मुदान्विताः ।
५. प—०भिस्तदा ।
६. ल प—राज्ञा ।
७. प—सुसुखं ।
८. प—वशिष्टो ।
९. प—अतः परम्—इत्यार्षे रामायणे आदिकाण्डे ऋष्यशृङ्गायोध्यागमनं नाम सर्गः ॥
१०. प—मनो दधे: ।
११. प—देववर्चसम् । भ—देवरूपिणं ।
१२. रा—यथार्थं ।

तथेति च स राजानमुवाच प्राप्तसत्क्रियः ।
१.१.३] संभाराः संभ्रियन्तां ते सहायाश्च द्विजातयः ॥[1]४०॥
ततोराजाऽब्रवीत् सूतं ब्राह्मणान् सपुरोहितान्[2] ।
१.१.५] क्षिप्रमानय धर्मज्ञ यज्ञार्थं मम सुव्रतान्[3] ॥४१॥[4] [१२.४
वेदविद्याव्रतस्नातान् यज्ञकर्मसु[5] निष्ठितान् ।
१.१.६] सूत्रभाष्यविदश्चैव वेदवेदाङ्गपारगान् ॥४२॥ [N
गृहमेधिनो दरिद्रांश्च वृद्धानपि कलत्रिणः ।
१.१.७] श्रोत्रियांश्च विदेशस्थान् सत्कृत्य त्वमुपानय[6] ॥४३॥[N
श्रुत्वा तु राज्ञो वचनं सुमन्त्रस्त्वरितं[7] तदा ।
११.८] आनयामास तान्[8] सर्वान्[8] ब्राह्मणान् वेदपारगान् ॥४४॥
सुयज्ञं[9] वामदेवं च जाबालिं[10] कश्यपं तथा ।
११.९] पुरोहितं [11]वसिष्ठं च तथैवान्ये[12] द्विजातयः[12] ॥४५॥ [१२.५
तान् पूजयित्वा धर्मात्मा राजा दशरथस्तदा ।
१.१.१०] इदं धर्मार्थसहितं श्लक्ष्णं[13] वचनमब्रवीत् ॥४६॥ [१२.७

---

१. प—संभाराः संक्रियंतां स्वै सहायाश्च द्विजोत्तमाः ।

२. कै प—सुपुरोहितान् ।

३. भ—सव्रत ।

४. प—नास्ति ।

५. ल—न्यायकर्मसु ।

६. ल—मामुपानय ।

७. ज प भ—॰त्वरितस्तदा ।

८. रा भ—तत्सर्वान् ।

९. रा—स्वयज्ञं ।

१०. ज ब—जावालिं । प—जाबलिं ।

११. प—वशिष्टं ।

१२. प—तथैवान्यान् द्विजोत्तमान् ।

१३. प—तक्ष्णं ।

मम लालप्यमानस्य पुत्रार्थं[1] नास्ति मे सुतः[2] ।
११] तदर्थं[3] हयमेधेन यक्ष्यामीति[4] मतिर्मम ॥४७॥ [८
तदर्थं यष्टुकामोऽहं[5] हयपूर्वेण कर्मणा ।
१२] ऋषिपुत्रप्रभावेण कामं प्राप्स्याम्यहं द्विजाः ॥४८[6]॥ [९
उ१३] ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ।
वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम्[7] ॥४९॥ [१०
१४] ऋष्यशृङ्गपुरोगास्ते प्रत्यूचुर्नृपतिं ततः ।
संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥५०॥ [११
१५] सर्वथा प्राप्स्यसे पुत्रांश्चतुरोऽमिततेजसः[8] ।
यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥[9]५१॥ [१२
१६] ततः प्रीतोऽभवद् राजा श्रुत्वा तद्द्विजभाषितम् ।
अमात्यांश्चाब्रवीत् तत्र हर्षवेगाकुलाक्षरम् ॥५२॥ [१३
१७] गुरूणां वचनाच्छीघ्रं संभाराः संभ्रियन्तु मे ।
पू१९] अमात्याधिष्ठितं[10]श्चाश्वः सोपाध्यायो विमुच्यताम् ॥५३॥ [१४

---

१. प—सुतार्थं ।
२. भ—सतः ।
३. प—तदहं । भ—तदर्थे ।
४. प—यजानीति ।
५. प—यष्टुकामोऽहं हयमेधेन ।
६. प—अतः परमधिकः पाठः—
अनुगृह्णन्तु मामत्र भवंतः शरणागतम् ।
७. रा ल—मुखाः च्युतं ।
८. प भ—०ऽमितविक्रमान् ।
९. ब—नास्ति ।
१०. कै—०त्याद्धिष्टित० । प—सुमन्त्राधि० ।

शान्तयश्चापि[1] कल्प्यन्तां तन्त्र[2]कल्पैर्यथाविधि । [१५३
२०] शक्यमाप्तुं महायज्ञं तत्सर्वं संविधीयताम् ।।[3] ५४।।[4]
N] नापचारो भवेद्राष्ट्रे[5] यथास्मिन् क्रतुपुङ्गवे । [१६
उ२१] छिद्रं हि मृगयन्ते तु विद्वांसो ब्रह्मराक्षसाः ।।५५।।[7]
विघ्ने[8] तु तस्य[6] यज्ञस्य कर्ता सद्यो विनश्यति । [१७
२२] तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ।।५६।।
तथा विधानं क्रियतां समर्थैः सत्रकर्मणि । [१८
२३] तथेति तद्वचः श्रुत्वा मन्त्रिणः प्रत्यपूजयन् ।।५७।।
पार्थिवेन्द्रस्य तत् सर्वं तथाज्ञां[9] प्रत्यपालयन् । [१९
२४] ततो द्विजास्ते धर्मज्ञा वर्धयित्वा च तं[10][11] नृपम् ।।५८।।
अनुज्ञातास्तदा[12] राज्ञा प्रतिजग्मुर्यथागतम् । [२०
गतेषु द्विजमुख्येषु मन्त्रिणोऽपि नराधिपः ।।५९।।

१. कै—०श्चाविक० ।

२. रा ज ब ल प भ—तत्र कल्पैर्य० ।

३. प—शक्योवाप्तुमयं यज्ञो नाशक्तेन महीक्षिता ।

४. ज प भ—अतः परमधिकः पाठः—

सरय्वाः सरितः पारे यज्ञभूमिर्विधीयतां ।

कै—पुस्तकस्योत्तरपार्श्वेऽपरहस्तेन पुनर्विन्यासः ।

५. प—भवेत्कश्चिद् ।

६. प—०ऽत्र यज्ञघ्ना ।

७. कै—पुस्तकस्योत्तरपार्श्वेऽतः परमपरहस्तेन लिखितोऽधिकः पाठः—

शक्यो ह्याप्तुमयं यज्ञो नाशक्तेन महीक्षिता ।

न त्वेवाश्रद्दधानेन न चाल्पद्रविणेन च ॥

८. भ—विघ्नं तु त० । प—विघ्नितस्य तु त० ।

९. रा ज ब ल—वार्ता ।

१०. प—यथाज्ञां ।

११. प—ते ।

१२. रा ब ल—अनुजग्मुस्तदा । प—०ज्ञातास्ततो ।

२९] विसृज्य[1] सर्वान् स्वं वेश्म प्रविवेश महाद्युतिः [२१
N] प्रजार्थं समभिप्रेतं निर्वृत्तं[2] चाभ्यमन्यत[3] ।।६०।। [N
पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् । [१३.१पू
१२.१] अभिवाद्य वसिष्ठं तु न्यायतः प्रत्यपूजयत्[4] ।।६१।।
अब्रवीत् प्रश्रितं[5] वाक्यं प्रसवार्थं द्विजोत्तमम् ।
२] यज्ञः[6] संस्क्रियतां[7] शीघ्रं यथाशास्त्रं सुनिश्चितम् ।।६२।। [२
यथा न विघ्नः क्रियते यज्ञाङ्गेनेह[8] केनचित् । [३
३] भवान्[9] स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान् ।।६३।।
वोढव्यो भवता चेह[10] यज्ञार्थे[11] भार[12] उद्यतः । [४
४] तथेति च[13] स[13] राजानमब्रवीद्[14] द्विजसत्तमः ।।६४।।
करिष्ये सर्वमेवैतद् भवतो यदभीप्सितम् । [५
५] ततोऽब्रवीद् द्विजान् वृद्धान्[15] यज्ञकर्मसु निष्ठितान् ।।६५।।

१. ज प भ—विसर्ज्य ।
२. रा ज ल—निवृत्तं । प—निर्वर्तं ।
३. प—चाप्यमन्यत ।
४. ज—प्रत्यपूपुजत् ।
५. ज भ—प्रसृतं । प—मधुरं ।
६. प—स यज्ञः ।
७. रा—संक्रियतां । प–क्रियतां । भ–संस्थीयतां ।
८. प—यज्ञेस्मिन् केनचित् क्वचित् ।
९. भ—भवान् ।
१०. प—चैव । भ–भारो ।
११. रा ञ—यज्ञार्थो । प–भारो । भ–यज्ञार्थम् ।
१२. प—यज्ञस्य चानघ । भ—अयमद्य नः ।
१३. प—स च ।
१४. प—राजानमुवाच ।
१५. प—सर्वान् ।

स्थाप्यन्तां[1] चेह[2] स्थाप्यन्तां[3] वृद्धान् परमधार्मिकान् । [६
६] कर्मान्तिकान् लेपकरान् खनकान् वर्धकानपि ॥६६॥[4]
गणकान शिल्पिनश्चैव[5] तथैव नटनर्तकान् ।
७] ततोऽब्रवीच्छास्त्रविदः पुरुषान् सुबहुश्रुतान्[6] ॥६७॥ [७
यज्ञकर्मसमारंभाद्[7] भवन्तो राजशासनात् ।
८] इष्टिं[8] च बहुसाहस्रीं शीघ्रं चाह्वयत द्विजान् ॥६८॥ [८
उपकार्याः क्रियन्तां च राज्ञो[9] बहुगुणान्विताः ।
९] ब्राह्मणावसथाश्चैव[10] क्रियन्तां शतशः शुभाः[11] ॥६९॥ [९
भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः[12] ।
१०] तथा पौरजनस्यापि कर्तव्या बहुविस्तराः ॥[13] ७०॥ [१०
आवासा[14] बहुभक्ष्यान्नाः सर्वकामैः सुपूजिताः ।[15]

---

१. कै भ—स्थाप्या । ज—स्थापस्ये । प—स्थाप्यतां ।
२. प—वै । भ— ये चेह ।
३. प—स्थपतयो ।
४. ज प भ—सर्वत्र श्लोके प्रथमान्तः पाठः । कै—पुस्तकस्य प्रथमे पाद एव ।
५. प—शिल्पिनश्चान्ये ।
६. रा ब ल—पूरुषान् सु० । ज भ—०षान् सुबहुश्रुतान् ।
प—पुरुषांश्च बहुश्रुतान् ।
७. ज ल—०समारंभान् । प भ—०समीहंतां ।
८. प—यष्टिं ।
९. प—राज्ञां ।
१०. रा—०वसथश्चैव ।
११. ज—शुभान् ।
१२. प—प्रतिष्ठिताः । भ—सुसंस्कृताः । अपरहस्तेनोत्तरपार्श्वे ।
१३. ल—नास्ति ।
१४. प—आभासा बहुभक्ष्याश्च ।
१५. ल—नास्ति ।

११] तथा जानपदस्येह कर्तव्यं बहुभोजनम् ॥७१॥ [१२
कर्तव्यमन्नं विधिवत् सत्कृत्य न तु पीडया । [१३
१२] सर्ववर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥७२॥
नावमानः प्रयोक्तव्यः कामक्रोधवशैः क्वचित् । [१४
१३] यज्ञकर्मसु ये व्यग्राः पुरुषाः शिल्पिनस्तथा ॥७३॥
पूजा कार्या विशेषेण तेषामपि यथाक्रमम् । [१५
१४] यथा सर्वं सुविहितं न किञ्चित् परिहीयते ॥७४॥
तथा भवन्तः कुर्वन्तु प्रीतिस्निग्धेन चेतसा । [१६
१५] ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ॥७५॥ [१७पू
यथाकृत्यं करिष्यामो न किञ्चित्परिहास्यते । [१८
१६] ततः सुमन्त्रमाहूय वसिष्ठो वाक्यमब्रवीत् ॥७६॥
निमन्त्रयस्व नृपतीन् पृथिव्यां ये च धार्मिकाः । [१९
१७] ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चापि सहस्रशः ॥७७॥
समानयस्व सत्कृत्य सर्वदेशेषु मानवान् । [२०
१८] मिथिलाधिपतिं शूरं जनकं दृढविक्रमम् ॥७८॥
निष्ठितं सर्वशास्त्रेषु सर्ववेदेषु निष्ठितम् । [२१

१. ज प भ—जनपदस्येह ।
२. प भ—दातव्यमन्नं ।
३. प—पीडय ।
४. रा ज ब ल प—सर्वे वर्णा ।
५. कै रा ज भ—कामक्रोधवशः । प—कामक्रोधकृतः ।
६. ब—सुखं ।
७. प—यथोक्तं तत् ।
८. भ—शूद्रांश्चापिह सर्वशः ।
९. ब—सर्वदेवेषु ।
१०. प—शूद्रं (?) ।
११. प भ—तथा वेदेषु ।

१९] समानय महाभागं स्वयमेव सुसत्कृतम् ।।[२] ७९।।
पूर्वं सांबन्धिकं ज्ञात्वा ततो वाक्यं ब्रवीमि ते । [२२
२०] तथा काशिपतिं शूरं सततं प्रियवादिनम् ।।८०।। [२३ I
वयस्यं राजसिंहस्य तमानय यशस्विनम् । [२५उ
२१] तथा केकयराजानं वृद्धं परमधार्मिकम् ।।८१।।
श्वशुरं राजसिंहस्य तमानय यशस्विनम् । [२४
२२] अङ्गेश्वरं तथा स्निग्धं लोमपादं सुसत्कृतम् ।।८२।। [२५पू
सुव्रतं देवसङ्काशं स्वयमेनं त्वमानय । [N
२३] प्राच्यांश्च सिन्धुसौवीरान् सुराष्ट्रां ये च मानवाः ।।८३।।
दाक्षिणात्यान नरेन्द्रांश्च सर्वानानय मा चिरम् । [२८
२४] अतिस्निग्धाश्च येऽन्येऽपि[१०] राजानः पृथिवीश्वराः ।।८४।।
तानप्यानय वै क्षिप्रं सानुगान सहबान्धवान । [२९
२५] वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्वरितस्तदा ।।८५।।
व्यादिशत् पुरुषांस्तत्र राज्ञामानयने बहून् । [३०

---

१. प भ—तमानय ।
२. ल—नास्ति ।
३. रा—काशपतिं ।
४. ल—तथा मानय ।
५. ज प—सपुत्रं त्वमिहानय । भ— सुमंत्र त्वमिहानय ।
६. ल—स्वसत्कृतं ।
७. प—स्वयमेव ।
८. प -सुराष्ट्रावन्त्यमागधान् ।
९. प—सुव्रत ।
१०. प—ये चान्ये ।
११. ल—पृथिवीपते ।
१२. ज प भ—सह बान्धवैः ।
१३. प—सुमंतुकामाय चोत्सुकः ।

२६] स्वयमेव च धर्मात्मा प्रययौ राजशासनात् ॥[1]८६॥
सुमन्त्रः प्रयतो भूत्वा समानेतुं महीक्षितः । [३१
२७] ततः कर्मान्तिकाः सर्वे वसिष्ठाय महात्मने ॥८७॥
सर्वे[2] निवेदयन्ति[3] स्म यज्ञियानु[4]पकल्पितान् । [३२
२८] ततः प्रीतो द्विजश्रेष्ठस्तान सर्वान् पुनरब्रवीत् ॥८८॥ [३३
भवद्भिर्न यथा यज्ञे परिहास्येत[5] किञ्चन ।
२९] नावज्ञया प्रदातव्यं किञ्चिद्[6] वा[6] केनचित् क्वचित् ॥८९॥
अवज्ञया हि यद्दत्तं तद्दातुं[7]र्दोषमावहेत् । [३४
३०] ततः कैश्चिदहोरात्रैरुपायाता[8] महीक्षितः ॥९०॥
रत्नान्यादाय सुबहु[9] राज्ञो दशरथस्य च[10] । [३५
३१] ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥९१॥
उपायाता[11] नरव्याघ्र[12] राजानस्तव शासनात् । [३६
३२] मयाऽभिसंस्कृताः[13] सर्वे यथावत् पूजिताश्च[14] ते[15] ॥९२॥

---

१. प—नास्ति ।

२. प—सर्वान् ।

३. ज—निवेदयंते ।

४. रा ज—यज्ञेयानु० । ब ल—याज्ञेया० ।

५. रा—परहास्येति । ज ल भ—परिहास्यति ।

६. रा—किञ्चित्का ।

७. ज—तद्दत्तं दोष० । प— दातुस्तद्दो० ।

८. कै—०रात्रैरुपायातां । ब—०त्रैरूपयाता ।

९. रा ज ल भ—सुबहून् । प—बहवो ।

१०. ज प भ—ह ।

११. प—उपयाता । भ—उपायातास्तु ।

१२. भ—ते सर्वे । उत्तरपार्श्वेऽपरहस्तेन ।

१३. प—मयापि सत्कृता । मयाभिपूजिता ।

१४. भ—सत्कृताश्च ।

१५. रा—ये ।

यथावत् संभृतं सर्वं पुरुषैः स्वैः समाहितैः[1] । [३७

३३] संप्राप्ते च भवेद्धृष्टो[2] यज्ञे संभारसंभृते ॥[3]६३॥ [N

सर्वकामैरुपहृतैरुपपन्नं[4] समन्ततः । [३८उ

३४] क्रियतां वचनान्मह्यमृष्यशृङ्गस्य[5] चैव हि ॥६४॥

शुभे दिवसनक्षत्रे[6] निर्यातु जगतीपतिः[7] । [४०

ततो वसिष्ठप्रमुखाः सर्व एव द्विजातयः ।

३५] अश्वमेधं पुरस्कृत्य यथाकर्मारभंस्तदा ॥[8]६५॥ [४२

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

यज्ञारंभो नाम नवमः सर्गः ।

---

१. प—सुसमाहितैः ।

२. क—भवेद्दृष्टो ।

३. प—सुमन्त्रश्चावहृष्टो यज्ञसंभारसंभृतः ।

४. ज—सर्वकालैरुप० । प—सर्वकामैरुपहृतैरुपपन्नः ।

५. प—वचनं न्याय्यमृष्य० ।

६. रा—दिवसि नक्षत्रे । ज—नक्षत्रदिवसे । प—दिने च नक्षत्रे ।

७. प—निर्यातुं पृथि [वी ?] पतिः ।

८. प—ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ।

यज्ञवाटगताः सर्व्वे यथाशास्त्रं यथाविधि॥

अथ संवत्सरे पूर्णे प्राप्ते तस्मिंस्तुरङ्गमे ।[1]
१] सरय्वा उत्तरे कूले[2] राज्ञो यज्ञो[3]ऽभ्यवर्तत ॥१॥ [१
ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः[4] ।
२] अश्वमेधे महायज्ञे राज्ञस्तस्य महात्मनः ॥२॥ [२
पू३] कर्म कुर्वन्ति[5] विधिवद् यज्ञाङ्गविधिपारगाः[6] ।
N] यथाविधि यथान्यायं परिक्रामन्ति[7] शास्त्रतः ॥३॥ [३
उ३] प्रवर्ग्यं[8] शास्त्रतः कृत्वा तथैवोपसदं द्विजाः[9] ।
N] चक्रुश्च विधिवत् सर्वं तथैवोद्धास्य कर्म ते ॥४॥ [४
N] अभिषुत्यं[10] ततो हृष्टाः सर्वे चक्रुर्यथाविधि ।
उ४] सवनानि[11] यथान्यायं[12] सोमसोमपसत्तमाः[13] ॥५॥[14] [५

---

१. प—अथ प्रदक्षिणं कृत्वा भूमिं प्राप्ते तुरङ्गमे ।
अथ संवत्सरे पूर्णे प्राप्ते तस्मिंस्तुरङ्गमे ॥

२. ल—तीरे ।

३. भ—यज्ञो राज्ञोऽभ्य० ।

४. प—०र्द्विजोत्तमाः ।

५. कै—कर्म कुर्वत । रा—कर्माकुर्वन्त । ब—कर्माकुर्वन्तु ।

६. ब—यज्ञार्थी विधिपारगाः ।

७. ब—पर्यक्रामन्त ।

८. प—प्रवर्ग्यान् ।

९. भ—शास्त्रतश्चक्रुस् ।

१०. प—अभिषुत्यं ।

११. ब—सस्नानानि ।

१२. ल—यथान्याय्यं ।

१३. ज प भ—सोमे सोमपस० ।

१४. प—अतः परमधिकः पाठः—

नानाहू[1]तमभूत् तत्र स[2]स्मितं वा[3]पि किञ्चन ।
९] दृश्यते ब्रह्मवत् सर्वं क्रमयुक्तं च[4] चक्रिरे ॥८॥[5] [१०

प्रायश्चित्तविधानानि चक्रुश्चानवशेषतः ।
सवनानि च सर्वाणि यथाकालं प्रचक्रिरे ॥
नासीदसत्कृतं तेषां स्खलितं वापि किञ्चन ।
परेण ह्यवधानेन ते क्रतुं वै प्रचक्रिरे ॥
न तेष्वहस्सु कृपणः क्षुधितो वापि दृश्यते ।
तिर्यक्ष्वपि कुतोऽन्येषु भूतेषु परिकर्षितः ॥
कोटिशो ब्राह्मणास्तत्र तथा शतसहस्रशः ।
तस्मिन् यज्ञमुपावृत्ता नानादेशनिवेशिनः ॥
ब्राह्मणानां सहस्राणि तत्र तानि महामखे ।
पृथग्बुभुजिरेऽन्नानि स्वादूनि विविधानि च ॥
रुक्मपात्रीष्वनेकासु राजतीषु तथैव च ।
द्विजातयोऽन्नपानानि तत्राभुञ्जन्त चासकृत् ॥

१. रा ज ल—नानाहूताम० । प—नवायुक्तमं ?
२. कै रा—सम्भितं । ल—सहितां । प—सभितं ।
३. कै प भ—चापि ।
४. प्रचक्रिरे ।
५. कै—पुस्तकस्योत्तरपार्श्वे ऽतः परमपरहस्तेन विन्यस्तोऽधिको वङ्ग-सम्मतः पाठः—

न तेष्वहःसु कृपणः क्षुत्क्षामो वाप्यदृश्यत ।
तिर्यक्ष्वपि कुतोऽन्येषु भूतेषु परितर्पितः ॥
कोटिशो ब्राह्मणास्तत्र तथा शतसहस्रशः ।
तस्मिन् यज्ञे तु ये वृत्ता नानादेशनिवासिनः ॥
नाविद्वान् ब्राह्मणस्तत्र नादातानुचरोपि वा ।
नानाहिताग्निर्नायज्वा नाव्रती पतितो न च ॥
ब्राह्मणानां सहस्राणि शतानि च महामखे ।
पृथग्बुभुजिरेऽन्नानि स्वादूनि विविधानि च ॥
रुक्मपात्रीष्वनेकासु राजतीषु च सर्वशः ।
द्विजातयोऽन्नपानानि तत्राभुञ्जंत सत्कृताः ॥

पू६] न तेष्वहःसु ब्राह्मण्यं क्षुभितं[1] दृश्यते क्वचित् ।

पू८] नाविद्रान् ब्राह्मणः कश्चिद् दृश्यन्ते तत्र वै तदा[2] ॥७॥ [११

अनाथा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते ।

११] तापसा भुञ्जते चापि[3] भुञ्जते श्रमणा[4] अपि ॥८॥ [१२

अनाथानां तथा स्त्रीणां बालवृद्धस्य चैव हि ।

१२] बुभुक्षितानां दीनानां सुतृप्तिरुपलभ्यते ॥९॥ [१३

पू१३] दीयतां दीयतामन्नं वासांसि विविधानि च ।

N] यथोचितसमाख्यानैः कर्म चक्रुरतन्द्रिताः ॥१०॥ [१४

अन्नपानं च सुबहु दृश्यते पर्वतोपमम् ।[5]

१४] दिवसे दिवसे तत्र भक्षन्तु विधिवत्तदा ॥११॥ [१५

अन्नं हि रसवत् स्वादु प्रशंसन्ति द्विजर्षभाः ।[6]

१५] अहो स्म तृप्ता भद्रं व इति स्म श्रूयते भृशम्[7] ॥१२॥[8] [१७

अलङ्कृताश्च राजानो ब्राह्मणान् पर्यसेवयन्[9] ।[10]

१६] सुप्रीतमनसः सर्वे सुमृष्टमणिकुण्डलाः ॥१३॥ [१८

---

१. प--क्षुधितं ।

२. प--नागतोन्युगतस्तथा ।

३. प--चैव ।

४. प--चारणा ।

५. भ--दिवसे तत्र भक्षन्तु विधिवद् विधिवत्तदा ।
दिवसे दिवसे क्लृप्ते व्यंजनानां चयस्तथा ॥
ल--नास्ति ।

६. प--अहो स्वादु प्रभूतं च विविचनन्नमीदृशम् ।

७. प--शशंसुरिति वै द्विजाः ।

८. ल--नास्ति । प-पुस्तके ऽत आरभ्य २८ श्लोकान्तः पाठः ४० श्लोकात्परं टिप्पण्यां द्रष्टव्यः ।

९. भ--पर्यवेशयन् ।

१०. प--राजानोऽभ्यागतास्तत्र स्वयमेव स्वलंकृताः ।

कर्मान्तरे तु[1] संप्राप्ते हेतुवादान् बहूंस्तदा ।
१७] प्राहुः सुवाग्मिनो वीराः[2] परस्परजिगीषवः ॥[3]१४॥ [१९
दिवसे दिवसे चक्रुः संस्तरे कुशले[4] द्विजाः ।
२०] सर्वं कर्म यथावत्तद्[5] यथा शास्त्रेण नोदितम् ॥१५॥ [२०
पू२१] नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः ।
N] सदस्यास्तत्र वै राज्ञो नावादकुशला द्विजाः ॥१६॥ [२१
प्राप्ते यूपोच्छ्रये तस्मिन् षड् बैल्वाः[6] खादिरास्तथा ।
२२] तथा पर्णमयाश्चैव[7] षडन्ये[8] बिल्वसंमताः ॥१७॥ [२२
श्लेष्मातकमयाश्चान्ये[9] पूतिदारुमयास्तथा[10] ।
२३] द्वावास्तां तत्र विहितौ बाहुभ्यामुपरिग्रहौ ॥१८॥[11] [२३
विन्यस्ता विधिवत् सर्वे शिल्पिभिः सुकृता दृढा[12]ः ।

---

१. ज—च ।
२. भ—धीराः ।
३. कै—अतः परमपरहस्तेन विन्यस्तः वङ्गशाखासम्मतोऽधिकः पाठः—
ऋष्यश्रृङ्गादयो मंत्रैः शिक्षाक्षरसमन्वितैः ।
आह्वयांचक्रिरे तत्र शक्रादिविबुधोत्तमान् ॥
सर्पिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ।
होतारो जुहियामासुर्हविर्भागैर्दिवोकसः ।
४. कै ज—कुशला ।
५. ज—यथावत्तु ।
६. ज—बैला । ल–वैला ।
७. ल—स्वर्णमया० ।
८. भ—तथान्ये ।
९. कै—श्लेष्मातकमथाप्नोति । रा–श्लेष्मांतकमथान्येपि ।
ज—श्लेष्मांतकमयाश्चान्ये । भ–श्लेष्मांतकयश्चान्यः ।
१०. ज—प्रतिदारुम० । भ–०रुमयस्तथा ।
११. कै—अतः परमुत्तरपार्श्वेऽपरहस्तविन्यस्तोऽधिकः पाठः—
यामोच्छ्रायपरिणाहो यूपान्यः सर्वकांचनः ।
यज्ञे समभवत्तत्र शोभार्थमुपकल्पितः ॥
१२. रा—द्विढाः ।

२५] अष्टाश्रयाः[1] सर्वे एवं[2] श्लक्ष्णरूपसमन्विताः ॥१९॥ [२६
आच्छादितास्ते वासोभिः कुशलैः शिल्पैकर्मणि[3] । [२७पू
२६] सं चैत्यो[4] राजसिंहस्य सञ्चितः[5] कुशलैर्द्विजैः ॥२०॥
उ२८] गरुडो रुक्मपक्षो[6] वै त्रिगुणोऽष्टादशात्मकः[7] । [२९
नियुक्तास्तत्र पशवस्तास्ता उद्दिश्य देवताः ॥२१॥ [३०पू
२९] जलेचराः स्थलेचराः[8] अन्तरिक्षचरास्तथा । [३१पू
पतङ्गाः पक्षिणश्चैव तथा वनचराश्च ये ॥२२॥ [३०उ
३०] ऋषभाः सर्व एवैते नियुक्ताः शास्त्रतस्तथा । [३१उ
उ३१] पशूनां त्रिशतं[9] त्वासीद् यूपेषु[10] नियतं तदा ॥२३॥
N] स यज्ञो वर्तते[11] तत्र राज्ञो दशरथस्य ह[12] । [३२
उ३२] कौसल्या[13] तं हयं तत्र परिचार्य समन्ततः ॥२४॥
विषाणै विंसंसारैनं[14] त्रिभिः परमया मुदा । [३३

---

१. ज—अष्टापदाः । कै–अष्टास्वाश्र० । इति केनाचित्संशोधितः पाठः ।
२. कै—एवैते । इति शोधितः पाठः ।
३. ज—शिल्पकर्माणि ।
४. ज—सुवैद्यो ।
५. रा ल—संचितैः ।
६. रा—पद्मपक्षो ।
७. ज ल भ—०णो द्वादशात्मकः ।
८. ल—सूलचरा ।
९. ब ल—त्रिंशतं ।
१०. ल—०सीद्रुपेषु ।
११. ज भ—ववृधे । कै–पुस्तके च ववृते इति पाठस्थाने संशोध्य ववृधे इति पाठः कृतः ।
१२. कै ज भ—च ।
१३. ज भ—कौशल्या ।
१४. कै रा—विषसानैनं । ज–विषसान्नेन । भ–विषशासैनं ।

N] पतत्रिणा तदा सार्धं तदामूले[1] समाविशत् ॥२५॥

पू३४] अवसद्रजनीमेकां कौसल्या धर्मकांक्षया । [३४

N] होताऽध्वर्युस्तथोद्गाता संग्रहं समयो[2] यथा ॥२६॥

N] महिष्यः परिचर्या च तामवापुस्तथाऽपराः[3] । [३५

उ३५] सत्रिणस्[4]तस्थं तु वपामुद्धृत्य[5] नियतेन्द्रियम्[6] ॥२७॥

पू३६] ऋत्विजश्च सुसंपन्नाः[7] श्रपयांचक्रिरे[8] वपाम्[9] । [३६

उ३७] हयस्य यानि चाङ्गानि तानि सर्वाणि ते द्विजाः ॥२८॥

पू३८] अग्नौ प्रास्यन्ति[10] विधिवत् समस्तं वै हयं तदा ।[11] [३८

N] प्लक्षशाखासु यज्ञानामन्येषां क्रियते स्रवः[12] ॥२९॥

अश्वमेधस्य चैकस्य वैतसः स्रवं[13] इष्यते । [३९

N] त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेषु वै द्विजैः ॥३०॥

चतुर्थो यस्त्वहस्तस्य[14] प्रथमं परिकल्पितम् । [४०

१. कै--'गुदमूले' इत्यपरहस्तेन शोधितः पाठः ।
ल--तदामूलो । भ-तत्र मूले ।

२. रा ल--मम यो यथा । भ-समयोचितं ।

३. ज--०पुस्तथापरां ।

४. ज ल--मंत्रिणस्त० ।

५. ल--वुद्धित्यजते । रा ज ब-···बुद्धृत्य

६. ज--०न्द्रियां । भ-नियतेन्द्रियाः ।

७. ज--सुसस्पर्शाः ।

८. कै--नुपयांच० । रा--स्रपयांच० । ज-श्रमयांच० ।

९. ज--कृपां ।

१०. प--जुहिविरे सम्यक् ।

११. प--अतः परमधिकः पाठः--
आगत्य देवताः सर्वा जगृहुर्भागमीप्सितं

१२. प--हविः । भ-श्रवः ।

१३. प--भंश । भ-भंग ।

१४. ज--यस्तुहस्तस्य ।

N] उक्ष्णो[1] द्वितीयं[2] संख्यातमात्रिरात्रं[3] तथोत्तरम्[3] ॥३१॥ [४०
विचारास्तत्र बह्वो विहिताः शास्त्रदर्शनात् । [४१
N] ज्योतिर्नामायुषी[4] चैव अतिरात्रौ विनिर्मितौ ॥३२॥
N] अभिजिद्विश्वजिच्चैव अप्तोर्यामो[5] महाव्रतः[6] ।[7] [४२
उ३९] प्राचीमध्वर्यवे राजा दिशं स्फीतां ददौ तदा ॥[8]३३॥
दक्षिणां ब्रह्मणे[9] होत्रे प्रतीचीमददाद्दिशम् ।[10] [४३
४०] उद्गात्रे च [11]तथोदीचीं दक्षिणैषा[12] विनिर्मिता ॥३४॥
पू४१] अश्वमेधे महायज्ञे पुराकल्पे स्वयंभुवा । [४४
N] क्रतुं संस्थाप्य[13] तु तदा न्यायतः पुरुषर्षभः[14] ॥३५॥
ऋत्विग्भ्यः प्रददौ राजा धरां तां क्रतुवर्धनः । [४५

---

१. ज—तक्ष्णो । ब ल—उक्तो । प—उको । भ—उक्थो ।
२. कै रा ज ब ल—द्वितीयः । रा—द्वितीयाः ।
३. ल—०तं सहरात्रं त० । प भ—०मतिरात्रमथोत्तरं ।
४. ब ल प—ज्योतिर्ग्रामायुषी । भ—ज्योतिर्गवायुषी ।
५. कै—प्राप्तो वामो । रा ज ब ल—प्राप्तोर्यामो ।
प भ—आप्तोर्यामो ।
६. रा ज—महाव्रताः ।
७. प—अतः परमधिकः पाठः—
ततो राजा यथान्यायं दक्षिणां व्यदधत्तदा ।
८. प—प्राचीं होत्रे ददौ स्फीतां दिशं बहुबलार्जिताम् ।
९. रा ज ब ल—ब्राह्मणे (इत्यपपाठः) ।
१०. प—अध्वर्यवे प्रतीचीं च दक्षिणां [।] ब्रह्मणे तथा ।
११. भ—ततोदीचीं ।
१२. प—अतः परमधिकः पाठः—
समग्रा पृथिवी दत्ता चातुर्होत्रस्य दक्षिणा ।
१३. प—समाप्य ।
१४. कै रा ज ब— षभाः ।

N] ऋत्विजोऽथाब्रुवन्[1] सर्वे राजानं गतकल्मषम् ॥३६॥
भवानेव महीं स्फीतामेकः शासितुमर्हति[2] । [४७
N] विपाप्मा भव राजेन्द्र अस्माकं पुष्टिमावह[3] ॥३७॥ [N
न भूम्या कार्यमस्माकमशक्ताः[4] पालने वयम् ।
N] रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ॥३८॥
निष्कृतिं त्वं नरश्रेष्ठ ह्यस्मभ्यं[5] दातुमर्हसि ।[6] [४८
N] गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ॥३९॥ [५०उ
दशकोटीः[7] सुवर्णस्य[8] रजतस्य चतुर्गुणम् ।[9] [५१

---

१. प—ऋत्विजस्तेऽब्रु० ।

२. रा—शासितुमर्हसि ।

३. प भ—तुष्टिमावह ।

४. भ—कार्यमस्माकं न शक्ताः ।

५. ज ल भ—अस्मभ्यं ।

६. प—अस्याश्वनिःकृतिः राजन्नस्मभ्यं दातुमर्हसि ।
तेषां श्रुत्वा वचस्तथ्यं राजा वै राष्ट्रवर्धनः ।

७. कै रा ज ल—कोटि ।

८. ज—सहस्रस्य ।

९. प—पुस्तके त्रयोदशश्लोकात्परः पाठो ऽत्रेत्थं द्रष्टव्यः—
भृत्यवत् प्रयतो यज्ञे ब्राह्मणान् परिवेषयन् ।
सुप्रीतमनसः सर्वे प्रमृष्टमणिकुण्डलाः ॥
सदया वाग्मि[नो]वीराः परस्परजिगीषिवः ।
ऋष्यश्रृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥
आह्वयांचक्रिरे तत्र शक्रादीन् विबुधोपमान् ।
ध्ययिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ॥
होतारो जुहवामासुर्हविर्भागं दिवोकसां ।
दिवसे दिवसे चक्रुः संस्कारकुशला द्विजाः ॥
सर्वं कर्म यथावत्तद्यथा शास्त्रेण चोदितम् ।
नाषडंगविदत्रासीत्सदस्यो नाबहुश्रुतः ॥

४३] ऋत्विजस्ते ततः सर्वे आददुः संहिताः वसु ॥४०॥
४४] ऋष्यशृङ्गाय महते वसिष्ठाय च धीमते । [५२

१. कै रा ब—आददुर्महिता: ।

न सूत्रं कल्याकुशला नवाकुशलास्तथा ।
उच्छ्रिताश्चाभवन् यूपाः षड् बैल्वाः खादिराश्च षट् ॥
तावन्त एव पालाशास्तथैवोदुम्बराः पृथक् ।
श्लेष्मांतकमयश्चैको देवदारुमयस्तथा ॥
द्वावास्तां तत्र निहितौ बाहुभ्यामपरिग्रहौ ।
महोच्छ्रायपरीणाहो यूपोन्यः कांचनस्तथा ॥
यज्ञे समभवत्तत्र शोभार्थमुपकल्पितः ।
विन्यस्ता विधिवत् सर्वे शिल्पिभिः सुकृता दृढाः ॥
अष्टाश्रयाः सर्व एव श्लक्ष्णरूपसमन्विताः ।
आच्छादितास्ते वासोभिः कुशलैः शिल्पिकर्मणि ॥
विततश्चाभवच्चैत्यो ब्राह्मणैर्यज्ञकर्मणि ।
महायूपोच्छ्रयस्तेऽस्तु सर्वतः समलंकृतैः ॥
रराज सुभृशं यज्ञः कल्पवृक्षैरिवोच्छ्रितैः ।
विविधाश्चाभवन् घोषा ब्राह्मणैर्यज्ञकर्मभिः ॥
अग्निवक्रः कृतश्चापि गरुडः कांचनेष्टकः ।
नियुक्तस्तत्र पशवस्तास्ता उद्दिश्य देवताः ॥
जलेचराः स्थलचरा अंतरिक्षचराश्च ये ।
ऋषभाः सर्व एवैते नियुक्ताः शास्त्रतस्तथा ॥
नानासत्त्वार्षभाश्चैव हयमेधे महाक्रतौ ।
नानासरीसृपाश्चैव नानौषध्यश्च कल्पिताः ॥
पशूनां त्रिशतं चासीद्यूपेषु नियतं तदा ।
अश्वरत्नं चावभृथे प्रोक्षितं विश्वदैविकं ॥
स यज्ञो ववृधे तत्र राज्ञो दशरथस्तथा ।
कौशल्या तं हयं तत्र परिगम्य प्रदक्षिणम् ।
सम्यगभ्यर्चयांचक्रे गन्धमाल्यविभूषणैः ॥
अध्वर्युसहिता चैनं समालभ्य शुचिस्मिता ।
रजनीं दर्युपोष्कां कौशल्या पुत्रकाम्यया ॥

N] ततस्ते न्यायतः कृत्वा प्रतिभागं द्विजोत्तमाः ॥४१॥ [५३पृ
दीनान्धकृपणानां च वृद्धानां च कलत्रिणाम् ।
N] स्त्रीणां हतप्रवीराणां वृद्धानां बालपुत्रिणाम् ॥४२॥ [N
व्याधिकर्षितगात्राणां गुर्वर्थं चाभियाचताम् ।
N] यियक्षूणां दरिद्राणां परराष्ट्रनिवासिनाम् ॥४३॥ [N
सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदितास्तदा । [५३उ
N] ततस्तु सर्वलोकेभ्यो हिरण्यस्य समुद्यताम् ॥४४॥

१. प भ—प्रविभागं ।
२. प—विकलानां ।
३ रा—बालपुत्रिणां । ल—बालिपुत्रिणां ।
४. रा ज—चाभियाचितां । प—चाभिजाचतां ।
५. ज—ययक्षूणां ।
६. प—समृद्धा मुदितास्तदा । भ—प्रददुर्मुदितास्तदा ।
७. ब भ—समुद्यतं । प—समुद्यता ।

तमश्वमुपतिष्ठन्त्याः कौशल्यायास्ततो द्विजाः ।
ऋष्यशृङ्गादयः प्रीताः प्रायुञ्जन्त तदाशिषः ॥
अश्वस्य विधिवत्तत्र परिवार्य समन्ततः ।
विपाशैर्विशशासैनं त्रिभिः परमया मुदा ॥
पतत्रिणा तदा सार्धं तदामूले समाविशत् ।
अवसद्रजनीमेकां कौशल्या धर्मकांक्षया ।
होताध्वर्युस्तथोद्गाता मंत्रवत्समयोज्यान् ॥
महिष्यः परिचर्य्या च तामवापुस्तथा पराम् ।
सत्रिणस्तस्य वचसा वपामुद्धृत्य नियतेन्द्रियाः ॥
ऋत्विङ्मंत्रार्चितामग्नौ जुहावाह्वयन् सुरान् ।
धूमं तस्य नृपो जघ्रौ जिघ्रन्तिस्म वरस्त्रियः ॥
यथाकालं यथान्यायमयावर्तत स क्रतुः ।
हयस्य यानि चांगानि तानि सर्वाणि वै द्विजाः ॥

कोटीशतं सुवर्णस्य कुलस्योद्भावनं शुभम्[1] । [५४
N] ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ।।४५।।[2][3]
स्वर्ग्यं पाप्मापहं चैव दुष्प्रापं सर्वपार्थिवैः । [५८
ततोऽब्रवीदृश्यशृङ्गं राजा दशरथस्तदा[4] ।।४६।।
४६] पुत्रानिच्छाम्यहं विप्र कुलस्योद्भावनान् शुभान् । [५९
पू४७] तथेति च स राजानमुवाच द्विजसत्तमः ।।४७।।
भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः । [६०
N] लोकपालोपमा वीराः परदर्पविनाशनाः[5] ।।४८।। [N
ऋष्यशृङ्गस्तु मेधावी राजानं पुनरब्रवीत्। [१५.१
१५.१]इष्टिं करोमि पुत्रीयां भवतः पुत्रकारणम्[6] ।।[7]४९।। [२पू
पू२] ततः प्रचक्रे तामिष्टिमृषिपुत्रः[8] समृद्धये ।

१. प—कोटीः शत० ।
२. प—कुशलेभ्यो ददौ नृपः ।
३. प—अतः परमधिकः पाठः—

दक्षिणां च प्रगृह्याथ सुप्रीतमनसो द्विजाः ।
ततश्च पानकाः सर्वे ऋषयश्च तपोधनाः ॥
ऊचुर्दशरथं तत्र कामं ध्यायेति वै तदा ।
तानब्रवीद्द्रष्टुमना राजा दशरथो द्विजान् ॥
इच्छामि चतुरः पुत्रानुदारान् ख्यातविक्रमान् ।
तथेति चैव राजानं तमूचुर्ब्रह्मवादिनः ।
यथाभिलखितान् पुत्रानचिरात्त्वमवाप्स्यसि ॥
इत्यार्षे रामायणे आदिकाण्डे त्रयोदशः सर्गः ।
ऊचुर्दशरथं तत्र कामं प्राप्नुहि पार्थिव ॥

४. भ—०थस्ततः ।
५. ज—परदर्पवि० ।
६. कै भ—पुत्रकारणे ।
७. प—इष्टिं तेऽद्यां करिष्यामि पुत्रीयां पुत्रकारणे ।
८. ज—तामिष्टिं मुष्टिपुत्रः । भ—०ष्टिमृषिः पुत्रसमृद्धये ।

N] दीप्तेऽग्नावजुहोद्धव्यं विधिदृष्टेन[1] कर्मणा ॥५०॥ [३

ततो देवाः सगन्धर्वाः[2] सिद्धाश्च ऋषिभिः सह ।

३] भागप्रतिग्रहार्थं[3] वै[4] पूर्वमेव समागताः ॥५१॥ [४

पू६] अश्वमेधे महायज्ञे राज्ञस्तस्य[6] महात्मनः ।

पू४] ब्रह्मा सुरेश्वरः स्थाणुस्तथा नारायणः प्रभुः ॥५२॥ [N

आजगाम महायज्ञे राज्ञो दशरथस्य तत्[5] ।[7]

N] देवांस्तानागतान् सर्वानब्रवीद्द्विजसत्तमः ॥५३॥ [N

प्रसादः क्रियतां राज्ञः प्रसवार्थं हि देवताः ।

N] राजाऽयं धार्मिकः शूरः कृतविद्यः[8] परन्तपः ॥५४॥ [N

प्राप्तवानश्वमेधं च शुद्धात्मा गतकल्मषः ।[9]

N] पुत्रार्थं[10] तप्यते चैव दीर्घकालं महाद्युतिः ॥५५॥ [N

---

१. ल—विधिसृष्टेन ।

२ प—सुगंधर्वाः ।

३. ल—०प्रतिग्रहार्थे ।

४. प—ते ।

५. ल—राज्ञो दशरथस्य तत् ।

६. प—च । भ–ते ।

७. ल—नास्ति । प–अत: परमधिकः पाठः—

तथैव लोकपाल [।]श्च देवतानां च माताः ।
यज्ञास्तथैव सर्व्वे च वेदाश्च साहितास्तथा ॥
इन्द्रश्च भगवान् साक्षान्मरुद्गणावृत: प्रभु: ।

८. रा –कृतविद्यः । प–कृतविज्ञः ।

९. प—अत: परमधिकः पाठः—

इष्टिं च पुत्रकामोऽन्यां पुन: कर्तुं समुद्यतः ।
तदस्य पुत्रकामस्य प्रसादं कर्तुमर्हथः ॥
अभियाचे स व: सर्वानस्यार्थेऽहं कृताञ्जलिः ।

१०. प—पुत्रार्थे ।

N] प्रयच्छत सुतानस्मै चतुरः[1] कुलवर्धनान् ।
तं तथेत्यब्रुवन् देवा द्विजमुख्यं कृताञ्जलिम् ।।५६।। [N
१०] भवान् मान्यश्च पूज्यश्च राजा चायं विशेषतः ।
पू११] लप्स्यसे च परं कामं पुत्रार्थं द्विजसत्तम ।।[2]५७।। [N
N] इष्टिर्हि विधिवत् प्राप्ता राज्ञा दशरथेन वै । [N
११] तथा तमुक्त्वा देवास्तु सर्वे एव महाद्युतिम् ।।५८।।[3]
पू१२] अब्रुवंल्लोककर्तारं ब्रह्माणं वचनं शुभम्[4] ।[5] [५
उ१३] भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ।।५९।।
सर्वान् नो बाधते वीर्याद् बाधितुं तं न शक्नुमः । [६
१४] त्वया तस्मै वरो दत्तः प्रीतेन भगवन्पुरा ।।[6]६०।।
उ१५] मानयन्तश्च त्वद्वाक्यं[7] तस्य सर्वे[8] क्षमामहे । [७
पू१६] उद्वेजयति[9] लोकांस्त्रीनुच्छ्रितान् द्वेष्टि दुर्मतिः ।।६१।।
N] शक्रं सुरगणेशं च स दीपयितुमिच्छति[10] । [८
उ१६] ऋषीन् सयक्षगन्धर्वानसुरान् ब्राह्मणांस्तथा ।।६२।।

---

१. कै रा ज—चत्वारः ।

२. प—लप्स्यते परमं काममेतदिष्ट्या नराधिपः ।

३. प—इत्युक्त्वान्तर्हिता देवास्तत्र शक्रपुरोगमाः ।
तं दृष्ट्वा विधिवत्ख्यातं क्रियमाणं महर्षिणा ।।

४. ल भ—महत् ।

५. प—उपेत्य लोककर्तारं ब्रह्माणं वचनं महत् ।
ऊचुः प्राञ्जलयः सर्वे प्रजापतिमिदं तदा ।।

६. कै प—अतः परमधिकः पाठः—
देवदानवयक्षाणामवध्योसीति कामतः ।
कै—पुस्तकस्याधः पार्श्वेऽनन्तरमपरहस्तेन विन्यासः ।

७. कै रा ज भ—तद्वाक्यं । प—ते वाक्यं ।

८. प भ—सर्वं ।

९. रा—उद्वीजयति ।

१०. कै प भ—धर्षयितुमिच्छति ।

३१७] अतिक्रामति दुर्धर्षो वरदानेन मोहितः ।[1] [९
३१८] जलोर्मिमाली तं दृष्ट्वा सागरो[2]ऽपि च कंपते ॥६३॥[3] [१०उं
उत्पन्नं नो भयं तस्माद्रक्षसो भीमदर्शनात्[4] ।
N] वधार्थं तस्य भगवन्नुपायं वक्तुमर्हसि[5] ॥६४॥ [११
N] एवमुक्तः सुरैः सर्वैर्ब्रह्मा ध्यात्वा ततोऽब्रवीत् ।
हन्तायं विहितस्तस्य वधोपायो दुरात्मनः[6] ॥६५॥ [१२
२१] नागगन्धर्वयक्षाणां देवताऽसुररक्षसाम् ।
अवध्योऽस्मीति तेनोक्तं तथेत्युक्तं च तन्मया ॥६६॥ [१३
२२] अवज्ञाय तु रक्षस्तान्[7] व्याहरन् मानुषाद् वधम् ।[8]
तेनासौ मानुषैर्वध्यो मृत्युश्चा[9]न्यो न विद्यते ॥६७॥ [१४
२३] तच्छ्रुत्वा तु प्रियं वाक्यं ब्रह्मणा समुदीरितम् ।
गन्धर्वर्षिसमायुक्ताः प्रहृष्टा ऋषिदेवताः[10] ॥६८॥ [१५

---

१. प—अतः परमधिकः पाठः—

देवर्षियज्ञगंधर्वान् सुवाणरान् मानुषांस्तु सः ।
अन्यायतः पीडयति वरदानेन दर्पितः ॥
न तत्र सूर्यस्तपति न भयाद्वाति मारुतः ।
नाग्निर्ज्वलति वै तत्र यत्र तिष्ठति रावणः ॥

२. प—समुद्रोऽपि ।

३. प—अतः परमधिकः पाठः—

नष्टो वैश्रवणस्त्यक्त्वा लङ्कां तद्वीर्यपीडितः ।
तस्मान्नः पाहि भगवन् रावणाल्लोकरावणात् ।

४. प—भीमकर्मणः ।

५. प—कर्तुमर्हसि ।

६. ज—दुरात्मनां ।

७. कै—रक्षांस्तान् ।

८. प—अवज्ञाय तु तद्रक्षो नोदाहरत मानुषान् ।

९. प—मृत्युर्नान्योऽस्य ।

१०. भ—वाक्यमब्रुवन् ।

२४] एतस्मिन्नन्तरे विष्णुं विधिना सर्व एव ते[1] ।[2] [१७पू
N] देवता ब्रह्मणा सार्धं तस्थुस्तत्र समाहिताः ॥६९॥
अब्रुवंस्ते तदा सर्वे सुराः संपूर्णमानसाः । [१८
N] त्वां[3] नियोक्ष्यामहे विष्णो लोकानां क्रियतां[4] हितम् ॥७०॥ [१९
एवमुक्तोऽब्रवीद् विष्णुस्तथेति सुरमण्डलम् ।
N] तस्य ते[5] तद्वचः श्रुत्वा व्यक्तमूचुरिदं सुराः ॥७१॥ [N
एष राजा दशरथो हयमेधने[6] दीक्षितः ।[7]
N] धर्मशीलो गुणश्लाघ्यः सत्यवादी दृढव्रतः ॥७२॥ [N
अस्य भार्यासु तिसृषु ह्रीश्रीकल्पासु[8] धीमतः ।
३०] विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम् ॥७३॥[9] [२१

१. प—विष्णुस्तत्रायं भगवान् स्वयं ।
२. प—अतः परमधिकः पाठः—
ब्रह्मणा मनसा ध्यातस्तद्ध्यायामितद्युतिः ।
अब्रवीत्तं ततो ब्रह्मा विष्णुं सुरगणैः सह ॥
अस्तीनामस्मि लोकानामार्तिघ्नो मधुसूदनः ।
याचामहेऽतस्त्वामार्ताः शरणं नो भवाच्युत ॥
ब्रूत किं करवाण्यस्मि विष्णुस्तानब्रवीत्ततः ।
३. रा—त्वं नि० । भ-त्वान्नि । प-त्वा नि ।
४. ल—क्रियते ।
५. प—तद्वचनं ।
६. प—पुत्रार्थं दीक्षितः स्वर्गी ।
७. प—अतः परमधिकः पाठः—
अश्वमेधेन यज्ञेन देवतानामनुग्रहात् ।
८. प—ह्रीश्रीकीर्तिषु धर्मतः ।
९. प—चतुर्द्धा त्वं विभज्य स्वं प्रादुर्भवितुमर्हसि ।
स नियुक्तस्तदा देवैः साक्षान्नारायणः प्रभुः ॥
तानुवाच ततो देवानिदं वचनमर्थवत् ।
किं मया तत्र कर्तव्यं प्रादुर्भूतेन वः सुराः ॥
कार्यं कुतो वापि भयं युष्माकमिदमीदृशम् ।

त्वं तत्र मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ।
N] अवध्यं दैवतैर्विष्णो समरे जहि रावणम् ॥७४॥ [२२
स हि देवर्षिगन्धर्वान् सिद्धानसुरमहोरगान् ।
N] राक्षसो रावणो नाम वीर्योत्सेकेन बाधते ॥७५॥ [२३

इति तस्य वचः श्रुत्वा विष्णोरूचुरिदं सुराः ॥
राक्षसान्नो भयं विष्णो रावणाल्लोकरावणात् ।
मानवीं तनुमास्थाय समुद्धर्तुं त्वमर्हसि ॥
त्वत्तो हि नान्यस्तं पापं शक्तो हंतुं दिवौकसाम् ।
स दीर्घं तप्तवान् कालं तपोऽत्युग्रमरिंदम ॥
तेनायं परितुष्टोऽस्य बभूव प्रपितामहः ।
तदास्मै प्रददौ तुष्टो वरदो भगवान् पुरा ॥
अभयं सर्वभूतेभ्यो वर्जयित्वा तु मानुषान् ।
ततो दत्तवरस्यैवं तस्य नान्यत्र मानुषान् ॥
वधाद्भयमतश्चैनं गत्वा मानुषतां जहि ।
स हि देवर्षिगंधर्वास्तपः सिद्धांश्च मानुषान् ॥
वरदानमदोन्मत्तो बाधते राक्षसाधमः ।
यज्ञहा ब्रह्महा चैव ब्रह्मद्विट् पुरुषादकः ।
अवध्यो वरदानेन रावणो लोककण्टकः ॥
तेनाक्रान्ता नृपतयः सरथाः [सह] कुंजराः ।
हता विप्रद्रुताश्चान्याः प्राद्रवंत दिशो दश ॥
भक्षिता ऋषयश्चैव तथैवाप्सरसां गणाः ।
दृप्तः सप्त सदा लोकान् क्रीडन्निव स बाधते ॥
तेन तप्तं तपस्तीव्रं दीर्घकालमरिंदम ।
येन तुष्टोऽभवद् ब्रह्मा लोककृल्लोकपूजितः ॥
स तुष्टः प्रददौ तस्मै राक्षसाय ह्यवध्यतां ।
अवज्ञाताः सुरास्तेन वरदानेन मानवाः ॥
तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परंतप ।

१. कै—देवतेद् । ज—देवते ।

तमुल्बणं रावणमुग्रमाहवे[1]
प्रवृद्धदर्पं[2] त्रिदशेश्वरद्विषम्[3] ।
तं रावणं[4] देवगणस्य[5] कण्टकं
N] पराक्रमादुद्धरतां भवानिति[6] ॥७९॥ [N

इत्यार्षे रामायणे[7] बालकाण्डे[8] रावणवधोपायो
नाम दशमः[9] सर्गः ।

---

१. प—रावणमुग्रतेजसं ।

२. प—विवृद्धदर्पं ।

३. रा—त्रिदशेश्वरद्विषाम् ।

४. प—विरावणं ।

५. ज—बुधग० । ठ—बुद्धगण० ।
प—सर्वतपस्वि० । भ—विबुधगणस्य ।

६. प—मनुष्य[ता]मेत्य निहंतुमर्हसि ।

७. भ—रामायणे वाल्मीकिविरचिते ।

८. भ—आदिकाण्डे ।

९. प—चतुर्दशः ।

[वं=१४, १५, १६] [एकादशः सर्गः] [दा=१६, १८]

स नियुक्तः सुरैः सर्वैर्विष्णुर्नारायणस्तथा ।
३१] उपगम्य सुरान् सर्वान् श्लक्ष्णं वचनमब्रवीत् ॥१॥[1] [१
क उपायो वधे तस्य राक्षसाधिपतेः सुराः ।
३२] यदहं तं समास्थाय निहन्यामृषिकण्टकम् ॥२॥ [२
पृ३३] एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययम् ।
पृ३४] मानुषं रूपमास्थाय तद् रक्षो जहि संयुगे ॥३॥ [३
तेन तप्तं तपस्तीव्रं चिरकालमरिन्दम[2] ।
३५] येन तुष्टोऽभवद्[3] ब्रह्मा लोककृल्लोकपूजितः ॥४॥ [४
सन्तुष्टः[4] प्रददौ तस्मै राक्षसाय वरं प्रभुः ।
३६] नानाविधेभ्यो भूतेभ्योऽभयमन्यत्र मानुषात् ॥५॥ [५
N] स पूर्वं हि वरं प्राप्तो राक्षसाधिपतिः प्रभो ।
पृ४२] तस्मात् तस्य वधो दृष्टो मानुषेभ्यः[5] परं तदा ॥६॥ [७
इत्येतद् वचनं श्रुत्वा सुराणां[6] विष्णुरव्ययः ।
१८.१] पितरं रोचयामास तदा दशरथं नृपम् ॥७॥ [८
अजस्य पुत्रो नृपतिस्तस्मिन् काले यदृच्छया ।
२] याज्यते[7] द्विजमुख्येन[8] पुत्रार्थमरिसूदनः[9] ॥८॥ [९

---

१. ल—पुस्तके प्रथमश्लोकस्य द्वितीयेन विपर्ययः ।

२. ज ल भ—दीर्घकालम० । कै—०लमरिंदम ।

३. रा—तुष्टोब्रवीद् ।

४. ज—ससंतु ।

५. रा—मनुषेभ्यः । ज—मानुष्येभ्यः ।

६. कै—स्वराणां ।

७. भ—यजते ।

८. भ—द्विजमुखेन ।

९. ज ल—०मरिसूदन ।

तस्यैव यजमानस्य पावकाद्द्भुतप्रभम् ।
३] प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम् ॥९॥ [११
कृष्णाजिनधरं कृष्णं रक्ताक्षं दुन्दुभिस्वनम् ।
४] हरिं स्निग्धेक्षणं रम्यं श्मश्रुप्रवरमूर्धजम् ॥१०॥ [१२
शुभलक्षणसंपूर्णं दिव्याभरणभूषितम् ।
५] मेरुशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम् ॥११॥ [१३
दिवाकरनिभाकारं दीप्तवह्निसमप्रभम् । [१४पू
N] तप्तजाम्बूनदमयीं राजितां नियतच्छदाम् ॥१२॥
६] दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् ।
प्रगृह्य विमलां दोर्भ्यां मयो मायामिवासुरीम् ॥१३॥ [१७
अब्रवीत् प्रश्रितं वाक्यमिदं द्विजवरं तदा ।
७] प्राजापत्यं नरं विद्धि मामिहाभ्यागतं स्वयम् ॥१४॥ [१८
८९] ततोऽब्रवीद् द्विजश्रेष्ठः प्राजापत्यं नरोत्तमः ।
प्रयच्छ पात्रीं राज्ञे त्वं स्वयमेव समुद्यताम् ॥१५॥ [N
१०] ऋषिपुत्रवचः श्रुत्वा प्राजापत्यो नरोत्तमः ।
N] ददौ नृपतये पात्रीं स्वयमेव समाहितः ॥१६॥ [N

---

१. भ—महावीर्यं ।
२. भ—महातेजो ।
३. ल—दुर्दुभिस्वनम् ।
४.—रा ल भ—हरिश्मिग्धेक्षणं ।
५. भ—०क्षणसंपन्नं ।
६. कै—तृप्तशा० ।
७. ल—नास्ति ।
८. रा ज ब भ—प्रसृतं ।
९. ज भ—द्विजश्रेष्ठं ।
१०. भ—राज्ञे पात्रीं ।

उ१२] ततस्तं स नरं ज्ञात्वा[1] प्रत्युवाच कृताञ्जलिः ।
भगवन् स्वागतं तेऽस्तु किमहं करवाणि ते ॥१७॥ [१९
१३] ततो नृपवरं वाक्यं प्राजापत्यो नरोऽब्रवीत् ।
N] राजन्नर्चयता[3] देवान् सद्यः प्राप्तं फलं त्वया ॥[2]१८॥ [२०
उ१४] इदं तु नरशार्दूल पायसं देवनिर्मितम् ।
प्रजाकरं[4] गृहाण त्वं धर्म्यमारोग्यवर्धनम् ॥१९॥ [२१
१५] भार्याणामनुरूपाणामशनार्थं प्रयच्छ वै ।
तासु त्वं[5] प्राप्स्यसे प्रीतिं[6] यदर्थं यजसे नृप ॥२०॥ [२२
१६] बाढमित्येवं[7] नृपतिः[8] सन्तुष्टः प्रतिपूज्य च । [२३पू
पू१७] अब्रवीत् तं महद्भूतं श्रेष्ठमात्महितं वचः ॥२१॥ [N
उ१७] ततः स भगवांस्तस्मै पात्रीं पात्रवराय वै ।
पू१८] नृपाय दत्त्वा तत्रैव क्षिप्रमन्तरधीयत ॥२२॥ [N
अदृश्यं तत्क्षणाद्[9] भूतं दीपवत् प्रजगाम ह ।
N] गते तस्मिन् महाभूते विस्मयं नृपसत्तमः ॥२३॥ [N
जगाम स महातेजा राजा दशरथस्तदा ।
N] खद्योतवच्चापि ततः संभूतो भूत उत्तमः ॥२४॥[10] [N

---

१. भ—राजा ।
२. कै—पुस्तकस्य पूर्वपार्श्वे ऽपरहस्तेन विन्यासः ।
३. रा ज ब—०र्चयतो ।
४. ज—पूजाकरं ।
५. ज—तं । भ–हि ।
६. रा—प्रीतिर्यं० । ब–०ऽपत्यं ।
७. रा—०मित्येवं । भ–०मित्यं च ।
८. भ—नृपतिं भहृष्टः ।
९. ज—अदृश्यत क्षणाद् ।
१०. रा—नास्ति ।

N] न[1] विज्ञातो गतिस्तस्य[2] येन[2] मार्गेण संप्लुतः । [N
उ१८] ततो दशरथः प्राप्य पायसं देवनिर्मितम् ॥२५॥[3]
बभूव परमप्रीतः प्राप्य वित्तमिवाधनः । [२५
१९] सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ॥२६॥[4]
पू२०] गृहाणार्धमितो देवि पुत्रीयं हितमात्मनः[5] । [२८
उ२१] अर्धादर्धं ददौ चापि कैकेय्याः स नराधिपः॥२७॥[4]
चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तथा । [२९
प्रददौ च विशिष्टं च पायसं देवनिर्मितम् ॥२८॥[4]
२२] अनुचिन्त्य सुमित्रायै पुनरेव नराधिपः[6] । [३०
N] ततः प्राश्य तु तत् सर्वं पृथक् पायसमुत्तमम् ॥२९॥ [N
श्रुत्वा पुत्रीयमित्येव प्रहृष्टमनसोऽभवन् ।
N] अन्तर्वत्न्यश्च ताः सर्वाः सर्वाश्च[7] सुसमाहिताः[7] ॥३०॥ [N
राजा संलक्ष्य धीरो हि प्रहसन्मुदितोऽभवत् ।
N] ततः प्रादात् सुविपुलं[8] धनं बहुविधं तदा ॥३१॥ [N
ऋष्यशृङ्गाय मेधावी राजा देवसमद्युतिः ।
N] प्रतिगृह्य च तत् सर्वं धनं द्विजवरस्तदा ॥३२॥ [N
N] श्वश्रूभ्यः प्रददौ गत्वा सर्वाभ्यः प्रीतिपूर्वकम् ।
राज्ञस्ततोऽभ्यनुज्ञातुं सर्वानेव प्रचक्रमे ॥३३॥ [N

१. ल — अविज्ञाता ।
२. रा — गतस्तस्य येण ।
३. ब — अतः परमधिकः पाठः—
अनुचिंत्य सुमित्रायै पुनरेव नराधिपः ।
४. कै — पुस्तकस्य पश्चिमभागे ऽपरहस्तेन विन्यासः ।
५. रा — प्रियमात्मनः ।
६. रा — धनाधिपः ।
७. ल — सर्वाश्चैव समाहिताः । ब-अभूवु सुस ।
८. ब — स्वविपुलं ।

१६.३]प्रीतियुक्तेन मनसा राजा दशरथस्तदा ।
स्वं स्वं राष्ट्रं यथाकामं गच्छन्तु वसुधाधिपाः ॥३४॥ [N

४] प्रीतोऽहमत्र भद्रं वः स्वस्ति प्राप्नुत मा चिरम्[1] ।
सर्वे भवन्तः पश्यन्तु कार्यं विषयरक्षणम् ॥३५॥ [N

५] भ्रष्टो हि विषयाद् राजा मृतकल्पः प्रदृश्यते[2] ।
तस्मात् स्वविषये रक्षा कर्तव्या भूतिमिच्छताम्[3] ॥३६॥ [N

६] यज्ञैर्नावाप्यते[4] स्वर्गो रक्षणात् प्राप्यते यथा ।
यथा हि पुरुषः कुर्याच्छरीरे यत्नमुत्तमम्[5] ॥३७॥ [N

७] बुद्ध्या[6] च चेतमानस्तु[7] तथा राज्ये नराधिपः ।
अनागतविधानं च कर्तव्यं विषये नृपैः ॥३८॥ [N

८] आगमश्चापि कर्तव्यस्तथा[8] दोषो न जायते ।
एवं संदिश्य राज्ञः स नुत्वा[9] ते च नराधिपाः ॥३९॥ [N

९] अन्योन्यं[10] संविदं[10] कृत्वा प्रयाताः सर्वतो दिशम् ।
समाप्तदीक्षानियमैः[11] पत्नीगणसमन्वितैः[12] ॥४०॥ [N

१०] संप्रहृष्टमना भूत्वा राजा दशरथस्तथा ।
गतेषु पार्थिवेन्द्रेषु सभृत्यबलवाहनः ।

११] प्रविवेश पुरीं श्रीमान् पुरस्कृत्य द्विजोत्तमान् ॥४१॥[१८.५

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
पायसोत्पत्तिर्नाम एकादशः सर्गः ।

---

१. भ—चिरां ।

२. कै—प्रभुश्यते ।

३. रा—भूमिमिच्छतां । ४. भ—०नैवाप्यते ।

५. रा—रत्नमुत्तमं । ६. रा—बुध्वा ।

७. रा ज—चेतयानस्तु । ८. रा—कर्तव्यस्तदा ।

९. रा ज ल भ—श्रुत्वा । १०. ज—अनन्यसंविदं ।

११. कै—समाप्तदीक्षः नियमः । १२. भ—०गणसमर्चितः ।

ततः कालस्य महते ऋष्यशृङ्गः सुपूजितः । [N
१] शान्तया प्रययौ सार्धं ब्राह्मणैश्च कृताञ्जलिः ॥१॥
अन्वीयमानो राज्ञा वै सानुयात्रेण धीमता । [६
२] वसिष्ठेन च वीरेण तथा पौरजनेन च ॥२॥ [N
यानेन महता शान्ता कम्बलावततेन हि ।
३] गोभिः श्वेतैस्तु युक्तेन प्रेष्यवर्गान्वितेन च ॥३॥ [N
संगृह्य रत्नं सुबहु मणिरत्नमजादिकम् ।
४] विविधैश्चाप्यलङ्कारैर्भूषिता श्रीरिवापरा ॥४॥ [N
मुदा च परयोपेता प्रययौ वरवर्णिनी ।
५] भर्तारमनुसंरक्ता पौलोमीव पुरन्दरम् ॥५॥ [N
उषित्वा सुखसंवासं सर्वकामैः सुपूजिता ।
६] लालिता ज्ञातिभिश्चापि तथा स्त्रीभिश्च सर्वशः ॥६॥ [N

---

१. रा भ—महतो ।

२. रा भ—कृतात्मभिः ।

३. रा—राजा ।

४. रा—सानुमाग्रेण धीमतः ।

५. रा भ—धीरेण ।

६. ब—कम्बलावर्तनेन ।

७. ल—शैतस्तु यु० । ब—श्वेतैश्चयुक्तेन । भ—श्वेतैः सयुक्तेन ।

८. ल—०त्नमयादिकम् । ब—०लगजादिकं । भ—०त्नमजाविकं ।

९. ज—भूषितैः ।

१०. रा ल—परमयोपेता ।

११. ज ल भ—सुखवासं ।

श्राविता वनवासं च भर्त्रा सा तु सुशोभना ।
७] तमेव मन्यते साधुं तथाऽपि सुखिता सती ॥७॥ [N
सान्तःपुरो नृपश्चापि सोऽन्वगच्छन्महाव्रतम् ।
८] ऋषिपुत्रं महाभागं शान्तां चैवात्मजां सुताम् ॥८॥ [N
ऋषिपुत्रस्य वचनात् ततो वासः प्रकल्पितः ।
९] सुखवासाः सुगच्छन्ति सर्वकामैः सुपूजिताः ॥९॥ [N
ततोऽभिवाद्य राजानमृषिपुत्रः प्रतापवान् ।
१०] विज्ञापयामास तदा निवर्ततु भवानिति ॥१०॥ [N
ऋषिपुत्रवचः श्रुत्वा राजा सान्तःपुरस्तदा ।
११] उच्चैः प्रमुदितस्तत्र वचनं चेदमब्रवीत् ॥११॥ [N
कौसल्यां च सुमित्रां च कैकेयीं च मनस्विनीम् ।
१२] सर्वाः सुदृष्टां कुरुत शान्तां दुर्लभदर्शनाम् ॥१२॥ [N

---

१. भ—भर्त्रे ।

२. ल—सुशोभनं ।

३. भ—सा तु ।

४. भ—सुषिता । रा—सुखितः ।

५. ज—सोन्तःपुरे ।

६ भ—चैवाद्विजां ।

७. भ—अतः परमधिकः पाठः—

कुर्वन्ति प्रसमामल्यां वसतिं ये निराकुलाः ।

८. ज ल—सुपूजितः ।

९. भ—सुखं वासान् प्रगच्छन्ति सर्वकामैस्तु पूजितः ।

१०. रा—निवर्तस्व ।

११. ज ल—सुदृष्टाः ।

१२. कै—सुदृष्टी । रा—दुर्लभदर्शनात् ।

तत आलिङ्ग्य सर्वास्ताः शान्तां बाष्पाविलेक्षणाः[1] ।
१३] ऊचुः स्वस्त्ययनं तस्य सभार्यस्य[2] द्विजस्य वै ॥१३॥ [N
वायुश्चाग्निश्च सूर्यश्च[3] पृथिवी चन्द्रमा[4] दिशः ।
१४] वने रक्षन्तु सततं त्वां भर्तृव्रतचारिणीम् ॥१४॥ [N
श्वशुरः पूजनीयस्ते स हि मान्यो विशेषतः ।
१५] पूजाभिरनुकूलाभिरग्निशुश्रूषणादिभिः ॥१५॥ [N
भर्ता च पूजनीयस्ते सर्वाऽवस्थास्वनिन्दिते ।
१६] प्रियवादेन रहसि स्त्रीणां भर्ता हि दैवतम् ॥१६॥ [N
प्रेषयिष्यति राजा तु कुशलार्थं तवाबले ।
१७] ब्राह्मणान् नित्यशः[5] पुत्रि मोत्सुका[6] भूः कदाचन ॥१७॥ [N
एवं शान्तां[7] समाश्वास्य[8] मूर्ध्नि चाघ्राय चासकृत् ।
१८] न्यवर्तन्त ततः सर्वाः स्त्रियो राज्ञा[9] प्रचोदिताः ॥१८॥ [N
प्रदक्षिणं द्विजश्रेष्ठं कृत्वा राजा स वीर्यवान् ।
१९] व्यादिशत् सैनिकान् कांश्चिदृश्यशृङ्गाय धीमते ॥१९॥ [N
अभिवाद्य स[10] राजानमुवाच द्विजसत्तमः ।
२०] स्वस्ति तेऽस्तु महाराज धर्मेणाराधय प्रजाः ॥२०॥ [N

---

१. रा—बाष्पाविलेक्षणां । ज ब—बाष्पविलेक्षणाः ।
ल—तां चाविलेक्षणाः ।
२. भ—सभार्यस्याह आशिषः ।
३. ज ल भ—सोमश्च ।
४. ज ल भ—सविता ।
५. ज ल भ—नित्यसंप्रीतो ।
६. रा ब—सोत्सुका ।
७. के—शांत्वां ।
८. ल—समाश्वस्य ।
९. रा—राजप्रचोदिताः ।
१०. भ—तु ।

व्यवहारेषु ते धर्मः कर्तव्यो हृदि नित्यशः ।
N] धर्मं श्रयेथाः सर्वेषु कालेषु पुरुषर्षभ ॥२१॥[2] [N
पू२१] एवमुक्त्वा तु राजानं ययावृषिसुतस्तदा ।
N] मनस्तस्मिन समाधाय स्नेहभावसमन्वितम् ॥२२॥[4] [N
उ२१] अदृश्योऽभूद् यदा विप्रस्तदा राजा न्यवर्तत ।
प्रविष्टश्च पुरीं राजा सभृत्यबलवाहनः ॥२३॥ [N
२२] न्यवसत् तत्र मुदितः पुत्रजन्मप्रतीक्षकः ।
ऋष्यशृङ्गः सुतेजस्वी प्रययौ क्रमशस्तदा ॥२४॥ [N
२३] लोमपादस्य नगरीं चम्पां चम्पकमालिनीम् ।
श्रुत्वैव लोमपादोऽपि तमायान्तमृषिं तदा ॥२५॥ [N
२४] सब्राह्मणः सहामात्यः प्रत्युद्गम्य तमब्रवीत् ।
स्वागतं ते द्विजश्रेष्ठ दिष्ट्याऽसि कुशली प्रभो ॥२६॥ [N
२५] इहागतो महाभागः सभार्यः सपरिच्छदः ।
पिता ते कुशली ब्रह्मन प्राहिणोन्नित्यशश्च मे ॥२७॥ [N
२६] कुशलार्थं तव विभो सभार्यस्य विशेषतः ।

---

१. रा—धर्माः कर्तव्ये ।

२. म—नास्ति ।

३. कै रा ज व—समादाय ।

४ अ—श्लोके पूर्वापरार्द्धव्यत्ययः । अतः परमधिकश्च पाठः—
तं यान्तमनुवव्राज स्थितो निश्चलचक्षुषा ।

५. रा—यथा ।

६. कै—सुभृत्यबल० ।

७. म—यत्र ।

८. रा—स्वतेजस्वी ।

९. रा—क्रमशस्तथा ।

१०. ज—चण्यां ।

११. ज व—चण्यकमा० । कै—पुस्तके च चण्यामिति पाठं संशोध्य
चंपामिति कृतम् ।

स्वलङ्कृतं च नगरं कारयामास बुद्धिमान् ॥२८॥ [N

२७] पूजार्थमृष्यशृङ्गस्य[1] राजा हृष्टेन चेतसा ।

ऋष्यशृङ्गः प्रहृष्टस्तु सह राज्ञा पुरोत्तमम् ॥२९॥ [N

२८] पुरोहितं पुरस्कृत्य पूजितः प्रविवेश ह ।

एवं स न्यवसत् तत्र द्विजपुत्रः प्रतापवान् ॥३०॥ [N

२९] राज्ञा सान्तःपुरेणैव पूज्यमानो यथाक्रमम् ॥३१॥ [N

इत्यार्षे रामायणे बालकाण्डे ऋष्यशृङ्गप्रयाणं[2]
नाम द्वादशः सर्गः[2] ॥ १२ ॥

---

१. के—पूजार्थं ऋषिशृ० । ज ब—पूजार्थमृषिशृ० ।

२. रा ळ—०शृङ्गप्रयाणो नाम सर्गः ।

ऋष्यशृङ्गे तु संप्राप्ते राजा ब्राह्मणमब्रवीत् ।
१] ऋषेर्गच्छ समीपं त्वं निवेदय यतव्रतम् ॥१॥
आगतं परमोदारमृष्य[2]शृङ्गं दुरासदम् ।
२] ऋषये सुव्रताय त्वं कश्यपात्मजसंभवम्[3] ॥२॥
अभिवाद्यैव शिरसा यत्कृ[4]ते द्विजसत्तम ।
३] प्रसाद्यश्च सुतार्थं मे सर्वा[5]वस्थं यतात्म[6]ना ॥३॥
श्रुत्वैवं[7] राज्ञो[8] वचनं[9] स तदा द्विजसत्तमः ।
४] जगाम तत्र यत्रासौ वर्तते कश्यपात्मजः ॥४॥
प्रसाद्य च द्विजश्रेष्ठं शिरसाऽभिप्रणम्य[10] च ।
५] अब्रवीत् [11]प्रश्रितं वाक्यं राज्ञा य[12]दभिचोदितः ॥५॥
पुत्रस्ते समनुप्राप्तो यज्ञं कृत्वा महात्मनः ।
६] राज्ञो दशरथस्यैव श्वशु[13]रस्य महामनाः ॥६॥

---

१. रा—तु ।
२. ज—०रमृषिश्रृंगं ।
३. रा ज ल भ—कश्यपस्यात्मसंभवं ।
४. ज भ—मत्कृते । ल—सत्कृते ।
५. कै ज ल भ—सर्वावस्थो । रा—सर्वावस्तां ।
६. ज ल—महात्मनः । भ—महामुनिः ।
७. ल—श्रुत्वा वै ।
८. कै—राज्ञो स तदा । ल—वचनं राज्ञस् ।
९. कै—वचनं । ज ल भ—तदा स द्वि० ।
१०. भ—सुप्रणम्य ।
११. ज भ—प्रसृतं ।
१२. ज ल भ—यदभिनोदितं ।
१३. ज ल—सुश्रूरस्य ।

पूर्वमेव[1] तु तत् सर्वं श्रुत्वा सांबन्धिकं कृतम्[2] ।
७] यज्ञकर्म च वीरस्य राज्ञो दशरथस्य तत् ॥[3]७॥
श्लाघनीयस्तु सम्बन्धी राजा देवसमो हि सः ।
८] ततो मर्षितवान् वीरस्तस्य राज्ञो महात्मनः ॥८॥
श्रुत्वा तु वचनं तस्य द्विजस्य सुमहायशाः[4] ।
९] गमने मतिमाधत्त[5] पुत्रस्यानयने तथा[6] ॥९॥
स हि[7] शिष्यवृतस्तत्र[8] प्रयातो द्विजसत्तमः ।
१०] लोमपादस्य नगरीं चम्पां पुत्रदिदृक्षया ॥१०॥
संपूज्यमानो धर्मात्मा ग्रामैर्घोषैश्च सर्वतः[9] ।
११] उपायनमुपादाय[10] नरास्तं समुपागमन्[11] ॥११॥
किङ्कराः समुपातिष्ठन् रात्रिन्दिवमतन्द्रिताः[12] ।
१२] ऊचुः प्रणम्य शिरसा किं[13] मुने करवामहे ॥१२॥
तानब्रवीत् स विप्रेन्द्रः सर्वानेव समागतान् ।
१३] किमर्थं क्रियते पूजा श्रोतुमिच्छामि तत्त्वतः ॥१३॥
तत ऊचुर्महात्मानं संबन्धी ते नराधिपः ।

---

१. भ—च ।
२. भ—विधिं ।
३. ज ल भ—यज्ञकर्म च वै राज्ञः कृतं दशरथस्य तत् ।
४. ज ल—हि महा० । भ—तु महा० ।
५. ल—मतिमादत्त ।
६. ज ल भ—तदा ।
७. ज—ह ।
८. रा व—शिष्यवृतस्तस्य । ज ल भ—शिष्यैर्वृतस्तत्र ।
९. ज ल भ—सर्वशः ।
१०. रा ज भ—भक्ष्यभोज्यमुपादाय । ल—बहु भोज्यमु० ।
११. ल—समुपागतम् ।
१२. ज भ—रात्रौ दिनमतन्द्रिताः ।
१३. ज ल भ—मुने किं ।

१४] तस्याज्ञा क्रियते ब्रह्मन् व्येतु ते मानसो ज्वरः ॥१४॥
श्रुत्वा तु वचनं तेषां मनःप्रह्लादकं शुभम् ।
१५] प्रसादमकरोद् राज्ञः सहामात्यपुरस्य हि ॥१५॥
विभाण्डकवचः श्रुत्वा किङ्करा हृष्टमानसाः ।
१६] परितो जग्मुराख्यातुं राज्ञः प्रियनिवेदकाः ॥१६॥
तच्छ्रुत्वा वचनं तेषां मनःप्रीतिविवर्धनम् ।
१७] मन्त्रिभिः सह धर्मात्मा प्रत्युद्गम्य नराधिपः ॥१७॥
दृष्ट्वा च मुनिशार्दूलं प्रणम्य च पुनः पुनः ।
१८] अब्रवीत् स इदं वाक्यं हर्षसंफुल्ललोचनः ॥१८॥
अद्य मे सफलं जन्म दर्शनात् तव सुव्रत ।
१९] तथेति च स राजानमुवाच द्विजसत्तमः ॥१९॥
मा ते भयं भूद् राजेन्द्र प्रसन्नोऽस्मि तवानघ ।
२०] ततः प्रहृष्टो नृपतिः पुरस्कृत्य द्विजर्षभम् ॥२०॥
प्राविशन् नगरीं श्रीमानर्चितां सर्वमङ्गलैः ।
२१] स्वलङ्कृतं गृहं चैव प्रावेशयदरिन्दमः ॥२१॥

---

१. ज ल भ—तस्यार्थे ।
२. ज ल भ—तेषां वचनं ।
३. ज ल भ—मनः प्रह्लादनं ।
४. रा—च ।
५. ज ल भ—त्वरिता ।
६. ज ल भ—प्रियहिते रताः ।
७. ज—मन्त्रिमुख्यः प्रसन्नात्मा । ल भ—मंत्रिमुख्यैः प्रसन्नात्मा ।
८. ज ल—तु ।
९. ज भ—अब्रवीच्च ।
१०. ज ल भ—प्रसन्नो ।
११. ज ल—नगरं
१२. कै रा व ल—श्रीमानर्चितं । ज—श्रीमानन्वितं ।

पुरोहितेन सहितः प्रगृह्यार्घमुपाद्रवत्[1] ।
२२] अभिवाद्य तथा चैनं[2] न्यायतः प्रतिपूज्य च ॥२२॥
तस्थुः प्राञ्जलयः सर्वे समासाद्य द्विजोत्तमम् ।
२३] ततः शान्तां पुरस्कृत्य ताः स्त्रियः समलङ्कृताम् ॥२३॥
न्यवेदयन्त विप्राय स्नुषेयं[3] तव मानद ।
२४] प्रतिगृह्य[4] स तां[5] शान्तां समालिङ्ग्य च धर्मवित् ॥२४॥
पू२५] अङ्के[6] निवेश्य च तदा विस्मयं परमं गतः ।
प्रायश्चित्तं च कृतवान्[7] पुत्रस्य द्विजसत्तमः ॥२५॥
२७] महर्षिभिः[8] पूज्यमानः सपुत्रश्च वनं ययौ ॥२६॥

इत्यार्षे[9] रामायणे बालकाण्डे ऋष्यश्रृङ्गोपाख्यानं
नाम त्रयोदशः सर्गः ॥१३॥

---

१. रा—प्रगृह्याघ्यमु० । ज ल भ—प्रगृह्यार्घ्यं समाहितः ।
२. ज ल भ—मुनिं चैव ।
३. रा—स्नुषैवं ।
४. ज ल—परिगृह्य ।
५. ज—सुतां । भ—तु तां ।
६. भ—अंकं ।
७. रा—भगवान् ।
८. ज ल—महर्षिः पूज्यमानश्च । भ—महर्षिः पूज्यमानस्तु ।
९. कै—वाल्मीकीये ।

राजोपि धर्मेण तदा रञ्जयन् सुनयैः प्रजाः ।
N] इक्ष्वाकुवंशजः श्रीमान् दीप्तयाप्यायितैः श्रिया ॥१॥ [N
यशसा रञ्जयंल्लोकान् कृतात्मा सर्वधर्मवित् ।
N] धर्ममेव च सत्यं च संपश्यञ्जीविते फलम् ॥२॥ [N
तिस्रो महिष्यो राजर्षेर्बभूवुस्तस्य धीमतः ।
N] गुणवत्योऽनुरूपाश्च चारुप्रोष्ठपदोपमाः ॥३॥ [N
सदृशी तत्र कौसल्या कैकेयी चाभवच्छुभा ।
९.] सुमित्रा वामदेवस्य बभूव करिणी सुता ॥४॥ [N
ततोऽस्य जज्ञिरे पुत्राश्चत्वारोऽमिततविक्रमाः ।
१०] रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ॥५॥ [N

---

१. ज ल भ—स च चारोत्तमं धर्मं ।
२. ज ल—सुनयः ।
३. रा—० प्यायतः ।
४. ज ल भ—राज्ञो वै बभू० ।
५. भ—० ऽनुरूपा वै ।
६. कै—सत्यशी (?)
७. भ—कौशल्या ।
८. रा ब—करणी ।
९. रा ज ब ल—शुभा ।
१०. भ—सुमित्रा वा नृदेवस्य बभूवानंदकारिणी ।
अतः परमस्य टीकापि मूले दृश्यते । यथा–
सुमित्रा वामदेवस्य बभूव करणी शुभा । इति पाठे वामः सुंदरः ।
स चासौ देवश्चेति व्युत्पत्त्या दशरथस्य राज्ञ इत्यर्थः ।
करं नयतीति करणी राज्ञः करस्पर्शविषया बभूव ।
अथवा वामदेवस्य करणी संज्ञका पत्नी यथा शुभा तथा
राज्ञः सुमित्रा बभूव ।

तेषां ज्येष्ठं महाबाहुं वीरमप्रतिमौजसम् ।
११] कौसल्याऽजनयद् रामं विष्णुतुल्यपराक्रमम् ॥६॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ।
१२] अदितिर्देवराजेन यथा बलनिघातिना ॥७॥ [१२
स हि[1] देवैः सगन्धर्वैर्याचितोऽर्थे[2] महात्मभिः[3] ।
N] विष्णो पुत्रत्वमेहीति[4] कृत्वाऽऽत्मानं चतुर्विधम् ॥८॥ [N
रावणस्य हि[5] रौद्रस्य वधार्थार्य[6] दुरात्मनः ।
N] विष्णुः स हि महाभागः[7] सुराणां शत्रुमर्दनः ॥९॥ [N
स हि शीलोपपन्नश्च[8] वीर्यवान्[9] गुणवानपि ।
N] बभूव मानवे[10] लोके गुणैर्दशरथाधिकः ॥१०॥[11] [N
अथ लक्ष्मणशत्रुघ्नौ जनितौ तौ सुमित्रया । [१४पू
N] उत्तमौ दृढभक्तीनां रामस्यानवमौ गुणैः ॥११॥ [N
तावप्यास्तां चतुर्भागौ विष्णोः संपिण्डितावुभौ[12] ।
N] चतुर्भागस्य यस्यार्धमेकैकः पायसोऽभवत्[13] ॥१२॥[14]

---

१. रा ज—ह ।
२. ज—याचितः स । ल भ—याचितश्च ।
३. रा—महर्षिभिः । भ—महामतिः ।
४. ज ल भ—पुत्रत्वं गच्छ विष्णो वै ।
५. ज ल भ—रावणस्येह ।
६. ज ल भ—वधार्थं तु ।
७. ज—विष्णुर्हि स महाभागः । भ—विष्णुर्हि सुमहा० ।
८. ल भ—वीर्योपपन्नश्च ।
९. ल भ—शीलवान् ।
१०. ल—मानवो ।
११. ज—नास्ति ।
१२. ज—विष्णुसंपिंडितावुभौ ।
१३. ज—पादशोऽभवत् । भ—पादशोऽददात् ।
१४. ल—एक एव चतुर्भागादपरस्मादजायत ।

पू१७] भरतो नाम कैकेय्या जज्ञे सत्यपराक्रमः ।
साक्षात् विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥१३॥ [१३
ते दीप्तयशसः सर्वे महेष्वासा नरर्षभाः[1] ।
१८] आपूरयन्तो[2] वै कामान पितुर्धर्मविशारदाः ॥१४॥ [N
स चतुर्भिर्महाभागैः पुत्रैर्दशरथो वृतः ।
१९] बभूव परमप्रीतो वेदैरिव[3] पितामहः ॥१५॥ [N
तेषां केतुरिव श्रेष्ठो रामो रतिकरः पितुः ।
२०] बभूव भूयो भूतानां स्वयंभूरिव धर्मतः ॥१६॥ [२६
ते यदा ज्ञानसंपन्नाः सर्वज्ञा दीर्घदर्शिनः ।
N] सर्वशास्त्रविद्वांसो[4] ह्रीमन्तः सत्यवादिनः ॥१७॥ [N
आसन वेदविदः शूराः सर्वे सर्वास्त्रकोविदाः[5] ।
३०] धीमन्तः[6] कृतविद्याश्च सर्वैः समुदिता गुणैः ॥१८॥ [N
अथ राजा[7] यथाकालं राजवर्यसुताः शुभाः ।
N] सर्वेषामवहद्[8] भार्यास्तुल्यलक्षणवर्चसः ॥१९॥ [N
जनकः श्वशुरो राजा रामस्य भरतस्य च ।
N] कुशध्वजसुताभ्यां च सुमित्रानन्दनौ पती ॥२०॥ [N
तेषामतियशा[9] लोके रामः सत्यपराक्रमः ।

---

१. ज भ—महर्षभाः ।

२. ज ल भ—अपूरयंत ते ।

३. ज ल भ—देवैरिव ।

४. ज ल भ—सर्वशास्त्रार्थविदुषो ।

५. ज ल—शास्त्रार्थकोविदाः । भ-शस्त्रास्त्रको० ।

६. ज ल—श्रीमन्तः । भ—ह्रीमन्तः ।

७. ज—राज्ञां ।

८. ज—सर्वेषामभवद् । ल—सर्वेषामभवं । भ—सर्वेषामकरोद् ।

९. रा—तेषामतियशो ।

N] स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥२१॥ [N
तस्य भूयो विशेषेण मैथिली जनकात्मजा ।
N] देवताभिः[1] समा रूपे सीता श्रीरिव[2] रूपिणी ॥२२॥ [N
प्रिया तु सीता रामस्य[3] दाराः[4] प्रियकृता इति[5] ।
N] गुणै रूपगुणैश्चापि पुनः प्रियतराऽभवत् ॥२३॥ [N
भर्ता तु तस्या द्विगुणं हृदये परिवर्तते ।
N] अनाख्यातमपि व्यक्तम्[6] आचष्ट हृदयप्रियम्[7] ॥२४॥ [N
बाल्यात् प्रभृति हि[8] स्निग्धो लक्ष्मणो लक्ष्मिवर्धनः[9] [३०पू
२१] सर्वाभिरामं रूपेण[10] भ्राता भ्रातरमग्रजम् ॥२५॥ [N
स च[11] प्रियतरस्तस्य प्राणेभ्योऽप्यरिमर्दनः[12] ।
२२] लक्ष्मणो लक्षणोपेतो[13] रामस्य रिपुघातिनः ॥२६॥ [३१
मृष्टम्[14] अन्नमुपानीतमश्नाति न हि तं विना ।
२३] प्रीतिर्न तस्य जायेत प्रीतिकालेषु तं विना ॥२७॥ [३२
यदा हयमुपारूढो मृगयां याति राघवः ।

---

१. ब—देवताभ्यः ।
२. ज—स्त्री रव । इत्यपपाठः ।
३. ल—लोकस्य ।
४. ज ल—दारा ।
५. भ—इव ।
६. कै—व्यक्तं आदष्ट । भ—व्यक्तामाचष्ट ।
७. कै ब भ—हृदयं प्रियं ।
८. ज ल भ—च ।
९. रा ब—लक्ष्मवर्धनः । भ—लक्ष्मवर्द्धनः ।
१०. रा—सर्वाभिरूपेण रामं ।
११. भ—वै ।
१२. भ—ऽप्यरिसूदनः ।
१३. ज—लक्ष्मणोपेतो ।
१४. रा ब—मिष्टमन्न० ।

२४] तदैनं पृष्ठतोऽन्वेति सधनुः परिपालयन्[1] ॥२८॥ [२३

भरतस्यापि शत्रुघ्नो राघवस्येव[2] लक्ष्मणः ।

२५] प्राणैर्बहुमतो नित्यं तस्यापि स तथाऽभवत् ॥२९॥ [१४

स तु केकय[3]राजेन स्नेहानुप्रे[4]षितैर्हयैः ।

N] ह्यहोप[5]नीतो धर्मात्मा नीतः स्वं[6]नगरं प्रति ॥३०॥ [N

कृतदाराः कृतास्ताश्च सधना[7]ः ससुहृद्गणाः ।

N] शुश्रूषमाणाः पितरं वर्तन्ते ते[8] नरोत्तमाः ॥३१॥ [N

रामश्च सीतया सार्धं विजहार बहूनृतून्[9] ।

N] मनश्च तद्[10]गतं तस्य तस्याः स हृदये स्थितः ॥३२॥ [N

तया स राजर्षिवराभिकामया[11]

समेयिवानुत्तमराजकन्यया[12] ।

अतीव रामः शुशुभेऽभिरामया

N] विभुः श्रिया[13] शक्र[13] इवामराधिपः ॥३३॥ [N

इत्यार्षे रामायणे[14] बालकाण्डे पुत्रजन्म नाम

चतुर्दशः सर्गः ॥ १४ ॥

---

१. ज ल भ—पथि पालयन् ।

२. ज ल—राघवस्य च ।

३. ज—कैकीय० । ल—कैकय० । भ—कैकेय० ।

४. ज ल भ—स्नेहाच्च प्रे० ।

५. रा—अहोपनीतो ।

६. रा—स्वं नगरं । ल—सुनगरं ।

७. ल—सुधनाः ।

८. ल—स्म ।

९. कै—बहून्भून् ।

१०. रा—तन्मनं (यं ?)

११. भ—राजर्षिवरोभिकामया ।

१२. ल—समीयिवानु० ।

१३. रा—प्रिया शत्रु ।

१४. कै—वाल्मीकीये ।

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ।
१] उवाच[1] देवताः सर्वाः स्वयंभूर्भगवानिदम् ॥१॥ [१
सत्यसन्धस्य वीरस्य सर्वेषां[2] नो हितैषिणः ।
२] विष्णोः सहायान् सृजत बलिनः कामरूपिणः ॥२॥ [२
मायाविनश्च वीरांश्च वायुवेगसमाजवे ।
३] अतिबुद्धिसमायुक्तान्[3] विष्णोस्तुल्यपराक्रमान् ॥३॥ [३
असंहार्यानुपायज्ञान्[4] दिव्यसंहननान्वितान् ।
४] सर्वास्त्रगुणसंपन्नानमृतप्राशकोपमान्[5] ॥४॥ [४
अप्सरःसु च मुख्यासु गन्धर्वीणां[6] तनूषु च ।
५] ऋषिपन्नगकन्यासु विद्याधरसुतासु च ॥५॥ [५
किन्नरीणां[7] च देहेषु वानरीणां[8] तथैव च ।
६] सृजध्वं हरिरूपेण[9] हरितुल्यपराक्रमान्[10] ॥६॥ [६
ते तथोक्ता भगवता तत् प्रतिश्रुत्य शासनम् ।

---

१. रा—उचे च ।
२. भ—च । अपरहस्तेन ।
३. ज ल भ—मतिबु० ।
४. ब—०र्यांनुपायज्ञायां ।
५. ज ल—सर्वास्तु गुण० ।
६. ज ल भ—गन्धर्वाणां ।
७. ज भ—किन्नराणां ।
८. ज भ—वानराणां ।
९. कै—हारिरूपेण ।
१०. ज—०ल्यपरिक्रमान् ।

७] असृजन् देवगन्धर्वान्[2] पुत्रान्[3] वानररूपिणः ॥७॥ [८
ऋषयश्च महात्मानः सिद्धाश्च किन्नरैः सह[4] ।
८] चारणांश्चासृजन्[5] घोरान्[6] वानरान् वनचारिणः[7] ॥८॥ [९
पृ९] ते सृष्टा[8] बहुसाहस्रा[9] दशग्रीववधोद्धताः[10] ।
अप्रमेयबलाः शूरा वानराः कामरूपिणः ॥९॥ [१७
१०] ते गुञ्जानलसङ्काशा वीर्यवन्तो महाबलाः ।
ऋक्षवानरगोपुच्छाः क्षिप्रमेव[11] विजज्ञिरे ॥१०॥ [१८
११] यस्य देवस्य यद्रूपं वेषस्[12]तेजश्च तद्विधम् ।
जज्ञे स सदृशस्तेन तस्य तस्य सुतस्तदा ॥११॥ [१९
१२] गोलाङ्गूलीषु[13] चोत्पन्नाः केचित् त्वमितविक्रमाः ।
ऋक्षीषु च तथा[14] घोरा[15] वानरीकिन्नरीषु च ॥१२॥ [२०

---

१. ज ल भ—जनयन् ।
२. ज ल भ—देवगन्धर्वाः ।
३. रा भ—पुत्रावान् नररू० । भ—पुत्रा वानररू० ।
४. ज ल भ—सह किन्नरैः ।
५. कै—चारणांश्चाभजन् । रा—चारणाश्च सृजन् ।
भ—चारणाश्चासृजन् ।
६. भ—घोरा ।
७. ज ल भ—वनवासिनः ।
८. ल—सृष्ट्वा ।
९. रा ज ल—दशसाहस्रा ।
१०. ज—वद्धोद्धताः । कै—वधोद्धताः । भ—वधोद्यता ।
११. ज ल भ—क्षिप्रमेवाभिजज्ञिरे ।
१२. कै रा ज ल—वेषास्ते० । भ—वंशस्ते ।
१३. भ—गोलाङ्गूलेषु ।
१४. रा—यथा ।
१५. ल—वीरा ।

१३] शिलाप्रहरणाः सर्वे सर्वे पादपयोधिनः ।
नखदंष्ट्रायुधाः सर्वे सर्वे वै कामरूपिणः ॥१३॥ [२५
१४] उत्पाटयेयुश्च गिरीन् भिन्द्युः कोपात् तथा द्रुमान् ।
क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम् ॥१४॥ [२६
१५] दारयेयुः क्षितिं पादैराप्लवेयुर्नभस्तलम् ।
धुनुयुः श्वसनाविद्धान् सजलानपि तोयदान् ॥१५॥ [२७
१६] गृह्णीयुरपि नागेन्द्रान् मत्तान् सुजनितश्रमान् ।
नदन्तोऽपि तथा व्योम्नि पातयेयुर्विहङ्गमान् ॥१६॥ [२८
१७] ईदृशानां प्रसूतानां हरीणां कामरूपिणाम् ।
पू१८] शतं शतसहस्राणां यूथपानां महात्मनाम् ॥१७॥ [२९
ईदृशं कीर्तितं जन्म फुल्लकिंशुकरोचिसाम् । [N
N] ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥१८॥
बभूवुर्यूथपश्रेष्ठास्ते चाप्यजनयन् सुतान् । [३०
१९] अन्येऽर्कशक्रयोः पुत्रावुपतस्थुः सहस्रशः ॥१९॥

---

१. क ग ब भ—भिद्युः ।
२. ज—वारयेयुः ।
३ क—धुन्वयुः । ज—ध्वनयुः । ब—धन्वयुः ।
४. ब—श्वसनाद्विद्धान् ।
५ क—नागेन्द्र दंतान् प्रजवितान् जवात् ।
ग—नागेन्द्रांस्तान् प्रजवितां जवात् ।
ब—नागेन्द्रदत्तान् प्रजविनीं हवान् ।
६. भ ल—हरिणां ।
७. ग—फुल्लतांकिंशुकरो० ।
८. ग—प्रधानयेषु ।
९. ब ल—यूथपश्रेष्ठास्त ।
१०. ग—अन्योर्कशा० । भ—अन्ये केशक्र० ।
११. ग भ—०त्रावुपतस्थः । ज ल—पुत्राबुपतस्थुः ।

अन्ये नानाविधान् शैलान् काननानि च भेजिरे[1] ।　[२१
२०] सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम् ॥२०॥
पू२१] भ्रातरावुपतस्थुश्च ते[2] च सर्वे हरीश्वराः ।　[२२
तथा दशग्रीववधे स्वयंभुवा
निशम्य सर्वं विहितं[3] शतक्रतुः ।
मनुष्यलोके प्रभुरञ्जसा ययौ
N]　दिदृक्षुरिक्ष्वाकुकुलं[4] सुरेश्वरः[5] ॥२१॥

इत्यार्षे रामायणे बालकाण्डे वानरोत्पत्ति-
नाम पञ्चदशः सर्गः ॥१५॥

---

१. भ—विभेजिरे ।
२. ज ल भ—तेपि सर्वे ।
३. ज ल—विदितं ।
४. भ—०रिक्ष्वाकुसुतं ।
५. ब—सुरेश्वराः ।

निवृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः ।
१] प्रतिगृह्य सुरा भागं प्रतिजग्मुर्यथागतम् ॥१॥ [१
पू११] प्रविवेश पुरीं राजा सभृत्यबलवाहनः ।[2] [५३उ
N] तस्य पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ॥२॥ [N
रूपवन्तो ऽनुरूपांश्च लोकपालोपमा गुणैः । [N
N] कौसल्याऽजनयद् रामं राजर्षिवरलक्षणम् ॥३॥
साक्षाद् विष्णोस्तदर्धं च पुत्रं त्रिकुलनन्दनम् । [११
N] अथ लक्ष्मणशत्रुघ्नौ जनितौ तौ सुमित्रया ॥४॥ [१४पू
कैकेयी जनयामास भरतं धर्मवत्सलम् । [१३पू
N] अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥५॥
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः । [३९
N] तस्य चिन्तयतः कार्यमृषिमध्ये महात्मनः ॥६॥ [४०पू

---

१. ज—सुभृत्यब० ।

२. रा—अतः परं पूर्वपार्श्वेऽपरहस्ताङ्कितोऽधिकः पाठः—

ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।
ततश्च द्वादशे मासे चैत्रे नावमीके तिथौ ॥
नक्षत्रे दितिदैवत्ये स्वोच्चसंस्थेषु पंचसु ।
ग्रहेषु कर्कलग्ने च वाक्पकाविंदुना सह ॥
प्रोद्यमाने जगन्नाथः सर्वलोकनमस्कृतः ।

३. कै—रूपवंत्योनु० । ज ल—गुणवन्तः सुरूपा० । भ—गुणवन्तोनु० ।

४. ज ल—लोकपालोपमैर्गुणैः ।

५. ल—राजर्षिरिव लक्ष्मणं ।

६. ज ल—०स्तदर्धे हि । भ—०स्तदर्धं हि ।

७. कै ज ल भ—पुत्रमिक्ष्वाकुनन्द० ।

एतस्मिन्नेव काले तु विश्वामित्र इति श्रुतः ।
२१.१]महर्षिरभ्ययाद् द्रष्टुमयोध्यायां नराधिपम् ॥७॥ [N
तस्य यज्ञोऽथ रक्षोभिस्तदा विलुलुपे किल ।
२] मायावीर्यबलोन्मत्तै धर्मकामस्य धीमतः ॥८॥ [N
रक्षार्थं तस्य यज्ञस्य द्रष्टुमिच्छन् स पार्थिवम् ।
३] न हि शक्नोत्यविघ्नेन तं समाप्तुं मुनिः क्रतुम् ॥९॥ [N
ततस्तेषां विनाशायाभ्युद्यतस्तपसां निधिः । [N
N] विश्वामित्रो महातेजा अयोध्यामगमत् पुरीम् ॥१०॥ [४०उ
स राज्ञो दर्शनाकांक्षी द्वाराध्यक्षानुवाच ह ।
४] शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनन्दनम् ॥११॥[४१
तस्य तद्वचनं श्रुत्वा राजवेश्म प्रदुद्रुवुः ।
५] संभ्रान्तमानसाः सर्वे तेन वाक्येन नोदिताः ॥१२॥ [४२
ते गत्वा राजभवनं विश्वामित्रमृषिं ततः ।
६] प्राप्तमावेदयामासुं नृपतेर्धर्मदर्शिनः ॥१३॥ [४३

१. रा – विलुलपे । ल—विललपे ।
२. रा—मयावीन्यब० ।
३. ज ल—द्रष्टुमिच्छामि । भ-द्रष्टुमिच्छति ।
४. रा ल भ—स ।
५. ज ल भ—महाक्रतुम् ।
६. रा—०य उद्यतः तपसां । ज भ—०य उद्यतस्तपसो ।
ल—०य चोद्यतस्तपसो ।
७. भ—०ध्यामभ्यगात् ।
८. ल—सः ।
९. रा—मा ।
१०. ज ल भ – गाधिनः सुतम् ।
११. कै न ब ल—संभ्रान्तमनसः ।
१२. रा—प्राप्तं निवेदयामासुर्नृ० । प्राप्तमावेदयाञ्चक्रुर्नृ० ।

तेषां दशरथः श्रुत्वा सोपाध्यायः सबान्धवः ।
७] प्रत्युज्जगाम तमृ[1]षिं ब्रह्माणमिव वासवः ॥१४॥ [४४
स दृष्ट्वा ज्वलितं लक्ष्म्या भीतस्तमृषिमागतम् ।
N] प्रहृ[2]ष्टवदनो राजा स्वयमर्घ्यं न्यवेदयत् ॥ [3]१५॥ [४५
३८] तं राजा प्राञ्जलिर्भूत्वा चकाराभिप्रदक्षिणम् ।[4]
पू९] राज्ञा संपूजितस्तेन[5] प्रत्युद्गम्य स्वयं तदा ॥१६॥ [N
N] राज्ञश्च प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ।
३९] कुशलानाम[6]यं प्रीतः पप्रच्छ वसुधाधिपम् ॥१७॥ [४६
वसिष्ठेन समाग[7]म्य प्रहसन् मुनिपुङ्गवः । [४७
१०] [8]यथार्थं चार्चयंश्चैनं पप्रच्छानामयं ततः ॥१८॥ [N
ततो यथार्थम[9]र्घ्येनं पूजयित्वा समेत्य च । [N
११] सर्वे प्रहृष्टमनसो राज्ञस्तस्य निवेशनम् ॥१९॥
विविशुः सहिता राज्ञा निषेदुश्च यथार्हतः । [५०
१२] उपविष्टाय ते तस्मै विश्वामित्राय धीमते ॥२०॥ [N
वसिष्ठसहितो राजा स्वयमेव महायशाः ।
१३] पाद्यमर्घ्यं तथा गां च विधिवत् प्रत्यवेदयत् ॥२१॥ [N
अर्चयित्वा ततो राजा विश्वामित्रमभाषत ।
१४] प्राञ्जलिः प्रयतो वाक्यमिदं प्रीतमनास्तदा ॥२२॥ [N

---

१. ज ल भ—नृपतिर् ।
२. रा—०वचनो ।
३. ज ल भ—नास्ति ।
४. ज ल भ—प्रणम्य प्राञ्जलिर्भूत्वा चक्रे चाभिप्रदक्षिणम् ।
५. ज ल भ—स राजा पूजितस्तेन ।
६. रा—०लानामयीं ।
७. ज ल—सहागम्य ।
८. रा ज भ—यथार्थं चार्चयंश्चैनं । ल—यथार्थमर्चयंश्चैनं ।
९. ज—०र्थमाप्येनं ।

यथामृतस्य संप्राप्तिर्यथा वर्षमवर्षके[1] ।
१५] यथा सदृशनारीभ्यः[2] पुत्रजन्माप्रजस्य हि[3] ॥२३॥ [५२
N] यथेप्सितस्य संप्राप्तिरिष्टस्यागमनं यथा ।
पू१६] प्रणष्टस्य यथा लाभो भवेद्धर्षो[4] महोदयः[5] ॥२४॥ [५३
उ१६] हर्षानन्दकरं[6] मेऽद्य तवाभ्यागमनं तथा[7] ।
N] स्वप्ने यथाऽर्थलाभः स्यान्मृतस्य पुनरागमः ॥२५॥ [N
ब्रह्मलोकनिवासश्च[8] कस्य न प्रीतिमावहेत्[9] ।
N] [10]मुने तवागमस्तद्वत् सत्यमेव[11] ब्रवीमि ते ॥२६॥ [N
N] यथाऽभिलषितं कामं[12] किं ते कुर्मोऽभिकांक्षितम् । [N
कश्च ते परमः कामः किमृषे करवाण्यहम् ॥[13]२७॥
१७] पात्रभूतोऽसि मे विप्र चिरस्याभ्यागतोऽतिथिः । [५४
त्वं हि राजर्षिकुलजस्तपोभिर्नियमैस्तथा ॥२८॥
१८] ब्रह्मर्षित्वमनुप्राप्तस्तस्मात् पूज्यतमोऽसि मे । [५६
साक्षादिव ब्रह्मणो मे तवाभ्यागमनं मतम्[14] ॥२९॥

---

१. भ—वर्षा अवर्षके ।
२. ल—सदृश्यना० ।
३. ज भ—ह । ल—च ।
४. ज ल भ—भवेद्धर्मो ।
५. कै रा—सहोदयः ।
६. ज—हर्षाननोत्तरं । हर्षानन्दोत्तरं ।
७. ज ल भ—तथाभ्यागमनात्तव ।
८. रा ब—ब्रह्मलोके निवा० ।
९. रा—प्रीतिमावहत ।
१० रा ल—मुनेस् ।
११. ल भ—सत्यमेतद् ।
१२. ज ल भ—कार्यं ।
१३. भ—नास्ति ।
१४. भ—तवाभ्यागमनाच्छुतः ? ।

१९] पूतोऽस्म्यनुगृहीतश्च[1] तवाभ्यागमनान्मुने । [N
पू२०] अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥३०॥ [५९
गङ्गाजलाभिषेकेण यथा प्रीतिर्भवेन्मम ।
N] तथा तवागमे विप्र परमप्रीतिमानहम्[2] ॥३१॥ [N
N] तदद्भुतमिदं ब्रह्मन् पवित्रं परमं मम । [N
शुभक्षेत्रगतश्चा[3]हं तवाभ्यागमनेन[4] वै ॥३२॥ [N
त्वामिहाभ्यागतं[5] दृष्ट्वा प्रतिपूज्य प्रणम्य च ।
यत्[6] कार्यं तेन[7] चार्थेन प्राप्तोऽसि मुनिपुङ्गव ॥३३॥
२१] कृतमित्येव तद् विद्धि मान्योऽसि हि भृशं मम । [५९
स्वकार्येण[8] विमर्ष त्वं[9] कर्तुमर्हसि कौशिक ॥३४॥
२२] भगवन् नास्त्यदेयं मे तव प्रति[10] हि[10] विद्यते[11] । [६०
इति हृदयमनोगतं[12] तदा वै नरपतिनाऽभिहितं वचो निशम्य ।
२३] प्रथितगुणयशास्ततो महर्षिर्मुदितमना निजगाद तं नरेन्द्रम् ॥[६१

इत्यार्षे रामायणे बालकाण्डे विश्वामित्रागमनो
नाम षोडशः सर्गः ॥ १६ ॥

---

१. रा ल—०ऽस्म्यनुगृहीतोऽस्मि ।
२. कै ब—०तिवानहं । रा—०तिवाहनम् ।
३. ज—शुभक्षेत्रे गत० ।
४. ज ल भ—तव संदर्शनेन । कै—पुस्तकेऽस्य स्थाने आंत्वा ३० श्लोकस्य द्वितीयः पादो लिखितः । ततोपि परं ३०–३१ श्लोकौ पुनर्लिपीकृतौ ।
५. रा—त्वमिहाद्यागतं ।
६. कै—यः ।
७. भ—येन ।
८. रा—सुकार्येण । भ—स्वकार्यस्य ।
९. रा—विमर्षत्वं । ज—विसर्गत्वं । ल भ—विसेगं त्वं ।
१०. भ—प्रीतिर्हि ।
११. ज—विश्यते ।
१२. ज ल—०यमनोनुगं ।

तच्छ्रुत्वा नरसिंहस्य वाक्यमद्भुतविस्तरम् ।
१] हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥१॥ [१
सदृशं राजशार्दूल तवैवाद्भुतनाम तत् ।
२] महावंशप्रसूतस्य वसिष्ठवशवर्तिनः ॥२॥ [२
पू३] यत् तु मे हृद्गतं वाक्यं तस्य कार्यविनिश्चयम् ।
N] कुरुष्व नरशार्दूल धर्मं समनुपालय ॥३॥ [३
पू४] अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ ।
N] तस्य विघ्नकरौ द्वौ मे राक्षसौ कामरूपिणौ ॥४॥ [४
N] मारीचश्च सुबाहुश्च तस्मिंस्तौ राक्षसाधमौ ।
उ५] तावभ्यकिरतां वेदिं मांसेन रुधिरेण च ॥५॥ [५
अवधूते तथाभूते तस्मिन् नियमविस्तरे ।
६] कृतश्रमो निरुत्साहस्तस्माद्देशादपाक्रमम् ॥६॥ [६

---

१. भ—राजसिंहस्य ।
२. ज ल भ—तवैतद्भवि नान्यतः ।
३. ज भ—कार्यं वाक्यं तस्य विनिश्चयं ।
ल—कार्यं-वाक्यमद्भुतविस्तरम् ।
४. ल—हृष्टरोमा महातेजा ।
५. ज ल भ—हि यज्ञमातिष्ठन् ।
६. ल—पुरुषाधमौ ।
७. ल—तावत्याकिरतां ।
८. ल—तस्मिन्निवमविस्तरे ।
भ—तस्मिन्नियमविद्यते । मध्यस्थं पाठं त्यक्त्वा ७मश्लोकस्य चतुर्थपादस्थेन विद्यत इति पदेन सम्बन्धः कृतः ।
९. ज—कृतश्रमनिरु० ।
१०. ल—०तस्माद्देशादुपाक्र० ।

पू७] न च क्रोधं समुत्स्रष्टुं बुद्धिर्भवति पार्थिव ।

N] तथाभूतं हि तत्कर्म न कोपस्तस्य विद्यते ॥७॥ [७

उ७] ईदृशी यज्ञदीक्षा सा मम तस्मिन् महाक्रतौ ।

त्वत्प्रसादादविघ्नेन प्रापयेयं[1] क्रियाफलम् ॥८॥ [N

८] त्रातुमर्हसि[2] मामत्र[3] शरणार्थिनमागतम्[4] । [N

स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ॥९॥

९] काकपक्षधरं शूरं[5] ज्येष्ठं त्वं दातुमर्हसि । [८

पू१०] शक्तो ह्येष[6] मया गुप्तो दिव्येन स्वेन तेजसा ॥१०॥

रक्षसां[7] येऽपि कर्तारस्तेषामपि विनिग्रहे[8] । [९

N] श्रेयश्चास्मै प्रवक्ष्यामि बहुरूपममत्सरः ॥११॥

उ११] त्रयाणामपि लोकानां येन कामो[9] भविष्यति । [१०

न च ते राममासाद्य स्थातुं शक्ताः[10] कथञ्चन ॥१२॥

१२] तेषां रामान्नान्यो[11] वै योद्धुमुत्सहते पुमान्[12] । [११

वीर्योत्सिक्ता हि ते पापाः कालकूटोपमा[13] रणे ॥१३॥ [१२

---

१. भ—प्रापयेऽहं ।

२. रा—कर्तुमर्हसि । ज—पातुमर्हसि ।

३. कै—मां सत्र० । रा—सा तत्र ।
ज ल भ—मां राजन् ।

४. ज ल भ—शरणागतमागतम् ।

५. ज ल भ—वीरं ।

६. रा—ह्ययं ।

७. ज ल—रक्षसामपि ।

८. ल—विनिग्रहं ।

९. ज—रामे । ल भ—रामो ।

१०. रा—शक्तः ।

११. रा ब—नान्यः काकुत्स्थाद् ।

१२. रा ब—द्विषाम् ।

१३. ज ल भ—कालकूटसमा ।

१३] रामस्य राजशार्दूल न सहिष्यन्ति सायकान् ।
न च पुत्रकृतं[1] स्नेहं कर्तुमर्हसि पार्थिव ॥१४॥ [१२
१४] अहं ते प्रतिजानामि हतांस्तान्[2] विद्धि राक्षसान् । [१३
अहं वेद्मि[3] महात्मानं रामं राजीवलोचनम् ॥१५॥
१५] वसिष्ठश्च महातेजा ये चान्ये तपसि स्थिताः । [१४
यदि ते धर्मलोभश्च[4] मनश्च यशसि स्थितम् ॥१६॥ [१५
१६] अभिप्रेतमसंयुक्तमात्मजं[5] योक्तुमर्हसि ।
दशरात्रेण यज्ञस्य विघ्ना रामेण राक्षसाः ॥१७॥ [१७
१७] हन्तव्या राजशार्दूल मम यज्ञस्य वैरिणः । [N
यद्यभ्यनुज्ञां काकुत्स्थ ददन्ति[6] तव मन्त्रिणः ॥१८॥
१८] वसिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय । [१६
नात्येति[7] कालः कालज्ञ यथाऽयं[8] मम राघव ॥१९॥
१९] तथा कुरुष्व भद्रं ते मा च शोके मनः[9] कृथाः । [१८
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥[10]

---

१. भ—पुत्रगतं ।

२. ज ल भ—हन्ताऽयं राक्षसान् रणे ।

३. ज ल भ—वेद ।

४. ल—धर्मलोभाच्च ।

५. ज ल भ—अभिप्रेतं महाबाहुमात्मजं मोक्तुमर्हसि ।

६. ज ल भ—वदन्ति ।

७. रा ज—नाभ्येति ।

८.—ज ल—यथं[1] मे बहु । भ—तथा मे वद ।

९. ज—मज्जाः कृशाः ?।

१०. ज—मास्ति ।

N] विरराम महातेजा विश्वामित्रो महामुनिः ॥२०॥ [१९

इत्येवमुक्त्वा विरते मुनीन्द्रे
जगाद[1] भूयो रघुवंशकेतुः ।
N] वक्षःस्थले[2] दन्तमयूखजालै-
र्हारावलीरम्यमिव[3] प्रकुर्वन् ॥२१॥ [N

इत्यार्षे रामायणे बालकाण्डे विश्वामित्रवाक्यं
नाम सप्तदशः सर्गः ॥ १७ ॥

---

१. ल—जगाम ।
२. रा ज ल—वक्षःस्थले ।
३. ल—हरावलीं रम्य० ।

तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् ।
१] मुहूर्तमासीन्निश्चेष्टः सदीनमिदमब्रवीत् ॥१॥ [१
ऊनषोडशवर्षोऽयं[1] रामो राजीवलोचनः ।
२] न युद्धे[3] योग्यतामस्य[2] पश्यामि सह राक्षसैः ॥२॥ [२
इयमक्षौहिणी पूर्णा यस्याः पतिरहं प्रभो ।
३] तया परिवृतो युद्धं दास्यामि पिशिताशिनाम् ॥३॥ [३
इमे हि शूरा विक्रान्ता भृत्या मेऽस्त्रविशारदाः[4] । [४पू
४] अहमेषां[5] धनुष्पाणिर्गोप्ता समरमूर्धनि ॥४॥
पू५] यावत्प्राणा[6] वहिष्यन्ति[7] युध्यतो मे निशाचरैः । [५
उ६] बालो ह्ययमनीकेषु[8] न जानाति[9] बलाबलम् ॥५॥
न चास्त्रैः[10] परमैर्युक्तो[11] न च बुद्धिविशारदः[12] । [७
७] न चापि रक्षसां योग्यः कूटयुद्धा[13] हि राक्षसाः ॥६॥ [८

---

१. भ—॰षवर्षस्तु ।
२. रा—योग्यता ह्यस्य । ल—योग्यता चास्य ।
३. ल—युद्धे ।
४. रा—मे सुविशारदाः । ज ल भ—शस्त्रविशारदाः ।
५. ज ल—अहं चैव । भ—अहं च ।
६. ज ल—यावत्प्राणं ।
७. ज ल भ—धरिष्यन्ति ।
८. ज—ह्ययमनेकेषु ।
९. ल—यानाति ।
१०. ज—शस्त्रैः । भ—चास्त्रे ।
११. भ—परमे युक्तो ।
१२. ल—युद्धविशारदः ।
१३. ज—कूटयुद्धं हि रक्षसम् ।

विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ।
८] जीवितुं नरशार्दूल[1] न रामं नेतुमर्हसि ॥७॥ [९
नववर्षसहस्राणि[2] मम जातस्य कौशिक ।
६] दुःखेनोत्पादिताश्चेमे[3] न रामं नेतुमर्हसि ॥८॥ [११
चतुर्णामात्मजानां वै[4] प्रीतिरत्र हि[5] मे परा[5] ।
उ१३] ज्येष्ठं धर्मप्रधानं च[6] न रामं नेतुमर्हसि ॥९॥ [१२
यदि[7] वा राघवं[8] ब्रह्मन् नेतुमिच्छसि[9] सुव्रत ।
१४] चतुरङ्ग[10]बलोपेतं मया सार्धममुं नय ॥१०॥ [१०
किंवीर्या राक्षसास्ते हि कस्य पुत्राः कथं च ने[11] ।
१५] कथंप्रमाणाः के चैते राक्षसा मुनिपुङ्गव ॥११॥ [१३
कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ।
१६] मामकैर्वा[12] बलैर्ब्रह्मन् मया[13] वा[13] कूटयोधिनाम् ॥१२॥ [१४
पू१७] सर्वं मे शंस भगवन् यथा तेषां[14] महारणे ।

---

१. ल—मुनिशार्दूल ।
२. ल—०र्षसहस्रासु ।
३. भ—दुःखेनोत्पादितं ह्येतं ।
४. ज ल भ—हि ।
५. ज ल भ—परा मम ।
६. ज ल भ—हि ।
७. भ—यर्हि ।
८. भ—राघवं नेतुं ।
९. कै रा ब—नेतुमर्हसि । भ—ब्रह्मन्निच्छसि ।
१०. ब— ० बलं नेतुं ।
११. ज ल भ—कथं च ते ।
१२. ज भ—सायकैर्वा ।
१३. ल—मायया ।
१४. ल—ते राक्षसा मुने ।

N] स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥१३॥ [१५
श्रूयते हि महावीरो रावणो नाम राक्षसः ।
१६] साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ॥१४॥ [१६
न खल्वसौ यज्ञविघ्नं तवाचरति दुर्मतिः ।
N] न शक्तास्तस्य सङ्ग्रामे वयं स्थातुं दुरात्मनः ॥१५॥ [N
तस्मात् प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ।
२०] यदि वा चाल्पभाग्योऽहं भवान् हि मम दैवतम् ॥१६॥ [२२
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः ।
२१] न शक्ता रावणं सोढुं किं पुनर्मानुषा युधि ॥१७॥ [२३
महावीर्यवतां वीर्यमाददाति सुवारितम् ।
२२] तेन सार्धं न शक्ताः स्मः संयुगे तस्य वा बलैः ॥१८॥ [२४
अथवा लवणं ब्रह्मन् यज्ञघ्नं मधुनः सुतम् ।
२३] कथयस्वामरप्रख्य नैव प्रेक्ष्यामि पुत्रकम् ॥१९॥ [२५
पू२४] सुन्दोपसुन्दयोश्चैव पुत्रौ वैवस्वतोपमौ ।
N] यज्ञविघ्नकरौ ब्रूहि न ते दास्यामि पुत्रकम् ॥२०॥ [२६

---

१. ज ल भ—महावीर्यो । ब—मया वीरो ।

२. ज—साक्षाद्विश्रवणभ्राता ।

३. ल—मुने ।

४. ल—तथाचरति । ब—उ वा चरति ।

५. ज ल भ—मम वै मन्दभाग्यस्य ।

६. कै ब—वीर्यमादधाति ।

७. कै रा—०स्वामरप्रख्यं । ज—०स्वमरप्रेक्ष्य ।
ल—० स्वासुरप्रख्य ।

८. ल—पश्यामि । भ—मोक्ष्यामि ।

९. कै—वैवस्वतोपमम् । रा—वैवसुतोपमौ ।

उ२४] मारीचश्च[1] सुबाहुश्च विघ्नं वै कुरुतस्तव[2] । [२७पू
पू२५] तथाऽपि[3] न च मोक्ष्यामि पुत्रं रामं प्रसीद मे[4] ॥२१॥[N
एतदन्यतमौ[5] यौ[6] तु योद्धाऽस्मि ससुतो मुने ।
२६] अन्यथा न तु यास्यामि भगवन् जयमात्मनः ॥२२॥

इत्यार्षे रामायणे[7] बालकाण्डे[8] दशरथवाक्यं
नाम अष्टादशः सर्गः ॥ १८ ॥

---

१. ल—मारीचः शम्बराहुश्च ।
२. ज ल भ—कुरुतः सह ।
३. ज—तथा च ।
४. रा—पुत्रं राज्य प्र० । ग—न ते दास्यामि पुत्रकं ।
५. भ—एते ह्यन्यतमौ ।
६. ज ल भ—वा तौ । ल—ससुतौ ।
७. कै—रामायणे वाल्मीकीये ।
८. कै—बालकाण्डपर्यायें ।

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् ।
१] समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥१॥ [१
करिष्यामि प्रतिज्ञाय प्रतिज्ञां हातुमिच्छसि ।
२] राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ॥२॥ [२
यदि त्वं न क्षमो राजन् गमिष्यामि यथागतम् ।
३] हीनप्रतिज्ञः काकुत्स्थ सुखी भव सबान्धवः ॥३॥ [३
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ।
४] चचाल वसुधा कृत्स्ना सुरांश्च भयमाविशत् ॥४॥ [४
क्रोधाभिभूतं विज्ञाय जगन्मैत्रो महानृषिः ।
५] धृतिमान् सुव्रतो धीमान् वसिष्ठो नृपमब्रवीत् ॥५॥ [५
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः ।
६] धृतिमान् सत्यवान् वीरो न धर्मं हातुमर्हसि ॥६॥ [६
पू७] त्रिषु लोकेषु विख्यातो धर्मात्मेति यशोधनः । [पू७
N] नातिविक्रवया बुद्ध्या पृष्ठतः कर्तुमर्हसि ॥७॥ [N
स्रष्टा धर्मव्यवस्थाऽर्थं तपस्यारक्षणाय च ।

---

१. रा—ज्ञातुमर्हसि । ब-हातुमर्हसि । भ-हंतुमर्हसि ।
२. ल—०नामसुक्तोयं ।
३. ज भ—रत्तसे ।
४. रा—सुबांधव ।
५. ज ल—सुराश्च भयमाविशन् ।
६. के—महाऋषिः ।
७. भ—न तद्विक्लवया ।
८. ज—वक्तुमर्हसि ।
९. ज—धर्मात्व्यव० । भ-धर्मव्यवस्थायां ।
१०. रा—तपसो रत्त० । भ—तपसां रक्ष० ।

N] क्षत्रियाः क्षत्रियश्रेष्ठ तथा भवितुमर्हसि ॥८॥ [N

नान्यो धर्मः क्षत्रियाणां रक्षणात् तात[1] ईष्यते[2] ।

N] स्वधर्मं प्रतिपद्यस्व[3] न धर्मं हातुमर्हसि[4] ॥९॥ [७उ

पू८] करिष्यामीति संश्रुत्य तद्वै[5] राजन्नकुर्वतः ।

N] इष्टापूर्तं हरेद्धर्मं तस्माद्रामं विसर्जय ॥१०॥ [८

कृतास्त्रमकृतास्त्रं[6] वा नैनं ध्वंक्ष्यन्ति[7] राक्षसाः ।

१०] गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥११॥ [९

एष विग्रहवान् धर्म एष वीर्यवतां वरः ।

११] एष बुद्ध्याऽधिको लोके तपसश्च[8] परायणम् ॥१२॥ [१०

एषोऽस्त्रं विविधं वेत्ति त्रैलोक्ये सचराचरे[9] ।

१२] नैतदन्यः पुमान् वेत्ति न च वेत्स्यति कश्चन ॥१३॥ [११

१२] न देवा नर्षयः केचिन नासुरा न च राक्षसाः ।

N] गन्धर्वयक्षप्रवरा न किन्नरमहोरगाः ॥१४॥ [१२

अस्त्रं ह्यस्मै[10] कृशाश्वेन [11]परैः परमदुर्जयम् ।

१३] कौशिकाय पुरा दत्तं यदा राज्यं समन्वशात्[12] ॥१५॥ [१३

---

१. व—तत । कै—तप ।

२. भ—उच्यते ।

३. कै—प्रति पत्स्यस्व ।

४. ज—हातुमिच्छसि ।

५. भ—तत्ते ।

६. ल—कृतास्त्रमकृतास्त्रं ।

७. व—द्रक्ष्यंति । भ-शक्ष्यंति ।

८. ज—तपस्तथा ।

९. ल—सचराचरैः ।

१०. ल भ—ह्यस्मिन् ।

११. रा—परं ।

१२. कै रा ज—समन्वयात् । ल-स सर्वशात् ।

ते हि पुत्राः कृशाश्वस्य प्रजापतिसुतोपमाः ।
१.४] नैकरूपा महात्मानो दीप्तिमन्तो जयावहाः[1] ॥१६॥ [१४
जया च सुप्रभा चैव दाक्षायिण्यौ[2] सुमध्यमे ।
१५] तयोस्तु यान्यपत्यानि शतं परमदुर्जयम् ॥१७॥ [१५
पञ्चाशतं सुतान्[3] जज्ञे जया[4] लब्धवरा पुरा ।
१६] वधाय परसैन्यानामक्षयान्[5] कामरूपिणः ॥१८॥ [१.६
सुप्रभा जनयामास पुत्रान् पञ्चाशतं वरात्[6] ।
पू१.८] सर्वास्तांल्लब्धवान् वीरान्[7] दुर्धर्षान् सुबलीयसः ॥१९॥ [१९
N] एवंवीर्यो महातेजा विश्वामित्रो महातपाः ।
पू२०] न रामगमने बुद्धिं वैक्लव्याद्रोद्धुमर्हसि[8] ॥२०॥ [२०

इत्यार्षे रामायणे[9] बालकाण्डे वसिष्ठवाक्यं
नाम एकोनविंशः सर्गः ॥ १९ ॥

---

१. ल—जितेन्द्रियः ।
२. कै रा ज—दाक्षायिन्यौ । ब—दाक्षायन्यौ ।
३. ज—जया
४. ज ल—सुतान् ।
५. कै रा ज ब—०न्यानामक्षयाः ।
६. ज ल—वरान् ।
७. ज—वीरः ।
८. ज—विक्लवाद्रोद्धु० । ल—विक्लवाद्रोद्धुमर्हति ।
९. कै—रामायणे वाल्मीकीये ।

तथा वसिष्ठे ब्रुवति राजा दशरथः सुतम् ।
१] प्रहृष्टवदनं[1] राममाजहार सलक्ष्मणम् ॥१॥ [१
कृतस्वस्त्ययनो मात्रा पित्रा दशरथेन च ।
२] पुरोधसा तथा वाग्भिर्मङ्गलैरभिवन्दितौ[2] ॥२॥ [२
ततो मूर्ध्नि समाघ्राय राजा दशरथः सुतौ ।
३] ददौ कुशिकपुत्राय विश्वामित्राय धीमते ॥३॥ [३
N] तं[3] दृष्ट्वा देवगन्धर्वाः पुष्पवृष्टिं सुरा[4] ददुः ।
उ४] विश्वामित्रगतं[5] दृष्ट्वा रामं राजीवलोचनम् ॥४॥ [N
सपुष्पवृष्टिः पटहध्वनिरासीदिहान्तरे[6] ।
५] शङ्खदुन्दुभिघोषश्च प्रयाते[7] रघुनन्दने[7] ॥५॥ [६
विश्वामित्रो ययावग्रे तं रामः पृष्ठतोऽन्वयात् ।[8]
६] काकपक्षधरो धन्वी तं[9] च सौमित्रिरन्वयात्[10] ॥६॥ [७
विश्वामित्रगतं रामं दृष्ट्वा देवाः सवासवाः ।
७] प्रहर्षमतुलं प्रापुर्दशग्रीववधैषिणः ॥७॥[11] [N

---

१. ल—प्रहृष्टवदनो ।
२. ल भ—मंगलैरभिनन्दितौ ।
३. रा—ते ।
४. ल—पुरा ।
५. भ—विश्वामित्रागतं ।
६. ल—०ध्वनिरासीद्दिगन्तरे । भ—०ध्वनिरासीदिहम्बरे ।
७. ज—प्रवाभ्यत महास्वनः । ल भ—प्रवाद्यत महास्वनः ।
८. ज ल भ—विश्वामित्रो प्रयात्यग्रे ततो रामो महायशाः ।
९. ज ल भ—ततः ।
१०. ज ल भ—सौमित्रिरन्वगात् ।
११. ज ल भ—कलापिनौ धनुष्पाणी शोभमानौ महापथे ।

विश्वामित्रं महात्मानं तावुभौ रामलक्ष्मणौ ।
८] तदानुययतुर्वीरौ यथेन्द्रं देवमश्विनौ ॥८॥[1] [N
बद्धगोधाङ्गुलि[2]त्राणौ खड्ग[3]तूणधनुर्धरौ । [९उ
९.] तदाऽनुजग्मतुः [4]स्थाणुं कुमाराविव पाव[5]कौ ॥९॥ [१०उ
अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ।
१०] रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥१०॥ [११
वत्स राम जलं तावद् विधिवत् स्प्रष्टुमर्हसि । [१२पू
११] [6]उपदेक्ष्यामि ते श्रेयो मा भूत् कालस्य पर्ययः ॥११॥ [N
गृहाण द्वे इमे विद्ये बलामतिबलां तथा । [१२उ
१२] न ते श्रमो जरा नाऽपि भविता नाङ्गवैकृतम् ॥१२॥[7]
न [8]च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋ[9]ताः । [१३
१३] न च ते सदृशो राम वीर्येणान्यो भविष्यति ।
सदेवनरनागेषु लोकेष्विह पुमांस्त्रिषु ॥[10]१३॥[11] [१४
१४] न सौभाग्ये न दाक्षिण्ये न[12] बुद्धिश्रुतपौरुषे ॥१४॥

---

१. ज ल भ—विश्वामित्रं समन्वेतां त्रिशीर्षाविव पन्नगौ ॥
२. रा—०धाङ्गुलित्राणौ । ल—बद्धगोपाङ्गुलि० ।
३. ज ल भ—खड्गवन्तौ महाद्युती ।
४. ज ल—स्थाणुं देवमिवाचिन्त्यौ । भ—स्थाणुं देवमिवाचिन्त्यं ।
५. कै रा—पावकम् । ब—पावकौ ।
६. ज ल भ—गृहाण वत्स सलिलं ।
७. ज ल भ—मंत्रग्रामं गृहाणेमं बलामतिबलां तथा ।
न श्रमो न जरा तुभ्यं न रूपस्योपसंक्षयः ॥
८. ज ल भ—त्वां ।
९. कै रा ब—नैनृताः । ल—तैनृताः । इत्यपपाठः ।
१०. ब—नास्ति ।
११. ज ल भ—न बाह्वोः सदृशो वीर्ये पृथिव्यां तव कश्चन ।
भविष्यति महाबाहो त्रिषु लोकेषु कश्चन ॥
१२. रा—न बुद्धिश्रुति० । ज ल भ- न च बुद्धिविनिश्चये ।

नोत्तरे प्रति[1]कर्तव्ये त्व[2]त्तुल्योऽन्यो भविष्यति ।[3] [१५
१५] एतद्विद्याद्वयं प्रा[4]प्य यशश्चाप्यर्यमाप्स्यसि ॥१५॥
बलामतिबलां चैव ज्ञानविज्ञानमा[5]तरौ । [१६
१६] क्षुत्पिपासे च ते राम नात्यर्थं पीडयिष्यतः ॥[6]१६॥[7] [N
तथैव दुर्गकान्तारप्रदेशेष्वटवीषु च ।
१७] सारतां त्रिषु लोकेषु गमिष्यसि च राघव ॥१७॥[7] [N
पितामहसुते चेमे विद्ये ह्यायुर्बलप्रदे ।[8]
१८] पात्रं त्वमसि काकुत्स्थ विद्ययोर्ग्रहणेऽनयोः ॥१८॥[10] [१९
स्वभावात् त्वं गुणैर्युक्तो कामैरप्यतुलैर्मतः ।[11]
१९] भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥[12]१९॥[13] [२०

१. ज ल भ—प्रतिपत्तव्ये ।

२. ज—समस्तेन वितानने । ल भ—समस्तैर्भविता न ते ।

३. ब—नास्ति ।

४. ज ल भ—राम गृहीत्वा नास्ति ते समः ।

५. ज ल भ—सर्वज्ञानस्य मातरौ ।

६. ज ल—क्षुत्पिपासे न ते राम मासादूर्ध्वं भविष्यतः ।
भ— „ „ „ „ मासादूर्ध्वे „

७. ज ल भ—बलामतिबलां चैव पठतो रघुनन्दन ।
गृहाण सर्वलोकस्य मातरौ बहुमानद ।
विद्याद्वयमधीयानः सर्वमेवातुलं भुवि ॥

८. रा—चायुर्बलप्रदे ।

९. ज ल भ—पितामहसुते ह्येते विद्धि तेजोमये शुभे ।

१०. ज ल—सदृशो तव काकुत्स्थ प्रज्ञातुं त्वं हि धार्मिकः ।
भ— „ „ „ „ त्विह धार्मिकः ॥

११. ज ल—कामं खलु गुणाः सर्वे तवैवैते न संशयः ।
भ— „ „ „ „ तदैवेते न „

१२. ज ल—तपोभिः संसृते ह्येते बहुरोषे भविष्यतः ।
भ— „ „ „ बहुपोषे „

१३. ज—अतः परमधिकः पाठः—बहुसत्रसहायिभ्यो विद्या द्वे ते भविष्यतः ।

ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः ।[1]
२०] प्रतिजग्राह ते विद्ये विश्वामित्रात्[2] तपोधनात्[2] ॥२०॥ [२१
गृहीतविद्योऽनुज्ञातस्ततो रामो महायशाः ।[3]
२१] तत्रोवास निशामेकां सरय्वां सहलक्ष्मणः ॥[4]२१॥[5] [२३उ

इत्यार्षे रामायणे बालकाण्डे[6] विद्याप्रदानं[7]
नाम विंशः सर्गः ॥ २० ॥

---

१. ज ल भ—ततो रामोंजलिं कृत्वा प्रहृष्टवदनः शुचिः ।

२. ज ल भ—महर्षेर्भावितात्मनः ।

३. ज—गुरुकार्याणि प्रयुज्य ततस्तु कुशिकात्मजे ।
ल—गुरुकार्याणि कार्याणि प्रयुज्य ,,
भ—गुरुकार्याणि सर्वाणि ,, ,,

४. ज—ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं ततः ।
ल— ,, ,, ,, ,, सम्मुखास्ततः ।
भ— ,, ,, ,, ,, सुखतरस्ततः ।

५. ज ल भ—अतः परमधिकः पाठः—
कथयंतः कथाश्चित्राः प्रीयमाणाः परस्परं ।

६. कै ब—आदिकांडे ।

७. रा—विद्यादानं । ज-विद्याप्रधानिको । ल भ-विद्याप्रदानिको ।

[वं=२६] [एकविंशः सर्गः] [दा=२३]

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः[1] ।
१] प्रत्यभाषत[2] काकुत्स्थं शयानं पर्णसंस्तरे ॥१॥ [१
कौसल्यामातरुत्तिष्ठ पूर्वां सन्ध्यामुपास्व ह[3] ।
२] पौर्वाह्णिकं विधिं कर्तुं तात कालोऽयमागतः ॥२॥[4] [२
तस्यर्षेः परमोदारं वचः श्रुत्वा तु[5] राघवौ ।
३] स्नात्वा कृतोदकौ[6] वीरौ जेपतुर्जप्यमाह्निकम्[7] ॥३॥ [३
कृताह्निकक्रियौ तत्र विश्वामित्रं तपोनिधिम् ।[8]
४] अभिवादयितुं चापि सहितावुपतस्थतुः ॥४॥[9] [४
ततः[10] प्रययतुश्चापि दिव्यां त्रिपथगां नदीम् ।
५] गङ्गां देवनदीं द्रष्टुं सरय्वा[11] अविदूरतः ॥[12] ५॥ [५

---

१. ज ल भ—महानृषिः ।

२. ज ल भ—अभ्यभाषत काकुत्स्थौ शयानौ ।

३. रा—सन्ध्यामुपास्महे ।

४. ज ल भ—कौसल्यासुप्रजा राम पूर्वसंध्या प्रवर्तते ।

५. ज ल भ—मनोनुगम् ।

६. ब—कृत्वोदकौ । ज ल भ—कृतान्हिकौ ।

७. ज ल—जपतुः परमं जपं । भ-जेपतुः परमं जपं ।

८. ज ल भ—कृतान्हिकौ महावीर्यौ विश्वामित्रमृषिं ततः ।

९. ज ल—अभिवाद्य ततो वीरौ गमनाय प्रचक्रमे ।
भ—अभिवाद्य ततो वीरौ सह तेनोपजग्मतुः ।

१०. रा—तत्र प्र० । ज ल भ-तौ प्रयातौ महात्मानौ ।

११. ब—सरय्वामविदूरतः ।

१२. ज ल—ददृशाते सरय्वां वै संगमे पुण्यसंमिते ।
भ—दृष्ट्वा परमशरय्यांवै संगमे पुण्यसंमते ।

तस्यारादाश्रमपदमृषीणां पुण्यकर्मणाम् ।[1]
६] रम्यं ददृशतुः पुण्यं तप्यतामुत्तमं तपः ॥[2] ६॥ [६
दृष्ट्वा तदाश्रमपदं जातकौतूहलं[3] मुनिम् ।
७] पप्रच्छतुस्तदा तत्र तावुभौ रामलक्ष्मणौ ॥७॥[4] [७
कस्यायमाश्रमो ब्रह्मन्[5] कश्चापि कुशलो मुनिः[6] ।
८] भगवन्[7] श्रोतुमिच्छामि परं कौतूहलं हि नौ ॥८॥ [८
तयोस्तद्वचनं श्रुत्वा प्रहसन्[8] मुनिरब्रवीत्[8] ।
९] उभाभ्यां श्रूयतां राम[9] यस्यायं पुण्य आश्रमः[9] ॥९॥ [९
कन्दर्पो मूर्तिमानासीत् काम इत्यभिविश्रुतः ।[10] [१०
१०] स्थाणुं स इह तप्यन्तं पुरा किल महत्तपः ॥[11] १०॥

---

१. ज—तमाश्रममिदं पुण्यं मुनीनां भावितात्मनाम् ।
ल भ—तमाश्रपदं ,, ,, ,,
२. ज—बहुवर्षसहस्राणि तत्र तत्तेपिरे तपः ।
ल— ,, यत्र ते तेपिरे ,,
भ— ,, तत्र ,, ,, ,,
३. रा—जातकौतूहलौ ।
४—ज ल भ—तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमं ।
ऊचतुर्मधुरं वाक्यं विश्वामित्रं महामुनिम् ॥
५. ज ल भ—पुण्यः कोन्वस्ति कुलपः पुमान् ।
६. ज ल भ—विश्वामित्रो महामुनिः ।
७. ज ल—भगवन् । भ—उवाच ।
८. ज ल भ—वत्सौ ।
९. ज—पूर्वमाश्रमः । ल—पूर्वमाश्रयः । भ—पूर्वमाश्रमः ।
१०. ज ल भ—मूर्तिमान्नाम कंदर्पः काम इत्युच्यते बुधैः ।
११. ज—स चकार तपोविघ्नं स्थाणु वेदुमनिर्मितम् ।
ल— ,, ,, ,, योद्धुमनिर्दितम् ।
भ— ,, ,, ,, ,, वेदमानिंदितम् ।

प्रवेष्टुमभ्ययात् तूर्णं कृतो[1]द्वाहमुमापतिम् ।[2]

११] स बुध्वा तत्र रुद्रेण शप्तः किल महात्मना ॥[3] ११॥ [११

अथ शप्तस्य रुद्रेण तस्य वै रघुनन्दन ।[4]

१२] रुद्रशापाग्निनिर्दग्धं तच्छरीरं व्यशीर्यत ॥[5] १२॥ [१२

तस्याङ्गान्यपतन्[6] राम सद्यः सर्वाण्यशेषतः[7] ।

१३] अशरीरः कृतः काम एवं कोपान्[8] महात्मना[9] ॥१३॥ [१३

अनङ्ग इति विख्यातस्तदाप्रभृति राघव ।

१४] अनङ्ग इति देशोऽयं ख्यातः कामाङ्गनाशनात्॥[10] १४॥ [१४

तस्यायमाश्रमः पुण्यः कामस्य[11] रघुनन्दन[11] ।

१५] तस्यायतनमत्रेदं तस्येमे परमर्षयः[11] ॥१५॥ [१५

तपोदमरताः सर्वे पुराणा ब्रह्मवादिनः ।

---

१. कै – कृतोत्साहमु० ।

२. ज ल—कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम् ।
भ— ,, ,, देवेशमतिष्ठत् ,,

३. ज—वेद्धुकामश्च दुर्मेधाः सोपाख्यातो महात्मना ।
ल— ,, ,, सोपाध्यातो ,,
भ—वद्धुकामश्च ,, ,, ,,

४. ज ल—अपध्यातस्य रुद्रेण चक्षुषो रघुनन्दन ।
भ— ,, स्यारुद्रेण चक्षुषो ,,

५. ज ल—व्यशीर्यतास्य सहसा ततो गात्राणि धीमतः ।
भ— ,, ,, ,, मात्राणि ,,

६. रा भ—०न्यपतद् ।

७. ज ल ल भ—हिमशैलसमीपतः ।

८. ज ल भ – क्रोधार्तेन ।

९. कै रा—महात्मनः ।

१०. ज ल—स चांगविषयः श्रीमान् यत्रांगानि मुमोच ह ।
भ—सांचविषयं ,, यत्रांगं प्रमुमोच ह ।

११. ज ल भ—तस्येमे मुनयः पुरा ।

१६] निवसन्त्यत्र नियतास्तपोनिर्धूतकल्मषाः[1] ॥१६॥ [N

इहाद्य रजनीमेकां[3] वसामः शुभदर्शन ।

१७] पुण्ययोः सरितोर्मध्ये भविष्यामः[4] परेद्यवि[5] ॥१७॥ [१६

अभिगच्छाम च स्नात्वा शुचयः पुण्यमाश्रमम् ।[6]

१८] इह कामाश्रमे[7] राम सुखं वत्स्यामहे निशि[8] ॥१८॥ [१७

तेषां संवदतामेवं तपोदीर्घेण चक्षुषा ।

१९] विज्ञाय परमप्रीता मुनयो हर्षमागमन्[9] ॥१९॥ [१८

तेऽर्घ्यं[10] पात्रं[10] च विधिवत् प्रयुज्यं[10] कुशिकात्मजे[11] ।

२०] रामलक्ष्मणयोरेवमकुर्वन्नतिथिक्रियाम्[12] ॥२०॥ [१९

सत्कारं परमं प्राप्य कथाभिरभिरम्य[13] च । [२०पू

२१] अवसंस्ते महात्मानः कामाश्रमपदे सुखम् ॥[14] २१॥ [२१उ

इत्यार्षे रामायणे बालकाण्डे[15] कामाश्रमनिवासो[16]
नाम एकविंशः[17] सर्गः ॥ २१ ॥

---

१. रा—०स्तपोनिव्रतक० ।

२. ज ल—शिष्टा धर्मपराधीना नैषां पापं हि विद्यते ।
भ— ,, कर्मपराधीना नेषा ,, ,, ,,

३. ज—रजनीं नाम । ल भ-रजनीं राम ।

४. ज ल भ—तरिष्यामः । ५. ज ल—प्रपद्य वै । भ-परेऽहनि ।

६. ज ल भ—नास्ति । ७. रा ब—कामाश्रमो ।

८. ज ल भ—वत्स्यामः सुसुखं निशाम् ।

९. ज ल भ—द्रष्टुमागताः ।

१०. ज—अर्घ्यं पाद्यं तथातिथ्यं निवेद्य । ल भ—पाद्यमथातिथ्यं निवेद्य-

११. ज—कुशकात्मजे ।

१२. ज ल भ—०णयोः पश्चादकु० । १३. ब—०भिरभिगम्य ।

१४. ज ल भ—न्यवसंस्ते सुखं तत्र कामाश्रमपदे तदा ।

१५. कै—आदिकांडे । ब—नास्ति ।
भ—महर्षिवाल्मीकिविरचिते बालकाण्डे ।

१६. रा—०श्रमनिवासं । १७. रा—षड्विंशः ।

ततः प्रभाते विमले कृत्वाऽऽह्निक[1]मरिन्दमौ ।
१] विश्वामित्रं पुरस्कृत्य नद्यास्तीरं[2] प्रजग्मतुः ॥१॥ [१
ते[3] च सर्वे[3] महात्मानो मुनयः[4] सूर्यवर्चसः ।
२] उपस्थाप्य[5] शुभां नावं विश्वामित्रमथाब्रुवन् ॥२॥ [२
आरोहतु भवान् नावं राजपुत्रपुरस्कृतः[6] ।
३] अरिष्टं गच्छ पन्थानं मा[7] ते कालात्ययो ह्यभूत्[7] ॥३॥ [३
विश्वामित्रस्तथेत्युक्त्वा तानृषीन् प्रतिपूज्य[8] च ।
४] ततार सरितं पुण्यां[9] सरयूं विमलोदकाम्[10] ॥४॥ [४
ततो[11] रामः सरिन्मध्ये पप्रच्छ मुनिपुङ्गवम् ।
५] वारिणो भिद्यत इव किमयं बलवान् स्वनः ॥[12]५॥ [६
[13]इति रामवचः[13] श्रुत्वा कौतूहलसमन्वितः[14] ।

---

१. ज भ—कृताह्निक० ।

२. ज ल भ—०स्तीरमुपागतौ ।

३. ज ल भ—सर्वं एव ।

४. ज ल—ऋषयः । भ–ज्ञेयः ।

५. ज ल भ—उपतस्थुः ।

६. ज ल भ—०त्रपुरःसरः ।

७. ज ल भ—माभूत् कालस्य पर्ययः ।

८. कै—प्रतिपूजयत् । ज ल भ– प्रत्यपूजयत् ।

९. रा—पुण्यं ।

१०. ज ल भ—सागरंगमाम् ।

११. ज ल भ—राघवस्तु ।

१२. ज ल भ—वारीणां भिद्यमानानां किमेष विमलो ध्वनिः ।

१३. ज ल भ—राघवस्य तु तच्छ्रुत्वा ।

१४. ज ल—जातकौतूहलं वचः ।

६] कथयामास भगवांस्तस्य[1] शब्दस्य विस्तरम्[2] ॥६॥ [७
कैलासशिखरे[3] राम मनसा निर्मितं सरः ।
७] ब्रह्मणा प्रागिदं तस्मात्[4] तदभून्मानसं सरः ॥[5]७॥ [८
सरसो मानसात् तस्मादयोध्यामनु शोभना ।
८] नदी[6] प्रसूता सरयूः पुण्या[7] ब्रह्मसरश्च्युता[8] ॥[9]८॥ [९
जाह्नवीमतिवर्तिन्यस्तस्याः शब्दोऽयमीदृशः ।[10]
९] वारिसंघर्षजो[11] राम प्रणामं प्रयतः[12] कुरु ॥९॥ [१०
चक्रतुस्तौ नमस्ताभ्यां[13] नदीभ्यामथ राघवौ ।[14]
१०] तीरं[15] परं समासाद्य जग्मतुर्लघुविक्रमौ ॥१०॥ [११

१. ज ल भ—धर्मात्मा तस्य ।
२. ज ल भ—निश्चयं ।
३. ज ल भ—कैलासपर्वते ।
४. रा—यस्मात् ।
५. ज ल भ—ब्रह्मणा रघुशार्दूल मानसं नाम तेन तत् ।
६. ज ल भ—नास्ति ।
७. ज ल भ—तस्मात् ।
८. भ—सायोध्यामभ्यभावयत् । ज—० सरच्छ्रुता ।
९. भ—अतः परमाधिकः पाठः—
सरःप्रसूता सरयूः पुण्या ब्रह्मसरःसुता ।
१०. ज—शब्दोऽयं विमलस्तस्या जाह्नव्यामधिवर्तते ।
ल— „ विपुलस्तस्यां जाह्नव्यामभिवर्तते ।
भ— „ विमलस्तस्या „ ।
११. रा—वारिसंघर्षणो ।
१२. ल—प्रयुतः ।
१३. ब—ततस्ताभ्यां ।
१४. ज ल भ—उभाभ्यां तावुभौ कृत्वा प्रणाममतिधार्मिकौ ।
१५. ज ल भ—दक्षिणमासाद्य ।

अथानुपदमेवान्यद्वनं घोरमरिन्दमौ ।[1][2]
११] दृष्ट्वा पप्रच्छतुर्भूयो मुनिं तं[3] नृवरात्मजौ ॥११॥ [१२
कस्येदं मेघसङ्काशं वनं घोरं प्रचक्षते । [N
१२] दुर्गं पक्षिगणाकीर्णं झिल्लिकागणनादितम् ॥[4]१२॥ [१३पू
नानामृगगणैर्जुष्टं शकुनैश्च निनादितम् ।[5]
१३] सिंहव्याघ्रवराहर्क्षबर्हिकुञ्जरसेवितम् ॥[6]१३॥ [१४
धवाश्वकर्णकुटजपाटलातिन्दुतिन्दुकैः ।
१४] द्रुमैः कण्टकिभिश्चैव कीर्णं किमिदमुच्यताम् ॥१४॥[6] [१५
तावुवाच तयोर्वाक्यं श्रुत्वेदं भगवान् मुनिः ।[7]
१५] श्रूयतामित्युपामन्त्र्य भ्रातरौ रामलक्ष्मणौ ॥[8]१५॥ [१६
अयं जनपदः श्रीमान् पूर्वमासीन्महर्द्धिमान् ।[9]
१६] मालवाश्च करूषाश्च देवनिर्माणनिर्मिताः ॥[10]१६॥ [१७

---

१. कै--० मरिंदमौ ।

२. ज ल भ--तद्वनं घोरसंनादं दृष्ट्वा नरवरात्मजौ ।

३. कै--नृपवरात्मजौ ।

४. ज ल--अहो वनमिदं घोरं झिल्लीकगण नादितम् ।
भ--,, ,, ,, झिल्लिकागणनादितं ।

५ ब--नास्ति ।
ज ल भ--भैरवैश्च समाकीर्णं शकुनैर्दारुणस्वनैः ।

६. ज ल भ--नास्ति ।

७. ज ल--तयोस्तद्वचनं श्रुत्वा विश्वामित्रो महानृषिः ।
भ-- ,, ,, विश्वामित्रोऽभ्यभाषत ।

८. ज ल भ--श्रूयतां वत्स काकुत्स्थ यस्येदं भैरवं वनम् ।

९. ज भ--शिवौ जनपदौ श्रीमान् पूर्वमास्तां नरोत्तम ।
ल-- ,, ,, ,, ,, नरोत्तमौ ।

१०. ज ल भ--मालवश्च करूषश्च देवनिर्माणनिर्मितौ ।

सखायं नमुचिं हत्वा मलेन समभिप्लुतः । [1]
१७] क्रोधाच्चैव सहस्राक्षो मित्रद्रुग् भगवान् किल ॥[2] १७॥ [१८
तमिह स्थापयामासुर्देवाः सर्षिगणाः पुरा ।[3]
१८] कलशैः पूर्णसलिलैः पुण्यैर्मलविशोधनैः॥[4] १८॥ [१९
सोऽस्मिन् देशे मलं त्यक्त्वा देवैः[5] कालुष्यमेव च ।[6]
१९] मित्राभिद्रोहसंयुक्तं परं हर्षमवाप्तवान् ॥[7] १९॥ [२०
निर्मलो निष्करूषश्च[8] शुचिरिन्द्रो यदा ह्यभूत् ।[9]
२०] ततो[10] देशस्य सुप्रीतो[11] ददौ वरमरिन्दमः[12] ॥२०॥ [२१
इमौ जानपदौ[13] स्फीतौ[14] ख्यातिं लोके गमिष्यतः ।

१. ज ल भ—पुरा वृत्रवधे राम ।

२. ज ल भ—क्षुधया च सहस्राक्षो ब्रह्महत्यां यदाविशत् ।

३. ज—तमिन्द्रस्य वयः सर्वे सर्वदेवगणैः सह ।
   ल भ—तमिन्द्रमृषयः ,, ,, ,, ।

४. ज ल भ—स्नपयांचक्रुरमलैः सलिलैर्मलशुद्धये ।

५. रा—देवाः ।

६. ज—तस्यां भूमौ मलं देवाः दत्वा करूषमेव च ।
   ल— ,, भूम्यां ,, ,, ,, ,,
   भ— ,, ,, ,, ,, ,, कालुषमेव च

७. ज ल भ—शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे ।

८. ज ल—निष्करूपश्च ।

९. ज ल भ—यदाभवत् ।

१०. ज ल भ—ददौ ।

११. ज ल भ—सुप्रीतस्ततो ।

१२. ब—वरमारिन्दमौ ।

१३. ज ब ल भ—जनपदौ ।

१४. ज ल भ—ख्यातिं कृत्स्ने ।

२१] मालवश्च करूषश्च अङ्गजेन ममाङ्कितौ[1] ॥२१॥ [२२
एवमस्त्विति तं देवाः पाकशासनमब्रुवन् ।[2]
२२] देशस्य नामनिर्वृत्तिः श्रूयतां वासवेरिता ॥[3]२२॥ [२३
एवमेतौ जनपदौ पूर्वमेव च शब्दितौ ।[4]
२३] मालवश्च करूषश्च मुदितौ[5] वृद्धिसंयुतौ ॥[6]२३॥ [२४
अथ कालस्य महतो यक्षिणी कामरूपिणी ।[7]
२४] बलं नागसहस्रस्य धारयन्ती महाबला[8] ॥२४॥
ताटका नाम सुन्दस्य भार्या दैत्यपतेरभूत् ।[9] [२५
२५] मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ॥२५॥ [२६
सेमं जनपदं राम समुच्छाद्य सुदारुणा ।[10]

---

१. ज ल भ—ममाङ्गसहचारिणौ ।

२. ज ल भ—साधु साध्विति तं देवाः शशंसुः पाकशासनम् ।

३. ज ल—देशपूजां तु तां कृत्वा कृतां चक्रेण धीमता ।
भ— ,, च ,, दृष्ट्वा ,, शक्रेण ,, ।

४. ज—एवं जनपदो श्रीमांस्तुल्यकाल्यमारिन्दम ।
ल— ,, जनपदौ श्रीमंस्तुल्यकाल ,, ।
भ— ,, ,, श्रीमत्तुल्यकाल ,, ।

५. रा—मुदितावृद्धिस० ।

६. ज—मालवश्च कुरूषश्च समृद्धौ धनधान्यतः ।
ल— ,, करूषश्च समृद्धौ ,, ।
भ ,, ,, संपन्नौ ,, ।

७. ज ल भ—कस्य चित्त्वथ कालस्य यक्षी दुष्टप्रचारिणी ।

८ ज ल भ—धारयंत्यनिशं युधि ।

९. ज ल—ताडका नाम भद्रं ते भार्या सुंदस्य धीमतः ।
भ—ताटका ,, ,, ,, ,, ।

१०. ज ल भ—उत्सादयति सा नित्यमेतौ जनपदौ विभो ।

२६] अद्यापि साऽधिवसति ताटका नाम यक्षिणी[1] ॥२६॥ [N
एषा पन्थानमावृत्य[2] निवसत्यर्धयोजने ।
२७] अत एव च[3] गन्तव्यं ताटकाभवनं[4] प्रति[5] ॥२७॥ [२९
स्वबाहुबलमाश्रित्य[6] जहि तां दुष्टयक्षिणीम् ।
२८] मन्नियोगादिमं[7] देशं कुरु निष्कण्टकं पुनः ॥२८॥[8] [३०
न हि कश्चिदिमं देशं शक्नोत्यागन्तुमीदृशम् ।
२९] यक्षिण्या घोररूपिण्या तत्सादितमनार्यया[9] ॥२९॥ [३१
इति[10] ते सत्यमाख्यातं यथेदं[11] दारुणं वनम् ।
३०] यक्षिण्योत्सादितं[12] पूर्वमद्याप्युत्साद्यते[13] सदा[14] ॥३०॥ [३२

इत्यार्षे रामायणे[15] बालकाण्डे[15]
ताटकावनप्रवेशो नाम द्वाविंशः[16] सर्गः ॥२२॥

---

१. ज भ—मलवांश्च करूषांश्च यची पिशितभाक्षिणी ।
ल— ,, ,, ,, वै पिशिनाशिनी ।
२. ज ल भ—पन्थानमावार्य ।
३. ज ल भ—न ।
४. ज—ताडकायोजनं । ल—ताडकायोवनं । भ—ताडकाभवनं ।
५. ज ल भ—यतः ।
६. रा ल—सुबाहुबलमा० ।
७. ब—मन्नियोगान्निमं ।
८. ज ल भ—नास्ति । ल—अपरहस्तेन पुनर्विन्यासः ।
९. रा ल—उत्सादितमनार्यया ।
१०. ज ल भ—एतत्ते सर्वमाख्यातं ।
११. ल—यदर्थे ।
१२. ज—यक्षण्युत्सादितं । ल—यक्षिण्युत्सा० । भ—यक्ष्यायुत्सादितं ।
१३. ज—सर्वमद्याप्यु ० । ब—० मद्याप्युसादिते ।
ल—सर्वमद्याप्युत्सध्यते ।
१४. ज ल भ—तया ।
१५. भ—महर्षिवाल्मीकिविरचिते ।
१६. रा—सप्तविंशः ।

इति तस्याप्रमेयस्य मुनेर्वचनमद्भुतम् ।[1][2]
१] श्रुत्वा रामस्ततो भूयः परिपप्रच्छ संशयम् ॥१॥ [१
अल्पवीर्या यदा यक्षाः श्रूयन्ते मुनिपुङ्गव ।[5]
२] कथं नागसहस्रस्य धारयन्त्यबला बलम् ॥२॥ [२
विश्वामित्रस्ततो रामं श्रुत्वेति पुनरब्रवीत् ।[7]
३] शृणु राम यथा चैषा धारयन्त्यबला बलम् ॥[10]३॥ [४
पूर्वमासीन्महायक्षः सुकेतुरिति विश्रुतः ।[11]
४] अनपत्यः प्रजाकामः स[12] तेपे[13] सुमहत्तपः[14] ॥४॥ [५
तस्मै साक्षात् स्वयं ब्रह्मा तपसा परितोषितः ।[15]

१. ज ब ल भ—अथ ।

२. ल—मुनेर्वचनमब्रवीत् । भ- ०चनमुत्तमं ।

३. ज ल भ—पुरुषशार्दूलः ।

४. ज ब ल भ—प्रत्युवाच शुभां गिरम् ।

५. भ—सदा ।

६. रा ज ल भ—धारयत्यबला ।

७. ज ल भ—एतच्छ्रुत्वा वचस्तस्य विश्वामित्रोऽभ्यभाषत ।

८. ब—क्षेमे ।

९. रा—धारयत्यबला ।

१०. ज ल भ—वरदानान्महाबाहो यथैषा कामरूपिणी ।

११. ज ल भ—सुकेतुर्नाम धार्मिकः ।

१२. ज ल भ—शुभाचारः ।

१३. कै—तत्तेपे । रा–तेतपे । ज ल भ– स च तेपे ।

१४. रा—समहत्तपः । ज ल भ–महत्तपः ।

१५. ज ल भ—पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा ।

५] कन्यारत्नं ददौ राम ताटकां[1] नाम नामतः ॥५॥ [६
बलं नागसहस्रस्य ददौ चास्याः पितामहः ।[2]
६] कांक्षतोऽप्यस्यै[3] पुत्रं हि यक्षाय न ददौ प्रभुः ॥[4]६॥ [७
वर्धमानां तु[5] तां दृष्ट्वा रूपयौवनशालिनीम् ।
७] कुम्भपुत्राय सुन्दाय ददौ भार्यामनिन्दिताम्[6] ॥७॥ [८
कस्यचित्त्वथ कालस्य यक्षीपुत्रो[7] व्यजायत ।
८] मारीचं नाम विख्यातं[8] शापाद्राक्षसतां[9] गतम् ॥८॥[10] [९
सुन्दे तु निहते तस्मिन्नगस्त्यं मुनिसत्तमम् ।[11]
९] ताटका[12] पुत्रसहिता[13] प्रधर्षयितुमुद्यता[14] ॥९॥ [१०

---

१. ज—ताडका । ब—तटकां । भ—ताडकां ।
२. ज ल भ—ददौ नागसहस्रस्य बलं तस्याः पितामहः ।
३. कांक्षतोप्यस्मै ।
४. ज ल—नन्वेव पुत्रं यक्षाय ददौ पुत्रं महायशाः ॥
भ— ,, ,, ,, ,, ब्रह्मा ,, ॥
५. ज ल भ—हि तां राम ।
६. ज ल भ—भार्यां यशस्विनीं
७. रा ज ब ल भ—यक्षी पुत्रं ।
८. ज ल भ—दुर्द्धर्षं ।
९. ज भ—साक्षाद्राक्षसतां ।
१०. कै—अतः परमाधिकोऽपरहस्तविन्यस्तः पाठः—
सोपेत्य नियतं मोहादगस्त्यमृषिसत्तमं ।
ताडका सह पुत्रेण प्रधर्षयितुमिच्छति ॥
राक्षसस्त्वं भवस्वेवं मारीचं व्याजहार सः ।
अगस्त्यः परमक्रुद्धस्ताडकां चापि शप्तवान् ॥
११. ज—सोऽभ्येत्य नियतं मोहादगस्त्यमृषिसत्तमं ।
ल—सोद्येति ,, मोहादगम्यं ऋषिसत्तमम् ।
भ—साभ्येत्य ,, मोहदगस्त्यमृषिसत्तमं ।
१२. ज भ—ताडका ।
१३. ज ल भ—सह पुत्रेण ।
१४. कै—प्रदर्षयितु० । रा-प्रदर्श० । ज ल भ-० पितुमिच्छति ।

राक्षसस्त्वं[1] भवेत्येवं[2] मारीचं व्याजहार सः। [१२उ
१०] अगस्त्यः परमक्रुद्धस्ताटकां[3] चेदमब्रवीत्[4] ॥१०॥ [१३
पुरुषादा घोररूपा यक्षी त्वं विकृतानना।[5]
११] इदं रूपं परित्यज्य विकृता त्वं भविष्यसि॥[6]११॥ [१४
सैषा शापसमाविष्टा ताटका दुष्टयक्षिणी।[7]
१२] देशमुत्सादयत्येनमगस्त्याध्युषितं पुरा॥[8]१२॥ [१५
एवं तां राम[9] दुर्वृत्तां यक्षीं परमदारुणाम्[10]।
१३] गोब्राह्मणहितार्थाय जहि घोरपराक्रमाम्॥[11]१३॥ [१६
न हि वीर्यमदोन्मत्तामेतां परमदारुणाम्।[12]
१४] निहन्ति[13] त्रिषु लोकेषु त्वामृते रघुनन्दन॥१४॥ [१७

---

१. कै—राक्षसस्त्वेव मुक्तस्तु।

२. रा—भवत्वेवं। भ—भवेत्युच्चैर्।

३. ज भ— ०स्ताडकां।

४. ज ब ल भ—चापि शप्तवान्।

५. ज ल—पुरुषादां महायक्षी विकृतां विकृताननाम्।
भ—पुरुषादा महायक्षीं विकृता विकृतानना।

६. ज ल—शुभं रूपं परित्यज्य दारुणं रूपमास्थिता।
भ—शुभरूपं ,, ,, ,,।

७. ज भ—सा वै पापकृतामर्षात्ताडका नाम राक्षसी।
ल— ,, ,, ,, त्ताटका ,, ,,।

८. ज ल—देशमुत्सादयत्येतदगस्त्याचरितं तदा।
भ— ,, ,, त्येतमगस्त्या ,, ,,।

९. ज ल भ—राघव।

१०. ज ल भ—दुष्टप०।

११. रा—नास्ति।

१२. ज ब ल भ—न ह्येनां शापसंदुष्टां कश्चिदुत्सहते पुमान्।
रा—नास्ति।

१३. ज ब ल भ—निहंतुं।

न च ते स्त्रीवधकृता[1] घृणा कार्या कथञ्चन[2] ।
१५] प्रजानां च हितं नित्यं कर्तव्यं राजसूनुभिः ।।[3]१५।। [१८
राजवंशाभिजातानामेष[4] धर्मः सनातनः ।
१७] अधर्मं जहि काकुत्स्थ कुरु धर्मं प्रजाहितम् ।।[5] १६।। [२०
नृशंसमनृशंसं वा प्रजारक्षणकारणात्[6] ।
१६] पावनं वा सदोषं वा कर्तव्यं नात्र संशयः ।।१७।।[7] [१९
श्रूयते हि पुरा राम विरोचनसुता किल[8] । [२१उ
१८] राक्षसी दीर्घजिह्वेति विख्याता कामरूपिणी ।।१८।। [N
विकृतं सुमहद्वक्त्रं[9] कृत्वा कालानलोपमम् ।
१९] ग्रसन्ती[10] पृथिवीं कृत्स्नां शक्रेण विनिपातिता ।।१९।। [N
विष्णुना च पुरा राम शक्रतुल्यपराक्रमा ।
२०] अपीन्द्रलोकमिच्छन्ती[11] काव्यमाता निपातिता[12] ।।२०।। [२२
एवमन्यैरपि पुरा राजधर्मविचारिभिः[13] ।
२१] अधर्मनिरता नार्यो हताः पुरुषसत्तम ।
N] तस्मादस्या वधाद्राम प्राणिनः सन्तु निर्भयाः ।।२१।।[14] [२३

इत्यार्षे रामायणे बालकाण्डे[15] ताटकोत्पत्ति[16] र्नाम[17] त्रयोविंशः सर्गः ।।[18] २३।।

---

१. रा—स्त्रीवधं कृत्वा । ज—स्त्रीवधस्त्वे वै । ल भ—स्त्रीवधेत्येवं ।
२. ज ल भ—नरोत्तम ।
३. ज ल भ—चातुर्वर्ण्यहितं तात कर्तव्यं राजसूनुना ।
४. ज ल भ—राज्यभारनियुक्तानामेषः ।
५. ज ब ल भ—तस्मात्त्वं जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ।
६. ज ल—प्रजाकारणकारणात् ।
७. ज भ—नास्ति । ल—उत्तरपार्श्वेऽपरहस्तेन पुनर्विन्यासः ।
८. ज—भवेत् । ब ल भ—सुताभवत् ।
९. ज ल भ—०सुमहत्कृत्वा वक्त्रं ।
१०. ज ल भ—जिघांसुः पृथिवीं सर्वां ।
११. रा—अप्येन्द्रलो० । ज—अपीन्द्रं लो० ।
ब—अनिन्द्रमिन्द्ररहितं । ल भ अनिन्द्रं लोकमि० ।
१२. ज ब ल भ—निषूदिता । १३. ज ब भ—राजभिर्द्धर्मचारिभिः ।
१४. रा—नास्ति । १५. कै आदिकाण्डे ।
१६. ब—तारकोत्प० । १७. रा—०र्नामाष्टाविंशः ।
१८. ज ल भ—पुस्तकेषु सर्गसमाप्तिर्न दृश्यते ।

मुनेर्वचनमक्लीबं श्रुत्वा नृपवरात्मजः[1] ।
१] राघवः प्राञ्जलिर्भूत्वा[2] प्रत्युवाच धृतव्रतम्[3] ॥१॥[4] [१
अहं पित्रा समादिष्टो मात्रा चैव महामुने ।
२] विश्वामित्रस्य वचनं त्वया कार्यमिति प्रभो ॥२॥[5] [३
सोऽहं पितृनियोगेन तव चैव महामुने ।[6]
३] करिष्ये दुष्टयक्षिण्यास्ताटकाया वधं प्रभो ॥[7]३॥[8] [४
गोब्राह्मणहितार्थाय देशस्य च सुखावहम्[9] ।
४] तदेतच्चैव प्रीतेन कर्तव्यं वचनं मुने ॥[10]४॥ [५

---

१. ज भ—वरनृपात्मजः
२. ज ल भ—०ञ्जिर्वाक्यं ।
३. ज ल भ—दृढव्रतं । ब—महामुने ।
४. ज ल भ—पुस्तकेषु सर्गसमाप्त्यभावाद् द्वाविंशः श्लोको ज्ञातव्यः द्वात्रिंशत्सर्गस्यैव ।
५. ज ल भ—पितुर्वचननिर्देशो ममायमृषिसत्तम ।
वचनं कौशिकस्येति कर्तव्यमविशंकया ॥
अनुशिष्टोस्म्ययोध्यायां गुरुमध्ये महात्मना ।
पित्रा दशरथेनैवमनुरुध्ये च तद्वचः ॥
ल—,, ,, वमनुध्यो ,, ,
ब—अतः परमधिकः पाठः—
अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना ।
पित्रा दशरथेनैवमनुदध्ये च तद्वचः ॥
६. ज भ— सोहं पितुर्वचः कुर्वन् शासनं ते महामुने ।
ल— ,, ,, कुर्याम् ,, ,, ,,
७. ज भ—निस्संदेहं करिष्यामि ताडकावधमुत्तमम् ।
ल— ,, ,, ताटकावध ,,
८. ब—नास्ति ।
९. ज ल भ--गोब्राह्मणहितं चैव यशस्यं च सुखावहं ।
१०. ज—उवाचैवाप्रमेयस्य वचनं कृतमस्तु मे ॥
ल भ—तव चैवा ,, ,, ,, ,,

एवमुक्त्वा धनुः सज्यं कृत्वोद्यम्य च राघवः ।[2]
९] ज्याशब्दमकरोत्[3] तीव्रं दिशः[4] शब्देन पूरयन् ॥५॥ [६
तेन शब्देन वित्रस्ता मृगा वनेनिवासिनः[5] ।
६] ताटका चापि संभ्रान्ता ज्यास्वनप्रतिबोधिता ॥[6] ६॥ [७
नन्दमाना भृशं क्रुद्धा विकृता[7] विकृतानना ।[8]
७] श्रुत्वैवाभ्याद्रवत्[9] तीव्रं[10] यतः शब्दोऽभिनिःसृतः[11] ॥७॥ [९
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् ।
८] अतिप्रमाणामायान्तीं रामो लक्ष्मणमब्रवीत् ॥[12] ८॥ [१०
पश्य लक्ष्मण राक्षस्या दारुणं विकृतं मुखम् ।[13] [११ पू
९] अतिप्रमाणं क्रुद्धाया रूपं चातिभयावहम् ॥[14] ९॥ [N

---

१. रा—राघवाः ।

२. ज ल भ—एवमुक्त्वा धनुर्मध्ये कृत्वा मुष्टिमरिंदमः ।

३. ज ब ल भ—ज्याघोषम० ।

४. ज ल भ—देशं ।

५. ज भ—ताडकावनवा० । ल—ताटकावनवा० ।

६. ज भ—ताडका च सुसंरब्धा तेन शब्देन कोपिता ।
ल—ताटका ,, ,, ,, ,, ।

७. के रा—विकृताधिकृता० ।

८. ज ल भ—तं शब्दं भीमनिह्रादं यक्षी कोपाभिमूर्छिता ।

९. ब—श्रुत्वैवाभ्यागमत् । ल—श्रुत्वैवाद्यभवत् ।

१०. ज ल भ—वेगाद् ।

११. रा—शब्दो विनिःसृतः । ज ल भ—शब्दो हि निःसृतः ।

१२. ज ल भ—प्रमाणेनातिवृद्धां च लक्ष्मणं वाक्यमब्रवीत् ।

१३. ज ल भ—यक्ष्या लक्ष्मण पश्यैतद्रूपं परमदारुणम् ।

१४. ज ल भ—भिद्यते दर्शनेनास्या हृदयं कातरस्य च ।
ल— ,, ,, ,, ,, हि ।

एतां पश्य महाबाहो मद्बाणेन हृदि क्षताम्।[1]

१०] निहतां पतितां भूमौ रुधिरेण परिप्लुताम् ॥[2]१०॥ [N

इयं हि राक्षसी घोरा महादुष्कृतकारिणी।

११] मच्छरेण विनिर्दग्धा धूतपापा भविष्यति ॥११॥[3] [N

एवं तस्य ब्रुवाणस्य ताटका[4] क्रोधमूर्च्छिता।

१२] उद्यम्य बाहू गर्जन्ती वेगेनाभ्याशमाययौ[5] ॥१२॥ [१.५

तामापतन्तीं[6] वेगेन विक्रान्ताम[7]शनीमिव।

१३] ताटकां विकृताकारां जिघांसन्तीं सुदारुणाम् ॥१३ [N

महाभ्रचयसङ्काशां समुच्छ्रितभुजद्वयाम्।

१४] विव्याधोरसि बाणेन चन्द्रार्धाकारवर्चसा ॥१४॥[8] [N

सा तेन वज्ररूपेण बाणेन भृशविक्षता।

१५] ववाम रुधिरं भूरि पपात च ममार च ॥१५॥[8] [२८

तां हतां पतितां[9] भूमौ दृष्ट्वा सुरपतिस्तदा।

१६] साधु साध्विति काकुत्स्थं[10] सुराश्च समनादयन्[10] ॥१६॥ [२९

---

१. ज—एनां पश्य दुराधर्षां निर्भिन्नहृदयां क्षितौ।
 ल—एतां ,, ,, त्रिभिन्नहृदयां ,, ।

२. ज ल—शयानां शयने धन्ये धूतपापां मया हताम्।
 भ— ,, ,, ,, पूतपापां ,, ,, ।

३. ज ल भ—नास्ति।

४. ज भ—ताडका।

५. ज ल भ—काकुत्स्थं समभिद्रुता।

६. ज ल भ—आपतंतीं तदा रामो।

७. रा—विभ्रांतामशनी० । ज ल भ—विचक्रामाशनीमिव।

८. ज ल भ—शरेणोरसि विव्याध पपात च ममार च।

९. ज ल भ—भीमसंकाशां।

१०. ज ब ल—०समपूजयन्। भ—सुराः समभिपूजयन्।

उवाच च भृशं प्रीतः सहस्राक्षोऽम्बरे स्थितः ।[1]

१७] सह सर्वामरगणैर्विश्वामित्रमिदं वचः ॥[2] १७॥ [३०

मुने कौशिक भद्रं ते सेन्द्राः सुरगणास्त्वया ।

१८] तोषिताः कर्मणानेन रामस्यामिततेजसः ॥[3] १८॥ [३१

अस्मन्नियोगाद् भद्रं ते स्नेहं दर्शय राघवे ।[3]

१९] तपोयोगबलेनैनमाप्याययितुमर्हसि[4] ॥[5] १९॥

प्रजापतिसुतांश्चैव कृशाश्वाद्राजसत्तमात् । [३२

२०] यान्यवाप्तानि तेऽस्त्राणि[6] तान्यस्मै प्रतिपादय ॥२०॥[7] [N

पात्रभूतो हि ते शिष्यो रामो दशरथात्मजः ।[8]

२१] कर्तव्यं च[9] महत् कार्यमस्माकं राजसूनुना ॥२१॥ [३३

एवमुक्त्वा सुरगणा विश्वामित्रं पुनर्ययुः

---

१. ज ल—उवाच वासवः प्रीतः सहस्राक्षः पुरन्दरः ।
भ—नास्ति ।

२. ज ल भ—सुराश्च सर्वे संप्रीता विश्वामित्रमिदं वचः ।

३. ज ल भ—तोषिताः कर्मणानेन स्नेहं दर्शय राघवे ।

४. रा ब—०बलेनैवमाप्य० ।

५. ज ल भ—नास्ति ।

६. ब—शस्त्राणि ।

७. ज भ—प्रजापतेः कृशाश्वस्य पुत्रान् दिव्यपराक्रमान् ।
ल— „ „ सुखं दिव्य „ ।
ज ल—तेजोबलयुतान् ब्रह्मन् राघवाय प्रदापय ।
भ— „ „ „ ददस्व च ।

८. ज—पात्रभूतो ह्ययं तेषां तवानुगमने गतः ।
ब— „ „ „ „ रतः ।
ल— „ „ „ भुवानुगमने वृतः ।
भ— „ „ „ तवानु० „ „ ।

९. ज भ—च महत्कर्म सुराणां । ब—सुमहत्कार्य० ।
ल—सुमहत्कर्म सुराणां ।

२२] यथागतेनैव पथा ततः सन्ध्याऽभ्यवर्तत ॥२२[1]॥ [३४
विश्वामित्रोऽपि भगवांस्ताटकावधतोषितः ।[3]
२३] रामं मूर्धन्युपाघ्राय वचनं चेदमब्रवीत ॥[4]२३॥ [३५
इहाद्य रजनीं वीरं वसामं शुभदर्शन ।[7]
२४] श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥२४॥ [३६

इत्यार्षे रामायणे बालकाण्डे[11] ताटकावधो[12]
नाम[13] चतुर्विंशः[13] सर्गः ॥२४॥

---

१. ज ब ल--एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा यथागतं ।
भ-- ,, ययुः सर्वे ,, ,, ।
रा--यथागतेनैव पथा ततः साम्रा ....।
ज ल भ--विश्वामित्रं समाधाय ततः संध्याभ्यवर्तत ।
ब-- ,, समादाय ,, ,, ।

२. कै-- ० स्तारका० ।

३. ज भ--ततो मुनिवरः प्रीतस्ताडकावधतोषितः ।
ल-- ,, ,, प्रीतस्ताटका ,, ।

४. ज ल--मूर्ध्नि राममुपाघ्राय मधुरं वाक्यमब्रवीत् ।
भ--मूर्ध्नि राममुपघ्राय ,, ,, ।

५. ज--नाम । ल भ--राम ।

६. ज ल--वसामि ।

७. कै--अतः परमपरहस्तेन विन्यस्तोऽधिकः पाठः--
अयं सिद्धाश्रमो राम यत्प्रसादाद्भविष्यति ।
भ--अयं सिद्धाश्रमो नाम यत्प्रसादाद्भविष्यति ।

८. ज ल भ--प्रभाते च ।

९.--ज ब ल भ-- ०स्तथाश्रमपदं ।

१०. ज ल--निजं । भ--निजां ।

११. कै--आदिकांडे । ब--नारिते ।

१२. ज भ--ताडकावधो ।

१३. कै--नामोनत्रिंशः । रा ब ल भ--नाम ।
ज--नाम त्रयोविंशः ।

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ।
१] प्रहसन् राममाभाष्य मधुरं वाक्यमब्रवीत् ॥[2]१॥ [१
तुष्टोऽस्मि राम भद्रं ते कर्मणा ह्यद्भुतेन वै ।
२] प्रीतिदायं च दास्यामि सर्वाण्यस्त्राण्यशेषतः ॥२॥[3] [२
यान्यहं वेद्मि[4] काकुत्स्थ पात्रभूतो[5]ऽसि मे यतः[6] ।
३] ब्रह्मास्त्रं प्रथमं[7] राम दिव्यमेतद्[8] ददामि ते ॥३॥ [N
त्रयाणामपि[9] लोकानां पीडितानां भयापहम्[10] ।
४] तथैव दण्डमस्त्रं ते[11] प्रजासंहारकारकम् ॥[12]४॥ [N

१. भ—सु ।

२. ज ल भ—प्रहसन्वाक्यतत्त्वज्ञमुवाच मधुराक्षरम् ।

३. ज ल भ—परितुष्टोऽस्मि भद्रं ते राजपुत्र महाबल ।
प्रीत्या परमया युक्तः सर्वास्त्राणि ददामि ते ॥

४. ज ल भ—वेद ।

५. ज—पात्रीभूतोसि ।

६. ज ब ल भ—मतः ।

७. ज ल भ—परमं ।

८. ज ल भ—दिव्यमस्त्रं ।

९. ज ल भ—सर्वेषामेव ।

१०. रा—भयावहम् ।

११. रा—दंडमस्त्रं मे । ब—चंडमस्त्र ते ।

१२. ज ल—दण्डमस्त्रं महच्छ्रेष्ठं ददामि रघुनंदन ।
भ— ,, महच्छ्रेष्ठं ,, ,, ।

ददानि राम शत्रूणां येनाधृष्यो भविष्यसि । [N
५] धर्मास्त्रं च महाबाहो कालकल्पं तथैव च ॥[4]५॥ [५पू
कालास्त्रमपि वाऽसह्यं ददानि दयितं विभोः ।[5] [N
६] विष्णुचक्रं च ते दिव्यमिन्द्रवज्रं च दुर्जयम् ॥[6]६॥ [५उ
वज्रमस्त्रं च दुर्धर्षं शैवं[7] शूलवरं तथा ।[8]
७] अस्त्रं ब्रह्मशिरश्चोग्रमैषीकं च ददानि ते ॥[10]७॥ [६
शङ्करास्त्रं च दीप्तास्यं गृहाणेदं मयोदितम् ।[12] [N
८] गदाद्वयं वामतिमं गृहाणारिभयावहम् ॥८॥[13]

---

१. कै--ददामि । ज ल भ—सर्वदा ।
२. ज ल भ—येनाजेयो ।
३. कै--अथाब्रवीत् । अपरहस्तेन पुनर्लिखितः । रा—ददानि ते ।
४. ज ल भ--धर्मचक्रं ततो राम कालचक्रं तथैव च ।
५. ज भ—विष्णुचक्रं तथात्युग्रमिन्द्रचक्रं तथैव च ।
ल— ,, ,, मिन्द्रशक्रं ,, ,, ।
६. ज—वज्रमस्त्रं नरश्रेष्ठ शैवं पशुपतं ततः
ल-- ,, ,, ,, पाशुपतं ततः ।
भ-- ,, नरश्रेष्ठ ,, ,, ,, ।
७. कै—दैवं ।
८. ज ल—गदे द्वे चापि काकुत्स्थ कौमोदकिशिवोदके ।
भ— ,, ,, ,, कौमोदकिशिवोदकी ।
९. रा—ब्रह्मवराश्चोग्र० ।
१०. ज ल—अस्त्रं ब्रह्मशिरश्चैवमैषीकमपि राघव ।
भ— ,, ,, श्चैव ऐषीकमपि ,, ।
११. कै—गृहाणेशं ।
१२. ज ल—ददामि ते महाबाहो ह्यस्त्रं शखधरं तथा ।
भ—,, ,, महोह्यस्त्रं शंखं दरवरं तथा ।
१३. ज—शांकरास्त्रं च दीप्तास्यं गृहाणेदं ममोद्यतां ।
ल— ,, ,, ,, ,, ममोद्यतम् ।
भ—शांकरास्त्रं ,, ,, ,, मयोद्यतं ।

कौमोदकीं वाऽप्रतिमां तथेमां लोहि[1]तामुखीम् ।[2] [७
९] धर्मपाशं तथैवास्त्रं कालपाशं च दुर्जयम् ॥[3] ९॥
वारुणं चापि ते पाशं ददानि परमार्चितम् ।[4] [८
१०] शुष्कार्द्रे चाश[5]नी राम गृहाणेमे मयोदिते ॥[6] १०॥
पैनाक[7]मपि चैवास्त्र[7]मस्त्रं नारायणं तथा । [९
११] आग्नेय[8]मपि वाऽस[8]ह्यं वायव्यं च दद[9]ानि ते ॥[10] ११॥
प्रमर्दनं प्रमथनं तथैवारिविदारणम् ।[11] [१०
१२] अस्त्रं ह[12]यशिरो नाम क्रौञ्चा[12]स्त्रं वाऽपराजितम् ॥[13] १२॥
शक्ती च द्वे गृहाणेमे अमोघां विजयां तथा ।[14] [११

---

१. कै—लोहितामसीम् ।

२. ज भ—अपि ते नरशार्दूल प्रयच्छामि नृपात्मज ।
   ल— ,, ,, ,, ,। नृपात्मजे ।

३. ज ल भ—धर्मपाशमिमं कालपाशं तथैव च ।

४. ज ल भ—वारुणं पाशरत्नं च ददाम्येतदनुत्तमम् ।

५. कै—लुप्तः पाठः । रा—वाशनी ।

६. ज—अशने द्वे प्रयच्छामि शुष्कार्द्रे रघुनंदन ।
   ल—अशनी ,, ,, शुष्कार्द्रे ,, ।
   भ— ,, ,, ,, शुष्कार्द्रो , ।

७. ज—दैवास्त्रमपि नागास्त्र० । ल भ—देवास्त्रमपि नागा० ।

८. रा—आग्नेयमपि वा मह्यं । ब—आग्नेयमस्त्रं दयितं ।

९. कै—ददामि । पुनरपरकरशोधितः ।

१०. ज ल भ—आग्नेयमस्त्रं दयितं दैवतास्त्रं तथैव च ।

११. ज ल वायव्यास्त्रं च दयितं ददामि तव राघव ।
   भ—वायव्यमस्त्रं दयितं विसृजामि रघूत्तम ।

१२. कै रा—हयशिराश्चैव कूटास्त्रं ।

१३. ज ल भ—अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ।

१४. ज ल भ—शक्ती द्वे पुरुषव्याघ्र विसृजामि रघूत्तम !

१३] तथैव कालं मुशलं[1] कङ्कालमथ किङ्किणी ॥[2] १३॥
धारय त्वं[3] नरव्याघ्र ददाम्येतानि तेऽनघ । [१२
N] अस्त्रं वैद्याधरं[4] नाम नन्दकं[5] नाम चापरम् ॥१४॥[6] [१३पू
प्रस्वापनं प्रमथनं[7] स्तंभनं च ददानि ते[8] । [१४उ
१४] धर्षणं[9] शोषणं चैव तथा[10] वारिनिकृन्तनम् ॥[11] १५॥
मदनोन्मादने चैव कन्दर्पदयितावुभौ ।[12] [१५

---

१. कै—सुमलं ।

२. ज ल—कंकालं मुसुलं घोरं कपालमथ किंकिणी ।
भ—कंकालमुशलं „ „ किंकिणीं ।

३. ज ल भ—त्वं हि वीरघ्न ।

४. ज ल भ—विद्याधरं ।

५. ज ल भ—नन्दिकं ।

६. कै रा—नास्ति ।

अतः परमधिकः पाठः—

ज ल भ—असिरत्नं महाबाहो ददामि मनुजाधिप ।
गान्धर्वमस्त्रं दयितं मोहनं नाम नामतः ॥
भ— „ „ मोहनं नामतः पुनः ॥
इति द्वितीयार्धस्य पाठान्तरम् ।

७. कै—मोहनं च ।

८. ज ल भ—वितरामि तवानघ ।

९. कै—वर्षणं शो० । ज ल—दर्पणं शो० । ल—दर्पं शोषणे ।

१०. ज भ—संतापनमिति श्रुतं । ब ल—संतापनमिति स्मृतं ।

११. रा—प्रस्वापनं मोहनं च स्तंभनं च ददानि ते ।

१२. ज—दमनं चैव दुर्धर्षं कंदर्पदायितामिव ।
ल—दमने „ „ कंदर्पदयितानि तु ।
भ—दमनं „ „ „ वै ।

१५] गन्धर्वास्त्रं तथैवेदं मोहनं च ददानि ते ॥[1] १६॥ [१४पू

तेजोऽभ्याहरणं[2] शौर्यमरिपक्षप्रतापनम्[3] ।

१६] रुधिरामिषपैशाचकौवेरं च ददानि ते ॥१७॥[4] [N

राक्षसं चापि शत्रूणां श्रीधृतिप्राणनाशनम् ।

१७] मूर्च्छनं स्वापनं चास्त्रं कम्पनं चारिकंपनम्[6] ॥१८॥[7] [N

उ१८] सत्यं चैवानृतं चास्त्रं महामायास्त्रमेव च ।[8]

अमोघतैजसं चैव परतेजोऽपकर्षणम् ॥[9] १९॥ [N

१९] सोमास्त्रं शिशिरं राम त्वाष्ट्रं चारिव्यथाकरम्[10] ।[11]

मानवं चास्त्रमजितं दैत्यदानवमेव च ॥[12] २०॥ [N

---

१. ज—पैशाचमर्थं दयितं मानवं नाम नामतः ।
ल भ—पैशाचमस्त्रं ,, ,, ,, ,, ।

२. कै—तेजोऽभ्याहरणं । रा—तेभ्योऽभ्याहरणं ।

३. कै—शौचमरिपक्ष० । ब—शौ'''मरिपक्षप्रयातनं ।

४. ब—पैशाचमस्त्रं दयितं कौवेरं ।

५. ज ल भ—नास्ति ।

६. कै—चारिकृत्यनम् । पुनरपरकरशोधितः ।

७. ज ल भ—गृहाण नरशार्दूल सर्वाण्येतानि राघवं ।
वामनं नरशार्दूल सौमनं च महाबलं ॥

८. ज ल—संवर्तं चैव दुर्धर्षं मौसलं च नृपात्मज ।
भ— ,, ,, ,, मौशलं ,, ,, ।

९. ज भ—सत्यमस्त्रं महाबाहो मायाधरमथापि च ।
ल— ,, ,, ,, वा ।

१० रा—चारिवृथाकरम् ।

११. ज भ—मोघतेजोबलं राम परतेजोपकर्षणं ।

१२. ज ल भ—सोमास्त्रं शिशिरं नाम तथा त्वाष्ट्रं सुदारुणं ।

२०] एवमादीनि चान्यानि ददानि दयितोऽसि मे ।
गृहाणैतानि मत्तस्त्वमस्त्राणि नृवरात्मज ॥२१॥[1] [N
२१] अथासौ[2] प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ।
ददौ रामाय सुप्रीतश्चास्त्र[3]ग्राममनुत्तमम् ॥२२॥ [N
२२] जपतोऽथ मुनेस्तस्य मन्त्रग्राममशेषतः ।[4]
उपतस्थुर्महास्त्राणि मूर्तिमन्ति नृपात्मजम् ॥[5]२३॥ [N
२३] ऊचुश्च राममभ्येत्य[6] तान्यस्त्राणि समन्ततः ।[7] [N
प्राञ्जलीनि महाबाहो शाध्यस्मानिति राघवम् ॥[8]२४॥ [N
२४] तान्यवेक्ष्य[9] ततो रामः समालभ्य[10] च पाणिना ।
[11]मां भजध्वं स्मृतानीति सर्वाण्येवाभ्यभाषत ॥[12] २५॥ [N

१. ज ल भ—दारुणं च भवस्यापि रौद्रमस्त्रं तथापि च ।
एतानि कामतेजांसि कामरूपबलानि च ॥
गृहाण चारुरूपाणि प्रीतात्माहं ददामि ते ।

२. ज ल भ—अथास्य ।

३. ज ल भ—सुप्रीतो दिव्यास्त्रग्राममनुत्तमं ।

४. ज ल भ—जपतस्तस्य तु मुनेर्विश्वामित्रस्य धीमतः ।

५. ज—अभ्युपेयुर्महाभागमस्त्राणि मुनिपुंगव ।
ल भ—,, ,, मुनिपुंगवं ।

६. ब—राममभ्येति ।

७. ल ज—ऊचुश्च रामं सर्वाणि प्राञ्जलीनि नृपात्मजं ।
भ—जग्मुश्च ,, ,, ,, ,, ।

८. ज ल—इमानि च महोदार किंकराणि च सुव्रत ।
भ—,, स्म ,, ,, ,, ,, ।

९. ज ल भ—प्रतिगृह्णीष्व काकुत्स्थ ।

१०. कै—समालभ्य ।

११. कै—मा ।

१२. ज ल भ—सर्वाणि मे मानसानि भवन्त्वित्यभ्यभाषत ।

तान्यवाप्य ततो रामो विश्वामित्रं महामुनिम् ।
२५] प्रणिपत्य यथान्यायं गमनाय मनो दधे॥[2]२६॥ [२७

इत्यार्षे रामायणे बालकाण्डे[3] अस्त्रप्रदानं[4]
नाम पञ्चविंशः[5] सर्गः[5] ॥२५॥

---

१. ज ल भ—ततः प्रीतमना ।

२. ज ल भ—अभिवाद्य महातेजा गमनायोपचक्रमे ।

३. कै—आदिकाण्डे ।

४. ज ल भ—अस्त्रग्रहणं ।

५. कै—त्रिंशोध्यायः । ज—चतुर्विंशः सर्गः ।
रा व ल भ—सर्गः

प्रतिगृह्य ततोऽस्त्राणि दिव्यानि प्रीतमानसः ।
१] गच्छन्नेवं[1] ततो[2] रामो विश्वामित्रमुवाच ह ॥१॥ [१
गृहीतास्त्रोऽस्मि भगवन्नजेयस्त्रिदशैरपि ।
२] अस्त्राणां तु ममैतेषां[3] संहारं वक्तुमर्हसि ॥२॥ [२
इत्युक्तवति रामेऽथ[4] विश्वामित्रो महामुनिः ।
३] आचख्यौ परमास्त्राणां[5] सरहस्यं निवर्तनम् ॥[6]३॥ [३
उक्त्वा संहारमस्त्राणां[7] रामायामिततेजसे ।[8]
४] ददौ[9] मन्त्रं जृम्भकानां[10] वशीकरणमुत्तमम् ॥४॥ [N
सत्यवाक् सत्यकीर्तिश्च धृष्टोऽदंभस्तथैव[11] च ।
५] प्रणिपातरसो[12] नाम अवाङ्मुखपराङ्मुखौ ॥५॥ [४

---

१. ज ल भ—गच्छन्निव ।
२. ज ल भ—तदा ।
३. ज ल—अस्त्राणामथ चैतेषां ।
भ—अस्त्राणामथ चैतेषां ।
४. ज—रामेण । ल भ—रामे तु ।
५. कै—परमन्त्राणां ।
६. ज ल भ—उक्त्वा तु परमास्त्राणां संहारं च निवर्तनं ।
७. रा—संहारमंत्राणां ।
८. ज ल भ—नास्ति ।
९. ज ल भ—ददावस्त्रं । व—ददौ अस्त्रं ।
१०. रा व ल भ—जंभकानां । ज—जंबकानां ।
११. ज ल भ—दृष्टारंभस्तथैव ।
१२. रा—प्रणिपातरसां । ल—प्रणिपाता रसो ।

वृषांक्षो वृषचर्मा च रेणुकः पुरुषादकः ।[२] [N
६] दशाक्षो दशशीर्षश्च दशशंकुः शतोदरः ॥ ६॥ [५उ
पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः । [६पू
७] ज्योतिनाभः क्रथः कुंभो मकरः क्रैकरोऽङ्गदः ॥७॥[६] [N
युगन्धरस्तथानिद्रो[७] भर्ता प्रमथनः स्थिरः ।[१०] [७पू
८] धरो धान्यः कुण्डधरो रतिभूरतिरेव च ॥[११]८॥ [N

---

१. ब—वृषाख्यो ।

२. ज—विपाकौ विश्वकर्मा च गौरो नाम प्रभो नभः ।
ल भ—विपाको ,, ,, ,, ,, ,, ,, ।

३. ज—दशाक्षो दशवक्त्रश्च दशग्रीवो दशोदरः ।
ल— ,, दशवक्त्रश्च दशशीर्षे दशोचरः ।
भ— ,, ,, दशशीर्षा दशोदरः ।

४. ज ल भ—दृढनाभः सुनामकः ।

५. रा—शक्ररोंगदः । ब—क्रकरोंगदः ।

६. ज ल—ज्योतिषः कथनश्चैव नैकासुखविलावुभौ ।
भ— ,, ,, नैकासवविलावुभौ ॥

७. ज ल—अगंधरस्त्वरिन्द्रश्च ।
भ—युगन्धरस्त्वरिन्द्रश्च ।

८. रा—भेत्त: । ज ल भ—भेत्ता ।

९. ज ल भ—तथा ।

१० अतः परमधिकः पाठः—
ज ल भ—शुचिर्बाहु महाबाहुः सर्वबाहुस्तथैव च ।
ज ल—चक्रसौमनसश्चैव विधूममकरावुभौ ॥ इति द्वितीयार्धम् ।
भ—वक्रः सौमनसश्चैव विधूमसकरावुभौ ॥ ,,

११. ज—करोति करती चैव धनं धान्यं च राघवः ।
ल—वारतिः ,, नैकासु च बिलावुभौ ।
भ—करतिः करती चैव धनधान्यो तथैव च ।

कामरूपः कामगमः कामहा कामनन्दनः ।
९] जंभकः स्वर्णनाभश्च स्यन्दनो वारुणिस्तथा ॥९॥[1] [९
कृशाश्वतनया ह्येते[2] जंभकाः[3] कामरूपिणः । [१०पू
१०] भासुरा रिपुसैन्यानां तेजोज्योतिहरास्तथा ॥[4]१०॥ [N
नायका विग्रहकराः प्रयोक्तुर्विजयावहाः ।
११] एतानपि गृहाण त्वं संप्रयोगनिवर्तनान् ॥११॥[5] [N
इत्युक्तो बाढमित्युक्त्वा विश्वामित्रात् तपोधनात् । [१२
१२] जग्राह तानपि तथा जंभकान् रिपुजंभकान् ॥१२॥
दिव्यमूर्तिधरास्ते हि दिव्याभरणभूषिताः ।
१३] ऊचुः प्राञ्जलयो रामं तदा मधुरभाषिणः ॥१३॥[6] [१३उ
पू१४] इमे स्म वशगा राम शाधि नस्त्वमिति स्थितान् ।[7] [१४

१. ज ल भ—कामरूपी कामरुचिर्मोह आवरणस्तथा ।
जंभकः सर्वनाभश्च* संतरावरणौ† तथा ।

२. ज ल भ—राम ।

३. ज भ—भास्वराः । ल—भास्कराः ।

४. ज ल भ—नास्ति ।

५. ज ल भ—प्रतिगृह्णीष्व भद्रं ते पात्रभूतोसि मे यतः ।
वाढमित्येव काकुत्स्थः सुप्रीतेनान्तरात्मना ।

६. ज ल भ—दिव्यभास्करदेहास्तु दिव्यमूर्तिसुखावहाः ।
रामं प्राञ्जलयो भूत्वा प्राब्रुवन्मधुराक्षरं ।

७. ज ल भ—नास्ति ।

* ल—सर्वनाशश्च ।

† भ—संततावरणौ ।

N] जंभकान् प्रणतान् रम्यान् किंकरान् समुपस्थितान्॥ १४॥[N
उ१४] गम्यतां स्वागतं वोऽस्तु कृत्यकाल उपेष्यताम् ।
स्मृता मामुपतिष्ठध्वमिति रामोऽप्युवाच तान् ॥१५॥[२] [१५
१५] इत्युक्त्वा[३] राममामन्त्र्य कृत्वा चाभिप्रदक्षिणम् ।
एवमस्त्विति चैवोक्त्वा प्रतिजग्मुर्यथागतम् ॥१६॥[४] [१६
१६] तान्[५] विसृज्य ततो रामो विश्वामित्रं महामुनिम् ।
गच्छन्नेवं पुनर्वाक्यं मधुराक्षरमब्रवीत् ॥[६] १७॥ [१८
१७] किमेतन्मेघ[७]संकाशं पर्वतस्याविदूरतः[८] ।
वनमाभाति सुमहत् कस्यैतदमरद्युतेः ॥[९][१०] १८॥ [१९
१८] आभाति रमणीयं हि वनमेतन्मनोहरम् ।
विनादितं वल्गुवाग्भिर्नानामृगगणैर्युतम् ॥१९॥[११] [२०

१. ज—इमे स्म नरशार्दूल ब्रूहि किं करवाणि ते ।
ल—इमेः स नरशार्दूल ,, ,, करवाम ते ।
भ—इमे स्म ,, ,, ,, ,, ,, ।

२. ज ल भ—गम्यतामिति तान् सर्वान्यथेष्टं प्राह राघवः ।
मनसा मे यथाकालं सहायार्थं* भविष्यथः ।

३. ज ल भ—अथ ते ।

४. ज ल भ—काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ।

५. ज ल भ—गतासु तासु विद्यासु ।

६. ज ल भ—गच्छन्नेवाथ काकुत्स्थ श्लक्ष्णं वचनमब्रवीत् ।

७. ज ल भ—किं त्वेतन्मेघ० ।

८. ज ल भ—पर्वतस्य विदूरतः ।

९. रा—कस्यैदमलद्युते ।

१०. ज ल भ—वृक्षषंड इवाभाति मुने कौतूहलं हि मे ।

११. ज ल भ—दर्शनीयं मनोज्ञं च मम चातिमनोहरं ।
नानाप्रभावैः शकुनैर्वल्गुवाग्भिरलंकृतं ॥

* ल—सहाय्यार्थं ।

१९] निःसृतोः स्मे मुनिश्रेष्ठ कान्ताराल्लोमहर्षणात्। [२१
अनेनैवावगच्छामो देशोऽयं सुमुखोदर्यः ॥२०॥ [२२पू
सुव्यक्तं वाऽपि भवतः सिद्धाश्रमपदं वयम्।
२०] संप्राप्ता यत्र तौ पापौ यज्ञविघ्नकरौ तव ॥२१॥[5] [N

इत्यार्षे रामायणे बालकाण्डे जंभकप्रदानं[7] नाम
षड्विंशः सर्गः ॥ २६ ॥

---

१. कै रा ल ज—निस्सृताः।
२. ज ल भ—स्मो।
३. ज भ—अनेनैवाथ गच्छामो। ल—०वाशु ग०।
४. कै रा—सुमुखोदयः। ज—सुमुखावहः। ल—सुसुखावहः।
५. ज ल भ—सर्वं मे शंस भगवन्कस्याश्रमपदं महत्।
संप्राप्ताः कुत्र ते पापा यज्ञघ्ना दुष्टराक्षसाः।
त्वत्कोपनिहताः पूर्वं निहंतव्या मया हि ते।
६. कै—आदिकाण्डे।
७. ज ल भ—विद्यासंहारग्रहणं।
८. कै—एकत्रिंशः। ज—पंचविंशः। रा ब ल भ—नास्ति।

अथ तस्याप्रमेयस्य तद्वनं परिपृच्छतः ।
१] विश्वामित्रो महातेजा आख्यातुमुपचक्रमे ॥[2]१॥ [१
अयं[3] पूर्वाश्रमो राम[4] वामनस्य महात्मनः ।
२] सिद्धाश्रम इति ख्यातः सिद्धो यत्र[5] महायशाः ॥२॥ [३
विष्णुर्वामनरूपेण तप्यमानो महत्तपः ।
३] त्रैलोक्यराज्येऽपहृते बलिनेन्द्रस्य राघव ॥३॥[6] [N
अभिभूय हि देवेन्द्रं पुरा वैरोचनिर्बलिः ।[7]
४] त्रैलोक्यराज्यं बुभुजे बलोन्मादसमन्वितः ॥[8]४॥ [४
ततो बैलौ[9] तदा यज्ञं यजमाने भयार्दिताः ।
५] इन्द्रादयः सुरगणा विष्णुमूचुरिहाश्रमे ॥५॥[10] [५

---

१. ज—तस्याश्रमे रम्ये । ल—तस्याश्रमो रामो ।
भ—तस्याश्रमे रम्यं ।
२. ज ल भ—आख्यातुं नरशार्दूलः सर्वमेवोपचक्रमे ।
३. ज ल भ—एष ।
४. भ—नाम ।
५. ज ल भ—ह्यत्र ।
६. ज ल भ—नास्ति ।
७. ज भ—एतस्मिन्नेव काले तु राज्यं वैरोचनो बलिः ।
ल— ,, ,, ,, वैरोचनिर्बलिः ।
८. ज—कारयामास काकुत्स्थः त्रिषु लोकेषु निश्चयः ।
ल भ— ,, ,, ,, ,, निर्भयः ।
९. कै—बलौ । पुनः शोधितः ।
१०. ज ल भ—बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ।
समागम्यर्षयश्चैव विष्णुमूचुरिहाश्रमे ॥

बलिर्वैरोचनिर्विष्णो यजतेऽसौ[1] महाबलः । [६पू
६] कामदः सर्वभूतानां महर्द्धिरसुराधिपः ॥[2] ६॥ [N
पू७] तं त्वं वामनरूपेण गत्वा भिक्षितुमर्हसि ।
भिक्षितो विक्रमानेतांस्त्रीन् वीर्यबलदर्पितः ॥७॥[3] [N
८] परिभूय जगन्नाथ तुभ्यं वामनरूपिणे ।[4]
ये ह्येनमभियाचन्ते[5] लिप्समानाः स्वमीप्सितम् ॥[6]८॥ [N
९] तान् कामैरीप्सितैः सर्वान् योजयत्यसुरेश्वरः ।
स त्वं त्रैलोक्यराज्यं नो हृतं भूयो जगत्पते ॥९॥[7] [N
१०] दातुमर्हसि निर्जित्य विक्रमैर्भूरिभिस्त्रिभिः ।[8]
अयं सिद्धाश्रमो[9] नाम[10] सिद्धकर्मा[11] भविष्यति ॥[12]१०॥[N
११] तस्मिन् कर्मणि संसिद्धे तव सत्यपराक्रम ।[13]

---

१. ज ल भ—यजते यज्ञमुत्तमं ।

२. ज ल भ—नास्ति ।

३. ज ल भ—अपर्यवसिते तस्मिन्स्वकार्यमुपपद्यतां ।

४. ज ल भ—नास्ति ।

५. ब—ह्येनमभियाचंतो ।

६. ज ल भ—ये चैनमभिनंदंति याचितारस्ततस्ततः ।

७. ज ल भ—ये गत्वा तत्र याचंते तेभ्यः सर्वं प्रयच्छति ।
यत्नं सुरहितार्थाय महायोगमुपागतः ॥
ल—उत्तरार्द्धो नास्ति ।

८. ज भ—वामनत्वं गतो विष्णो कुरु कल्याणमुत्तमं ।
ल—नास्ति ।

९. रा—श्रद्धाश्रमो ।

१०. ब—राम ।

११. ज भ—यत्प्रसादाद् ।

१२. ल—नास्ति ।

१३. ज ल भ—सिद्धे कर्मणि देवेशः प्रातिष्ठद्भगवानिति ।

एवमुक्तः सुरैर्विष्णुर्वामनं रूपमास्थितः ॥[1] ११॥ [N

१२] वैरोचनिमुपागम्य[2] त्रीनयाचत् पदक्रमान् ।

लब्ध्वा च त्रीन् पदान् विष्णुः कृत्वा रूपमथाद्भुतम्॥[3] १२॥[N

१३] त्रिभिः क्रमैस्तथा लोकानाजहार त्रिविक्रमः ।

एकेन हि पदा कृत्स्नां पृथिवीं सोऽध्यतिष्ठत ॥१३॥[4] [N

१४] द्वितीयेनाव्ययं[5] व्योम द्यां तृतीयेन राघव ।

तं च बद्धाञ्जलिं कृत्वा पातालतलवासिनम्[6] ॥१४॥[7] [N

१५] त्रैलोक्यराज्यमिन्द्राय ददावुद्धृतकण्टकम् । [३५पू

तेनैष पूर्वाध्युषित आश्रमः पुण्यकर्मणा ॥१५॥[8]

१६] अद्याप्यभिख्या[9] तस्यैव वामनस्यं निषेव्यते[10] । [३६

यत्र तौ राक्षसौ वीर[11] यज्ञविघ्नकरौ मम ॥[12] १६॥

---

१. ज ल भ—अथ विष्णुर्महायोगं प्रविश्य रघुनन्दन ।

२. रा—वैरोचनमुपागत्य ।

३. ज भ—वामनं रूपमास्थाय वैरोचनमुपागमत् ।

ल—वामने ,, वैरोचनिमुपागतम् ।

४. ज ल भ—त्रीन् क्रमानथ याचित्वा प्रतिगृह्य च वासवः ।

आक्रम्य लोकांल्लोकात्मा सर्वभूतहिते रतः ॥

५. रा—द्वितियेन पदा स्वर्गं ।

६. कै—पातालतलवासिनाम् । रा—पुनः शोधितः ।

७. ज ल भ - नास्ति ।

८. ज ल—तेनैव पूर्वमाक्रांतमाश्रमं श्रमनाशनं ।

भ—तेनैष पूर्वमाक्रांत आश्रमः श्रमनाशनः ।

९. रा—अद्यापिभिख्या । ज ल भ—मया तु भक्त्या ।

१०. ज ल—वामनस्योपसेव्यते । भ—वामनस्यैव भुज्यते ।

११. रा—वीरौ ।

१२. ज ल - अत्र ते राक्षसा राम मम ते विघ्नकारिणः ।

ब—यत्र ,, ,, ,, ,, ,, ,, ।

भ—·····राक्षसा राम मम ये विघ्नकारिणः ।

१७] हन्तव्यौ येन वीर्येण त्वया नरवरात्मज ।[1] [३७

पू१८] एवमेवोभिगच्छामः[2] सिद्धाश्रमपदं[3] मम ॥१७॥ [३८पू

[4]तं दृष्ट्वा स्वागतं दूरात् सिद्धाश्रमनिवासिनः[6] ।

१९] प्रत्युद्गम्य[7] महात्मानं विश्वामित्रमपूजयन् ॥१८॥ [४०

प्रविष्टाय[10] ददुश्चास्मै पाद्यार्घ्यासनसत्क्रियाम् ।[11]

२०] रामलक्ष्मणयोश्चापि सत्क्रियां प्रददुर्द्विजाः ॥[12] १९॥ [४१

मुहूर्तमथ विश्रान्तौ ततस्तौ रामलक्ष्मणौ ।[13]

२१] तमूचतुर्मुनिवरं विश्वामित्रं कृताञ्जली ॥[14] २०॥ [४२

---

१. ज ल भ— ते त्वया पुरुषव्याघ्र हंतव्या दुष्टचारिणः ।
ब—,, ,, ,, ,, दुष्टकारिणः ।

२. भ—एतमेवाभिगच्छामः ।

३. ज ल भ—सिद्धाश्रममनुत्तमं ।

४. ल—ते ।

५. ज ब ल भ—ऋषयः सर्वे ।

६. ज ब ल भ—तदाश्रमनिवासिनः ।

७. कै—प्रत्युद्यम्य ।

८. ज ल—यथान्याय्यं भ—यथान्यायं !

९. ज—विश्वामित्राय धीमते ।

१०. रा—वरिष्ठाय ददौ चास्मै ।

११. ल—कृत्वा पूजां यथान्यायं विश्वामित्राय धीमते ।
ज—नास्ति । भ—कृत्वा पूजां ......। त्रुटितः पाठः

१२. ज ल भ—काकुत्स्थयोरपि तदा पूजां चक्रुर्महर्षयः ।

१३. ज ल भ—मुहूर्तमिव विश्रान्तौ राजपुत्रौ महाबलौ ।
भ—अतः परमधिकः पाठः—
अथ रामो महाबाहुः प्रीणयन्कुशिकात्मजं ।

१४. ज ल भ—प्राञ्जलिर्मुनिशार्दूलमुवाच मधुरं वचः ।

अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुङ्गव ।
२२] सिद्धाश्रमोऽयं सिद्धोऽस्तु[1] संसिद्धे[2] तव कर्मणि॥२१॥ [४३
तयोरेतद्वचः श्रुत्वा विश्वामित्रो महात्मनोः ।[3]
२३] आदिदेश तथेत्युक्त्वा दीक्षां तदहरेव तु ॥[4]२२॥ [४४
रामोऽपि तां तत्र निशामुषित्वा सहलक्ष्मणः ।[5]
२४] प्रभातकाले चोत्थाय विश्वामित्रमवन्दतं[6] ॥२३॥[7] [४५

इत्यार्षे रामायणे बालकाण्डे[8] सिद्धाश्रमनिवासो
नाम सप्तविंशः[9] सर्गः[9] ॥२७॥

---

१. रा ल भ—सिद्धस्तु ।
२. ज ल भ—सत्यमेवास्तु मे वचः ।
३. ज ल भ—रामस्य तु वचः श्रुत्वा दीक्षां संहृष्टमानसः ।
४. ज ल—जग्राह स महातेजो विश्वामित्रो महामुनिः ।
भ— ,, ,, ,, ,, महानृषिः ।
५. ज ल भ—कुमारावपि तां रात्रिमतिवाह्य समाहितौ ।
६. ज ल भ—विश्वामित्रमवन्दतां ।
७. ज ल भ—अतः परमाधिकः पाठः—

इत्थं विनीय धरणीमथ तौ प्रभाते
कौतूहलेन धरणीं सहपंक्तिमुच्चां ।
पुष्पानतां मृगगणैरभितः प्रकीर्णां※
†पत्रोत्तरां ददृशतुः हर्षाकुलाक्षौ ॥

८. कै—आदिकांडे । ब—नास्ति ।
९. कै—द्वात्रिंशोध्यायः । रा—द्वात्रिंशो सर्गः ।
ज—षड्विंशः सर्गः ॥२६॥ ब ल—सर्गः ।
भ—सर्गः ॥२६॥

※ ल—प्रकीर्णपत्रोत्तरां ।
† ल—प्रसदाकुलाक्षौ ।

तदा च देशकालज्ञो रामः सत्यपराक्रमः ।[1]
१] कालयुक्तमिदं वाक्यं विश्वामित्रमुवाच ह ॥[2]१॥[3] [१
भगवन् श्रोतुमि[4]च्छामि क[5]स्मिन् काले निशाच[6]रौ ।
२] मया तौ प्रतिषेद्धव्यौ यज्ञविघ्नकरौ तव ॥[7]२॥[8] [२
रामस्यैतद्वचः श्रुत्वा विश्वामित्रादयस्तदा ।[9]
३] सर्वे ते मुनयः प्रीताः प्रशंसन्तस्तमब्रुवन् ॥३॥[10] [३
अद्य प्रभृति राम त्वं षड्रात्रं रक्ष[11] तत्परः[11] ।
४] दीक्षां गतो ह्येष मुनिर्मौनं संकल्पयिष्यति ॥४॥[12] [४

---

१. ज ल—अथ तौ देशकालज्ञौ राजपुत्रौ महाबलौ ।
२. ज—देशं कालं च विज्ञाय व्याजहतुरिदं वचः ।
ल—देशकालं „ „ „ „ ।
३. भ—अथ तौ देशकालेशौ नातिवर्तेत सक्षणः ।
४. ज—श्रोतुमिच्छावो ।
५. ज ल—यस्मिन् ।
६. रा—निशाचरैः ।
७. ज--रक्षणीयौ विभो ब्रह्मनातिवर्तेत साक्षिणः ।
ल—रक्षणीयावितो ब्रह्मन्नातिवर्तेतमक्षणः ।
८. भ—नास्ति ।
९. ज ल भ--ब्रुवतोस्तु तयोरेव हृष्टयोः परिपृच्छतोः ।
१०. ज ल भ--प्रशशंसुस्तयोर्वचः ।
११. रा—रक्षितत्परः ।
१२. ज ल भ--अद्य प्रभृति षड्रात्रं तिष्टतां *वत्स यंत्रितौ* ।
दीक्षागतो हि भगवान्मुनिरेष यथाचलः ॥

---

*भ—तिष्टतो च सुसंपदौ ।

तेषामेतद्वचः श्रुत्वा मुनीनां भावितात्मनाम् । [५पू
५] उद्यम्य कार्मुकं तस्थौ रामस्तत्र सलक्ष्मणः ॥५॥[1] [N
अनिद्र एवं[2] षड्रात्रं संरक्षन् स मुनेः क्रतुम् । [५उ
६] राक्षसागमनाकांक्षी निश्चलः स्थाणुवत् स्थितः ॥६॥[3] [N
कालेनाभ्यागते तस्मिन् षष्ठेऽहनि महात्मनः ।[4] [७पू
६] स्थापयांचक्रिरे वेदीं मुनयः संशितव्रताः ॥[5]७॥[6] [८उ
ततो[7] मायां प्रकुर्वाणौ राक्षसावभ्यधावताम् । [११उ
१०] मारीचश्च सुबाहुश्च[8] तयोरनुचरास्तथा ॥८॥[9] [१२पू

---

१. ज ल भ—तेषां तद्वचनं श्रुत्वा राजपुत्रावतिष्ठतां ।

२. श—एष ।

३. ज ल भ—अनिद्रौ षडहोरात्रं *रक्षमाणौ तपोधनं† ।

४. ज ल भ—अथ काले गते तस्मिन्षष्ठेहन्युपकल्पिते ।

५. ज ल भ—प्रजज्वाल ततो वेदी सोपाध्यायससामगा‡ ।

६. ज ल भ—अतः परमधिकः पाठः—

मंत्रवच्च यथान्यायं यज्ञः समभिवर्तते ।

ज ल भ—आकाशे च महान् ‖ शब्दः प्रादुरासीद्भयंकरः ।

ज—अवातगमनं मेघा यथा प्रावृषि चाभवन् ।

ल—आवार्य गगनं ,, ,, ,, चाभवत् ।

भ—आवार्यगगने मेघा यथा प्रावृषि चाभवन् ।

७. ज ल भ—तथा । ८. कै—स्ववाहुश्च ।

९. ज ल भ—अतः परमधिकः पाठः—

आगम्य भीमनिर्ह्रादा रुधिरौघानवासृजन् ।

---

* भ—चाप्यहोरात्रं ।

* भ—चाप्यहोरा ।

† ल—तपोनिधिम् ।

‡ भ—उपाध्यायससामगा ।

‖ ल—महाशब्दः ।

स तानापततो दृष्ट्वा रुधिरौघ[1]प्रवर्षिणः ।
११] उवाच लक्ष्मणं वाक्यं रामो[2] राजीवलोचनः ॥९॥ [१४
पश्य लक्ष्मण मारीचं[3] महाशनिसमस्वनम्[4] ।
१२] सपदानुगमायान्तं सुबाहुं च निशाचरम् ॥[5]१०॥ [N
एतौ पश्य महाबाहो नीलाञ्जनचयोपमौ ।[5]
१३] अस्मिन् क्षणे समाधूतावनिलेनांबुदाविव ॥[6]११॥ [N
पवनास्त्रं ततो रामः प्रगृह्यास्त्रविशारदः । [N
१४] मारीचोरसि चिक्षेप नातिकोपसमन्वितः ॥१२॥[7] [१८
स तेन परमास्त्रेण पावनेन[8] समाहतः ।
N] संपूर्णं योजनशतं क्षिप्तो[9] वेगानिलेरितः ॥१३॥[10] [१९
स तेन शरवेगेन नीतः सागरमूर्धनि ।
१५] पपाताचलसङ्काशो भीवेपथुसमन्वितः ॥१४॥[11] [N
विचेतसं विघूर्णन्तं पवनास्त्रबलेरितम् ।[12]

---

१. ज ल भ—रामो राजीवलोचनः ।
२. ज ल भ—निर्व्यथः प्रहसन्निव ।
३. ज ल भ—दुर्वृत्तं ।
४. ज ल भ—राक्षसापसदं मया ।
५. ज ल भ—नास्ति ।
६. ज ल भ—मानवेन समाधूतमनिलेन यथा तृणं ।
७. ज ल भ—स मनोः परमोदग्रमस्त्रं परमदुर्जयं ।
चिक्षेप परमक्रुद्धो मारिचोरसि राघवः ।
८. ज ल भ—मानवेन ।
९. ज ल भ—क्षिप्तः सागरसंप्लवे ।
१०. कै रा—नास्ति ।
११. कै रा ज ल भ—नास्ति ।
१२. ज ल भ—विचेतनंविघूर्णन्तं शीतेषुवनताडितं* ।

---

* ल—शीतेषुवरताडितं । भ—शितेषुबलताडितं ।

१६] मारीचं [1]पतितं दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥१५॥ [२०
पश्य लक्ष्मण मारीचं पवनास्त्रसमाहतम् ।[2]
१७] मोहयित्वानयद्दूरं न च प्राणैर्व्ययोजयत्[3] ॥१६॥ [N
इमांस्त्वन्यान् हनिष्यामि सुबाहुप्रभृतीन् रुषा ।[4]
१८] यज्ञघ्नान् राक्षसान घोरान् रुधिरामिषभोजनान् ॥[5]१७॥[२२
प्रगृह्यास्त्रमथो दिव्यमाग्नेयं रघुनन्दनः ।[6]
१९] विद्[7]ध्वा सुबाहुमुरसि पातयामास भूतले ॥[8]१८॥ [२३
अन्[9]यान्यपि च वायव्यमस्त्रमादाय राघवः ।
२०] निजघान स रक्षांसि मुनीनां वर्धयन् सुखम् ॥१९॥[10] [२४
एवं हत्वा स रक्षांसि तत्र रामो महायशाः ।
२१] समेत्य मुनिभिः सर्वैर्विश्वामित्रादिभिस्तदा ॥२०॥[11] [N

---

१. ज—निर्हतं । ल भ—निहतं ।

२. ज ल भ—पश्य लक्ष्मण शीतेषु मानवं धर्मशोभितं ।

३. भ—प्राणां व्ययोजयत् ।

४. ज ल भ—इमांस्तु निहनिष्यामि निर्घृणान्दुष्टचारिणः ।

५. ज ल भ—राक्षसान्पापकर्मज्ञान्यज्ञघ्नान् रुधिराशनान्* ।

६. ज ल भ—स गृहीत्वास्त्रमाग्नेयं चिक्षेप रघुनन्दनः ।
७. रा—विद्धं ।

८. ज ल—गृहीत्वा वक्षसि स्थाने सुबाहुं पातयन्भुवि ।
भ— ,, ,, स्थानं ,, पातयन्भुवि ।

९. कै ब—अन्यानपि ।

१०. ज ल भ—वायव्येन तु तान् शेषान्निजघान निशाचरान् ।
रामं तमथ संहृष्टा मुनयः प्रत्यपूजयन् ।

११. ज ल भ—स हत्वा राक्षसान्सर्वान्यज्ञघ्नान् रघुनन्दनः ।
ऋषिभ्यः प्राप्तवान्पूजां यथेन्द्रो विजयी पुरा ।

---

* ल—रुधिराशनाम् ।

भ—रुधिराशतान् ?

पूजितोऽभिष्टुतश्चैव जयेन च समन्वितः।
२२] विस्मिताश्चाभवन् सर्वे मुनयो रामकर्मणा ॥२१॥[2] [N
तस्मिन् यज्ञे समाप्तेऽथ विश्वामित्रो महायशाः।[3]
२३] दृष्ट्वाऽऽश्रमं कृतक्षेमं काकुत्स्थमिदमब्रवीत् ॥[4]२२॥ [२६
कृतार्थोऽस्मि[5] महाबाहो कृतं गुरुवचस्त्वया।
२४] सिद्धाश्रमपदं भूयस्त्वया[6] सिद्धतरं कृतम् ॥[7]२३॥[8] [२७

इत्यार्षे रामायणे बालकाण्डे[9] विश्वामित्रयज्ञो
नाम अष्टाविंशः[11] सर्गः ॥२८॥[12]

---

१. रा—रामलक्ष्मणौ।
२. ज ल भ—नास्ति।
३. ज ल भ—अथ यज्ञसमाप्तौ तु विश्वामित्रो महामुनिः।
४. ज—निरीतिकां दिशं दृष्ट्वा काकुत्स्थमिदमब्रवीत्।
ल—निरीतीकां ,, ,, ,, ।
भ—निरातंकां ,, ,, ,, ।
५. कै ब रा—कृतार्थोसि।
६. कै—भूयः कृतं।
७. ज ल भ—सिद्धाश्रमनिवासानां कृतं क्षेमं महात्मनां।
८. ज भ—अतः परमधिकः पाठः—
अथ निहत्य निशाचरमण्डलं घननिभे शुशुभे रघुनन्दनः।
तिमिरजालमतीव सुदुःसहं दिनकरो हि विधूय यथाम्बरे॥
९. कै—आदिकाण्डे।
१०. ज ल भ—राक्षसवधो।
११. कै रा—त्रयस्त्रिंशः। ज—सप्तविंशः। ब ल भ—नास्ति।
१२. ज भ—॥ २७ ॥

अथ तौ[1] रजनीं तत्र कृतार्थौ[2] रामलक्ष्मणौ[3] ।
१] ऊषतुर्मुदितौ वीरौ मुनिभिः प्रतिपूजितौ ॥[4]१॥ [१
प्रभातायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियौ[5] ।
२] विश्वामित्रमृषींश्चान्यान् राघवावभ्यवन्दताम् ॥[6]२॥ [२
अभिवाद्य मुनीन् सर्वांस्तांश्च[7] तावमरद्युती ।
३] ऊचतुर्मधुरोदारभाषिणौ रघुनन्दनौ ॥३॥[8] [३
इमौ द्वौ[9] मुनिशार्दूल किङ्करौ समुपस्थितौ[10] ।
४] आज्ञापय यथेष्टं नौ[11] पुनः किं[11] करवाव ते[12] ॥४॥ [४

---

१. ज ल—तां ।
२. ज ब भ—कृतार्थौ । ल-कृतार्थौ ।
३. ज भ—रघुनन्दनौ । ल-रघुनन्दन ।
४. ज ल भ—ऊषतुर्मुदितौ वीरौ प्रकृष्टेनान्तरात्मना✳ ।
५. ज ल—प्रभातायां तु शर्वर्यां कृत्वा स्नानमरिन्दमौ ।
भ— ,, ,, ,, ,, शौचमरिन्दमौ ।
६. ज—अभ्यवादयतां गत्वा विश्वामित्रं महामुनिं ।
ल— ,, तत्र ,, महामुनिम् ।
भ—अभ्यवाद्……………मित्रं महामुनिं ।
७. रा—सर्वांस्तं च । पुनरपरकरशोधितः ।
८. ज ल भ—नास्ति ।
९. ज ल—तौ ।
१०. ज ल भ—समुपागतौ ।
११. ज ल भ—ते शासनं ।
१२. कै रा ज—करवामहे । ल भ—वः ।

✳ ल—प्रहृष्टस्तेनान्तरात्मना ।
भ—प्रहृष्टेनान्तरात्मना ।

एवमुक्ते ततस्ताभ्यामृषयस्ते तपोधनाः ।[1]

५] विश्वामित्रं पुरस्कृत्य रामं वचनमब्रवीत् ॥५॥[2] [५

मैथिलस्य रघुश्रेष्ठ जनकस्य महात्मनः ।

६] भविष्यति महायज्ञस्तत्र यास्यामहे वयम् ॥६॥[3] [६

त्वं चापि नरशार्दूल सहास्माभिर्गमिष्यसि ।

७] रत्नं महादद्भुतं तत्र तद्धनुर्द्रष्टुमर्हसि ॥७॥ [७

प्राग् दत्तं नृपतेस्तत्र न्यासभूतं महद् धनुः ।[4]

८] देवासुरे तथा युद्धे वृत्ते देवैः सवासवैः ॥[5]८॥ [८

तत्र[6] देवा न गन्धर्वा नासुरा न च पन्नगाः ।

९] समारोपयितुं शक्ताः कुत एवेतरे जनाः ॥[7]९॥ [९

---

१. ज ल भ—अतः पूर्वमधिकः पाठः—

एवं तौ हृष्टवदनौ मुनिं ज्वलनतेजसम् ।

ऊचतुः परमोदारं वाक्यं मधुरभाषिणौ ।

२. ज ल भ—ब्रुवतोस्तु तयोरेवं सर्व एव महर्षयः ।

विश्वामित्रं पुरस्कृत्य राघवं वाक्यमब्रुवन् ।

३. ज ल भ—मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ।

यज्ञः परमधर्मिष्ठो यास्यामस्तत्र वै वयम् ।

४. ज ल भ—धनुस्त्वं द्रष्टुमर्हसि ।

५. ज ल भ—तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः ।

" " रघुश्रेष्ठ " " "

६. व—धृते ।

७. ज ल—अप्रमेयबलं घोरं मिथेः परमभास्करम् *।

८. ज ल भ—तत्तु ।

९. ज ल भ—आधिज्यं कर्तुमानस्य शक्ताः किमुत मानवाः ।

---

* भ—परमभासुरम् ।

धनुषः सारतां तस्य जिज्ञासन्तो नराधिपाः ।[२]
१०] न शेकुरातोलयितुमप्यारोपयितुं कुतः ॥[३]१०॥[४] [१०
तद्धनुर्नरशार्दूल शंकरस्य[५] महात्मनः ।
११] [६]यज्ञे द्रक्ष्यसि काकुत्स्थ सहास्माभिरितो गतः[७] ॥११॥ [११
तथेत्युक्त्वा ततो रामः प्रयातुमुपचक्रमे ।
१२] विश्वामित्रपुरोगैस्तैर्महर्षिभिरुदारधीः ॥१२॥[८] [N
विश्वामित्रोऽथ भगवानामन्त्र्य वनदेवताः ।
१३] उवाचेदं ततो वाक्यं यियासुर्मिथिलां प्रति ॥१३॥[९] [१४

---

१. कै—जज्ञासंतो । रा—जह्रासंतो ।

२. ज ल भ—धनुषा* बलवीर्यं हि जिज्ञासीत महीपतिः ।

३. ज ल भ—न शेकुरारोपयितुं राजपुत्रा महाबलाः ।

४. अतः परमधिकः पाठः—

ज ल भ—तद्धि यज्ञफलं तेषां मैथिला† धनुरुत्तमम् ।

ज ल भ—याचितं नरशार्दूल दुर्लभं सर्वदैवतैः ।

५. ज ल भ—मैथिलस्य ।

६. ज—मिथले । ल—मिथेः । भ—मिथेर् ।

७. ज ल भ—यज्ञं चाद्भुतदर्शनं ।

८. ज ब ल भ—अतः परमधिकः पाठः—
एवमुक्त्वा मुनिवराः प्रस्थानं समरोचयन् ।
ज ल भ—नास्ति ।

९. ज ल भ—महर्षिसंघा काकुत्स्थमामंत्र्य नरदेवताः ।

---

* भ—धनुषो ।

† भ—मैथिलं ।

स्वस्ति वोऽस्तु गमिष्यामि[1] सिद्धाः सिद्धाश्रमादितः[2] ।
१४] उत्तरं जाह्नवीतीरं[3] हिमवन्तं शिलोच्चयम् ॥[4] १४॥ [१५
प्रदक्षिणमुपावृत्या ततः सिद्धाश्रमं मुनिः ।[5]
१५] उत्तरां[6] दिशमास्थाय प्रस्थातुमुपचक्रमे[7] ॥१५॥ [१६
युक्तं ब्रह्मरथानां तु शतमात्रं हि तत्क्षणात् ।
१६] ययुर्मुनीनां भाण्डानि समारोप्यानुयायिनाम् ॥१६॥[8] [१७
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ।
१७] प्रयान्तमुपजग्मुस्ते[9] विश्वामित्रं महामुनिम् ॥१७॥ [१८
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
१८] वासं चक्रुर्मुनिगणाः शोणतीरे समागताः ॥[10] १८॥ [२०
गते त्वस्तं दिनकरे स्नातो[11] हुतहुताशनाः ।[12]

---

१. ज व ल भ—गमिष्यामः ।

२. कै—०सिद्धाश्रमाश्रिताः । ज ल—०सिद्धाश्रमाद्वयं ।
भ—सिद्धासिद्धाश्रमाद्वयं ।

३. ज—जान्हवीकूलं ।

४. ल—नास्ति । भ—उत्तरे जान्हवीकूले हिमवंतं नगोत्तमं ।

५. ज ल भ—प्रदक्षिणं ततः कृत्वा सिद्धाश्रममनुत्तमं ।

६. रा ज—उत्तरं ।

७. ज ल—पन्थानमुपचक्रमुः । भ—प्रस्थानमुपचक्रमुः ।

८. ज ल भ—ते प्रयाता मुनिवरा बहवो रेणुपांडुराः ।
शकटीशतमात्रेण विश्वामित्रपुरोगमाः ॥

९ ज ल भ—अनुजग्मुर्महाभागं ।

१०. ज ल भ—वासं चक्रुर्मुनिवराः शोणकूले समाहिताः ।

११. रा—स्नात्वा ।

१२. ज ल भ—तेऽस्त गते दिनकरे ततोर्चितहुताशनाः ।
ब—गते त्वस्तं ,, ,, ।

१९] विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः[1] ॥१९॥[2] [२१
२०] निषसादा[3]भितस्तस्य विश्वामित्रस्य धीमतः । [२२उ
अथ रामो[4]ऽञ्जलिं कृत्वा[4] विश्वामित्रं[5] मुनिं[5] तदा ॥२०॥
२१] पप्रच्छ नरशार्दूलः[6] कौतूहलसमन्वितः । [२३
भगवन् को न्वयं देशः समृद्धजनसेवितः ॥२१॥
२२] श्रोतुमिच्छामि भद्रं ते वक्तुमर्हस्यशेषतः । [२४
नोदितो रामवाक्येन तस्य[7] देशस्य[7] विस्तरम्[8] ।
२३] विश्वामित्रो महातेजा व्याहर्तुमुपचक्रमे ॥[9]२२॥ [२५

इत्यार्षे रामायणे बालकाण्डे[10] शोणतीरनिवासो
नाम एकोनत्रिंशः[11] सर्गः ॥ २९ ॥[12]

---

१. ज ब ल भ—निषेदुर्धरणीतले ।
२. ज ल भ— अतः परमधिकः पाठ —
रामोऽपि सहसौमित्रिर्ऋषींस्तान्समपूजयत् ।
३. ज ल भ—अग्रतो निषसादाथ ।
४. ज ल भ— रामो महातेजो ।
५. ज ल भ—विश्वामित्रमृषिं ।
६. ज ल भ—मुनिशार्दूलं ।
७. ज ल भ—कथयामास ।
८. ज ल—विस्तरात् ।
९. ज ल भ—तं देशमखिलं सर्वमृषिमध्ये तपोधनः ।
१०. कै—आदिकाण्डे । ब—नास्ति ।
११. कै रा—चतुस्त्रिंशः । ब—नास्ति ।
१२. ज ल भ—सर्गसमाप्तिर्न दृश्यते ।

N] शृणु राम कथां दिव्यां देशस्य च समुद्भवाम् ।[1] [N
ब्रह्मयोनिर्महानासीत् कुशो नाम महायशाः ॥१॥[2][3] [१पू
१] स सुतान् जनयामास चतुरः ख्यातविक्रमान् ।
कुशाम्बं कुशनाभं च अमूर्तवयसं वसुम् ॥२॥[4][5] [२
२] महात्मनो दीप्तिमतः क्षत्रधर्ममनुव्रतान् ।[6]
तानुवाच कुशः पुत्रान् विनीतान् श्रुतिपारगान् ॥३॥[7]
३] प्रजानां पालनं पुत्राः क्रियतामिति राघव । [३
पितुस्ते वचनं श्रुत्वा लोकपालोपमाः सुताः ॥[8]४॥
४] निवेशं[9] चक्रिरे सर्वे पुराणां कुशसूनवः । [४

---

१. ल – समुद्भवम् ।
२. कै रा—नास्ति ।
३. कै रा—महातपाः ।
४. रा—कुशांभं ।
५. ज ल भ—स किलाजनयत् पुत्रांश्चतुरः पुरुषर्षभः* ।
शकुनाभं कुशांवं† च असूनुरपसंवसन् ‡ ।
६. ज ल भ—महोत्साहान् ।
७. ज ल—धर्मिष्ठः क्षत्रपारगः ।
भ—धर्मिष्ठो वेदपारगः ।
८. ज ल भ—क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलं ।
ऋषेस्तस्य वचः श्रुत्वा चत्वारस्तेऽमितौजसः ।
९. भ—निदेशं । पुनः शोधितः ।
११. कै रा—पुराण्यावासयामासुः पृथक् चत्वारि राघव ।

---

* भ—पुरुषर्षभ । † ल – कुशांभं । भ—कुशांवं । ‡ ल – असूनुवयसं वसम् । भ—अमूर्त्तरयसं वसुं ।

तेषां कुशाम्बः कौशाम्बीं पुरीमावासयत्त ताम् ॥[1]५॥
५] कुशनाभस्तु धर्मात्मा पुरं[2] चक्रे महोदयम् । [५
तथाऽमूर्तरयो वीरश्चक्रे प्राग्ज्योतिषं[3] पुरम् ॥[4]६॥
६] धर्मारण्यसमीपस्थं वसुश्चक्रे गिरिव्रजम् । [६
देशोऽयं वसुनामासीद्वसोरमिततेजसः ॥७॥[5]
७] एते शैलवराः पञ्च प्रकाशन्ते महोच्छ्रयाः[6] । [७
सुमागधी[7] नदी चात्र मागधा विश्रुता यया ॥[8]८॥
८] पञ्चानां भूभृतां मध्ये वनमालेव शोभते । [८
एषा सा मागधा राम वसोर्नाम[9][10] महात्मनः ॥[11]९॥
९] पूर्वमध्यासिता तेन सुक्षेत्रा[12] सस्यमालिनी । [९

१. ज—कुशांबस्तु महातेजाः काशांबीमकरोत्पुरीं ।
ल—कुशांभस्तु ,, कौशांभीमकरोत्पुरीं ।
भ—कुशांबस्तु ,, कौशांबीम ,, ।

२. कै—परं ।

३. रा शक्रज्योतिषं ।

४. ज ल भ - प्राग्ज्योतिषं पुरं चक्रे वसुश्चक्रे गिरिव्रजं ।

५. ज ल भ—तथा सूनुरयो* वीरो धर्मारण्यसमीपतः ।
एषा वसुमती तस्य वसुदस्य महात्मनः ।

६ ज ब ल भ—विदूरतः ।

७. रा—सुमागधा ।

८. ज ल भ—एषा सा मागधी रम्या मागधा† विश्रुता भुवि ।

९. कै रा —नाम ।

१०. ब—वसोस्तस्य ।

११. ज ल भ —एते ते मागधा राम वसुदस्य महात्मनः ।

१२. रा—सुक्षेत्रस्यास्यमालिनी ।

*भ—भूतरयो । †ल भ— मगधा ।

कुशनाभोऽपि राजर्षिः कन्याशतमनुत्तमम् ॥१०॥[1]

१०] जनयामास[2] दुर्धर्षो घृताच्यां[3] रघुनन्दन । [१०

रूपयौवनशालिन्यस्ताः कदाचिदलङ्कृताः ॥११॥[4]

११] उद्यानभूमिमासाद्य[5] चिक्रीडुर्विद्युतो यथा । [११

गायन्त्यो नृत्यमानाश्च वादयन्त्यश्च राघव ॥[6]१२॥

१२] आमोदं[7] परमं जग्मुर्वनमाल्यैरलङ्कृताः । [१२

अथ ताश्चारुसर्वाङ्गी रूपेणाप्रतिमा भुवि ॥[8]१३॥ [१३पू

१३] दृष्ट्वा सर्वत्रगो वायुरिदं वचनमब्रवीत् । [१४उ

अहं वः कामये सर्वा भार्या भवत मेऽबलाः ॥[9]१४॥

१४] त्यक्त्वा मानुष्यकं भावममरत्वमवाप्यताम् ।[10] [१५

तस्य तद्वचनं श्रुत्वा वायोर्वचनमङ्गनाः[11] ॥१५॥

१५] मुक्त्वा[12] हास्यं ततः सर्वा वायुं वचनमब्रुवन् ।[13] [१७

---

१. ज ल भ—पूर्वाधिवासितास्तेन सुक्षेत्रा सस्यमालिनः ।
कुशनाभस्तु राजर्षिः कन्यानां शतमुत्तमं ॥

२. ज ल भ—सुषुवे देवरूपाणा ।

३. कै—घृताश्यां ।

४. ज ल भ—तास्तु यौवनशालिन्यो रूपेणाप्रतिमा भुवि ।

५. ज ल भ—उद्यानभूमिमागम्य ।

६. ज ब ल भ—गायन्त्यो वादयंत्यश्च नृत्यंत्यश्च यथासुखं ।

७. ज ब ल भ—आल्हादं ।

८. ल भ—ततस्ता रूपसंपन्ना यौवनेनाभ्यलंकृताः ।
ज—नास्ति ।

९. ज ल भ—भवतीः कामये सर्वा भार्या मे भवतेति वै ।

१०. ज ल भ—मानुषस्त्यज्यतां स्नेहो दीर्घमायुरवाप्स्यताम् ।

११. ज ब ल भ—वायोरमितकर्मणः ।

१२. रा—कृत्वा । पुनरपरपार्श्वे शोधितः ।

१३. ज ल भ—श्रवहस्य ततो वाक्यं कन्याशतमुवाच तं ।

अन्तश्चरसि भूतानां सर्वेषां किल मारुतः ॥१६॥
१६] प्रभावज्ञाः स्म ते सर्वाः[२] किमस्मानवमन्यसे । [१८
कुशनाभसुताः साध्वीः क्षमस्त्वं न हि मारुत ॥[३]१७॥
१७] स्थानाद्द् भ्रंशयितुं देव रक्षामः स्वकुलं वयम् । [१९
मा भूत् स कालो यद्द् वायो पितरं सत्यवादिनम् ॥[४]१८॥
१८] कामतः समतिक्रम्य वरयेम स्वयं वरम् । [२०
पिताऽस्माकं प्रभवति दैवतं नः परं पिता ॥[६]१९॥
१९] अस्मान् दास्यत्यसौ यस्मै स नो भर्ता भविष्यति ।[७] [२१
तासां तद्वचनं श्रुत्वा वायुः कोपसमन्वितः ॥२०॥
२०] बभञ्ज कन्या मध्ये ताः संप्रविश्यात्मतेजसा ।[१०] [२२
N] ताः कन्या वायुना भग्ना विविशुर्भवनं प्रति[११] ॥२१॥ [२३पू
उ२२] दृष्ट्वा[१२] भग्नाश्च ता रामे राजर्षिरिदमब्रवीत् । [२४उ

---

१. ज ल भ—त्वं सुरोत्तम ।
२. ज ब ल भ—प्रभावं ते विजानीमः ।
३. ज ल भ—कुशनाभसुताः सर्वाः समर्थस्त्वं न मारुत ।
४. ज भ—स्थानाच्च्यावयितुं । ल-स्थानाः स्थापयितुं ।
५. ज ल भ—माभूत्कलंको वंशेऽस्मिन्पितरं सत्यवादिनः ।
६. ज ल भ—आवाहया* ग्रधर्मेण स्वयं* कन्या वरं व्रजेत् ।
जनिता प्रभुरस्माकं दैवतं परमं पिता ।
७. ज ल—यस्मै नो दास्यति पिता स नो भर्ता भविष्यति ।
८. ज ल भ – तु ।
९. ज ल भ—परमकोपनः ।
१०. ल भ—प्रविश्य सर्वगात्राणि बभंज भगवान्प्रभुः ।
ज— ,, ,, ववंज ,, ।
११. ज ल—विविशुर्नगरीं पितुः । ब—०र्भवनं पितुः ।
भ — ०र्नगरं पितुः ।
१२. ज ल—तास्तदा दुःखिता दृष्ट्वा । भ—तास्तथा दुःखिता दृष्ट्वा ।

---

* ल—आवहाय० । भ—आवहाय स्वधर्मं हि यदि ।

किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ॥२२॥[1]

२३] कुब्जाः केन कृता यूयं समाविश्य दुरात्मना ।[3] [२९

तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः ॥२३॥[4]

२४] शिरोभिः शरणं गत्वा कन्याशतमभाषत । [३३,१

वायुरस्मानुपागम्य बलवान् काममोहितः ॥[6]२४॥

२५] उत्क्रम्य धर्ममर्यादां प्रधर्षयितुमुद्यतः । [२

सोऽस्माभिरुक्तः सर्वाभिर्वायुः कामवशङ्गतः ॥[7]२५॥ [N

२६] पितृमत्यः स्म भगवन् न स्वच्छन्दवरा वयम् ।[8]

पितरं नोऽभियाचस्व न्यायतो यदि मन्यसे ॥[9]२६॥ [३

२७] न वयं स्वैरचारिण्यः प्रसीद भगवन्निति ।

इत्युक्तः कुपितो वायुः प्रविश्यास्मांस्ततः प्रभो ॥[10]२७॥[N

२८] बभञ्ज बलवांस्तेन सर्वाः कुब्जीकृता वयम् । [N

---

१. कै रा—अतः परमधिकः पाठः—

प्रोत्तिष्ठन्त्यः सुसंत्रस्ताः सलज्जाः साश्रुलोचनाः ।
अवदत् स पिता कन्यास्ततः परमकोपितः ॥

२. ज ल—विचेष्टं तानभाषत । भ—विचेष्टत्यो न भाषथ ।

३. ज ल भ—अतः परमधिकः पाठः—

शंसध्वं किमिदं पुत्र्यः कुब्जत्वं कथमागतं ।

४. ज ल भ—ताः सुताः ।

५. ब—नास्ति ।

६. ज ब ल भ—अभिवाद्य पितुः पादौ सर्वा वचनमब्रुवन् ।
वायुः सर्वत्रगः सोऽस्मान्नैच्छद्धर्षयितुं† प्रभुः ।

७. ज ल भ—अशुभं मार्गमास्थाय न धर्मं पर्यवैक्षत ।

८. ज ल भ—पितृवत्यो वयं सर्वा न स्वातन्त्र्यमुपस्थिताः ।

९. ज ल भ—नास्ति ।

१०. ज ल भ—नास्ति ।

११. कै—वदतांस्तेन । पुनरपरकरशोधितोऽपपाठः ।

---

† ब—०नैतद्धर्षयितुं ।

इति तासां वचः श्रुत्वा कुशनाभो नराधिपः ।।२८।।[1]
२९] प्रत्युवाच ततो राम[2] कन्याशतमिदं वचः । [५
यत् क्षान्तोऽतिक्रमो वायोः[3] कृतं तन्मे महत् प्रियम्।।[4]२९।।[N
३०] पुत्र्यो मे यच्च युष्माभिः कुलमाभिश्च[5] रक्षितम् ।[6]
अलङ्कारो हि नारीणां क्षमा पुत्र्यो विशेषतः ।।३०।। [N
३१] पुंसां चैव विशेषेण क्षन्तव्यमिति मे मतिः ।
पृ३२] दुष्करं च कृतं मन्ये यद् वायोः क्षान्तमीदृशम् ।।[7]३१।। [N
N] देशः कालश्च प्राप्तोऽयं सुपात्रप्रतिपादने ।[8]
प्रदानसमयं चैव मन्येऽहं वोऽद्य सर्वशः ।।[9]३२।। [N
३३] गम्यतामिच्छतः पुत्र्यश्चिन्तयिष्यामि वो[10] हितम् ।

१. ज ल भ—इति तेन ब्रवाणाः स्म वायुनोपहता भृशं ।
तासां तु वचनं श्रुत्वा राजा परमधार्मिकः ।

२. ज—स धर्मात्मा । ल भ—महातेजाः ।

३. कै रा—वायुः ।

४. ज ल भ—भद्रं कृतमिदं पुत्र्यः कर्तव्यश्च महत्कृतम् ।

५. ब—कुशयाभिश्च ।

६. ज ल भ—ऐकमत्यमुपागम्य† कुलं वै रक्षितं मम ।
अलंकारः क्षमा पुत्र्यः स्त्रियो वा पुरुषस्य वा ।।
कै—अतः परमुपरिभागे पुनरपरकराविन्यस्तोऽधिकः पाठः—
भद्रं कृतमिदं पुत्र्यः कर्तव्यं च महत्कृतम् ।
ऐकमत्यमुपागम्य कुलं वै रक्षितं मम ।।

७. ज ल—दुष्करं तद्वचः क्षान्तं त्रिदशेषु विशेषतः ।
भ— ,, तच्च वै ,, ,, ,,

८. कै रा—व्यभिचारकृतं यस्मात्प्राप्तोयं तेन सुव्रताः ।

९. ज ल भ—प्राप्तोयं देशकालश्च सुपात्रप्रतिपादने* ।
यद्वायुना च कन्यास्तास्तत्र न्युब्जीकृताः पुरा ।।

१०. रा—वै ।

†भ—एकमत्यमुपागत्य । *ल भ—०प्रतिपादनं ।

विसृज्य चैव ताः कन्यास्ततः स नृपसत्तमः ॥३३॥[1] [N
३४] राजा प्रदानधर्मज्ञः चिन्तयामास मन्त्रिभिः ।[3]
यद्वायुना च ताः कन्यास्तत्र कुब्जीकृताः पुरा ॥[4]३४॥[N
३५] कान्यकुब्जमिति ख्यातं ततः प्रभृति तत् पुरम् ।[5] [N
एतस्मिन्नेव काले तु शूलो नाम महामुनिः ॥३५॥
३६] ऊर्ध्वरेता ब्रह्मचर्यं चकार किल दुष्करम् । [११
तं ब्रह्मचारिणं राम तप्यमानं महत्तपः ॥३६॥[8]
३७] सोमपा नाम गन्धर्वी ऊर्णायुदुहिता पुरा ।[9] [१२
परं नियममास्थाय सम्यक् परिचचार ह ॥[10]३७॥
३८] पुत्रार्थिनी ततो राम महर्षेर्भावितात्मनः ।[10] [N

१. ज ब ल भ—कान्यकुब्जमितिख्यातं* ततः प्रभृति तत्पुरः ।
विसृज्य कन्याः काकुत्स्थ राजा त्रिदशविक्रमः ॥
२. रा—प्रधानधर्मज्ञाः ।
३. ज ब ल भ—मंत्रज्ञो मंत्रयामास प्रदानं सह मंत्रिभिः ।
४. रा—शतं ।
५. ज ल भ—नास्ति । पूर्वमायातः ।
६. ज ब—चूडिर्नाम । ल-शूलिर्नाम । इत्यपरहस्तेन ।
भ—चूडिन्नाम ।
७. ज ल—महानृषिः ।
८. ज ल भ—ऊर्ध्वरेताः शुभाचारो ब्रह्मतेजा† ह्यलंकृतः† ।
तप्यमानं तु तमृषिं‡ गंधर्वी तमुवाच ह ॥
९. ज—सोमपा नाम भद्रं ते तूर्णायुर्दुहिता पुरा ॥
ल भ— ,, ,, ,, ,, ऊर्णायुदुहिता तदा ।
ब—सोमपा नाम गन्धर्वी तूर्णायुदुहिता पुरा ।
१०. ज ल भ—नास्ति ।

*ल—कन्याकुब्ज० । †ब ल—०तेजोऽभ्य० ।
‡ल—मृषिं तं तु ।

साऽभवत्[1] प्रयता भूत्वा शुश्रूषणपरायणा ॥३८॥ [१३पू
३९] स तां कालस्य[2] महतः प्रोवाच परितोषितः ।[3]
परितुष्टो ऽस्म्यहं भद्रे ब्रूहि किं करवाणि ते ॥[4]३९॥ [१४
४०] परितुष्टं मुनिं दृष्ट्वा गन्धर्वी मधुराक्षरा ।
उवाच प्राञ्जलिर्भूत्वा वाक्यमात्महितं तदा ॥[5]४०॥ [१५
४१] दीप्यसे परया लक्ष्म्या ब्राह्म्या त्वमनया यथा[6] ।[7]
तथाऽहं पुत्रमिच्छामि त्वत्तो ब्रह्मश्रिया न्वितम् ॥४१॥ [१६
४२] स्वयं च वरये[8] त्वाऽहं भर्तारमपरिग्रहा ।

---

१. ज ल—सा तदा ।
भ—सा तथा ।

२. ब—कालेन महता ।

३. ज ल भ—उवास काले धर्मज्ञस्तस्यास्तुष्टोभवद् गुरुः ।
स तथा कालयोगेन प्राब्रवीद्रघुनन्दन ॥

४. ज ल भ—परितुष्टोस्मि भद्रं ते किं करोमि तव प्रिये ।

५. ज ल भ—परितुष्टं मुनिं ज्ञात्वा गंधर्वी मधुरस्वरा ।
उवाच परमोदारं वाक्यज्ञा वाक्यमब्रवीत्* ॥

६. ब—यया ।

७. ज ल भ—ब्रह्म्या† लक्ष्म्यानया ब्रह्मन्दीप्यसे ब्रह्मवित्तम ।
त्वत्तो लक्ष्म्या‡ त्वया‡ ब्रह्मन्पुत्रमिच्छामि धार्मिकं ।

८. ज ल भ—अतः परमधिकः पाठः—
न पतिश्चास्तिमे ब्रह्मन्न भार्या चास्मि कस्यचित् ।
ब— .... त्रुटितः ।

---

* ल-वाक्यकोविदम् । †ल-बाह्या ।

‡ल-०तया । भ-लक्ष्म्या तया ।

अनन्यपूर्वा भज मां याचमानामनुव्रताम् ॥[1][2]४२॥ [१७

४३] तस्यै[3] प्रसन्नो विप्रर्षिर्ददौ[4] पुत्रं यथेप्सितम् ।

ब्रह्मदत्त इति ख्यातः सोऽभवच्चूलिनः सुतः ॥[5][6]४३॥ [१८

४४] ब्रह्मदत्तः स राजर्षिः पुरमध्यवसत् तदा ।

काम्पिल्लं नाम काकुत्स्थ देवराजसमद्युतिः ॥४४॥[7] [१९

४५] तं[8] श्रुत्वा परया लक्ष्म्या कुशनाभोऽन्वितं नृपम् ।[9]

ब्रह्मदत्ताय ताः कन्याः प्रदातुमुपचक्रमे ॥[10]४५॥ [२०

४६] स तमाहूय धर्मज्ञो ब्रह्मदत्तं महीपतिम् ।[11]

ददौ कन्याशतं तस्मै[12] सुप्रीतेनान्तरात्मना ॥[13]४६॥ [२१

---

१. ज भ—भजमानां पतिव्रतां । ल—भजमानं यतव्रतं ।

२. भ—अतः परमधिकः पाठः—

ब्राह्मण्ये ननु संयुक्तं दातुमर्हसि सुव्रतं ।

३. ज ल भ—तस्याः ।

४. ज ल भ—ब्रह्मर्षिर्ददौ ।

५. ज ब—सोभूच्चूडिसुतो नृपः ।

ल—सोभूः शूडिसुतो नृपः । पुनः शोधितः ।

६. भ—ब्रह्मदत्त इति ख्यातोऽभवच्चूडीसुतो नृपः ।

७. ज ल भ—नास्ति ।

८. रा—ते ।

९. ज ल—स बुद्धिमकरोद्राजा कुशनाभः सुधार्मिकः ।

भ—स बुद्धिमकरोज्जातु कुशनाभः सुधार्मिकः ।

१०. ज ल—ब्रह्मदत्ताय काकुत्स्थं दत्तं कन्याशतं तदा ।

भ— „ „ दद्यां „ „ ।

११. ज भ—तमाहूय महातेजा ब्रह्मदत्तं महीपतिः ।

१२. ज भ—राजा ।

१३. ल—नास्ति ।

४७] यथाक्रमं च सर्वासां तासामनुपमद्युतिः ।
जग्राह विधिवत् पाणिं ब्रह्मदत्तो नराधिपः ॥४७॥[1] [२२

४८] तेन च स्पृष्टमात्रेषु ताः पाणिषु गतव्यथाः ।
बभूवुः सर्वशः कन्या रूपौदार्यगुणान्विताः ॥[2]४८॥ [२३

४९] ताँ[3] दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः[4] ।
विस्मयं परमं चक्रे मुमुदेऽभिननन्द च ॥[5]४९॥ [२४

५०] कृतोद्वाहं च राजानं ब्रह्मदत्तं रघूद्वह ।[6]
सदारं प्रेषयामास स्वपुरं परमार्चितं ॥५०॥ [२५

१. ज भ—यथाक्रमं तथा पाणिं जग्राह रघुनन्दन ।
ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥
ल—नास्ति ।

२. ज भ—स्पृष्टमात्रे तथा* पाणौ विज्वरं विपुलं शुचि ।
युक्तं परमया लक्ष्म्या कन्याशतमभूत्तदा ॥
ल—नास्ति ।

३. ज ल भ—सः ।

४. ज ल भ—कुशनाभः सुतास्तदा ।

५. ज ल भ—बभूव परमप्रीतो हर्षवाष्पाकुलेक्षणः ।

६. ज ल भ—कृतोद्वाहं तु राजा वै ब्रह्मदत्तं महामुनिं ।

७. ज—सोपाध्यायगणं तथा ।
ल भ— ,, तदा ।

* भ—ततः ।

तं तथा सदृशैर्दारैरन्वितं पुत्रमागतम् ।
५१] मुमुदे सोमपा प्रीता दृष्ट्वा चाभिननन्द च ॥५१॥[1] [२६

इत्यार्षे रामायणे बालकाण्डे[2] ब्रह्मदत्तविवाहो[3]
नाम त्रिंशः[4] सर्गः ॥[5] ३० ॥

---

१. ज ल भ—स सोमपास्तु* ताः प्राप्य पुत्रस्य सदृशीः प्रियाः* ।
कन्या गृहीत्वा सम्पूज्य कुशनाभं मुदा† ययौ ॥

२. कै—आदिकाण्डे ।

३. ज ल—वैवाहिको । भ - कन्यावैवाहिको ।

४. कै रा—पंचत्रिंशः । ज—अष्टाविंशः ।
ब ल भ—नास्ति ।

५ ज भ— ॥ २८ ॥

---

* ल—सोमपायितु तं प्राप्य सदृशीं प्रियाम् ।
भ-सोमपापितु० ।

† ल भ-तदा ।

कृतोद्वाहे गते तस्मिन् ब्रह्मदत्ते नराधिपे ।
१] अपुत्रः कुशनाभोऽथ पुत्रीयामिष्टिमारभत् ॥१॥ [१
तस्यां च वर्तमानायां कुशनाभं तदा नृपम् ।
२] उवाच परमप्रीतः कुशो ब्रह्मसुतस्तदा ॥२॥ [२
पुत्रस्ते सदृशः पुत्र भविष्यति सुधार्मिकः ।
३] गाधिः प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीम् ॥३॥ [३
एवमुक्त्वा कुशो राम कुशनाभं महीपतिम् ।
४] जगामाकाशमास्थाय ब्रह्मलोकं सनातनम् ॥४॥ [४
कस्यचित् त्वथ कालस्य कुशनाभस्य धीमतः ।
५] प्राजायत सुतो राम गाधिर्नाम महायशाः ॥५॥ [५
स पिता मम धर्मात्मा गाधिः सत्यपराक्रमः ।

---

१. ज ल भ—तदा ।
२. ज ल भ—नराधिपः ।
३. कै रा—पुत्रीयामिष्टिमाहरत् ।
४. ज ल भ—इष्ट्यां तु ।
५. ज ल—गाधिं ।
६. भ—कीर्तिर्लोके च शाश्वती ।
७. ज—एवमुक्तः ।
८. रा—कुशानाभं ।
९. रा—प्रजापतिसुतो ।
१०. ज ल—जज्ञे परमसन्तुष्टो गाधिर्नाम सुतस्ततः ।
भ—यज्ञे परमधार्मिष्ठो ,, ,, ।
११. ज—काकुत्स्थो । ल भ—काकुत्स्थ ।
१२. ज ल भ—परमधार्मिकः ।

६] कुशवंश्योऽभवद् राजा गाधिजोऽहं रघूद्वह ॥[2]६॥ [६
अनुजा[3] भगिनी चापि[4] मम राघव सुव्रता[5] ।
७] नाम्ना सत्यवती राम[6] ऋचीके प्रतिपादिता ॥७॥ [७
भर्तृव्रतत्वाद् भर्त्रैव सह गत्वा सुरालयम् ।[7]
८] कौशिकी परमोदारा सा प्रवृत्ता[8] महानदी ॥८॥ [८
स्वर्ग्या[9] पुण्योदका रम्या हिमवन्तमुपाश्रिता ।
९] इयं पावयितुं लोकान् प्रवृत्ता भगिनी मम ॥[10]९॥ [९
अहं हि हिमवत्पार्श्वे वसामि निरतः सुखी ।
१०] भगिन्याः स्नेहतो राम कौशिक्या नियतव्रतः॥१०॥[11] [१०
सैषा सत्यवती पुण्या सत्यधर्मपरायणा[12] ।
११] पतिव्रता महाभागा कौशिकी सरितां वरा ॥११॥[13] [११

---

१. रा—कुशवंशोभवद्राजा । ब—०वश्यो भवेद्राजा ।
२. ज भ—कुशादेवं प्रसूताः स्म कौशिका रघुनन्दन ।
ल—कुशादेव ,, ,, ,, ,, ।
३. ज ल भ—पूर्वजा ।
४. ज ल भ—चैव ।
५. ज—सुव्रत ।
६. ज ल भ—नाम ।
७. ज—भर्तारमनुरुच्यंती सशरीरा दिवं गता ।
ल भ—भर्तारमनुध्यंती ।
८. ब—सात्र वृत्ता ।
९. ज ल—स्वर्गपुण्योदका ।
१०. ज ल भ—लोकस्य हितकामार्थं प्रवृत्ता भगिनी मम ।
११. ज ल भ—ततो हिमवतः पार्श्वे निवसामि ततः* सुखम् *।
भगिन्या स्नेहसंयुक्तः कौशिक्या रघुनंदन ।
१२. ज—सत्वे धर्मे च संस्थिता । भ-सत्यं धर्मं च संस्थिता ।
१३. ल—नास्ति ।

---

* ल—यथासुखम् ।

अहं च नियमं कञ्चिदास्थातुं रघुनन्दन ।[1]
१२] सिद्धाश्रममनुप्राप्तः सिद्धोऽस्मि तव तेजसा ॥१२॥ [१२
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ।
१३] देशस्य वास्य निर्वृत्तिं[2] यन्मां त्वं परिपृच्छसि ॥१३॥
स्थितोऽर्धरात्रः[3] काकुत्स्थ कथां कथयतो मम ।
१४] निद्रां भजस्व भद्रं ते विघ्नोऽयं माऽस्तु नोऽधुना ॥[4]१४॥[१४
निःस्पन्दास्तरवः सर्वे संलीनमृगपक्षिणः ।[5]
१५] नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥१५॥ [१५
सूक्ष्मेणाञ्जनचूर्णेन नभः कृत्स्नमिवाञ्जितम् ।
१६] ग्रहनक्षत्रताराभिः काञ्चनीभिरिवावृतम्[6] ॥१६॥ [१६
उदेति चासौ शीतांशुर्लोककान्तो निशाकरः ।
१७] अंशुभिः स्वैर्जगच्छीतैर्घर्मान्तं ह्लादयन्निव ॥[7]१७॥ [१७
निशाचराणि सर्वाणि सत्त्वानि विचरन्ति च ।[8]
१८] यक्षरक्षोगणाश्चैव ये चान्ये पिशिताशनाः ॥[9]१८॥[10] [१८

१. ज भ—अहं तु नियमस्यास्य सिद्ध्यर्थं रघुनंदन ।
ल—नास्ति ।
२. रा—निर्विंत्तिं ।
३. ज ब ल भ—गतोर्धरात्रः ।
४. ज ल भ—नास्ति ।
५. ज ल भ—निष्पन्दपर्णास्तरवः संलीना मृगपक्षिणः ।
६. ज ल भ—काञ्चनाभिरिवावृतं ।
७. ज ल भ—स्वैरंशुभिर्ल्हादयते घर्मार्त्तान् रघुनन्दन ।
८. ज ल भ—नास्ति ।
९. ज ल—यक्षरक्षोगणांश्चैव ये चान्ये पिशिताशिनः ।
भ—यक्षरक्षोगणाश्चान्ये ये चैव पिशिताशनाः ।
१०. ज ल भ—अतः परमधिकः पाठः—
निद्रां भजस्व भद्रं ते विघ्नो वै माऽध्वनोस्तु वः* ।

*भ—नः ।

एवमुक्त्वा [1]कौशिको वै[1] विरराम[2] महाद्युतिः[3] ।
१९] साधु साध्विति [4]ते सर्वे मुनयः प्रशशंसिरे[5] ॥१६॥ [१९
[6]रामोऽपि सहसौमित्रिः[6] किञ्चिदागतविस्मयः ।
N] प्रणम्य[7] मुनिशार्दूलं निद्रावशमुपेयिवान् ॥२०॥ [२३

इत्यार्षे रामायणे बालकाण्डे[8] विश्वामित्रवंश- कीर्तनं
नाम एकत्रिंशः[9] सर्गः ॥३१॥[10]

---

१. ज ल भ—महातेजा ।
२. ल—विश्वामित्रो ।
३ ज ल भ—महानृषिः । ब—महामुनिः ।
४. ज ल—तत् । ब—तं ।
५. ज ल भ—प्रत्यपूजयन् ।
६. ज ल भ—राघवोपि ससौमित्रिः ।
७. ज ल भ—प्रशंसन् ।
८. कै—आदिकाण्डे ।
९. कै—षड्त्रिंशः । रा – षष्टत्रिंशः ।
ज—एकोनत्रिंशः । ब ल भ—नास्ति ।
१०. ज भ –॥२६॥

ते रात्रिशेषं सुषुपुः शोणतीरे महर्षयः ।
१] प्रभातायां तु शर्वर्यां विश्वामित्रोऽभ्यभाषत ॥१॥[1][2] [१
कौसल्यामातरुत्तिष्ठ सुप्रभाता निशा तव ।
२] पूर्वां सन्ध्यामुपास्यैनां गमनायाभिरोचय ॥२॥[3] [२
तच्छ्रुत्वोत्थाय रामोऽपि कृत्वा पौर्वाह्णिकक्रियाम् ।
३] गमनं रोचयामास वचनं चेदमब्रवीत् ॥३॥[4] [३
अयं शोणः शुचिजलो गाधः पुलिनमण्डितः[5] ।
४] कतमेन पथा ब्रह्मंस्तरिष्याम इमं वयम् ॥[6]४॥ [४

---

१. रा—०मित्रो ऽभ्यभाषत ।

२. ज ल भ—ऋषीणां तु ततस्तेषां शोणकूले मनोहरे ।
निशायां तु* प्रभातायां* विश्वामित्रोऽभ्यभाषत ।
सुप्रभाता निशा राम पूर्वसंध्या प्रवर्तते ।
ब—पुस्तके केवलं तृतीया पङ्क्तिरधिका ।

३. ज भ—उत्तिष्ठोत्तिष्ठ भद्रं ते गमनं प्रतिरोचय† ।

४. ज भ ल—तच्छ्रुत्वा वचनं तस्य कृत्वा पूर्वाह्णिकां‡ क्रियां ।
गमनं नोदयामास वाक्यं चेदमुवाच ह ।

५. कै—ह्यगाधः पुलि० । पुनरपरकरेण शोधितः ।
ज भ—ह्यगाधः पुलिनान्वितः । ल—ह्यगाधा पुलिनाः ।

६. ज ल—कथमेष यथा ब्रह्मंस्तरिष्यामः सुखं वयम् ।
भ—कथयेनं यथा ,, ,, ,, ।

---

* भ—सुप्रभातायां । † ल भ —पुत्र रोचय । ‡ भ—पूर्वाह्णिकीं ।

इत्युक्तः[1] प्रत्युवाचाथ विश्वामित्र इदं वचः । [५पू
५] रामं कमलपत्राक्षं तदा संहर्षयन्निव ॥५॥[2] [N
गाध[3] एष महाबाहो तरितव्यो यथासुखम् ।[4] [N
६] एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥६॥ [५उ
ते गत्वा दूरमध्वानं गते च दिवसे तदा ।
७] जाह्नवीं सरितां श्रेष्ठां ददृशुः परमर्षयः ॥७॥[5] [७
तां दृष्ट्वा पुण्यसलिलां गङ्गां[6] मुनिजन[6]प्रियाम् ।
N] कथमेतां तरिष्यामो गन्तव्यं वा कुतो मुने ॥८॥ [N
इत्युक्तः[7] प्रत्युवाचेदं विश्वामित्रो महामुनिः ।
N] रामं कमलपत्राक्षं हर्षयन्निदमब्रवीत् ॥९॥ [N
इतस्त्रियोजनादूर्ध्वं सन्तरिष्याम जाह्नवीम् ।
N] अस्मिन्नेव समुत्तीर्य तीर्थं[8] शोणमिमं[9] नदम् ॥१०॥ [N
एष पन्थाः शिवः क्षेमः स्वादुमूलफलोदकः ।
N] अनेन राम यास्यामः[10] पथा[10] सुखमनामयम्[11] ॥११॥ [N

---

१. रा—इत्युक्त्वा ।
२. ज ल भ—नास्ति ।
३. कै—अगाधः । पुनरपरकरेण शोधितः ।
४. ज ल भ—सोऽब्रवीद्गाध एषोऽत्र तरितव्यं यथासुखम् ।
५. कै रा—अतः परं द्वादशश्लोकान्तः पाठो नास्तिः ।
६. ज ल भ—हंससारससेवितां ।
७. ज—इत्युक्त्वा ।
८. ज—तीर्थं । भ—तीर्थे ।
९. ज ब ल—शोणमिदं ।
१०. ज—यास्यामः पंथाः । भ—यास्यामो यथा ।
११. ज—सुखमनामयः ।

ते तमध्वानमचिरात् सुखेनोत्तीर्य[1] जाह्नवीम् ।
N] ददृशुर्मुनयः सिद्धा आश्रमं श्रमनाशनम् ।।१२।। [N
तां ते शुचिजलां दृष्ट्वा हंससारसशोभिताम्[2] ।
८] बभूवुर्मुदिताः सर्वे मुनयः[3] सहराघवाः[3] ।।१३।। [८
तस्यास्तीरे च[4] ते[4] चक्रुस्तदा[5] वासपरिग्रहम्[5] । [९
९] ततः स्नात्वा[6] यथाकामं सन्तर्प्य पितृदेवताः ।।१४।।
हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः । [१०
१०] विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ।।१५।।
विश्वामित्रं महात्मानं परिवार्य समन्ततः । [११
११] अथ[7] तत्र[7] तदा रामो विश्वामित्रमभाषत ।।१६।।
भगवन् श्रोतुमिच्छामि यथेयं[8] सरितां वरा । [१२
१२] त्रैलोक्यपथंगां[9] गङ्गां[9] गता नदनदीपतिम् ।।१७।। [१३
नोदितो रामवाक्येन विश्वामित्रो महामुनिः ।

---

१. ज भ—सुखेनोत्तीर्य ।

२. ज ल भ—गंगां मुनिजनप्रियां ।

३. ज ल—राघवो मुनयस्तदा । भ—राघवौ मुनयस्तथा ।

४. कै रा—तदा ।

५. ज ल भ—चक्रुर्निवासं मुनयस्तदा ।

६. ज ल भ—सर्वे ।

७. ज—वासं तत्र । ल—वसंस्तत्र ।

८. कै—भगवांछ्रोतु० । व—भगवं छ्रोतुमि० ।

९. ज ल—गंगा त्रिपथगा नदी । भ—गंगां त्रिपथगां ।

१०. ज ल—त्रिलोक्यं कथमाक्रम्य ।
भ—त्रैलोक्यं कथमाक्रम्य ।

१३] जन्मप्रभृति गङ्गायाः प्रावदत् प्रभवागमम् ॥[1] १८॥ [१४

शैलेन्द्रो हिमवान् नाम रत्नानामाकरो महान्[2]।

१४] तस्य कन्याद्वयं जज्ञे[3] रूपेणाप्रतिमं भुवि ॥१९॥ [१५

सुमेरोर्दुहिता[4] राम तयोर्माता सुमध्यमा।

१५] नाम्ना मनोरमा देवी पत्नी हिमवतोऽभवत् ॥[5] २०॥ [१६

तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता।

१६] उमा नाम द्वितीयाऽभूत् कन्या तस्यैव राघव ॥२१॥[6] [१७

अथ ज्येष्ठां हिमवतः सुतां गङ्गामनिन्दिताम्।

१७] वरयाञ्चक्रिरे देवा आत्मकार्यचिकीर्षवः[7] ॥२२॥[8] [१८

ददौ चापि स धर्मेण तेभ्यस्त्रैलोक्यपावनीम्।

१८] स्वच्छन्दपथगां देवीं सुतां गङ्गां महानदीम् ॥२३॥[9] [१९

प्रतिगृह्य च गङ्गां ते त्रैलोक्यपथचारिणीम्।

१९] यथागतं ययुर्देवास्तदा पूर्णमनोरथाः ॥२४॥[10] [२०

---

१. ज ल भ—वृद्धिं जन्म च गंगाया वक्तुमेवोपचक्रमे।

२. कै रा—रत्नाकरसमान्वितः।

३. ज ल भ—राम।

४. ज ल भ—मेरोर्दुहितरा। रा—मेरोर्दुहितरौ।

५. ज ल भ—नाम्ना मनोरमा नाम पत्नी हिमवतः प्रिया।

६. ज ल भ—नास्ति।

७. ब—स तु कार्यचिकीर्षवः।

८. ज ल भ—अथ ज्येष्ठां सुतां राम देवाः सत्रचिकीर्षवः।
शैलेन्द्रं वरयामासुर्गंगां त्रिपथगां नदीं॥

९. ज ब ल भ—ददौ धर्मेण हिमवांस्तनयां लोकपावनीं।
स्वच्छां त्रिपथगां गंगां त्रैलोक्यहितकाम्यया॥

१०. ज ल भ—प्रतिगृह्य तु लोकार्थं* त्रैलोक्य*-हितकाम्यया।
गंगामादाय ते जग्मुः कृतार्थास्त्वंतरात्मभिः॥

---

* भ—तां गंगां लोकानां।

सा तु शैलेन्द्रदुहिता द्वितीया रघुनन्दन ।[1]
२०] औग्रं[2] व्रतमुपाश्रित्य तपस्तेपे तपोधना[3] ॥२५॥ [२१
तामप्युग्रतपःसिद्धां[4] ददौ शैलवरः[5] सुताम् ।
२१] रुद्राय याचमानाय उग्रां[6] लोकनमस्कृताम् ॥[7]२६॥ [२२
इत्येते शैलराजस्य सुते राम बभूवतुः ।[8]
२२] गङ्गा च सरितां श्रेष्ठा देवीनां[9] चाप्युमा वरा ॥२७॥ [२३
तत्र पावयितुं लोकानिमांस्त्रीन् स्वेन तेजसा ।[10]

---

१. ज ल भ—यावत्सा* शैलतनया कन्यासीद्रघुनंदन ।

२. ज ल भ—उग्रं सा व्रतमास्थाय ।

३. ज—तपोधन ।

४. ज—उग्रेण तपसा युक्तं । ल भ—उग्रेण तपसा युक्तां ।

५. ल—शैलपतिः ।

६. ब—सर्वलोकनमस्कृतां ।

७. ज —रुद्रायाप्रतिवीर्याय लोकसंपूजितां† पुमान् † ।

८. ज ल—एते ते शैलराजस्य उभे‡ सुदयिते सुते ।

९. ज ल भ—देवी चोमा रघूत्तम ।

ब— „ „ रघूद्वह ।

१०. ज ल भ—एतत्ते सर्वमाख्यातं यथा त्रिपथगा नदी ।

---

* भ—या त्वन्या ।

† भ—लोकसंपूजितामिमां ।

‡ भ—शुभे ।

२३] गङ्गा प्रवर्तते राम सर्वभूतहिते रता ॥[१] २८॥[२] [N

इत्यार्षे रामायणे बालकाण्डे[3] गङ्गोत्पत्तिर्नाम
द्वात्रिंशः[४] सर्गः ॥३२॥[५]

---

१. ज ल भ—गं गता[1] प्रथमं गंगा[2] गंगा[3] मतिमतां वर[3] ।

२. अतः परमधिकः पाठः—

ज—उवाच देवं भर्तारं संप्राप्ता च सुमध्यमा ।

ल—शैलेंद्रः वरयामास „ „ „ ।

भ—उमा च देवं भर्तारं „ „ „ ।

३. कै ब—आदिकांडे ।

४. कै रा—सप्तत्रिंशः । ज—त्रिशतितमः ।

ब ल भ—नास्ति ।

५. ज भ—॥३०॥

---

1. ल भ—गां गता । 2. ल भ—राम । 3. ल—देवाः मन्त्रान्विकर्षिवः ।

उक्तवाक्ये मुनौ तस्मिन्[1] रामः पप्रच्छ तं पुनः ।
१] विश्वामित्रं सुखासीनं महात्मानं कृताञ्जलिः ॥[2]१॥[3] [१
कथेयं कथिता ब्रह्मन् पुण्यश्रवणकीर्तना[4] ।[5]
२] या त्वया तां पुनः श्रोतुमिच्छामि बहुविस्तरम् ॥[6]२॥[N
उमा केनाभवद् देवी कौमारब्रह्मचारिणी[7] ।
३] अवाप[8] देवप्रवरं पतिं देवं[9] महेश्वरम् ॥३॥ [N
हेतुना केन चैवेयं गंगा त्रिपथगाऽभवत् । [४पू

---

१. ज—तस्मिनुभौ तौ रामलक्ष्मणौ ।
ल भ—तस्मिन्नुभौ ,, ,, ।

२. ज भ—प्रतिनंद्य कथां वीरावब्रतां मुनिपुंगवः ।
ल— ,, ,, वीरावब्रतां पुनिपुंगवम् ।

३. ज ल भ—अतः परमधिकः पाठः—
युक्तरूपमिदं ब्रह्मन्कथितं मधुराक्षरं ।

४. रा—०श्रवनकीर्तना ।

५. ज ल भ—अतः परमधिकः पाठः—
दुहितुः शैलराजस्य ज्येष्ठा या वक्तुमर्हसि ।
विस्तरं विस्तरज्ञोसि कथां नो दिवि चेह च ।

६. ज ल भ—पुनस्तां श्रोतुमिच्छामि त्वत्तोऽहं बहुविस्तरां* ।

७. रा—कौमारव्रतचारिणी । ल—०व्रतधारिणी ।

८. ज ल भ—अवाप्य ।

९. ज ल भ—भूत०

---

* ल—बहुविस्तरं ।

४] कथं देवनदी चेयं मानुषान्[1] समुपागता ॥४॥[2] [N
त्रिषु लोकेषु विख्यातां[3] कैश्च धर्मैरधिष्ठिता[4] । [४उ
५] एवं ब्रुवति काकुत्स्थे[5] विश्वामित्रो महातपाः ॥[6]५॥
विस्तरेण कथामेतां व्याख्यातुमुपचक्रमे ।[7] [५
६] पुरा राम कृतोद्वाहः शितिकण्ठो[8] महातपाः ॥६॥
उमा च स्पर्धया देवी मैथुनायोपजग्मतुः । [६
७] शितिकण्ठस्य देव्याश्च दिव्यं वर्षशतं गतम् ॥७॥ [७पू
न चैवैकतरस्यासीत्[9] तयोः राम पराजयः । [८पू
८] ततो देवा ययुश्चिन्तां पितामहपुरोगमाः ॥८॥
यदत्रोत्पत्स्यते भूतं सोढां[10] कोऽस्य भविष्यति ।[11] [९
९] तेऽभिगम्य[12] सुराः सर्वे प्रणिपत्य वृषध्वजम् ॥९॥

---

१. अ—मानुषं । । ल भ—मानुष्यं ।

२. ज ल भ—अतः परमधिकः पाठः –

कथं* त्रिपथगा गंगा प्रोच्यते देवमानुषैः ।

३. ज ल भ—धर्मज्ञ ।

४. ज ल भ—०रनुष्ठिता ।

५. रा—काकुत्स्थो ।

६. ज ल भ—तथा तयोस्तु ब्रवतोर्विश्वामित्रो महातपाः+ ।

७. ज ल भ—निखिलेन कथां दिव्यामृषिमध्ये ततोऽब्रवीत् ।

८. ल—सितिकंठो ।

९. ज ल भ– चैवान्यतरस्यासीत् ।

१०. रा—सोढः । व—सोढं ।

११. ज ल भ—यदि चोत्पत्स्यते पुत्रः सोढा कस्तं भविष्यति ।

१२. ज—तेऽपि गत्वा ।

---

* ल भ—कथानां । + ल—महातपः ।

शितिकण्ठं महात्मानमिदं वचनमब्रुवन् ।[1] [१०
१०] देवदेव महाभाग सर्वभूतहिते रत ॥[2]१०॥
सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि । [११
११] न तेऽपत्यं धारयितुं शक्तेयं पृथिवी विभो ॥[3]११॥ [N
न लोकाः सर्वशश्वेमे सोढुं ते वीर्यसंभवम् ॥[4] [१२पू
१२] आत्मनैवात्मनस्तेजस्त्वं धारयितुमर्हसि ॥[5]१२॥[6] [N
सहानयैव देव्या त्वं ब्रह्मचारी भवेश्वर ।[7]
१३] अस्माकं च धरायाश्च लोकानां हितकाम्यया ॥[8]१३॥ [N
पू१४] धारयात्मभवं तेजः स्वयमेवोमया सह ।[8]
रक्ष लोकानिमान् देव न लोकान् हर्तुमर्हसि ॥[9]१४॥ [१३
१६] इति तेषां वचः श्रुत्वा देवानां भगवान् शिवः ।
शिवेन मनसा युक्तो देवान् वचनमब्रवीत् ॥१५॥[10] [१४

---

१. ज ल भ—नास्ति ।

२. ज ल भ—देवदेवं महादेवं* सर्वभूतहिते रतं ।

३. ज ल भ—नास्ति ।

४. ज भ—न लोका धारयिष्यन्ति तवापत्यं सुरोत्तम ।

५. ज भ—नास्ति ।

६. ल—नास्ति ।

७. ज भ—ब्रह्मचर्य्येण संयुक्तो देव्या सह तपश्चर† ।

८. ज ल—त्रैलोक्यहितकामस्त्वं तेजो धारय तेजसा ।

९. ल—वयं च शरणं याता न लोकान्हंतुमर्हसि ।

१०. ज ल भ—देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ।
वाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाच ह ॥

---

* भ—महाभागं ।

† भ—परस्परं ।

१७] धारयिष्याम्यहं तेजः समुद्भूतं सहोमया।
निर्वृत्ता[1] भवतेत्येवं मुनींश्चेदमुवाच ह ॥१६॥[2] [१५
१८] यच्चेदं[3] क्षुभितं[4] स्थानान्मम[5] तेजो ह्यनुत्तमम् ।
धारयिष्यति कस्तन्मे[6] प्रोच्यतां सुरसत्तमाः[7] ॥१७॥ [१६
१९] एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् ।
यत् तव क्षुभितं तेजस्तद् धरा धारयिष्यति ॥१८॥ [१७
२०] एवमुक्तः सुरश्रेष्ठैः प्रमुमोच महाबलः ।
तेजस्तत् पृथिवी येन व्याप्ता[8] सगिरिकानना ॥१९॥ [१८
२१] ततो देवाः पुनरिदमूचुः[9] सर्वे हुताशनम् ।
प्रविश त्वं महातेजो रौद्रं[10] वायुसमन्वितः ॥२०॥ [१९
२२] तदग्निना पुनर्व्याप्तं स जातः श्वेतपर्वतः ।
दिव्यं शरवणं[11] चैव पावकादित्यवर्चसम् ॥२१॥
२३] यत्र जातो महातेजाः[12] कार्त्तिकेयोऽग्निसंभवः । [२०
ततो देवीं शिवं चैव देवाः सर्वेऽभ्यपूजयन्[13] ॥२२॥

---

१. ब—निर्वृता भवतीत्येवं।
२. ज ल भ—नास्ति।
३. ज ल भ—यदिदं।
४. ल—क्षोभितं।
५. भ—स्थानात्समरेतो।
६. ज ल भ—कस्तं।
७. ज ल भ—सुरपतिः।
८. ज ल भ—व्याप्तं तदगिरिकाननं।
९. ज ल भ—सुरपतिं प्रोचुः।
१०. रा—रौद्रं।
११. रा—शरवंर। कै ब ज ल—शरवनं।
१२. भ—महावीर्यः।
१३. ज ल भ—सर्षिगणास्तदा।

२४] प्रह्वानतशिरःकायाः साधु साध्विति चाब्रुवन् ।[१] [२१
अथ शैलसुता राम त्रिदशानभिवीक्ष्य तान् ॥२३॥ [२२पू
२५] समन्युरशपत् सर्वान्[२] क्रोधसंरक्तलोचना[३] । [२३उ
यस्मादपत्यं सदृशममरा मम नोऽभवत् ॥[५]२४॥ [N
२६] अपत्यं स्वेषु दारेषु यूयं[६] नोत्पादयिष्यथ ।[७]
उक्त्वा[८] चैव सुरान् सर्वान्[९] शशाप पृथिवीमपि ॥२५॥ [२५
२७] त्वमप्यूषरसङ्कीर्णा भविष्यसि वसुन्धरे ।[१०] [N

१. ज ल भ—पूजयामासुरत्यर्थं सुराःसुरपतिं यदा * ।
कै—पुनरपरहस्तेन स्थूलाक्षरैः शोधितः ।
२. ज ल भ—सर्वानेव तदा सुरान् ।
३. ज ल भ—देवी ।
४. ल ज भ—रोषात्संर० ।
५. कै—यस्मादपत्यदारेषु यूयमुत्पाभवत् ।
अपरहस्तेन पुनस्तत्रैव शोधितः ।
सदृशममराममनेच्छथ ।
ज ल भ—नास्ति ।
६. ज ल भ—युष्माकं न भविष्यति ।
७. अतः परमधिकः पाठ :—
ज—भार्ययाद्यप्रभृतिभिर्भविष्यंत्यप्रजाः सुराः ।
ल— ,, प्रभृति वै भविष्यंत्यजाः सुरः ।
भ—भार्याश्च वोद्यप्रभृति ,, सुराः ।
८. ज ल भ—एवमुक्त्वा ।
९. कै ब ल—सर्वां ।
१०. ज ल—एकरूपावने त्वं च बहुभोज्या भविष्यसि ।
भ—एकरूपा च नित्य च ,, ,, ।

* कै—तथा ।

न चापत्यकृतां प्रीतिं मत्क्रोधकलुषीकृता ॥२६॥

२८] प्राप्स्यसि त्वमनिच्छन्ती[1] ममापत्यमभीप्सितम् ।[3] [२६

तां दृष्ट्वा व्यथितां[4] देवीमुमां देवो[5] महेश्वरः ॥२७॥

२९] गन्तुं[6] समुपचक्राम दिशं वरुणपालिताम् । [२७

स गत्वा तप आतिष्ठदुत्तमं संशितव्रतः ॥२८॥

३०] हिमवत्प्रभवे श्रृंगे[7] सह देव्या महेश्वरः । [२८

एष ते विस्तरो राम शैलपुत्र्या निवेदितः ॥२९॥

३१] गंगायां श्रृणु कार्त्स्न्येन[8] प्रभवं[9] सहलक्ष्मणः । [२९

N] कुमारं[10] संभवं चैव बह्वर्थं सुरपूजितम् ॥३०॥ [N

इत्यार्षे रामायणे बालकाण्डे[11] उमामाहात्म्यं

नाम त्रयस्त्रिंशः[12] सर्गः ॥३३॥[13]

---

१. कै रा—त्वमभीप्सन्ती ।

२. कै रा—न चापत्यमभीप्सितम् ।

३. ज—ममापत्यमनिछंतीमेवं त्वमपि लप्स्यसे ।

ल— ० निच्छंती चैवाहं त्वमपि „ ।

भ— „ „ ह्येवं त्वमपि „ ।

४ ज ल भ—व्रीडितां ।

५. ज ल भ—सुरपतिस्तदा ।

६. ज ल भ—गमनाय मतिं चक्रे ।

७. रा—गंगे ।

८. ल—कांत्येव ।

९. ज भ—प्रभावं ।

१०. कै—०मारसंभवो । ब—कुमारं संभवं ।

११. कै ब—आदिकांडे ।

१२. कै—अष्टात्रिंशत्तमः । रा—अष्टत्रिंशतमः ।

ब—नास्ति ।

१३. ज ल भ—नास्ति ।

तपस्तप्यति देवेशे त्र्यम्बके विबुधास्ततः ।[2]
१] सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥१॥ [१
अब्रुवंश्च सुराः सर्वे भगवन्तं पितामहम् ।
२] प्रणिपत्याञ्जलिं बद्ध्वा सेन्द्रा वह्निपुरोगमाः ॥[4]२॥ [२
यो[5] नः सेनापतिर्देव दत्तो भगवता पुरा । [३पू
३] स ब्रह्मचर्यमास्थाय तपस्तेपे सहोमया ॥[8]३॥ [४उ
यदत्रानन्तरं कार्यं सर्वलोकपितामह ।
४] तत्कुरुष्व भृशार्तानां त्वं हि नः परमा गतिः ॥४॥ [५
देवानां वचनं श्रुत्वा सर्वलोकनमस्कृतः ।[13]

---

१. ब—विविधास्ततः ।

२. ज ल भ—तप्यमाने महादेवे देवाः सर्षिगणाः पुरा ।

३. कै—०मुपागमत् ।

४. ज ल भ—प्रणिपत्य शुभां वाणीं सुबद्धाञ्जलिकुड्मलाः* ।

५. ब—येन ।

६. ज ल—०देवः कृतो । ०देव कृतो ।

७. रा—भगवतः ।

८. ज ल भ—स तपः परमास्थाय स्थितः सुमहदद्भुतं ।

९. ज ल भ—लोकानां हितकाम्यया ।

१०. ज ल भ—तद्विधत्स्व ।

११. कै—भृशांत्तानां । ज ल भ—विधानज्ञ ।

१२. कै—०नमस्कृतिः ।

१३. ज ल भ—देवतानां वचः श्रुत्वा ब्रह्मा लोकपितामहः ।

---

* भ—प्रबद्धांजलि० ।

५] ब्रह्मा[1] मधुरया[2] वाचा त्रिदशानिदमब्रवीत् ॥५॥ [६

यथा हि यूयमुमया शप्ताः सासूयया पुरा ।[3]

६] तथा[4] तद्वचनं देवा न शक्यं कर्तुमन्यथा ॥[5]६॥ [७

इयं त्वाकाशगा[6] गङ्गा शैलराजसुता[7] पुरा ।

७] उमाया भगिनी ज्येष्ठा ततोऽपत्यं हुताशनः ॥[8]७॥

जनयत्यात्मवीर्येण तपसा परमद्युतिः ।[9] [८

पू८] ज्येष्ठा शैलेन्द्रदुहिता जनयिष्यति यं[10] सुतम् ॥[11]८॥

N] स[12] उमाया[12] बहुमतो भविष्यति न संशयः[13] । [९

उ८] भविष्यति स च श्रीमान् सेनापतिरभीप्सितः ॥[14]९॥ [N

---

१. ज—सान्त्वया । ल— सांत्वयं । भ—सांत्वयम् ।

२. ज ल भ—श्लक्ष्णया ।

३. ज ल भ —शैलपुत्र्या प्रयुक्ताः स्थ प्रजा वो नो* भविष्यति ।

४. रा—तस्मात् ।

५. ज ल —पत्नीष्विति च चादिष्ट तत्सत्यं नात्र संशयः ।

भ— ,, वचोऽभिष्टं ,, ,, ,, ।

६. रा—०काशका ।

७. रा—०सुतापरा ।

८. ज भ—येयमाकाशगंगेयमुपसृत्य† हुताशनं ।

ल— ,, ,, मुपोपृत्युद्गताशनन् ।

९. ज ल भ—जनयिष्यति देवानां सेनापतिमरिंदमं ।

१०. भ—तं ।

११. कै रा—नास्ति ।

१२. ज—शतमाया । ल—शतुमाया । भ—शतमायो ।

१३. भ—संशयं ।

१४. ज ल भ—नास्ति ।

---

* भ—न । † भ—वै ह्युपसृ० ।

एतच्छ्रुत्वा[1] वचो देवाः प्रणिपत्य पितामहम् ।
९] प्रहृष्टमनसः सर्वे कृतार्थाः पुनराययुः ॥१०॥[2] [१०
ततः कैलासशिखरमागत्य सहिताः सुराः ।[3]
१०] अग्निं नियोजयामासुः[4] पुत्रार्थं[5] रघुनन्दन ॥११॥ [११
हितार्थमग्ने लोकानामपत्योत्पादनं कुरु ।
११] आकाशपथचारिण्या संभूय सह गङ्गया ॥१२॥[6] [१२
तथेति च प्रतिज्ञाय वचस्तेषां हुताशनः ।
१२] उवाच गङ्गां मत्तेजो धार्यतामिति राघव ॥१३॥[7] [१३
तमुवाच ततो गङ्गा हुताशनम्[8]इदं वचः ।

---

१. कै--एत [त् ?] श्रुत्वा ।

२. ज ल भ—तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनंदन ।
प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥

३. ज ल भ—गत्वा तु पर्वतं राम कैलासं रत्नमंडितं ।

४. कै रा—विज्ञापयामासुर्गंगां च ।

५. ज ल भ—सर्वदेवताः ।

६. ज ल भ—देवतानां कृते साधु पुत्रं जनय पावक ।
शैलपुत्र्यां महाभाग गंगायां तेज उत्तमं ॥

७. ज ल भ—देवतानां प्रतिज्ञाय गंगां प्रोवाच पावकः ।
गर्भं धारय वै देवि देवतानामिदं प्रियम् ॥

अतः परमधिकः पाठः—

ज ब ल भ—कर्तव्यमिति सा श्रुत्वा दिव्यं गर्भमधारयत्-
दृष्ट्वा तंमहिमानं + सा समंतादन्वकीर्यत* ॥

ज ब ल भ—समंततश्च तां देवीमभ्यषिंचत पावकः ।

ज ब ल भ—सर्वश्रोतांसि पूर्णानि तस्या×ह्यासन्नरोत्तम× ।

८. ज भ—सर्वदेवपुरोहितं ।

+ भ—तन्महि॰ । *ल—॰दवकर्यित । ×ल—तस्या--सन्वै नरोत्तमम् ।

१३] अशक्ताऽहं धारयितुं त्वत्तेजो भग[1]वन्निति ॥[2]१४॥[3]   [१.६
तामुवाच ततो गङ्गां हुतभुग् भगवान् पुनः ।
१४] प्रगृह्य गङ्गे मत्तेजः शैलेन्द्रे[4] त्वं विसर्जय ॥१५॥[5]   [१.७
तथेत्युक्त्वा ततो गङ्गा तत्तेजः प्रत्यप[6]द्यत ।
१५] प्रतिपद्य च सद्योऽभूद् विह्वला मूर्च्छिता च सा ॥१६[7]॥ [१.८
असहन्ती ततो गर्भं तं धारयितुमोजसा ।
१६] कैलासशिखरे राम सा[8]ग्निरेतः सुषाव तत् ॥१७॥[7]   [N
अजातसारं प्रस्कन्नं सहसा भूरितेजसम् ।
१७] रम्ये शरवणोद्देशे समुत्सृज्य ततो ययौ ॥१.८॥[7]   [N

---

१. ब—भगवानिति ।

२. ज—शक्ता धारयितुं नास्मि तव तेजःसमुद्यतं ।
  भ— ,, ,, नास्मात्तव ,, ।

३. ल—नास्ति ।
  अतः परमधिकः पाठः—
  ज—असौ तु दह्यमाना या संप्रव्यथितचेतना ।
  ल— ,, ,, दह्यमानाह्य ,,
  भ— ,, ,, दह्यमानाहं ,, ।

४. ब—शैलेन्द्र ।

५. ज ल भ - अथाब्रवीदिदं तत्र गंगां देवो हुताशनः ।
  साधु हैमवते पार्श्वे गर्भमेनं* निवेशय* ।

६. रा—प्रतिपद्यत ।

७. ज ल भ—श्रुत्वा तस्यापि वचनं तं गर्भमतिभास्वरं† ।
  तं ससर्ज ‡ महातेजाः + स्रोतोभ्यो हि तदानघ ॥

८. कै—सोग्नीरेतः । रा—सोग्ने रेतः ।

---

* भ—गर्भ [मे] तं विसर्जय । † ज—ऽतिभासुरं । ‡ भ—विससर्ज ।
+ ल भ—महातेजः ।

तदिदं[1] निर्गतं तस्यास्तदा[2] जांबूनदप्रभम् ।
१८] काञ्चनं[3] धरणीं प्राप्तं हिरण्यं चाभवत् तदा[4] ॥१९॥ [१९
ताम्रं कृष्णायसं चापि वक्त्रादेतदजायत ।
१९] मलं चाप्यभवत् तत्र[5] त्रपुसीसकमेव च ॥२०॥
N] तदेतद् धरणीं प्राप्य नानाधातुत्वमागतम् ।[6] [२०
निक्षिप्तमात्रे[7] गर्भे तु तेजसाऽप्यत्र[8] रञ्जितम् ॥२१॥
२०] सर्वं[9] पर्वतसंबद्धं सौवर्णमभवद्वनम्[10] । [२१
जातरूपमिदं[11] ख्यातं ततः[12] प्रभृति राघव ॥२२॥
२१] सुवर्णं प्रादुरभवद् वह्नितेजोभवं शुचि । [२३
कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः ॥२३॥
२२] वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः ।[13] [N
तं कुमारं ततो जातं दृष्ट्वा सेन्द्राः[14] मरुद्गणाः ॥२४॥

---

१ रा—तदिन ।

२. ज ल—स्तस० । भ—तस्य तस० ।

३. भ—कापिशं ।

४. ल—तथा । ज—पुनरपरहस्तेन शोधितः ।

५. भ—तस्य ।

६. कै रा—नास्ति ।

७. ल—निक्षिप्तमात्रे ।

८. कै रा—०जसा भूरितेजसि ।

९. ज ल—सर्वं० ।

१०. कै रा—०मभवत्तदा । ज—सौवर्द्धमभवद्धनं ।
ल—सौभद्रमभ० । भ—०र्णमवनं तदा ।

११. ज ल भ—जातरूपमिति ।

१२. रा—तदा ।

१३. ज ल भ—नास्ति ।

१४. ज ल भ—देवा ।

२३] तदा[1] क्षीरप्रदानार्थं कृत्तिकाः सन्न्ययोजयन् । [२४
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ॥२५॥[2]
२४] स्यादस्माकमयं पुत्रः ख्यातो नाम्नेति[3] राघवं । [२५
ततस्ता देवता ऊचुः कार्त्तिकेय[4] इति प्रभुः ॥[5]२६॥
२५] पुत्रोऽयं जगति ख्यातो भविष्यति न संशयः ।[6] [२६
देवतानां वचः श्रुत्वा पूर्वं[7] गर्भपरिस्रवे ॥२७॥
२६] कृत्तिकाः स्कन्दयामासुस्तमादित्यसमप्रभम्[8] ।[9] [२७
स्कन्दं[10] इत्येव तं देवाः[11] प्रोचुरप्रतिमौजसम्[12] ॥२८॥

---

१. रा—ततः ।
२. ज ल भ—क्षीरसंभवनार्थाया कृत्तिकाः समयोजयन् ।
तत्क्षीरं जातमात्राय कृत्वा समयमुत्तमं ।
ददुःपुत्रार्थमस्माकं सर्वासां प्रकरिष्यति ।
३. रा—नाम्नोभिराघव ।
४. ज ल—कार्तिकेयमिति ।
५. भ—ततस्ता देवताः सर्वाः कार्तिकेयमतिप्रभुं ।
६ भ—सेनापत्येभियोक्ष्यामो विजयायेति चाब्रवीत् ।
ज ल—नास्ति ।
७. कै—०परिप्रवे । ज—सर्वं गर्भं परिस्रवे ।
ल—सर्वं गर्भं परिस्रवे । भ—तीर्थगर्भपरिस्रवे ।
८. कै रा—छंदयामासु० ।
९. ज ल—सूपयामासुरथ तं दीप्यमानं यथा रविं ।
भ—स्नपयामासु ऋषये दीप्यमान , ,, ।
भ—अतः परमधिकः पाठः—
स्कन्नत्वात्प्रतिजग्राह सुरेसं तु शिवं तदा ।
१०. कै रा—सुत ।
११. कै रा—दृष्ट्वा । ज ल भ—देवा ।
१२. ज ल—ऊचुरप्रति० । भ—ऊचुरप्रिजम् ।

२७] कार्त्तिकेयं[1] महत्तेजं[2] काकुत्स्थं[3] ज्वलनप्रभम्[4] । [२८
प्रस्नुतानां ततः क्षीरं तासां षण्णां षडाननः ॥[5]२९॥
२८] भूत्वा स बालोऽप्यपिबत् कृत्तिकानां परिस्नुतम् । [२९
पीत्वा तासां[6] च तत् क्षीरं स कुमारो व्यवर्धत ।
२९] अजयत् स्वेन वीर्येण दैत्यसैन्यगणान् बहून् ॥३०॥[7] [३०
सुरसेनागणपतिं ततस्तममरद्युतिम् ।
३०] अभ्यषिंचन् सुरगणाः समेत्याग्निपुरोगमाः ॥३१॥[8] [३१
इति ते कथितो राम गङ्गायाः संभवो मया ।[9]
३१] देवस्य च कुमारस्य संभवः पुण्यकीर्तनः ॥ ३२॥ [३२

इत्यार्षे रामायणे बालकाण्डे[10] कुमारोत्पत्तिर्नाम[11]
चतुस्त्रिंशः[11] सर्गः ॥३४॥[12]

---

१. ब—कार्तिकेय । ज ल—कार्तिकेयो ।
२. ज ल—महातेजाः । भ—महातेजः ।
३. ज—काकुत्स्थो ।
४. ज ल—ज्वलनोपमः । भ - ज्वलनोपमं ।
५. ज ल भ—प्रादुर्भूतं तदा* क्षीरं कृत्तिकानामनुक्रमं ।
६. ब—वासां ।
७. ज ल—षण्णां षडाननो भूत्वा जग्राह सुरजस्तदा ।
भ— ,, ,, ,, ,, सुरसं तदा ।
८. ज ल भ—नास्ति ।
९. ज ल भ—एष ते विस्तरो राम गंगायाः कीर्तितो मया ।
कुमारः† संभवश्चैव धन्यः पूज्यः‡ सुखावहः ।
१०. के ब—आदिकाण्डे ।
११. के—०नामैकोनचत्वारिंशः ।
ज—एकत्रिंशः । रा ब ल भ—०नाम ।
१२. ज भ—॥३१॥

---

* ल भ—ततः ।
† ल भ—कुमारसम्भ० ।
‡ ल भ—पुण्यः ।

तां तथा[1] कौशिको रामे निवेद्य मधुरां[2] कथाम् ।

१] पुनरेव कथामेतां कथयामास कौशिकः ॥[3]१॥ [१

अयोध्याधिपतिः श्रीमान्[4] पूर्वमासीन् नराधिपः ।

२] सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥२॥ [२

विदर्भराजतनया[5] केशिनी नाम नामतः ।

३] ज्येष्ठा सगरपत्न्यासीद्[6] धर्मिष्ठा सत्यवादिनी ॥३॥ [३

अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।

४] द्वितीया सगरस्यासीत् पत्नी परमधार्मिका ॥४॥ [४

ताभ्यां सह महेष्वासः पत्नीभ्यां तप्तवांस्तपः ।

५] अपत्यकामः[7] काकुत्स्थ[8] भृगुप्रस्रवणे गिरौ ॥५[9]॥ [५

---

१. ज ल भ—कथां ।

२. ज भ—मधुराक्षरां । ल—मधुराक्षरम् ।

३. ज ब ल भ—पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ।

४. ज ल भ—शूरः ।

५. ज ल भ—वैदर्भदुहिता राम ।

६. कै—०सीद्धर्मिष्ठा । ज ल—०रपत्नी सा ध०

७. ज ल—हिमवंतमुपाश्रित्य । भ—हिमवंतमपाश्रित्य ।

८. कै रा—०प्रतरणे ।

९. कै—अतः परमधिकः पाठः

उत्तरपार्श्वे विन्यस्तः—

हिमवद्गिरिमाश्रित्य भृगुप्रस्रवणे गिरौ ।

अथ वर्षशते पूर्णे तपसाराधितो मुनिः ।

सगराय वरं प्रादा ... ... ।

अथ[1] वर्षशते पूर्णे[1] तपसाऽऽराधितो मुनिः[2] ।
६] सगराय वरान्[3] प्रादाद्[4] भृगुः सत्यवतां वरः ॥६॥ [६
अपत्यलाभः सुमहांस्तव राजन् भविष्यति ।
७] कीर्त्तिमप्रतिमां लोके सन्तानोत्थामवाप्स्यसि ॥७॥[5] [७
एका जनयिता पुत्रं[6] पत्नी वंशधरं तव[6] ।
८] षष्टिं पुत्रसहस्राणि द्वितीया जनयिष्यति ॥[7]८॥ [८
मुनिमेवं भाषमाणं सत्यधर्मतपोनिधिम् ।
९] ते पत्न्यौ सगरस्येदं कृत्वा[8]ऽञ्जलिमभाषताम् ॥९॥[9] [९
एकं[10] का तनयं[10] ब्रह्मन् का बहून् जनयिष्यति ।

---

१. कै रा—तस्मै वर्षसहस्रांते ।

२. भ—भृगुः ।

३. ज ल भ—वरं ।

४. भ—प्रादान्मुनिः ।

५. ज ल भ—अपत्यलाभः सुमहान् भविता ते नरेश्वर ।
कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥

६. ज ल भ—राजन्पुत्रं वंशकरं तव ।

७. ज—षष्टिपुत्रसहस्राणामेका च जनयिष्यति ।
ल—षष्टिं पुत्रसहस्राणामन्यापि ,, ।
भ— ,, ,, मेकापि ,, ।

८. रा—कृताञ्जलिरभाषताम् ।
ब—कृताञ्जलिमभाषतां ।

९. ज ल भ—एवं मुनिं भाषमाणं राजपत्न्यौ महेश्वरं† ।
ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ।

१०. ज—एकैकस्याः सुतो । ल भ—एकःकस्याः सुतो ।

---

†भ—नरोत्तम ।

१०] भगवन् श्रोतुमिच्छावः[1] सत्यः[2] सोऽस्तु वरो हि नौ॥[3]१०॥ [१०

तयोरेतद् वचः श्रुत्वा स मुनिप्रवरस्तदा ।

११] उवाच मधुरं वाक्यं स्वच्छन्देन[4] ददामि वाम् ॥११॥[5] [११

एका वंशधरं पुत्रमेका वंशान्तकान्[6] बहून् ।

१२] यथेष्टं मां वरयतं तथा दास्यामि वाञ्छितम्[7] ॥१२॥[8] [१२

मुनेरेतद्[9] वचः श्रुत्वा केशिनी रघुनन्दन ।

१३] पुत्रं वंशधरं[10] राम जग्राहैकमनिन्दिता[11] ॥१३॥ [१३

[12]षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तथा[13] ।

१४] जग्राह कीर्त्तियुक्तानि सुमतिर्वरमीप्सितम् ॥[14]१४॥ [१४

---

१. कै—भगवं श्रो० । ब—०वंच्छ्रोतुमिच्छावः ।

२. ब—सत्यः ।

३. ज ल भ—इत्येतच्छ्रोतुमिच्छावः सत्यं चास्तु वचस्तव ।

४. ब—स्वाच्छंद्येन ।

५. ज ल भ—तयोस्तु वचनं श्रुत्वा भृगुः परमधार्मिकः ।
उवाच मधुरां वाणीं स्वच्छंदोत्र विधीयतां ॥

६. ब—वंशकरान् ।

७. कै—वास्थिताम् ।

८. ज ल भ—एको वंशकरो वास्तु* बहवो वा† महाबलाः ।
कीर्तिमंतो महोत्साहा एवं× का वरमिच्छति ।

९. ज ल भ—मुनेस्तु वचनं ।

१०. ज ल भ—वंशकरं ।

११. ज—राजा ह नृपसंसदि । ल भ—०ह नृपसंसदि ।

१२. ज ल भ—पुत्रान्षष्टिसहस्राणि ।

१३. ज ल भ—ततः ।

१४. ज ल भ—कीर्तियुक्तान्महोत्साहान् जग्राह सुमतिस्तदा ।

---

*ज ल—वोस्तु । †ज—वै । ल—वो । ×भ—एव ।

प्रदक्षिणं ततः कृत्वा भृगुं धर्मभृतां वरम् ।[1]

१५] जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥१५॥ [१५

अथ कालेन[2] महता पुत्रं ज्येष्ठां[3] व्यजायत ।

१६] असमञ्जा[4] इति ख्यातं काकुत्स्थ सगरात्मजम् ॥१६॥ [१६

सुमतिश्च[5] रघुश्रेष्ठ[6] गर्भं[7] तुम्बं व्यजायत ।

१७] षष्टिः[8] पुत्रसहस्राणि भिन्ने तुम्बे[9] विनिर्ययुः ॥१७॥ [१७

घृतपूर्णेषु[10] कुम्भेषु धात्र्यस्तान[11] अभ्यवर्धयन् ।

१८] ते[12] च कालेन महता यौवनं प्रतिपेदिरे ॥१८॥ [१८

समानवयसः सर्वे तुल्यवीर्यपराक्रमाः ।[13]

१९] [14]षष्टिः पुत्रसहस्राणि सगरस्य तदाऽभवन्[15] ॥१९॥ [१९

स च ज्येष्ठोऽभवत् तेषामसमञ्जाः[16] परन्तपः ।[17] [२०पू

---

१. ज ल भ—प्रदक्षिणमृषिं कृत्वा शिरसा चाभिवाद्य च ।

२. ज ल भ—काले गते तस्मिन् ।

३. ज ल—ज्येष्टं । भ—ज्येष्ठं ।

४. कै—असमंजा इति । ज ल भ—०मंजमिति ।

५. ज ल भ—सुमतिस्तु ।

६. ज ल भ—नरव्याघ्र ।

७. ज—गर्भः ।

८. रा ज ल—षष्टि० । भ—षष्टिं ।

९. ज ल भ—तुम्बे भिन्ने ।

१०. ल भ—घृतकुंभेषु पूर्णेषु ।

११. रा—धात्र्यास्ता० ।

१२. ज ल भ—कालेन महता ते तु ।

१३. ज ल भ—अथ दीर्घस्य कालस्य रूपयौवनशालिनः ।

१४. कै रा—षष्टि० । ज—पुत्रः षष्टिसह० । ल—पुत्राष्षष्टिसह० ।

भ—पुत्राः षष्टिसहस्रा० ।

१५. भ—नास्ति । अतः परं २३श्लोकान्तो नास्ति पाठः ।

१६. रा—०समंजः । ब—०समंजाः ।

१७. ज ल—स च ज्येष्ठो नरव्याघ्र सगरस्यात्मसंभवः ।

२०] पौराणामहिते युक्तः पित्रा निर्वासितः[1] पुरात् ॥२०॥ [२१उ

तस्य पुत्रोऽंशुमान् नाम बभूव ह्यसमञ्जसः ।[2]

२१] संमतः सर्वलोकस्य सर्वलोकप्रियंवदः[3] ॥२१॥ [२२

अथ[4] कालेन महता मतिरेवमजायत[5] ।

२२] सगरस्याश्वमेधेन[6] यजेयमिति राघव ॥२२॥ [२३

स कृत्वा निश्चितां[7] बुद्धिं सोपाध्यायगणो[9] नृपः[8] ।

२३] सगरो यष्टुमारेभे कृत्वा द्रव्यपरिग्रहम् ॥[10]२३॥ [२४

इत्यार्षे रामायणे बालकाण्डे[11] सगरपुत्रजन्म
नाम[12] पञ्चत्रिंशः[13] सर्गः ॥३५॥[14]

---

१. रा—निर्वासितः । ज—'विवासित' इति मौलिकं पाठं संशोध्य 'निर्वासित' इति कृतम् । ल—निवासितः ।

२. ज ब ल—तस्य पुत्रोंशुमानासीदसमंजस्य वीर्यवान् ।

३. ज ल—सर्वस्यैव प्रियं० ।

४. ज ब ल—तस्य ।

५. ज ल—मतिरासीन्महात्मनः ।

६. ज ल—०रस्य नरश्रेष्ठ ।

७. ज ल—निश्चयं ।

८. ज ल—राजा ।

९. ज ल—०गणस्तदा ।

१०. ज ल—यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ।

तत्र तस्यात्मजा राम† प्रविष्टाः कापिलं‡ वपुः ।

११. ब—आदिकाण्डे । कै—नास्ति ।

१२. कै रा—नास्ति ।

१३. कै रा—चत्वारिंशत्तमः । ब—नास्ति ।

१४. ज ल भ—सर्गसमाप्तिर्न दृश्यते ।

---

†ल—नाम । ‡ज—कपिलं ।

विश्वामित्रवचः श्रुत्वा कथाऽन्ते रघुनन्दनः ।
१] उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥१॥[1] [१
श्रोतुमिच्छामि भगवन् विस्तरेण कथामिमाम् ।
२] पूर्वको मे यथा यज्ञं सगरः समवाप्तवान् ॥[2]२॥ [२
विश्वा[3]मित्रस्ततो राममुवाच प्रहसन्निव ।
३] श्रूयतां विस्तरो राम सगरस्य कथां प्रति ॥३॥ [३
शङ्करश्वशुरः श्रीमान् हिमवानचलोत्तमः ।
४] विन्ध्यश्च स्पर्धयाऽन्योन्यं यत्र देशे निरक्षताम् ॥[5]४॥ [४
तस्मिन् देशे स यज्ञोऽभूत् सगरस्य महात्मनः ।[6]
५] स हि देशो महापुण्यः प्रशस्तो यज्ञकर्मणि ॥५॥ [५
तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ।

---

१. भ—नास्ति । अतः परं १४श्लोकस्य पूर्वार्द्धपर्यन्तः पाठो न दृश्यते ।
२. रा—पूर्वको मे यथा यज्ञमश्वमेधमवाप्तवान् ।
ज ल—पूर्वः को मे कथं ब्रह्मन्यज्ञान्तं समवाप्यथ* ।
३. ज ल—विश्वामित्रस्तु काकुत्स्थमुवाच ।
४. ज—०रोराम । ब ल—०रोनाम
५. ज—विंध्यश्च पर्वतश्रेष्ठो निरीक्ष्येते परस्परं ।
६. ज ल—तयोर्मध्ये प्रवृत्तोभूद्यज्ञो वै रघुनंदन ।
७. ज ल—नरव्याघ्र ।
८. कै रा—ख्यातः पुण्यजनाश्रितः ।
९. कै रा—तस्य चानन्तरो राम ।

---

* ल—समवाप्य ह ।

६] अंशुमानकरोद् वीरः सगरस्य तदाऽऽज्ञया ॥६॥[1] [६
यजतस्तस्य तं यज्ञमुत्थाय धरणीतलात्[2] ।
७] तमश्वं यज्ञियं नागो जहारानन्तरूपधृत् ॥ ७॥[3] [७
हृतेऽश्वे यज्ञिये तस्मिन् सर्वे ते रघुनन्दन ।
८] याजकाः समुपागम्य यजमानं तदाऽब्रुवन्[4] ॥८॥[5] [८
केनापि नागरूपेण हृतस्तेऽश्वः स यज्ञियः ।
९] हत्वा तमश्वहर्तारं[6] तमेवाश्वं त्वमानय ॥९॥[7] [९
यज्ञच्छिद्रं महद्ध्येतत् सर्वेषामशिवाय नः ।
१०] तथा तत् क्रियतां राजन् यथाऽच्छिद्रः क्रतुर्भवेत्॥१०॥[8] [१०
उपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ।
११] षष्टिं पुत्रसहस्राणि समाहूयेदमब्रवीत्[9] ॥११॥ [११
न गतिं राक्षसानां हि पश्यामीह महाक्रतौ ।

---

१. कै रा—०नभवद्वीरः । ज ल—०नकरोत्तात ।

२. रा—यज्ञं मुक्त्वाथ ।

३. ज ल—तस्य पर्वणि तं यज्ञं यजमानस्य राघवः ।
राक्षसीं तनुमास्थाय केनाप्यश्वस्तदा हृतः ।

४. रा—तथाब्रुवन् ।

५. ज ल—ह्रियमाणे तु काकुत्स्थ तस्मिन्काले महात्मनः ।
उपाध्यायगणः सर्वो यजमानमथाब्रवीत्* ।

६. रा ब—०श्वहंतारं ।

७. ज ल—अयं पर्वणि वेगेन याज्ञिकोश्वोपनीयते ।
हर्तारमस्य राजेन्द्र जहि माश्वः प्रयास्यतु ।

८. ज ल—नास्ति ।

९. ज ल—वाक्यमेतदुवाच ह ।

---

* ल—यजमानस्य राघव ।

१२] नागानां चापि चान्येषां रक्षिते हि महर्षिभिः ॥१२॥[1] [१२
केनापि तु स देवेन हृतोऽश्वो नागरूपिणा ।
१३] अमर्षतोच्छिद्रमेतद् दृष्ट्वा दीक्षामुपागतम् ॥१३॥[2] [N
योऽसौ रसातलगतो यदि वान्तर्जले स्थितः । [N
१४] तं[3] हत्वाऽऽनयताश्वं मे[3] पुत्रका भद्रमस्तु वः ॥१४॥
समुद्रमालिनीं[4] कृत्स्नां[4] पृथिवीमनुमार्गथ[5] । [१३
१५] प्रोत्खनन्तः प्रयत्नेन यावत्तुरगदर्शनम् ॥[6]१५॥ [N
एकैकं योजनं भूमिं निर्भिन्दन्तो[7]ऽनुगच्छत ।[8]
१६] अस्माकमश्वहर्तारं मार्गमाणा ममाज्ञया[9] ॥[10]१६॥ [१४,१५
दीक्षितः पुत्र[11]सहितः सोपाध्यायगणस्त्वहम्[12] ।
१७] इह स्थास्यामि भद्रं वो यावत् तुरगदर्शनम्[13] ॥१७॥ [१६

---

१. ज ल––न गतिर्दृश्यते तावद्रक्षसः पुरुषर्षभाः ।
मंत्रविद्भिर्महाभागैरधिष्ठितमिदं सदः ॥
२. ज ल––नास्ति ।
३. ज ल भ––तद्गच्छत समग्रकाः ।
४. ज––०नीमिमां । ल––०नीमेनां । भ––०नीमेतां ।
५. कै––०नुगच्छत । रा––०नुगच्छतु । ज––०नुमार्गय ।
६. ज ल भ––एकैकं योजनं पुत्रा विस्तामनुगच्छंत ।
७. कै रा––निर्भिंदतोनु० ।
८. ज ल भ––यावत्तुरगसंदर्शस्तावत्खनतमेदिनी ।
पूर्वोत्तरश्लोकार्द्धविपर्य्यासो दृश्यते ।
९. कै––०मनुज्ञया ।
१०. ज ल भ––नास्ति ।
११. भ––यैत्र सहितः ।
१२. ल भ––०गणो ह्यहं ।
१३. रा––०दर्शनात् ।

असमाप्तक्रतुस्तावद् भविष्यामीह पुत्रकाः ।
१८] युष्माभिर्यावदश्वो मे न प्रत्याह्रियते पुनः ॥१८॥[1] [N
इत्युक्ता[2] हृष्टमनसः पित्राऽथ[3] सगरेण ते ।[4]
१९] बिभिदुर्वसुधां[5] राम पितुर्वचनकारिणः[6] ॥१९॥ [१७
योजनायामविस्तारमेकैको[7] धरणीतलम् ।
२०] बिभेद[8] पुरुषव्याघ्रो[9] वज्रसारैर्भुजैः[10] क्रमात्[11] ॥२०॥ [१८
कुद्दालैः परिघैः शूलैर्मुसलैः शक्तिभिस्तथा ।
२१] भिद्यमाना वसुमती तैरार्तैर्न[11] ननाद सा ॥२१॥[12] [१९
नागानां वध्यमानानां[13] सर्पाणां च महौजसाम् ।[14]

---

१. ज ल भ—नास्ति ।
२. रा—इत्युक्त्वा ।
३. कै—पुत्राथ ।
४. ज ल भ—ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः ।
५. ज—चख्नुर्महीतलं । ल—चखुः महीतलं ।
भ—चेरुर्महीतलं ।
६. ज ल—०न मंत्रिताः । भ—०यंत्रिताः ।
७. ज ल—तेषां योजनविस्तीर्णमेकैको ।
भ—तेषां योजनविस्तीर्ण० ।
८. कै रा—बिभिदुः ।
९. कै रा—पुरुषव्याघ्रा ।
१०. ज ल भ वज्रस्पर्शसमैर्भुजैः ।
११. रा तैरांतेव ।
१२. ज ल भ—शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ।
छिद्यमाना‡ वसुमती बिदध्रे× रघुनंदन ।
१३. रा—बण्य० ।
१४. ज ल भ—नागानां हन्यमानानामसुराणां च राघव ।

---

‡ल—भिद्यमाना । ×भ—विदद्रे ।

२२] रक्षसामसुराणां[1] च बभूवार्तस्वरो[2] महान् ॥२२॥ [२०
षष्टिं हि योजनानां ते सहस्राणि महौजसः ।[3]
२३] धरण्यां[4] बिभिदुः क्रुद्धाः सर्वे यावद् रसातलम् ॥२३॥[२१
एवं पर्वतसंबाधं जम्बुद्वीपं[5] नृपात्मज ।
२४] खनन्तस्ते नृपसुताः सर्वतः परिबभ्रमुः[6] ॥२४॥ [२२
ततो[7] देवाः सगन्धर्वाः सहोरगगणास्तथा[8] ।
२५] संभ्रान्तमनसः सर्वे पितामहमुपागमन्[9] ॥२५॥ [२३
तेऽभिवन्द्य[10] महात्मानं विषण्णवदनास्तदा[11] ।
२६] अब्रुवन् परमत्रस्ताः पितामहमिदं वचः ॥[12]२६॥ [२४
N] सपर्वतवना देव सरिद्द्वीपसमाकुला[13] ।[14] [N

१. ज ब ल भ—राक्षसानां च घोराणां ।
२. कै—०वार्त्तस्व० । रा—०भूवांतं बरो० ।
ज—नांतः समुपपद्यते । ल भ—नांतः समुपलभ्यते ।
३. ज—योजनानां सहस्राणि चाशीतिं रघुनंदन ।
ब ल भ— ,, ,, अशीतिं ,,
४. ज ब ल भ—विभिदुर्धरणीं वीराः ।
५. भ—जंबू० ।
६. ज—प्रतिचक्रमुः । ल भ—परिचक्रमुः ।
७. ज ल भ—तदा ।
८. ज ल भ—सासुराः सहपन्नगाः ।
९. ज ब ल—०मुपाद्रवन् । भ—०मुपाब्रवन् ।
१०. ज ल भ—ते प्रसाद्य ।
११. कै रा—संभ्रांतमनसः सुराः ।
१२. ज ल भ—ऊचुः परमसंभ्रांताः ससंभ्रममिदं वचः ।
१३. ज ल भ—ससरिद्द्वीपसंकुला ।
१४. कै रा—नास्ति ।

भगवन् पृथिवी सर्वा खन्यते सगरात्मजैः ॥२७॥
२७] खनद्भिश्चैव तैर्ब्रह्मन् हन्यन्ते मुनयस्तथा । [२५
उ२८] इति ते सर्वभूतानि निघ्नन्ति सगरात्मजाः ॥२८॥[1] [२६उ

इत्यार्षे रामायणे बालकाण्डे[2] पृथिवीदारणं
नाम[3] षट्त्रिंशः सर्गः[3] ॥३६॥

---

१. ज ल भ—महान्तश्च महात्मानो वध्यते जलचारिणः ।
२. कै—आदिकाण्डे
३. कै—नामैकचत्वारिंशत्तमोध्यायः ।
रा ब—नाम सर्ग । ज ल भ—पुस्तकेषु सर्गसमाप्तिर्न दृश्यते ।

इति तेषां वचः[1] श्रुत्वा देवानां[2] प्रपितामहः ।
१] प्रत्युवाच भयोद्विग्नान्[3] सर्वान् देवानिदं वचः ॥[4]१॥ [१
बिभर्ति यो जगत्सर्वं यस्योत्पत्तिं न विद्महे ।
२] तेनाश्वो वासुदेवेन कपिलेनापवाहितः ॥२॥[5] [N
पृथिव्याश्चैव भेदोऽयं दृष्टस्तेनेति मे मतिः ।[6]
३] सगरस्य च[7] पुत्राणां विनाशोऽमिततेजसाम्[8] ॥३॥ [४
पितामहवचः श्रुत्वा ततस्ते त्रिदिवालयाः[9] ।
४] देवर्षिपितृगन्धर्वाः प्रतिजग्मुर्यथागतम् ॥[10]४॥ [५
सगरस्य[11] च पुत्राणां प्रादुरासीन् महौजसाम्[12] ।
५] खनतां पृथिवीं शब्दो वज्राशनिसमस्वनः ॥[13]५॥ [६

१. ज ल भ—देवानां वचनं ।
२. ज ल भ—भगवान् ।
३. के—भयोद्विग्नाः ।
४. ज ल भ—तान्प्रत्युवाच संत्रस्तान्सर्वदेवानिदं वचः ।
५. ज ल भ—यस्येयं वसुधा वत्सा वासुदेवस्य दीयते * ।
कापिलं ‡ रूपमास्थाय हयस्तेनापवाहितः ।
६. ज ल भ—पृथिव्याश्चापि निर्भेदो दृष्ट एव पुरातनः ।
७. ज ल भ—तु ।
८. ज ल भ—दीर्घजीविनां ।
९. ज ल भ—त्रयस्त्रिंशदरिंदम ।
१०. ज ल भ—देवाः परमसंहृष्टाः सर्वे जग्मुर्यथागतं ।
११. ज ल भ—तु ।
१२. ज ल भ—महास्वनः ।
१३. ज ल भ—पृथिव्यां भिद्यमानायां निर्घातस्वनवत्तदा ।

* ज—दीयते । ‡ भ—कपिलं ।

ते[1] भित्त्वा पृथिवीं सर्वां[2] कृत्वा चाभिप्रदक्षिणम् ।
६] उपेत्य पितरं सर्वे सगरं वाक्यमब्रुवन् ॥[3]६॥ [७
परिक्रान्ता मही सर्वा महद्भिर्शसनं कृतम्[4] ।
७] यादोगणमहाग्राहदैत्यदानवरक्षसाम् ॥[5]७॥ [८
न[6] चापश्याम तं राजन् यज्ञविघ्नकरं तव ।
८] किं कुर्महे पुनस्तात विनिश्चित्य प्रशाधि नः ॥[7]८॥ [९
तेषामेतद्वचः श्रुत्वा पुत्राणां सगरस्तदा ।[8]
९] निश्चित्योवाच तान् सर्वान् पुनः पुत्रानिदं वचः ॥९॥ [१०
भूयो मृगयताश्वार्थं विभिद्येदं रसातलम् ।[9]
१०] कृतार्थाः सन्निवर्तध्वं गृहीत्वाऽश्वापवाहकम् ॥[10]१०॥ [११

---

१. ज ल भ—ततो भित्त्वा महीं कृत्स्नां ।

२. रा—पुत्रास्ते ।

३. ज ल भ—पार्थिवं सगरं सर्वे पितरं वाक्यमब्रुवन् ।

४. कै—०द्विशमनं० । ज ब ल—महान् सत्त्ववधः कृतः ।
भ—महासत्त्ववधः कृतः ।

५. ज ल भ—गंधर्वयक्षवृक्षाणां पिशाचोरगरक्षसां* ।

६. ज ल भ—पश्यामो न च ।

७. ज ल भ—†तत्करिष्यामहे भूयस्तं‡ बुद्ध्या साधु चिन्त्यतां ।

८. ज ल भ—पुत्राणां वचनं श्रुत्वा तेषां तु रघुनन्दन ।
समन्युरब्रवीद्वाक्यं सगरः पुरुषर्षभः ॥

९. ज ल भ—भूयः खनत भद्रं वो निर्भिद्य वसुधातलं ।

१०. कै रा—अपहर्तारमासाद्य कृतार्थास्संन्यवर्तत ।
रा—पुस्तकेऽतः परं—॥ १००० ॥

---

*ज—राक्षसाम् । भ—†यत्० । ‡ ल भ—०तत् ।

पितुरेतद्वचः[1] श्रुत्वा सगरस्यात्मसंभवाः ॥[2]
११] षष्टिः[3] पुत्रसहस्राणि रसातलमुपागमन् ॥[4][5] ११॥ [१२
पुनः खनन्तस्ते तत्र[6] ददृशुः पर्वतोपमम् ।
१२] आशागजं[7] विरूपाक्षं[8] धारयन्तमिमां महीम्[9] ॥१२॥ [१३
शिरसा नरशार्दूल सशैलवनकाननाम् ।[10]
१३] नानाजनपदाकीर्णां नानापत्तनशोभिताम् ॥[11] १३॥ [१४
यदा च पर्वणि शिरः? खेदाच्चालयते शिरः ।[12]

१. कै रा—पुनरेत० ।

२. ज ल भ—पितुर्वचनमाज्ञाय सगरस्य महात्मनः ।

३. भ—षष्टिं ।

४. ज ल भ—०लमथाद्रवन् ।

५. कै रा—सागराः षष्टिसाहस्राः पितामहमुपागमन् ।

६. ज ल भ—खन्यमाने तदा तस्मिन् ।

७. रा—अश्वागजं ।

८. ज ब—विरूपाक्षं ।

९. ज ल भ—धारयंतं महीमिमां ।

१०. ज ब ल भ—सपर्वतवनां कृत्स्नां पृथिवीं स नरोत्तम† ।

११. ज—सदा बिभर्ति काकुत्स्थ विरूपाख्यो महागजः ।
भ— ,, ,, ,, दिक्पालं कुंजरोत्तमं ।
खनमाना दिशो राम जग्मुर्भित्त्वा वसुंधरां ।
तं रूपाख्यो महागजः ।
ब ल—नास्ति ।

१२. ज भ—यदा पर्वणि काकुत्स्थ विश्रामार्थं स वारणः ।
ब—सदा बिभर्तु ये जातु ,, ,, ,, ।
ल— ,, ,, काकुत्स्थ ,, ,, ,, ।

† ज—सगरोत्तम ।

१४] सपर्वतवना राम तदेयं चलति क्षमा ॥[1]१४॥ [१५
तं[2] ते[2] प्रदक्षिणं कृत्वा दिक्पालं[3] कुञ्जरोत्तमम्[3] ।
१५] मन्यमाना दिशां पालं दक्षिणां बिभिदुर्दिशम् ॥१५॥[4] [१६
दक्षिणस्यामपि पुनर्ददृशुस्ते गजोत्तमम् ।[5] [१७उ
१६] महापद्मं महात्मानं तिष्ठन्तं मन्दरोपमम् ॥१६॥
तं च दृष्ट्वा महाकायं विस्मयं परमं ययुः ।[6] [१८
१७] कृत्वा तमपि नागेन्द्रं प्रदक्षिणमरिन्दम ॥[7]१७॥
सगरस्यात्मजा राम[8] पश्चिमां बिभिदुर्दिशम् । [१९
१८] पश्चिमायामपि दिशि[9] कैलासशिखरोपमम्[9] ॥१८॥
आशागजं सौमनसं[10] ददृशुस्ते महाबलम् । [२०

---

१. ज ब ल भ—ईषच्चालयते स्कंधं कंपते मेदिनी तदा ।

२. ज ल— ते तं ।

३. के रा—दिशो गजमरिंदम । भ-दिक्पालं तु गजोत्तमं ।

४. ज भ—खनमाना *दिशं पूर्वां जग्मुर्भित्वा वसुंधरा [म्] ।
ततः पूर्वां दिशं भित्वा दक्षिणां विभिदुः पुनः ॥
ल—नास्ति ।

५. भ—दाक्षिणस्यां पुनश्चैव ददृशुस्ते गजोत्तमं ।
ल—नास्ति ।

६. ज ल भ—शिरसा धारयंतं गां ते† दृष्ट्वा विस्मयं गताः ।

७. ज ल भ—ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः ।

८. रा—सागर० । ज ल-षष्टिःपुत्रसहस्राणि ।
भ—षष्टिं पुत्रसहस्राणि ।

९. ज—तदा महांतमचलोत्तमं । ल भ-तदा महांतमचलोपमम् ।

१०. ज ल भ—दिक्कुंजरं सुमनसं ।

---

* भ— दिशो राम ज० । † भ—तं ।

१९] तं[1] ते[1] प्रदक्षिणं कृत्वा पृष्ट्वा चाना[2]मयं तथा ॥१९॥

प्रोत्खनन्तो ययुर्वीरा दिशं हैमवतीं ततः[3] । [२१

२०] उत्तरस्या[4]मपि तथा[4] ददृशुर्हिमपाण्डुरम् ॥२०॥

भद्रं भद्रेण वपुषा धारयन्[5]तमिमां महीम्[5] । [२२

२१] समाल[6]भ्य च ते[6] सर्वे कृत्वा चाभि[7]प्रदक्षिणम् ॥२१॥

स[8]हिताः पु[8]नरेवेदं बिभिदुर्धरणीतलम् । [२३

२२] प्रागुत्तरां दिशं गत्वा ततस्ते सगरात्मजाः ॥[9]२२॥

अमर्षवशमापन्नाश्चखनुरेव धरामिमाम् । [२४

२३] तत्राथ प्रोत्खनन्तस्ते क्षोणीमपि समन्ततः ॥[10]२३॥ [N

ददृशुः कपिलं नाम देवं नारायणं प्रभुम् ।[11] [२५उ

२४] हयं च यज्ञियं तस्य चरन्तमविदूरतः ॥२४॥ [N

---

१. र ज ल—ते तं ।

२. ज ल—चैवमनामयं । भ—चैनमनामयं । के रा—०मयं ततः ।

३. ज ल भ—खनंतः समतिक्रान्तां दिशं हैववतीं तदा ।

४. ज ल भ—०स्यां रघुश्रेष्ठ ।

५. ज ल भ—धारयंतं धरामिमां ।

६. के—तमप्यालभ्य ते ।
रा—तमप्यालभ ते ?

७. ज ल भ—चैनं प्रदक्षि० ।

८. ज ल भ—राजपुत्रास्ततो भूयो ।

९. ज भ ल—ततः प्रागुत्तरं गत्वा याज्ञिया† पृथिवीमिमां ।

१०. ज ल भ—अभ्यघ्नन्‡ रुषिताः सर्वे काकुत्स्थ सगरात्मजाः ।

११. ज ल भ—ददृशुः कपिलं तत्र वसुदेवं महाबलं* ।

१२. ज ल भ—नास्ति ।

---

† ल—याज्ञियां । ‡ ल—अभ्यघ्नंत । *भ—महाबल ।

ते[1] तं[1] यज्ञहरं[2] मत्वा[3] क्रोधपर्याकुलेक्षणाः ।
२५] अभ्यधावन्त ते क्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥[4]२५॥ [२७
संमूढा न विदुस्तं वै देवमक्षयमव्ययम् ।[5]
ततस्तेनाप्रमेयेण तेऽपध्याता महात्मना ।[6]
२६] भस्मराशीकृताः सर्वे समेताः[7] सगरात्मजाः ॥२६॥ [३०

इत्यार्षे रामायणे बालकाण्डे कपिलदर्शनं
नाम सप्तत्रिंश[8] सर्गः ॥ ३७ ॥

---

१. भ तं ते ।
२. ज ल भ—यज्ञहरं ।
३. ज ल भ—ज्ञात्वा ।
४. ज ल भ— अभ्यधावन्नरश्रेष्ठ तिष्ठ तिष्ठेति चाब्रुवन् ।
५. कै रा—नास्ति ।
६. ज ल भ—ततस्तेनाप्रमेयेण तेन* शप्ता महात्मना ।
७. ज ल भ--काकुत्स्थ ।
८. कै—द्विचत्वारिंशत्तमः । रा ब —नास्ति ।
ज ल भ—सर्गसमाप्तिर्न दृश्यते ।

---

*ज ल—०येणाश्चेते ।

पुत्रांश्चिरगतान् मत्वा[1] सगरो रघुनन्दन[2] ।
१] नप्तारमब्रवीद् वाक्यं दीप्यमानं स्वतेजसा[3] ॥१॥ [१
पितॄन्[4] गच्छ त्वमन्वेष्टुं[4] येन चाश्वोऽपवाहितः । [२उ
२] अन्तर्भूमिनिवासीनि सन्ति सत्त्वान्यनेकशः ॥[5]२॥
तेषां प्रतिविधानार्थं गृहीत्वा व्रज कार्मुकम् ।[6] [३
३] तानासाद्य पितॄंस्तात यज्ञविघ्नकरं च मे ॥[7]३॥
कृतार्थः[8] सन्निवर्तेथा यज्ञादुत्तारयस्व माम् ।[9] [४
४] शूरोऽसि कृतविद्यश्च पूर्वैस्तुल्यपराक्रमः ॥[10]४॥ [२पू
N] शीघ्रमायाहि भद्रं ते यथा धर्मो न लुप्यते[11] । [N
एवमुक्तो[12]ऽशुमांस्तेन सगरेण महात्मना ॥५॥

---

१. ज ल भ—ज्ञात्वा ।

२. रा—रघुनन्दनः ।

३. ल—सुतेजसम् ।

४. ज ल भ—पितॄणां गतिमन्विच्छ ।

५. ज ल भ—अंतर्भौमानि सत्त्वानि वीर्यवंति महांति च ।

६. ज ल भ—तेषां त्वं प्रतिघातार्थमसिं गृह्णीष्व कार्मुकं ।
  ब—तेषां प्रतिविघातार्थं ,, ,, ,, ।

७. ज ल भ—अभिवन्द्याभिवाद्यत्वं संहृत्य च रिपूनपि ।

८ रा—कृतार्थो ।

९. ज ल भ—सिद्धार्थः सन्निवर्तस्व मम यज्ञस्य पारगः ।

१०. ज ल भ—नास्ति ।

११. रा—लभ्यते ।

१२. ज ल भ—एवमुक्तो राम ।

५] धनुरादाय खड्गं च ययौ त्वरितविक्रमः[1] । [५
तमेव पितृभिर्यातं पन्थानमनुसंचरन्[2] ॥[3]६॥
६] ययौ वेगेन महता पितृंस्तान् द्रष्टुमञ्जसा । [६
वीक्षमाणो विशसनं कृतं तैर्यक्षरक्षसाम् ॥७[3]॥
७] सोऽवैक्षत विरूपाक्षमाशागजमत्रस्थितम् ।[3] [७
स तं[4] प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं[5] ततः ॥८॥
८] पितॄन्[6] स्वान्[6] परिपप्रच्छ हयहर्तारमेव[7] च । [८
आशागजोऽपि तच्छ्रुत्वा पृच्छतोंऽशुमतो वचः ॥[8]९॥
९] तमुवाच कृतार्थस्त्वमेष्यसीत्यभितः स्थितः ।[9] [९
इति[10] तस्य वचः श्रुत्वा सर्वानेव हि दिग्गजान् ॥१०॥
१०] यथाक्रमं यथान्यायं[11] प्रष्टुं समुपचक्रमे । [१०
एतदेव च तैरुक्तो गजैराशुपराक्रमैः ॥[12]११॥

---

१. कै—चरितविक्रमः । रा—चरतिविक्रमः ।
२. रा—०नमनुसंस्मरन् ।
३. ज ल भ—दैत्यदानवरक्षोभिः पिशाचपतगोरगैः ।
स्तूयमानो महातेजा दिग्गजं स ददर्श ह ॥
४. कै—तां ।
५. ज ल—चैवमनामयम् । ब—चैनामनामयं ।
भ—चैनमनामयं ।
६. ज ल भ—पितृंस्तान् ।
७. ज ल भ—वाजिहर्तारमेव ।
८. ज ल भ—दिग्वारणस्तु तच्छ्रुत्वा सौम्यमंशुमतो वचः ।
९. ज ल भ—तमुवाच कृतार्थस्त्वं हयं त्वं† प्राप्स्यसीति च ।
१०. ज ल भ—तस्य तद्वचनं ।
११. कै ब ल—यथान्याय्यं ।
१२. ज भ ल—दिक्पालैः सस्तुतैः सर्वैर्वाक्यतो वाक्यकोविदैः ।

---

† भ—तं । ‡ज ल—संततैः ।

११] पूजितः सहयश्चैव गन्ताऽसीत्यंशुमानपि ।[1] [११
तेषां स[2] वचनं श्रुत्वा जगा[3]म लघुविक्रमः[3] ।।१२।।
१२] भस्मराशीकृता यत्र पितरस्तस्य साग[4]राः ।[5] [१२
स दुःखवशमापन्नः सुतोऽथ ह्यसमञ्जसः ।।[6] १३।।
१३] चुक्रोशार्तस्वरं दृष्ट्वा भस्मराशीकृतान् पितॄन् ।[7] [१३
पू१४] अप[8]श्यत् तुरगं तं तु[8] चर[9]न्तमविदूरतः ।।१४।।[10] [१३
स तेषां राजपुत्राणां कर्तु[11]कामो जलक्रि[11]याम् ।
१५] सलिलार्थी महातेजा नापश्यत् सलिलं क्वचित् ।।[12] १५।।[१५

१. ज ल—पूजितः सहि जित्वैव गंतासीत्यभिभाषितः ।
भ—पूजितः स समस्तैस्तु गंतासीत्यवभाषितः ।

२. ज ल भ—तु ।

३. रा—जगामाल० ।

४. ज—सागरः ।

५. ज—अतः परमधिकः पाठः—
सदुःखवशमापन्नाः पितरस्तस्य सागराः ।

६. ज ल भ—स दुःखवशमापन्नस्त्वसमंजसुतस्तदा ।

७. ज ल भ—चुकोप* परमायस्तो बधे तेषां सुदुःखितः ।

८. ज ल भ—यज्ञियं च हयं तत्र ।

९. ज—चरित्तमवि० ? ।

१०. अतः परमधिकः पाठः—
कै—यथा पर्वणि नागेन कृतं वेलावनेस्ति…… ।
रा—तदा ,, ,, ,, वेलां वने स्थितम् ।
ज ल भ—ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ।

११. कै ज ल भ—०कामोंजलिक्रियां ।

१२. ज ल भ—सलिलार्थं महातेजास्तदापश्यज्जलाशयं ।

* ल भ—चुक्रोश ।

पातयंश्चाभितो[1] दृष्टिं ततस्तत्र[2] ददर्श ह ।
१६] पितॄणां मातुलं राम सुपर्णं पतगोत्तमम्[3] ॥१६॥ [१६
स चैनमब्रवीद् वाक्यं वैनतेयो महाबलः ।
१७] मा शुचः पुरुषव्याघ्र[7] वधोऽयं लोकसंमतः ॥[4]१७॥ [१७
कपिलेनाप्रमेयेण दग्धा ह्येते महाबलाः ।[4]
१८] सलिलं नार्हसे वीर दातुमेषां त्वमन्यतः[5] ॥[6]१८॥ [१८पू
गङ्गा हिमवतो ज्येष्ठा दुहिता सरितां वरा । [१९पू
१९] भस्मराशीकृतानेतान् पावयेल्लोकपावनी[8] ॥१९॥
यावत्[9] क्लिन्नमिदं भस्म गङ्गया लोककान्तया ।
२०] यदैषां भविता तात स्वर्गमेष्यन्ति वै तदा ॥[10]२०॥ [२०
गङ्गामानय भद्रं ते नाकलोकान्महीतलम् ।

---

१. के ज ल भ—विचार्य निपुणं दृष्ट्वा ।

२. भ—ततस्तत्प्रददर्श ।

३. ज ल भ—सुपर्णमनिलोपमम् ।

४. ज ल भ—नास्ति ।

५. ब—०मेभ्यस्त्वमन्यतः ।

६. ज ल भ—अर्होसि सलिलं वीर दातुमेभ्यो‡ नरोत्तम ।

७. ज ल भ—पुरुषर्षभ ।

८. ज—पावयेल्लोकभावन । ल—प्लावयेल्लोकभावन ।
भ—प्लावयेल्लोकभावना ।

९. ज ल भ—तया ।

१०. ज ल भ—नास्ति ।

---

‡ल भ—दातुं तुभ्यः ।

२१] क्रियतां यदि शक्तोऽसि[1] गङ्गाया अवतारणम् ॥[2]२१॥ [२१
गच्छाश्वमेतमादाय[3] पुनरेव यथागतम् ।[4]
२२] यज्ञं पैतामहं वीरं[5] निर्वर्तयितुमर्हसि ॥[6]२२॥ [२२
सुपर्णवचनं[7] श्रुत्वा वीर्यवानंशुमानथ ।
२३] त्वरितो[8] हयमादाय यज्ञमायान्[9] महायशाः ॥२३॥[10] [२३
स राजानं[11] समासाद्य[11] दीक्षितं रघुनन्दन ।
२४] तस्मै[12] निवेदयामास[12] सुपर्णवचनं तदा[13] ॥२४॥ [२४
तच्छ्रुत्वा व्यथितो राजा राघवांशुमतो वचः ।[14]
२५] यज्ञं समापयामास नातिहृष्टमना इव ॥[15]२५॥ [२५

१. रा—शक्नोसि ।
२. ज ल—षष्टिं तानि सहस्राणि शक्रलोकाय यास्यति† ।
भ— ,, ,, ,, यास्यन्तीन्द्रसलोकतां ।
३. रा—॰मेतदादाय ।
४. ज—गच्छ चाश्वं महातेजाः प्रगृह्य पुरुषर्षभ ।
ल—गंगां चाशु महातेजः ,, ,, ।
भ—गच्छ चाश्वं ,, ,, ,, ।
५. रा—पैतामहीं वीर । ज—पैत्य महावीर ।
६. ल—नास्ति ।
७. ज—सुपर्णो राम नामतः । ब-वीरवानंशुमानथ ।
भ—सोंशुमान्नाम नामतः ।
८. ज भ—त्वरितं ।
९. ज—पुनरायां । भ—पुनरायान् ।
१०. ल—नास्ति ।
११. ज ल भ—राजानमथा॰ ।
१२. ज भ—न्यवेदयद्यथावृत्तं । ल—न्यवेदयन्यथावृत्तं ।
१३. ज ल भ—ततः ।
१४. ज ल भ—तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः ।
१५. ज ल भ—यज्ञं निवर्तयामास यथारब्धं* यथाविधि ।

† ल—यास्यति । * भ—यथारंभं ।

स्वपुरं च ययौ धीमानिष्टयज्ञो महीपतिः ।[1]

२६] गङ्गायाश्चागमे राजा नाध्यगच्छत् स निश्चयम् ॥२६॥[2] [२६

अगत्वा निश्चयं चापि युयुजे कालधर्मणा ।[3]

२७] त्रिंशद्वर्षसहस्राणि पालयित्वा महीमिमाम् ॥२७॥[4] [२७

विधाय सोपानमिव क्रतुं[5] स

प्रतापविद्योतितभूमिपृष्ठः[6] ।

आरुह्य देवालयमुग्रतेजा—

N] श्चिक्रीड देशेषु मनोरमेषु ॥२८॥[7] [N

इत्यार्षे रामायणे बालकाण्डे[8] यज्ञसमाप्ति[9] र्नाम

अष्टत्रिंशः[10] सर्गः ॥३८॥[11]

---

१. ज ल भ—स्वपुरं चागमद्धीमा० ।

२. ज ल भ—नाध्यगच्छद्विनिश्चयं ।

३. ज ल भ—अगत्वा† निश्चयं राजा कालेन महता महान् ।

४. ज ल भ—राज्यं कृत्वा दिवं ययौ ।

५. भ—क्रतून् ।

६. ज—०भूमिपृष्ठः । ल–०विद्योतिबभूवमिष्टः । के रा—०मृष्टः ।

७ के रा—नास्ति ।

८. ल—आदिकाण्डे ।

९. ज भ—सगरयज्ञस० । ल–सगरयज्ञसमाप्ति ।

१०. के—त्रिचत्वारिंशतमाध्यायः ।

रा— त्रिचत्वारिंशत्तमः सर्गः ।

ज—द्वात्रिंशः सर्गः । ब भ–सर्गः ।

ल —नास्ति ।

११. ज भ—॥ ३२ ॥

---

† ल–अकाले ।

[वं=४४] [एकोनचत्वारिंशः सर्गः] [दा=४२]

ततः प्रकृतयो राम स्वर्गते सगरे नृपे ।[1]

१] धार्मिकं रोचयामासुरंशुमन्तं नराधिपम् ॥[2] १॥ [१

स राजामंशुमानासीदंशुमान् रघुनन्दन ।[3]

२] तस्य पुत्रः समभवद् दिलीप इति विश्रुतः ॥२॥ [२

तस्मिन् राज्यं समावेश्य दिलीपेऽथांशुमानपि ।

३] हिमवच्छिखरे राम तपस्तेपे महायशाः ॥३॥ [३

गङ्गावतरणं पुण्यं चिकीर्षुरमरद्युतिः ।

४] अनवाप्यैव तं कामं स वै नृपतिसत्तमः ॥४॥[10] [N

द्वात्रिंशत्स सहस्राणि वर्षाणाममितद्युतिः ।

५] तपस्तप्त्वा महाघोरं स्वर्गं लेभे महामनाः ॥५॥ [४

---

१. ज ल भ—कालधर्मं गते राम सगरे प्रकृतिजनः ।

२. ज ल—राजानं चोदयमास* अंशुमंतं महाद्युतिं ।

३. ज ल भ—राजा च सुमहानासीदंशु० ।

४. ज ल भ—पुत्रो महातेजा ।

५. ज ब ल—समादेश्य ।

६. ज भ—दिलीपे रघुनन्दन । ल–दिलीपं रघुनन्दन ।

७. ज ल भ— रम्ये

८. ज ल भ—तदांशुमान् ।

९. रा—०रमितद्युतिः ।

१०. ज ल भ—नास्ति ।

११. भ–द्वात्रिंशच्च ।

१२. ज—०मितप्रभः । ल–०मितप्रभुः । भ–०प्रभाः ।

१३. ज ब ल भ—तपोवने ।

१४ ज ब ल भ—तपः कृत्वा ।

१५. ज ब ल भ—स्वकर्मजं ।

---

* भ–रोचयामास ।

दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वरम्[1] ।
N] दुःखोपहतया बुद्ध्या नाध्यगच्छत् स[2] निश्चयम् ॥६॥[3] [५
कथं गङ्गावतरणं कथं तेषां जलक्रिया ।
N] तारयेयं कथं बन्धूनिति चिन्तापरोऽभवत् ॥७॥[3] [६
तस्य चिन्तयतो नित्यं धर्मेण विजितात्मनः ।
N] पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः[4] ॥८॥ [७
दिलीपोऽपि[5] महातेजा यज्ञैर्बहुभिरिष्टवान्[6] ।
६] त्रिंशच्चैव[7] सहस्राणि वर्षाणां गामपालयत् ॥९॥ [८
निश्चयं चाप्यगत्वैव[8] गङ्गावतरणे ततः ।[9]
७] व्याधिना नरशार्दूल कालस्य वशमीयिवान्[10] ॥१०॥[11] [९
इन्द्रलोकं गतो राजा सोऽर्जितं पुण्यकर्मणा ।[12]

---

१. ज ल भ—वधम् ।
२. भ—स्व० ।
३. के रा—नास्ति ।
४. भ—०धार्म्मिकः ।
५. ज ल भ—दिलीपस्तु ।
६. ज ल—यज्ञैश्च बहुभिर्यजन् । भ–यज्ञैर्बहुविधैर्यजन् ।
७. ज ल भ—विंशतिं वै ।
८. रा—चापि गत्वैव ।
९. ज ल भ—अगत्वा निश्चयं तांस्तु† समुद्धर्तुमशक्नुवन् ।
१०. ब—०मेयिवान् ।
११. ज ल भ—विधिना नरशार्दूल कालधर्ममुपेयिवान् ।
१२. ज—इन्द्रलोकगतो राजा स्वार्जितं स्वेन कर्मणा ।
ल—इन्द्रलोकं गतो ,, ,, ,, ,, ।
भ—इन्द्रलोके ,, राजान्निर्जितं ,, ,, ।

† ज—त्वां तु ।

८] राज्यं भगीरथे पुत्रे निक्षिप्य पुरुषर्षभे ॥[1]११॥ [१०
भगीरथोऽथ राजाऽभूद् धार्मिको रघुनन्दन ।
९] अनपत्यः स चाकांक्षन् सदृशीमात्मनः प्रजाम् ॥१२॥[3] [११
स तपो महदातिष्ठद् गोकर्णेऽनुपमद्युतिः ।[4]
१०] ऊर्ध्वबाहुः पञ्चतपा[5] ग्रीष्मे[6] भूत्वा यतव्रतः ॥१३॥ [१३
जलशायी च हेमन्ते वर्षास्वभ्राव···सनः ।
११] शीर्णपर्णकृताहारो यतात्मा जितमैथुनः ॥१४॥[6] [N
तस्य वर्षसहस्रान्ते तपसोग्रेण तोषितः ।
१२] आजगामाश्रमं ब्रह्मा प्रजानां पतिरीश्वरः ॥१५॥[1] [१५
वृतः सुरगणैः श्रीमान् विमानवरमास्थितः ।
१३] स एनमाभाष्य तदा तप्यमानं तपोऽब्रवीत् ॥१६॥[11] [१६

१. ज ल भ—*राज्ये भगीरथं पुत्रं निक्षिप्य ‡पुरुषर्षभं ।
२. ज ल भ—भगीरथोपि ।
३. ज ल भ—नास्ति ।
४. ज ल भ—नास्ति ।
५. ज—पंचतपो ।
६. ज ल भ—मिताहारो जितेंद्रियः ।
७. रा—जलाशये ।
८. रा—वर्षासुभ्रावकासन । पुनः ककारो लिखितः ।
ब—वर्षस्वभ्राव···सनः ।
९. ज ल भ—नास्ति ।
१०. ज ल भ—तस्य वर्षसहस्रेण तपस्युग्रे महात्मनः ।
ब्रह्मा प्रीतोभवद्राम प्रजानां प्रभुरीश्वरः ॥
११. ज ल भ—ततः सुरगणैः सर्वैः सहलोकपितामहः ।
भगीरथं तप्यमानं महात्मानं वचोब्रवीत्× ॥

*ल—राज्यं । ‡ पुरुषर्षभ । × भ—ततोऽब्र॰ ।

भगीरथ[1] महाभाग प्रीतस्तेऽहं नरेश्वर ।
१४] गृहाण वरमस्मत्तः कांक्षितं पृथिवीपते ।।[2]१७।।[3] [१७
तमुवाच ततो दृष्ट्वा ब्रह्माणं स्वयमागतम् ।[4]
१५] भगीरथो नरश्रेष्ठ कृताञ्जलिरिदं वचः ।।[5] १८।। [१८
यदि मे भगवान् प्रीतो यद्यस्ति तपसो[6] बलम् ।
१६] ततः[7] सगरपुत्रास्ते मत्तः सलिलमाप्नुयुः ।।१९।। [१९
गङ्गाजलप्लुते तस्मिन् देहभस्मनि चानघ ।
१७] गच्छेयुरमलाः स्वर्गं सर्वे नः प्रपितामहाः ।।२०।।[8] [२०
इयं च सन्ततिर्देव नावसानं[9] कथञ्चन[10] ।
२८] इक्ष्वाकूणां कुले गच्छेदेष मेऽस्त्वपरो[11] वरः ।।२१।। [२१
इत्युक्तवाक्यं[12] राजानं सर्वलोकपितामहः ।[13]

१. ल—भगीरथं ।
२. ज ल भ—तपसा त्वं सुतप्तेन वरं वर[य]सुव्रत ।
३. ब—नास्ति ।
४. ज ल भ—उवाच स‡ महात्मानं सर्वलोकपितामहं ।
ब—नास्ति ।
५. रा ज ल भ—भगीरथो महातेजा बद्ध्वा शिरसि चांजलिं ।
६. रा ज ल भ—तपसः फलम् ।
७. रा ज ल भ—सगरस्यात्मजाः सर्वे ।
८. रा ज ल भ—गंगासलिलसंक्लिन्ने ते भस्मनि महौजसः ।
*स्वर्गं गच्छेयुरत्यंत× सर्वे ते† प्रपितामहाः ।
९. कै भ—नावसादं ।
१०. ज ल भ—कदाचन ।
११. ज ल—मेस्तु वरो वरः । भ-मेस्तु वरः परः ।
१२. ज—उक्तवाक्यं च । भ-उक्तवाक्यं तु ।
१३. रा ल—नास्ति ।

‡ ल—सुमहात्मानं । * ज-स्वर्गे । × भ-रत्यंते । † भ-मे ।

१९] प्रत्युवाच शुभां वाणीं मधुराक्षरभूषिताम् ॥२२॥ [२२
तपोधन महाभाग भगीरथ महारथ ।
२०] एवं भवत्वविच्छिन्नमिक्ष्वाकुकुलमव्ययम् ॥[1]२३॥ [२३
इयं च गङ्गा प्रवरा सरितां स्वर्गतश्च्युता । [२४पू
२१] दारयेत् पृथिवीं सर्वां निपतन्ती महौघिनी ॥२४॥[2] [N
तदस्या धारणे राजन् महादेवः प्रसाद्यताम् ।[3] [२४उ
२२] गङ्गायाः पतनं [4]व्यक्तं भूमिः सोढुं न शक्ष्यति ॥२५॥ [२५पू
N] अतिवेगात् पतंती[5] गां भित्वा पातालमाविशेत् ।[6] [N
२३] तस्या धारयितारं च नान्यं पश्यामि शङ्करात् ॥२६॥ [२५पू
वेगं सुदुःसहं लोके[7] तस्मात् त्वं तं प्रसादय । [N
तमेवमुक्त्वा राजानं भगवान् प्रपितामहः ।
२४] आभाष्य च महीं नेतुं गङ्गां स त्रिदिवं ययौ ॥[10]२७॥[२६

इत्यार्षे रामायणे बालकाण्डे[11] भगीरथवरप्रदानं
नाम एकोनचत्वारिंशः[12] सर्गः ॥ ३९ ॥[13]

---

१. कै—०कुलसंभव । ज-०भवतु भद्रं वै चेक्ष्वाकु० ।
रा ज भ—भवतु भद्रं व इक्ष्वाकु० ।
२. रा ज ल भ—या सा देवनदी गंगा ज्येष्ठा हिमवतः सुताः ।
३. रा ज ल भ—तां वै धारयितुं राजन् शिवो देवः प्रसाद्यताम् ।
४. रा ज भ—राजन् । ल-राजं ।
५. ज ल—पतंतीं ।
६. कै—नास्ति ।
७. ब—मन्ये ।
८. रा ज ल भ—नास्ति ।
९. रा ज भ—गंगां चाभाष्य लोककृत् ।
ल—गंगामाभाष्य लोककृत् ।
१०. रा ज ल भ--नियुक्ता जगतीं गंतुं गंगां प्रतिययौ ततः ।
पुराणं देवसदनं सर्वदेवनमस्कृतः ॥
११. कै ब—आदिकाण्डे ।
१२. कै—चतुश्चत्वारिंशत्तमः । ब-नास्ति ।
१३. रा ज ल भ—सर्गसमाप्तिर्नास्ति ।

प्रजापतौ गते तस्मिन्नङ्गुष्ठाग्रप्रपीडितम् ।[1]
१] कृत्वा महीतलं[2] राजा संवत्सरमुपावसत्[3] ॥१॥ [१
ऊर्ध्वबाहुर्निरालम्बो वायुभक्षो निराश्रयः ।
२] अचलः[4] स्थाणुवत् स्थित्वा रात्रिन्दिवमतन्द्रितः ॥२॥[5] [२
अथ संवत्सरेऽतीते[6] सर्वदेवनमस्कृतः ।
३] उमापतिः पशुपतिर्भगीरथमभाषत ॥[7]३॥ [३
प्रीतस्तेऽहं[8] नरश्रेष्ठ करिष्यामि प्रियं[9] महत् । [४पू
४] पतन्तीं धारयिष्यामि दिवस्त्रिपथगां नदीम् ॥[10]४॥[11] [५उ
ततो हिमवतः शृङ्गमधिरुह्य महेश्वरः ।[12]

---

१. रा ज ल भ—देवदेव गते राम सोगुष्ठाग्रेण पीडिताम् ।
२. रा भ—वसुमती । ज ल—वसुमतीं ।
३. रा ज—०मुपागमत् । ल—०मुपागतम् ।
४. कै—अचला० ।
५. रा ज ल भ—नास्ति ।
६. रा ज ल भ—०त्सरे पूर्णे ।
७. रा ज ल भ—उमापतिः पशुपती राजानमिदमब्रवीत् ।
८. रा ज ल भ—तव ।
९. रा—प्रियाम् । ल—प्रियम् । ज भ—प्रियं ।
१०. रा ज ल भ—शिरसा धारयिष्यामि शैलराजसुतामिमां* ।
११. अतः परमधिकः पाठः—
रा ज ल—ततो हैमवतीं ज्येष्ठां सर्वलोकनमस्कृतां ।
भ—ततो हैमवती ह्येषा सर्वलोकनमस्कृता ।
अचिंतयत्तदा [गङ्गा] देवानामपि दुर्धरा ।
वसाम्यहं हि पातालमंभसागृह्य शंकरं ।
तथावलिप्तां विज्ञाय क्रुद्धोभूद्भगवान्हरः ।
१२. रा ज ल भ—ततः स हिमवंतं तमधिरुह्य महेश्वरः× ।

---

* ल भ—सुतामहम् । × ज—समंततः ।

५] निपतेत्यब्रवीद् गङ्गामाभाष्याकाशगां तदा[1][2] ॥५॥ [N
जटाकलापं विपुलं प्रविकीर्य[3] समन्ततः ।
६] बहुयोजनविस्तारं शैलकन्दरसन्निभम्[4] ॥६॥ [N
तस्मिन् पपात गगनाद् गङ्गा देवनदीच्युता ।
७] वेगेन महता राम शिरस्यमिततेजसः ॥७॥[5] [७
तत्र[6] संवत्सरं पूर्णं बभ्राम परिमोहिता[7] । [१२पू
८] गङ्गा शिरसि देवस्य निःसृता[8] वेगवाहिनी ॥८॥ [N
ततः प्रसादयामास पुनरेव भगीरथः ।
९] गङ्गायाः परिमोक्षार्थं[9] महादेवमुमापतिम् ॥९॥ [N
तस्याथ वचनाद् गङ्गामुत्ससर्ज भगाक्षिहा[10] ।
१०] जटामेकां समापीड्य[11] स्रोतः सञ्जनयन् स्वयम्[12] ॥१०॥ [N

---

१. रा ज ल भ—पतस्वेत्यब्रवी० । ब—निपतस्वेत्यब्रवी० ।

२. ज ल—तथा ।

३. कै—विनिकीर्य ।

४. भ—शैवकन्दर० । [लेखकान्तर लिखितम्]

५. अतः परमधिकः पाठः—

रा ज ल भ—उत्ससर्ज जलं तत्र तीव्रशब्दपुरस्कृतम्* ।
आकाशगंगामासाद्य धारयामास शंकरः ॥

६. रा ज ल भ—ततः ।

७. भ—प्रतिमोहिता ।

८. रा ज ल भ—विधृता । रा—पुनः शोधयित्वा कृतम् ।

९. कै—परिमोक्षाय ।

१०. कै—भगार्दनः । रा—भगाहिहा ।
ज—भगादिह ।

११. कै—समाक्षिप्य ।

१२. ल—द्वयम् ।

---

* भ—पुरः सरम् ।

स्रोतसा तेन सुस्राव गङ्गा त्रिपथगा नदी ।[1]
११] पावयन्ती जगद् रामं पुण्या देवनदी शुभा ॥११॥[2] [N
गगनाच्छंकरशिरस्ततश्च धरणीं गता ।
N] तां प्रच्युतामृषिगणाः शिरसा जगृहुस्तदा ॥१२॥[3] [N
N] सेन्द्रैः सुरगणैः सार्द्धं पूजयंतो महानदीम् ।
पू१२] ततो देवर्षिगन्धर्वा यक्षाः सिद्धगणास्तथा ॥[4]१३॥[5] [२१पू
उ१३] स्वयं चानुजगामैनां[6] ब्रह्मा लोकपितामहः ।[7] [N
तदद्भुततमं लोके गङ्गापतनमुत्तमम् ॥१४॥
१४] दिदृक्षवो देवगणाः समीयुरमितौजसः । [२३

---

१. रा ज ल भ—ततस्त्रिपथ० । कै—०त्रिपथगामिनी ।

२. रा ज ल भ—प्लावयन्ती जगद्राम ।

३. कै—नास्ति ।

४. रा ज ल भ—नास्ति ।

५. कै—अतः परमधिकः पाठः—
विमानैर्विविधै राम हयैर्गजवरैस्तथा ।

६. कै—चावजगा० । रा ज—चात्र जगामैतां ।
ल—चाद्राजगामैतां । भ— वात्र जगामै० ।

७. अतः परमाधिकः पाठः—
रा ज ल भ—नागाश्च शोधयामासु मार्गं* रम्यां × महौजसः ।
जेपुर्देवर्षयो ÷ जप्यं† सिद्धाश्च परमर्षयः ॥
जगुश्च देवगन्धर्वा यक्षाः सिद्धगणास्तथा ।
व्याकुलां पतितां गंगां गगनाद्गां गतां तथा ॥
विमानैर्गरुडैर्हंसैर्हयैर्गजवरैस्तथा ।
परिप्लवगताश्चान्ये देवतास्तत्राधिष्ठिताः ‡ ।

---

* भ—०सुमार्गं । × ज—तस्यां । ल—तस्या म० । ÷ ल—जपं ।
† भ—जाप्यं । ‡ भ—विमानैस्त० ।

संपतद्भिः सुरगणैस्तेषां चाभरणौजसा[1] ॥१५॥

१५] शतादित्यमिवासीत् तु गगनं गततोयदम्[2] । [२४

क्वचिद् द्रुततरं यायात् कुटिलं चायतं[3] क्वचित्[3] ॥१६॥

१६] विनम्रं[4] क्वचिदुद्वृत्तं शनैरपि पुनः पुनः[5] । [२७

सलिलेनैव सलिलं क्वचिदभ्याहनत्[6] पुनः ॥१७॥[7] [२८पू

१७] शिशुमारोरगगणैर्मीनैरपि[8] च चञ्चलैः ।

विद्युद्भिरिव विक्षिप्तमाकाशमभवद् वृतम्[9] ॥१८॥ [२५

१८] पाण्डुरैः [10]सलिलोत्पीडैः कीर्यमाणं सहस्रधा ।

शरच्छुभ्रमिवा[11]भाति गगनं हंससंप्लवैः[12] ॥१९॥ [२६

१९] पुनरूर्ध्वमधो[13] गत्वा पपात धरणीतले । [२८उ

---

१. रा ज ल —०स्तेषामाभरणौजसाम् ।
 भ —० ,, जसा ।

२. रा—नृततोयदम् ।

३. रा ज ल भ—क्वाचिदायतम् ।

४. कै—विततं ।

५. कै—रा ज भ--क्वचित् ।

६. कै—०दभ्यावधीत् ।

७. रा ज ल भ—अतः परमधिकः पाठः—

सुवेगोद्भ्रमितावर्ता× फेनमालावतंसका* ।
महाजलावर्तवती महाफेनप्रवाहिनी‡ ॥

८. ल—०णै पीनैरपि ।

९. रा ज ल भ—विचित्रैराकाश० । कै—०वच्छतम् ।

१०. कै—सलिलोत्पातैः ।

११. रा ल भ—शरच्छुद्ध० ।

१२. कै—हंसविप्लवैः ।

१३. रा ज ल—मुहूर्तार्धमधो । भ—मुहूर्तं तमधो ।

× ल—स्ववेगो० । * ज—फेन । ल—हेम मा० ।

‡ ज—महाफेण । ल—महाहेन ।

पू२०] तच्छङ्करशिरोभ्रष्टं[1] गतं भूमितलं पयः[2] ॥२०॥
N] विरराज तदा[3] तोयं[3] निर्मलं[4] गतकल्मषम् ।[5] [२९
उ२०] ग्रहाः सगण[6]गन्धर्वा वसुधातलनिवासिनः ॥२१॥ [३०पू
नागाश्च शोधयामासुर्मार्गमस्य[7] महौजसः ।[8] [N
२१] भवाङ्गसङ्गते[9] तोये[10] [11]पवित्रे तत्र[11] पूजिते ॥२२॥ [३०उ
[12]कृत्वाऽभिषेकं ते [12]सर्वे बभूवुर्गतकल्मषाः । [३१पू
२२] शापात् प्रपतिता ये [13]तु गगनाद्वसुधातलम् ॥२३॥ [३१उ
पूतात्मानः [14]पुनस्ते [14]च सलिलेन दिवं गताः । [३२
२३] जेपुर्देवर्षयो जप्यं सिद्धाश्च परमर्षयः ॥[15]२४॥ [N
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः । [N

---

१. रा ल—तज्ज[ज]हरशिरोभ्रष्टं । ज—उज्जहाशि० ।

२. रा ज ल भ—पुनः ।

३. रा—ततस्तोयं ।

४. रा—निर्मूलं ।

५. कै—नास्ति ।

६. ल—सघनगन्ध० ।

७. ब—०गमस्या ।

८. रा ज ल भ—नास्ति ।

९. रा ज—०संगतो ।

१०. रा ज—येन

११. रा ज ल भ—पवित्रत्वात्तु ।

१२. रा ज ल भ—कृत्वा तत्राभिषेकांते ।

१३. कै—च ।

१४. रा ज ल भ—पुनस्तेन ।

१५. रा ज ल भ—नास्ति ।

२४] मुनिसंघा[1] मुमुदिरे प्रह्लादं जगदाप च ॥२५॥[2] [N
त्रयोऽपि लोका मुदिता गङ्गाऽवतरणे तदा । [N
२५] भगीरथोऽपि राजर्षिर्[3]दिव्यं स्यन्दनमाश्रितः[3] ॥२६॥[4]
प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वयात्[5] । [३४
२६] महातरङ्गौघवती प्रनृत्यन्तीव राघव ॥[6]२७॥[7] [N
स्ववेगो[8]द्भासितजला पद्ममा[9]लाऽवतंसका ।
२७] महाज[10]लावर्तवती महावेगप्रवाहिनी ॥२८॥[11] [N
प्रययौ विलसन्ती च भगीरथपथानुगा ।[11]
२८] देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥२९॥ [३५
गन्धर्वयक्षप्रव[12]राः सकिन्नरमहो[13]रगाः ।
२९] सर्वाश्चाप्सरसो रा[14]म भगीरथरथानुगाः ॥३०॥ [३६
गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये । [३७

---

१. ब—मुनिसंगा ।
२. रा ज ल भ—नास्ति ।
३. रा ज ल भ—०दिव्यमारुह्य वै रथम् ।
४. ब—नास्ति ।
५. रा ज ल भ—०न्वगात् ।
६. रा ज ल भ—नास्ति ।
७. ब—नास्ति ।
८. ब—०गोद्भ्रमितावर्ता ।
९. ब—फेनमाला० ।
१०. ब—०वर्तनदी ।
११. रा ज ल भ—नास्ति ।
१२. रा ज ल—०प्लवगा ।
१३. ल— गंगायन्वमहोरगाः ।
१४. ज—वीर ।

३०] यतो[1] भगीरथो राजा[2] ततो[3] गङ्गा[4] यशस्विनी ॥३१॥
जगाम नरशार्दूल सर्वलोकनमस्कृता । [३७
३१] स गत्वा सागरं राजा[5] गङ्गयाऽनुगतस्तदा[6] ॥३१॥
प्रविवेश तलं भूमेः[7] खातं यत् सगरात्मजैः[7] । [४४.१
३२] उपानीय ततो गङ्गां रसातलतलं प्रभुः ॥[8]३३॥ [३२
तर्पयामास तान्[9] सर्वान् भस्मीभूतान् पितामहान् ।
३३] अथ गङ्गाऽम्भसा तत्र प्लाविताः सगरात्मजाः ॥३५॥[10]
दिव्यमूर्तिधरा भूत्वा जग्मुः स्वर्गं मुदा युताः । [४३
३४] तान् दृष्ट्वा प्लावितान् सर्वान् पितॄंस्तेन महात्मना ॥३५॥[11]
भगीरथमुवाचेदं ब्रह्मा सुरगणैः सह । [२ उ
३५] तारिता नरशार्दूल त्वया पूर्वपितामहाः ॥३६॥[12]

---

१. रा ज ल भ--यथा ।

२. भ—गंगा ।

३. रा ज ल--तथा । भ--तथा ।

४. भ—वा सा ।

५. कै--राम ।

६. रा ज ल—गंगायानुगतस्तदा ।

७. रा ज ल भ--भूमेर्यत्र ते भस्मसात्कृताः ।

८. रा ज ल भ—नास्ति ।

९. कै—ताः ?

१०. रा ज ल भ--भस्मन्यथाप्लुते तेन गांगोदेन† नरोत्तमः ।

११. रा ज ल भ—नास्ति ।

१२. रा ज ल भ--सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ।
तारितानि नृपश्रेष्ठ दिवं यातानि देववत् ॥

---

† ज--गंगोदेन । भ—गंगोघेन ।

षष्टिः[1] पुत्रसहस्राणि[2] सगरस्य महात्मनः । [३

३६] अक्षयः सगरस्यायं नाम्ना ख्यातो महोदधिः ॥३७॥[3]

व्यक्तं सागर इत्येवं ख्यातिं लोके गमिष्यति ।[3]

३७] यावच्च सागरो लोके स्थितोऽयमिह[4] शाश्वतः ॥[5] ३८ ॥

सगरः सहितः पुत्रैस्तावत् स्वर्गे निवत्स्यति ।[6] [६

३८] इयं च[7] दुहिता राजंस्तव[8] गङ्गा भविष्यति ॥३९॥

भागीरथीति विख्याता त्रिषु लोकेषु भूपते ।[9] [५

३९] गङ्गेति गमनाद् भूमेः[10] ख्याता भागीरथीति च ॥ ४०॥ [६

भविष्यति सरिच्छ्रेष्ठा लोके त्रिपथगति च ।[11]

---

१. ज—षष्टिं ।

२. ज—पुत्रसहस्रस्य ।

३. रा ज ल भ—नास्ति ।

४. ब—स्थितोहमिह ।

५. रा ल भ—सागरस्य जलं यावल्लोके स्थास्यति पार्थिव ।

६. रा ज ल भ—सगरस्यात्मजास्तावल्लोके* स्थास्यंति देववत्† ।

अतः परमधिकः पाठः—

रा ज ल भ—दिव्यमालांबरवृता‡ दिव्यमाल्यानुलेपनाः× ।
दिव्यरूपधराश्चैव भविष्यंति गुणान्विताः ॥

७. रा ज ल—तु ।

८. रा ज ल भ—ज्येष्ठा तव ।

९. रा ज ल भ—त्वत्कृतेन= च नाम्ना तु लोकधात्री÷ तु विश्रुता ।

१०. रा—प्रथमं नाम तथा । ज-प्रथितं । राजंस्तथा ।
ल भ—प्रथितं नाम तथा ।

११. रा ज ल भ—नास्ति ।

---

* ज-०स्यात्मजस्ता० । † ज-स्थास्यति । ‡ भ-दिव्यमाल्यांब० ।

× ल भ-दिव्यगन्धानु० । = भ-त्वत्कृते तव । ÷ ज लोकधात्रीतिवि०

४०] त्रिपथगेति नामास्यास्त्रिमार्गगमनादिदम् ।।[१]४१।। [६
त्रीँल्लोकान् पावयन्त्या[२] वै सुरर्षिभिरुदाहृतम् ।
४१] द्वितीयं चापि गङ्गेति गां गतायै[३] विशांपते ।।४२।।[४] [N
पू४२] भागीरथीति चाप्येतत् तृतीयं चापि सुव्रत ।
यावच्च भुवि गङ्गेयं भविष्यति महानदी ।।४३।।[५] [N
४३] तावत् तवाक्षया कीर्त्तिर्लोकेषु विचरिष्यति । [N
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ।।४४।।
४४] कुरुष्व सलिलं राजन् प्रतिज्ञा (ज्ञां ?) परिपालय । [७
पूर्वजेनापि[६] ते राजंस्तेनातियशसा सता[७] ।।४५।।[८]
४५] धर्म्मिणां[९] प्रवरेणापि नैष प्राप्तो मनोरथः । [८
तथैवांशुमता तात लोकेऽप्रतिमतेजसा ।।४६।।

---

१. कै—त्रिपथगेति चाप्येतत्तृतीयं चापि सुव्रत । मध्ये पाठं विच्छिद्य ४२ तमश्लोकस्य पूर्वार्द्धेन सह योजितः ।

रा ज ल भ—त्रिपथेति च नामास्यास्त्रिमार्गगमनात् स्मृतं ।

२. ज—पालयन्त्यो ।

३. रा ल भ—गतायां ।

४. कै—नास्ति ।

५. रा ज ल भ—भागीरथीति चाप्येव* तृतीयं नाम सुप्रभम् । भविष्यति च त्वत्प्रीत्या† मत्प्रीत्या च विचक्षण‡ ।

६. रा ज ल—पूर्व केनापि । भ—पूर्वे केनापि ।

७. रा ज ल भ—तदा ।

८. कै—कुरुष्व सलिलं राजंस्तेनातियशसा सता । अपरकरेण पूर्वपार्श्वे 'प्रतिज्ञामनुपालयन्' इति लिखितम् ।

९. रा ज ल भ—धर्मेण ।

---

* ज भ—चाप्येवं । † भ—त्वत्प्रीते । ‡ ज—विचक्षणः ।

रा—विचक्षणा ।

४६] गङ्गां प्रार्थयमाणेन न प्राप्तः काम एष हि ।[1] [९
राजर्षीणां[2] पुराणानां महर्षिसमतेजसाम्[3] ॥४७॥
४७] अतुल्यतपसा चापि[4] क्षत्रधर्मस्थितेन च । [१०
दिलीपेन महाभाग तव पित्राऽतितेजसा ॥४८॥
४८] पुनर्न[5] शंकिता तेन गङ्गां प्रार्थयताऽनघ[6] । [११
सा त्वया समनुप्राप्ता प्रतिज्ञा पुरुषर्षभ॥[7]४९॥
४९] प्राप्तोऽसि[8] परमं[9] लोके यशस्त्रिदशसम्मितम्[10] । [१२
यच्च गङ्गाऽवतरणं त्वया कृतमरिन्दम ॥५०॥[7]
५०] अनेन च महत्[11] प्राप्तं धर्मस्थानं त्वयाऽनघ ।[7] [१३
प्लावयस्व[12] स्वमात्मानं[13] नरोत्तम नरोचते[14] ॥५१॥
५१] सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो[15] भव । [१४
पितामहानां सलिलं कुरुष्व च यथासुखम् ॥५२॥

---

१. रा ज ल भ—नास्ति ।
२. रा ज ल भ—गुणवतां ।
३. रा ज ल भ—महर्षिप्रतिमौजसाम् ।
४. कै—वापि ।
५. कै—शोधितं । रा—शंकिता ।
६. भ—०नया ।
७. भ—नघ । मध्यस्थं पाठं भ्रान्तिवशादपहाय लिखितमिदम् ।
८. ज—प्राप्तासि ।
९. ज—परमे ।
१०. कै—०दशसम्मतम् ।
११. कै—त्वया ।
१२. रा ज ल भ—प्लावय त्वं ।
१३. कै—स्वमात्मानं ।
१४. कै—सदोचिते । रा ज ल भ—मयोदिते ।
१५. कै—०ण्यफलाय च । भ—पुण्यफला भव ।

५२] स्वस्ति तेऽस्तु गमिष्यामि स्वंलोकं[1] नरपुङ्गव[2] । [१५
इत्युक्त्वा भगवान् ब्रह्मा भगीरथमरिन्दम ॥[3]५३॥
५३] जगाम सहितो देवैर्ब्रह्मलोकमनामयम् ।[4] [१६
भगीरथोऽपि राजर्षिः कृत्वा तेषां जलैंक्रियाः ॥५४॥ [१७पू
५४] पितामहानां सर्वेषामयोध्यां पुनरागमत् ।[6]
समृद्धार्थो नँरश्रेष्ठो राज्यं चानुशशास ह ॥५५॥ [१८
५५] प्रमुमोद च लोकस्तं नृपमासाद्य राघव ।[8] [१८पू
इति[9] ते राम गङ्गाया विस्तरोऽभिहितो मया ॥५६॥
५६] स्वंस्ति प्राप्नुहि भद्रं ते सन्ध्याकाल उपस्थितः । [२०
धन्यं यशस्यमायुष्यं स्वर्ग्यं पावनमेव च[13] । [२१पू

१. रा ज ल भ—स्वगृहं ।

२. रा ज ल भ—गम्यतामिति ।

३. रा ज ल भ—इत्येवमुक्त्वा लोकेशः* सर्वलोकपितामहः ।

४. रा ज ल भ—यथागतं† जगामाथ ब्रह्मलोकं‡ पितामहः ।

५. रा ज ल भ—सलिलमुत्तमम् ।

६. रा ज ल भ—यथाक्रमं यथान्यायं‡‡ सागराणां रघूत्तम ।
रा ज ल भ—अतः परमाधिकः पाठः—
कृतोदकः शुची राजा स्वपुर प्रविवेश ह ।

७. कै—नरं श्रेष्ठो । रा ज ल भ—नरश्रेष्ठ ।

८. रा ज ल भ—अतः परमधिकः पाठः—
नष्टशोकः समृद्धार्थो× बभूव विगतज्वरः ।

९. रा ज ल भ—एष ।

१०. कै—स्वस्ति ।

११. रा ज ल—०कालोभिवर्तते । भ—०लोतिवर्तते ।

१२. रा ज ल भ—पुण्यं ।

१३. रा ल भ—स्वर्ग्यं तथैव । ज—स्वर्गं तथैव ।

* ज—सर्वेशः । † ल—यथामतं । ‡ ल—ब्रह्मलोके ।

‡‡ ल—यथान्याय्यं । × स सिद्धार्थो ब० ।

५७] इदमाख्यानमाख्यातं गङ्गाऽवतरणं मया[1] ॥५७॥ [२२पू

भागीरथीति विदिता भुवनत्रयेऽस्मिन्
पीयूषनिर्मलजलप्रचलत्तरङ्गा ।
[2]भस्मीकृताखिलजगत्कलुषा धरण्यां
N] स्वैरं प्रखेल[3]ैति विहंगमशब्दरम्या ॥५८॥ [N

इत्यार्षे रामायणे बालकाण्डे[4] गङ्गाऽवतरणो
नाम चत्वारिंशः[5] सर्गः ॥४०॥[6]

---

१. रा ज ल भ—शुभम् ।

२. रा ज ल—प्रज्वालिता० । भ—प्रक्षालिता० ।

३. रा ल भ—हि खेलति । ज—च खेलति ।

४. कै ब—आदिकाण्डे ।

५. कै —पञ्चचत्वारिंशत्तमः । ज—त्रयस्त्रिंशः ।
रा ब ल भ—नास्ति ।

६. भ— ॥ ३३ ॥

विश्वामित्रवचः श्रुत्वा राघवः[1] सहलक्ष्मणः ।
१] विस्मयं परमं गत्वा प्रोवाचेदं[2] वचस्तदा ॥१॥ [१
अत्यद्भुतमुपाख्यानं त्वयाऽऽख्यातं महामुने ।[3]
२] गङ्गाऽवतरणं पुण्यं सागरस्य[4] च पूरणम् ॥२॥ [२
इयं नो रजनी पुण्या गुणभूता भविष्यति ।[5]
३] इमां चिन्तयतामेव कथां पापभयापहाम् ॥[6]३॥ [३
ततः[7] सा शर्वरी सर्वा[8] सह सौमित्रिणा तदा ।
४] गता चिन्तयतश्चैव विश्वामित्रस्य तां कथाम् ॥४॥ [४
ततः प्रभाते विमले विश्वामित्रं महामुनिम् ।
५] उवाच रामः सत्कृत्य कृत्वाह्निकमिदं[9] वचः ॥[10]५॥ [५
गता भगवती रात्रिः श्रोतव्यं परमं श्रुतम् । [६

---

१. कै—रामो दशरथात्मजः ।
२. रा ज ल भ—विश्वामित्रमथाब्रवीत् ।
३. रा ज ल भ—अत्यद्भुतमिदं ब्रह्मन्कथितं परमं त्वया ।
४. रा ज ल भ—समुद्रस्य ।
५. रा ज ल भ—क्षणभूता हि रात्रिर्मे वृत्तेयं सुमहाव्रत ।
६. रा ज ल भ—इमां चिंतयतः सर्वां निखिलेन कथां* तव† ।
७. कै—तस्या सा रजनी पुण्या ।
८. रा ज ल भ—चिंतयतस्तस्य ।
९. कै—कृताह्निक० ।
१०. रा ज ल भ—उवाच राघवो वाक्यं कृतपूर्वाह्निकक्रियः ।

---

* भ—कथं । †रा—इव ।

६] सन्तरामः सरिच्छ्रेष्ठां पुण्यां त्रिपथगां नदीम् ॥[1]६॥ [७
इयं[2] नौः[2] सुविस्तीर्णा[3] सन्तारयितुमापगाम्[4] ।
७] भवन्तमिह संप्राप्तं दृष्ट्वैवेति मतिर्मम ॥[5]७॥ [७
इत्येतद् वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः ।
८] सन्तारं कारयामास विश्वामित्रो महामुनिः ॥८॥[6] [८
उत्तरं तीरमासाद्य[7] ततः स मुनिपुङ्गवः[8] ।
९] अपश्यत् तत्र निरतांस्तापसान् नियतव्रतान् ॥[9]९॥ [९
स तान् संपूज्य विधिवज् जगाम सहराघवः ।[10]
१०] विशालां[11] नगरीं रम्यां दिव्यां[12] स्वर्गपुरीमिव ॥१०॥ [१०
ततो रामो महाबुद्धिर्विश्वामित्रमिदं तदा ।[13]

---

१. रा ज ल भ—*तराम: सरितां श्रेष्ठां पुण्यां †त्रिपथगामिनीम् ।

२. रा ल—कथा श्रुता । भ—नौरेषा हि ।

३. रा ज ब ल भ—सुविस्तीर्णा ।

४. रा ज ल—मुनीनां पुण्यकर्मणां । भ—मुनीनां भावितात्मनां ।

५. रा ज ल भ—भगवंतमिह प्राप्तं ज्ञात्वा त्वरितमागता ।

६. रा ज ल भ—तस्य तद्वचनं श्रुत्वा राघवस्य महानृषि: ।
सन्तारं तारयामास सर्षिसंघ:X सराघव: ॥

७. रा ज ल भ—कूलमासाद्य ।

८. रा ज ब ल—संपूणार्षिगणं तत: । भ—संपूज्यर्षिगणं तत: ।

९. रा ज ल भ—गंगातीरे निविष्टास्ते विशालां ददृशुः पुरीम् ।

१०. रा ज ल भ—ततो मुनिवरो द्रष्टुं जगाम सहराघव: ।

११. कै—विशालं ।

१२. ज—दिव्यं ।

१३. रा ज ल भ—अथ रामो महाप्राज्ञो विश्वामित्रं महामुनिं ।

---

*ज—तां रामः । भ—स रामः । † भ—०गामिमां । Xज—सर्षि-
संगः ।

११] पप्रच्छ प्राञ्जलिर्भूत्वा विशालां[1] प्राप्य तां पुरीम् ॥११॥[११
कतमो[2] राजवंशोऽयं विशालस्य महात्मनः[3] ।
१२] श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥१२॥[4] [१२
तस्य तद्वचनं श्रुत्वा राघवस्य मुनिस्तदा ।
१३] आख्यातुमुपचक्राम विशालस्य[5] पुरातनम् । [१३
श्रुता मयेयं शक्रस्य पुरा कथयतः कथा ॥[6]१३॥
१४] यथा दिवि सभामध्ये शृणु तां मम राघव । [१४
आसन् कृतयुगे राम दितेः पुत्रा महाबलाः ॥[7]१४॥
१५] अदितेश्च महावीर्याः सुवीर्यबलदर्पिताः।[8] [१५
भ्रातरः स्पर्धिनः पुत्राः कश्यपस्य महात्मनः॥[9]१५॥ [N

---

१. कै—वैशाली: । रा ज भ—विशालामुत्तमां ।

२. रा ल भ—कतरो ।

३. रा ज ल—महामुने ।

४. कै—नास्ति ।

५ कै—विश्वामित्रो महातपाः ।

६. रा ज ल भ—*श्रुता मया महेन्द्रस्य कथां कथयतः शुभां ।

७. रा ज ल भ—तां मे निगदतो वत्स शृणु तत्त्वेन राघव ।
पूर्वं कृतयुगे वीर दितिपुत्रा महाबलाः ॥

८. रा भ—अदितेश्च समानार्था वीर्यवंतो महाबलाः ।
ज—,, समानार्यो ,, ,,
ल—अदितेः शसमनार्या ,, ,,
रा ज ल भ—अतः परमाधिकः पाठः—
ततस्तेषां नरश्रेष्ट बुद्धिरासीन्महात्मनां ।

९. भ—नास्ति ।

---

*ल—श्रुत्वा । † रा—निगादितो ।

१६] मातृष्वस्रीया:[1] सापत्नाः परस्परजिगीषवः ।[2] [N
तेषां किल समेतानां[3] बुद्धिरासीन्महौजसाम्[4] ॥१६॥

१७] अजराश्चामराश्चैव कथं स्यामेति राघव । [१६
तेषां चिन्तयतां राम बुद्धिरासीत् सुनिश्चला[5] ॥१७॥[6]

१८] क्षीरोदसागरं सर्वे मथ्नीमः सहिता वयम् ।[7] [१७
नानौषधीः[8] समाहृत्य प्रक्षिप्य च ततस्ततः ॥१८॥ [N

१९] यत्तत्रोत्पत्स्यते[9] सारं तत् पास्यामस्ततो वयम् ।
तेनाजरामरा[10] लोके[11] भविष्यामो गतज्वराः ॥१९॥ [N

२०] तेजोवीर्यबलोपेताः[12] कान्तिद्युतिसमन्विताः । [N
इति ते निश्चयं कृत्वा ममन्थुर्वरुणालयम् ॥२०॥

---

१. कै—मातृस्वश्रेयाः ।

२. रा ज ल भ—नास्ति ।

३. भ—ततस्तेषां नरश्रेष्ठ ।

४. रा—॰रासीद्विनिश्चिता । भ—॰रासीन्महात्मनां ।

५. ज ल—विनिश्चिता ।

६. रा भ—नास्ति ।

७. भ—नास्ति ।

रा ज ल भ—अत: परमाधिक: पाठः—
क्षीरोदमथनाद्दिर रसं संभाव्य तत्र वै ।

८. रा ज ल भ—सर्वौषधीः ।

९. रा ज ल भ—यदत्रोत्पस्यते ।

१०. रा ल—तथाजरामरा । ज—तथाजरामा? । भ–तथा तथाजरा ।

११. ज—लोके च ।

१२. रा—तेषां वीर्यबलोन्मत्ताः ।

ज ल भ—तेजोवीर्यबलोन्मत्ताः ।

२१] मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा च वासुकिम् ।[1] [१८
अप्सु निर्मथ्यमानासु[2] रसात् तस्माद् वरस्त्रियः[3] ॥२१॥
२२] उत्पेतुस्तु रसाद् यस्मात् तस्मादप्सरसः स्मृताः ।[4] [३३
षष्टिः कोट्योऽभवन् राम तासामप्सरसां तदा ॥[5] ।२२। [३४पू
२३] दिव्यानां दिव्यरूपाणां दिव्याभरणवाससाम् ।
रूपयौवनमाधुर्यगुणाढ्यानां सुवर्चसाम् ॥२३॥ [N
२४] असंख्येया[6] बभूवुश्च यास्तासां[7] परिचारिकाः । [३४उ
N] तास्ततः[8] प्रतिसंप्राप्ता जगृहुर्देवदानवाः ॥२४॥[9]
उ२५] अप्रतिग्रहणात् ताश्च सर्वाः साधारणीकृताः ।[10] [३५
वरुणस्य ततः कन्या वारुणी रघुनन्दन ॥२५॥

---

१. रा ज ल भ—तेथ निश्चित्य मनसा नेत्रं कृत्वा † तु वासुकिम् ।
मंथानं मंदरं चैव *ममन्थुः पुरुषोत्तम ॥

२. रा—निर्मंथ्यमानासु ।

३. रा—०स्मात्सुरस्त्रियः । ल—०स्मात्सरस्त्रियः ।
भ—रम्यात् तस्माद्वराः स्त्रियः ।

४. रा ज ल भ—उत्पेतुः पयसस्तस्मात् ।

५. ज भ—षष्टिः कोट्यस्तु ‡संभूतास्तस्मादप्सर[सः]पुरा ।
ल—षष्टिकोट्यस्तु काकुत्स्थ यास्मादप्सरसः पुरा ।

६. ज ल भ—असंख्येयास्तु काकुत्स्थ ।

७. रा—यस्तासां ।

८. ज—ततस्ताः ।

९. कै रा—न त्वेता जगृहुर्देवास्तत्र दैत्याश्च राघव ।
कै पुस्तके पाठममुं छित्त्वा पुनरपरकरेण मूलस्थपाठो विन्यस्तः ।

१०. ज ल भ—अप्रतिग्रहणाच्चैव ततःसाधारणास्तु ताः ।

---

† ज—कृत्वाथ । *ल—कृत्वा । ‡भ—षष्टिको० ।

२६] उत्पपात रसात्[1] तस्मान् मार्गमाणा[2] परिग्रहम् । [३६
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजाम् ॥२६॥
२७] अदितेस्तु सुताः प्रीतास्तामगृह्णन्त वै सुराः । [३७
सुरापरिग्रहाद् देवाः सुरा इत्यभिविश्रुताः ॥[3] २७॥
२८] अप्रतिग्रहणात् तस्या दैतेया[4] असुरास्तथा ।[5] [३८ पू
उच्चैःश्रवाश्च[6] तत्राश्वो मणिरत्नं च कौस्तुभम् ॥२८॥ [३९ पू
२९] तस्मादेतत्[7] समुद्भूतममृतं[8] चाप्यनन्तरम् । [N
अमृतानन्तरं चापि धन्वन्तरिर्[9] जायत ॥२९॥
३०] वैद्यराडमृतस्यैव बिभ्रत् पूर्णं[10] कमण्डलुम् । [३२ पू
धन्वन्तरेस्तदुद्भूतं[11] विषं लोकविषादकृत् ॥[12] ॥३०॥ [N

१. ज ल भ—महावीर्या ।
२. ज ल भ—वांछमाना । ब—वांछिमाना ।
३. ज ल भ—आदितेस्तु †सुता वीरा जगृहुस्तामनिंदितां ।
तेनाभवन्सुरा देवा दैतेया *श्चासुरास्ततः ॥
४. रा—दैत्येया ।
५. ज—हृष्टाः प्रमुदिताश्चासन्वारुण्यांग्रहणात्सुराः ।
ल—हृष्टाः प्रमुदिताश्चासं वारुणीग्रहणात्मनाः ।
भ—हृष्टाः प्रमुदिता आसन्वारुणीयहणात्सुराः ।
६. ल भ—उच्चैःश्रवास्तु ।
७. ज—तस्मादेव च । ल भ—तस्मादेव ।
८. ज—संभूतममृतं ।
९. रा ज ल भ—धान्वंतरि० ।
१०. रा—पूर्णक० ।
११. रा—धान्वंतरे तदद्भूतं । ज ल—धान्वंतरेरनुद्भू० ।
ब भ—धन्वंतरेरनुद्भूतं ।
१२. ज ल—सर्वविषाददम् । भ—सर्वविषादनं ।

†ल—सुरा । *०तेया असुरा० ।

३१] तन्नागा[1] जगृहुः सर्वे ज्वलनादित्यसन्निभम् । [N
तत्रामृतार्थे[2] देवानामसुराणां च विग्रहः ॥[3]३१॥ [४७ पू
३२] आसीद् बलवतां राम लोकक्षयकरो महान् ।[4] [४८ उ
तस्मिन् विमर्दे महति तेषाममिततेजसाम् ॥[5] ३२॥
३३] अदितेरात्मजा राम निजघ्नुस्तान् दितेः सुतान्[6] ।[7] [५१
निहत्य च[8] दितेः पुत्रान् राज्यं प्राप्य पुरन्दरः ।
३४] मुमोदर्द्धिं[9] परां प्राप्य सर्वदेवाभिपूजितः ।[10]॥३३॥ [५२

इत्यार्षे रामायणे बालकाण्डे[11] अमृतमथने अमृतोत्पत्तिर्नाम
एकचत्वारिंशः[12] सर्गः ॥ ४१ ॥[13]

१. ज ल भ—तं नागा ।
२. रा—तत्रामृतार्थी ।
३. ज ल भ—दृष्ट्वा देवास्ततोधावन्नमृतं चापि भास्वरं ।
४. ज ल भ—अमृतस्य कृते राम महानासीत्कुलक्षयः ।
५. ज ल भ—नास्ति ।
६. के—सुरान् ।
७. ज ल भ— अदितेरात्मजास्तत्र दि*तिपुत्रान्निजघ्निरे ।
८. ज ल भ—तु ।
९. रा—मुमोचार्द्धिं ।
१०. ज ल भ—विज्वरो निहितामित्रो †विबुधैर्मुमुदे सह ।
ज ल भ—तदा तु मुदिता लोका सर्षिसंघाः सचारणाः ।
११. के ब—आदिकांडे ।
१२. के रा—षट्चत्वारिंशत्तमः । ब—नास्ति ।
१३. ज ल भ—सर्गसमाप्तिर्न दृश्यते ।

*—दितेः पु० । †ल भ—मुमुदे विबुधैः ।

हतपुत्रा[1] ततो देवैर्दितिः परमदुःखिता ।[2]
१] मारीचं[3] कश्यपं देवी[4] भर्तारमिदमब्रवीत् ॥१॥ [१
हतपुत्राऽस्मि भगवन् पुत्रैः शक्रादिभिस्तव[5] ।
२] शक्रहन्तारमिच्छामि[6] पुत्रं दीर्घतपोऽर्जितम् ॥२॥ [२
साऽहं तपः[7] करिष्यामि गर्भमाधातुमर्हसि ।
३] तत्र मे शक्रहन्तारं पुत्रं त्वं जनयिष्यसि ॥[8] ३॥ [३
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा ।
४] प्रत्युवाच महातेजा दितिं परमदुःखिताम्[9] ॥४॥ [४
एवं भवतु भद्रं ते शुचिर्भव तपोधने ।
५] जनयिष्यसि पुत्रं त्वं शक्रहन्तारमीप्सितम्[10] ॥५॥ [५

---

१. कै—हतपुत्रस्ततो ।

२. ज ल भ—हतेषु पुत्रेषु दितिः परं दुःखेन मोहिता ।

३. रा—मारीचीं ।

४. ज ल भ—राम ।

५. ज ल—०वंस्तव पुत्रैर्महात्मभिः ।

भ—०वन् तव पुत्रैर्महात्मभिः ।

६. ज—०हर्तारमिच्छामि ।

७. ज ल भ—तपश्चरिष्यामि । व—तप्त करिष्या० ।

८. ज ल भ—ईदृशं शक्रह†न्तारं त्वमनुज्ञातुमर्हसि ।

९. ज—०दुःखितं ।

१०. ज—शक्रहर्तारमाहवे । ल भ—०हंतारमाहवे ।

---

†ज—शक्रहर्तारं । भ—क्रतुहन्तारं ।

पू६] पूर्णे वर्षसहस्रे च शुचिर्यदि भविष्यसि ।
N] पुत्रं त्रैलोक्यहन्तारं[2] मत्तो[3] वै[3] जनयिष्यसि ॥६॥ [६
उ६] एवमुक्त्वा महातेजाः पाणिना सम्ममार्ज ताम् ।
संस्पृश्य चोक्त्वा स्वस्तीति जगाम तपसे मुनिः ॥[4]७॥ [७
७] गते तस्मिन् मुनिश्रेष्ठे[5] दितिः परमहर्षिता[6] ।
उदक्प्रस्रवणे देशे तप आतिष्ठदुत्तमम् ॥[7]८॥ [८
८] चरन्त्याश्च तपस्तस्याः परां सन्नतिमास्थितः ।
परिचर्यां स्वयं शक्रश्चकाराधनतत्परः ॥९[8]॥ [९
९] समित्कुशं मूलफलं पुष्पमग्निं तथा जलम् ॥[9]१०॥ [१०
प्रयत्नवानाजहार तस्याः काले पुरन्दरः ॥[10]११॥ [११

---

१. ज ल भ—त्वं ।

२. ज—०हर्तारं । कै रा—त्वं शक्रहर्तारं ।

३. ज ल भ—ततस्त्वं ।

४. ज ल भ—संमार्ज्य †चात्र भवनं जगाम स महानृषिः ।

५. ज ल—नरश्रेष्ठ । भ—नरश्रेष्टे ।

६. भ—परमदुःखिता ।

७. ज ल भ—कुशप्रवणमासाद्य तपस्तेपे सुदारुणम् ।

८. ज ल भ—तपस्तस्याश्च कुर्वत्याः परिचर्यां चकार ह ।
सहस्राक्षो नरश्रेष्ठ *परया भक्तिसंपदा ॥

९. ज ल भ—‡समिधोऽग्निं कुशान्पुष्प×महीमूलफलं हविः ।
समिधोऽग्निकुशान्पुष्पं महीं मूलं फलं हविः ॥

१०. कै ज ल भ—शक्रो न्यवेदयत्तस्यै यच्चान्य÷दपि कांक्षितं ।

---

†ल—च त्रिभुवनं । *ल—०क्षोऽमरश्रेष्ठो । ‡ज—समिद्धो० ।

×भ—पुष्पं महीमूलं फलं । ÷ज—०न्यदाभकां० ।

१०] गात्रसंवाहने चैव श्रमापनयने तथा ।[1]
शक्रः सर्वेषु कार्येषु[2] दितिं परिचचार ह ॥११॥ [११
११] गते[3] वर्षसहस्रे तु दशोने[3] रघुनन्दन ।
दितिः प्रीता सहस्राक्षमिदं वचनमब्रवीत ॥[4]१२॥ [१२
१२] प्रीता तेऽहं सहस्राक्ष दशवर्षाणि पुत्रक ।
अवशिष्टानि भद्रं ते द्रष्टासि[5] भ्रातरं ततः ॥१३॥ [१४
१३] तमहं त्वत्कृते पुत्र समाधास्ये यथा[6] तथा[6] ।
पू१४] सौभ्रात्रेणैव सहितस्त्वं हि राज्यमवाप्स्यसि ॥[7]१४॥ [१५
N] त्रैलोक्यं निखिलं पुत्र भोक्ष्यर्थः[8] सह विज्वरौ ।[9] [N
उ१४] एवमुक्त्वा[10] दितिः[11] [11]शक्रं विश्वस्ता[12] शक्रसंन्निधौ[12] ॥१५॥ [१६
उ१५] कृतपादा[13] शिरःस्थाने[13] प्राप्ते[14] मध्यं दिवाकरे[14] ।

---

१. ज ल भ—गात्रसं†वाहने *चात्र श्रमापनयनेन सः ।
२. ज ल भ—कालेषु ।
३. ज ल भ—अथ वर्षशते पूर्णे दशमे ।
४. ज ल भ—दितिः परमसुप्रीता सहस्राक्षमुवाच ह ।
५. ज ल भ—भ्रातरं द्रक्ष्यसे ।
६. कै ज ल भ—जयोत्सुकं ।
७. ज ल भ—नास्ति ।
८. भ—भोक्ष्येथे ।
९. कै रा—नास्ति ।
१०. रा—एवमुक्तः ।
११. कै रा—ततः ।
१२. ज ल भ—नास्ति । कै—वर्ज्यचिन्हेनाबद्धः ।
१३. ज ल भ—नास्ति ।
१४. ज—प्राप्ते मध्ये दिवाकरे ।

---

†भ—॰संवाहनं । *ल—चापि

पू १५] निद्रयापहृता देवी[2] पादौ कृत्वा तु शीर्षतः ॥१६॥[3] [१६
दृष्ट्वा तामशुचिं[4] शक्रः पादयोः कृतमूर्द्धजाम्[5] ।
१६] वैपरीत्येन सुप्तां च मुमुदे[6] च जहास च ॥१७॥ [१७
तस्याः शरीरं विकृतं प्रविश्य बलसूदनः ।[7]
१७] बिभेद सप्तधा गर्भं वज्रेण शतपर्वणा ॥१८॥[8] [१८
एकैकं चैव गर्भं[9] स पुनश्चिच्छेद सप्तधा ।
१८] विस्फुरन्तं[10] बलाद् राम रुदन्तं चार्तया[11] गिरा ॥१९॥ [N
भिद्यमानस्तदा[12] गर्भः कुक्षौ वज्रेण वज्रिणा ।[13]
१९] रुरोद सुस्वरं राम ततोऽदितिरबुध्यत ॥२०॥ [१९
मा रोदीरिति तं शक्रः[14] प्ररुदन्तमभाषत[14] ।
२०] बिभेद चैवं वज्रेण रुदन्तमपि वासवः ॥[15] २१॥ [२०

---

१. ज—निद्रयापहृतां । ल—दिद्रायां पहृतां ।
२. ज ल—देवीं ।
३. रा—कृतपादा शिरःस्थाने मुमुदे च जहास च ।
४. ज ल—तामशुचिः ।
५. ज ल—कृतायां शिरसःस्थाने । भ—कृतायाः शिरसः स्थाने ।
६. क ज ल भ—जहास मुदितोपि च ।
७. ज ल—विवेश स पुरंदरः । भ—प्रविवेश पुरंदरः ।
८. ज ल भ—गर्भं च सप्तधा †राम बिभेद परमात्मवान् ।
९. ज ल—गर्भांस्तु ।
१०. ज—विस्फुटं तु । ब ल—विस्फुटंतं ।
११. ज—रुरोदैवार्तया । ल—रुरोदैवांतया ।
१२. भ—नास्ति ।
१३. ज ल भ—भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ।
१४. ज ल भ—शक्रो गर्भं चैवाभ्यभाषत ।
१५. ज ल भ—बिभेद च महातेजा एकैकं सप्तधा पुनः ।

---

†भ—कृत्वा ।

न[1] हन्तव्यो न हन्तव्यं[1] इति[2] तं[2] दितिरब्रवीत् ।
२१] निर्ययौ[3] च ततः शक्रो मातुर्वचनगौरवात् ॥२२॥ [२१
प्राञ्जलिश्चाब्रवीदेनां विनिःसृत्याग्रतः स्थितः ।[4]
२२] अशुचिर्देवि सुप्ताऽसि पादयोः[5] कृतमूर्धजा ॥२३॥ [२२
लब्ध्वा तदन्तरं चाहं[6] मद्विनाशार्थमाहितम् ।[7]
२३] गर्भं[8] ते हतवान् देवि तन्मे त्वं क्षन्तुमर्हसि ॥२४॥ [२३

इत्यार्षे रामायणे बालकाण्डे[9] दितिगर्भच्छेदो[10] नाम
द्विचत्वारिंशः[11] सर्गः ॥४२॥[12]

---

१. रा—न हंतव्यं न हंतव्यं ।
२. ज ल भ—इत्येवं ।
३. ज भ—निर्ययावथ देवेशो । ल—निर्ययाविति देवेशो ।
४. ज ल भ—प्राञ्जलिर्वज्रसहितो दितिंचैवाभ्यभाषत ।
५. ज ल भ—पादतः ।
६. रा—वीर्यं ।
७. ज ल भ—तदंतमहं लब्ध्वा †शक्रहंतारमाहवे ।
८. ज ल भ—भिन्नवान्सप्तधा ।
९. कै ब—आदिकाण्डे ।
१०. ज—दितिगर्भच्छेदभेदो । ल—गर्भविभेदनं ।
भ—भेददर्शनो ।
११. कै रा—सप्तचत्वारिंशः । ज—चतुस्त्रिंशः ।
ब भ—नास्ति ।
१२. भ—॥ ३४ ॥

---

† ज—शक्रहर्तारमा० ।

एकोनपञ्चाशद्धा तु भिन्ने गर्भे तदा दितिः ।
१] सहस्राक्षं दुराधर्षमुवाच भृशदुःखिता ॥१॥[1] [१
ममापराधाद् गर्भोऽयं सप्तधा विदलीकृतः ।
२] नापराधोऽस्ति देवेश भवतः[2] स्वहितैषिणः[3] ॥२॥[4] [२
एवं गतेऽपि वत्स त्वं प्रियं मे कर्तुमर्हसि[5] ।

---

१. ज ल भ--सप्तधा तु हते1 गर्भे दितिः परमदुःखिता ।
सहस्राक्षं दुराधर्षं2 वाक्यं सानुनयाब्रवीत् ॥

२. ज ल भ—तव ।

३. रा—सुहितैषिण: । ज ल भ—कश्चन पुत्रक ।

४. ज ब ल भ--अतः परमधिकः पाठः—

प्रियं तु कृत3मिच्छेयमस्मिन्गर्भविपर्यये ।
सप्त स्थानानि सप्तैते मरुतः4 पालयंतु ते ।
वातस्कन्धाः5 सदा सप्त चरंतु6 मम पुत्रक ।
मरुतश्चेति च7 विख्याता दिव्यरूपा महाबलाः ।
ब्रह्मलोकं चरत्वेक 8इंद्रलोकं तथापरः 8।
विश्वग्वायुरिति9 ख्यातस्तृतीयस्तु महायशाः ।
चत्वारस्तु नरश्रेष्ठ दिशो वै तव शासनात् ।
संचरिष्यंति भद्रं ते देवरूपा महाबलाः ।
त्वत्कृतेनैव मरुत इति नाम्ना च विश्रुताः ।
संचरिष्यंति भद्रं ते कालेन हि ममात्मजाः ।

५. ब--नास्ति ।

---

1. ब ल भ--कृते । 2. ज—दुराधर्षा । 3. ज--गतमि० । 4. ज—मारुतः । 5. ज ब ल—वातस्कन्दाः । 6 ब—वर्धतु । ल—वरंतु । 7. ज—मरश्चेति च । ब--मारुतश्चेति । 8. ज--चरत्वेके इन्द्रलोके तथापरे । 9. भ-विष्वग्मत इति ।

३] इमे ते सप्तधा सप्त मरुतो नाम विश्रुताः ॥३॥[२] [३
चरन्त्वाज्ञाकराः[३] सप्त वातस्कन्देषु सप्तसु । [४पू
४] सहैभिर्मम पुत्रैस्त्वं मरुद्भिर्जहि[४] शात्रवान्[५] ॥४॥[६] [N
ब्रह्मलोके चरन्त्वेके[७] इन्द्रलोके तथापरे ।[८] [५पू
५] दिक्षु चैतासु सर्वासु विचरन्तु तवाज्ञया ॥५॥[६] [N
दिव्यमूर्तिधरा भूत्वा मरुतोऽमृतभोजनाः ।
६] तवैवाज्ञाकरा[९]ः शक्र कुरुष्वैतद्वचो मम ॥६॥[६] [N
तस्यास्तद्वचनं श्रुत्वा शक्रः[१०] शक्तिमतां वरः ।
७] उवाच प्राञ्जलिर्वाक्यमेवमस्त्विति राघव ॥[११]७॥[१२] [७
त्वत्कृतेनैव नाम्ना हि भविष्यन्ति तवात्मजाः ।[१३]
८] ख्याता मरुत इत्येते दिव्यरूपा ममाज्ञया ॥८॥ [६ उ
सर्वमेतद् यथातथ त्वं करिष्ये ऽहमशेषतः ।

---

१. रा ज—सप्तभिः ।
२. ल भ—नास्ति ।
३. रा—चरंत्वाज्ञाः कराः । ज—चरन्त्वातेकराः ।
४. रा—महद्भिर्जहि ।
५. रा—शातवान् ।
६. ल भ—नास्ति ।
७. रा—चरन्त्वेमे ।
८. ज—त्वत्कृतेनैव नाम्ना हि भविष्यंति तवात्मजाः ।
ख्याता मरुत इत्येते दिव्यरूपा ममाज्ञया ॥
एष देशः स काकुत्स्थ महेन्द्राद्युषितः पुरा ।
दितिं यत्र तपःसिद्धामेवं परिचचार सः ॥
९. ज —तथैवाज्ञाकराः ।
१०. ल भ—सहस्राक्षः पुरंदरः ।
११. ल भ—उवाच प्राञ्जलिर्वाक्यं दितिं बलनिषूदनः ।
१२. ज—नास्ति ।
१३. ज ल भ—नास्ति ।

९] अमृतप्राशिनः पुत्रा इमे ते सहिता मया ॥९॥[1] [N
विचरिष्यन्ति लोकांस्त्रीन् निर्भया विगतज्वराः।
१०] निर्वृता भव भद्रं ते करिष्ये वचनं तव ॥१०॥[1] [N
सर्वमेतद् यथोक्तं ते भविष्यति न संशयः। [८ पृ
११] एवं तौ निश्चयं कृत्वा मातापुत्रौ[2] परस्परम्[3] [4]॥११॥
जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतम्। [९
१२] एष देशः स काकुत्स्थ महेन्द्राध्युषितः पुरा[5]॥१२॥
दितिं यत्र तपःसिद्धामेवं परिचचार सः।[6] [१०
१३] इक्ष्वाकोरत्र[7] राजर्षेः पुत्रः परमधार्मिकः ॥१३॥
अलंबुसायामुत्पन्नो[8] विशाल इति विश्रुतः[9]। [११
१४] तेनेयं निर्मिता राम वैशाली[10] नगरी पुरी[11] ॥१४॥
विशालस्य सुतो राम हेमचन्द्रोऽभवन्नृपः[12]। [१२

---

१. ल भ—नास्ति।
ज—अतः परमधिकः पाठः—
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षःपुरंदरः।
उवाच प्रांजलिर्वाक्यं दितिं बलनिसूदनः॥
२. ज भ—मातृपुत्रौ।
३. ज भ—तपोवने।
४. ल—तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमाम्।
५. ज ल भ—नास्ति।
६. ज ल—विश्वग्वायोस्तु। भ—विष्वग्वायोस्तु।
७. ज ल भ—काकुत्स्थ।
८. भ—अलंवुषाया०।
९. ज ल भ—नः श्रुतम्।
१०. रा—वैशाली।
११. ल—भुवि। भ—शुभा।
१२. ल भ—महाबलः।

१५] सुचन्द्र इति विख्यातो हैमचन्द्रिर्महायशाः[1] ॥१५॥ [१३
सुचन्द्रतनयो राम धूम्राश्व[2] इति विश्रुतः ।
१६] धूम्राश्वतनयो[3] राम सञ्जयः[4] समजायत ॥[5] १६॥
सञ्जयस्य[6] सुतः[7] श्रीमान् सहदेवः प्रतापवान् । [१४
N] कृताश्वः[8] सहदेवस्य पुत्रः परमधार्मिकः ॥१७॥
कृताश्वस्य[9] महातेजाः सोमदत्तः सुतोऽभवत् ।
१८] सोमदत्तस्य काकुत्स्थ पुत्रो[10] भूज्जनमेजयः[11] ॥१८॥ [१६
तस्य पुत्रश्च[12] काकुत्स्थ पालयेतां सांप्रतं पुरीम् ।
१९] धर्मात्मा[13] नरशार्दूल सुमतिर्नाम[14] वीर्यवान्[15] ॥[16] १९॥ [१७

---

१. रा—हेमचंद्रिर्महायशाः ।
ज—हैमचंद्रो महायशाः ।
२. रा—धूमाश्व । ब ल—धूम्राश्वः ।
३. रा—धूमाश्व० ।
४. रा ज ब—सृंजयः ।
५. ल—धूम्राश्वतनयश्चापि सृंजयः समपद्यत ।
भ—धूम्राश्वतनय ,, ,, ,, ।
६. रा ज ब ल—सृंजयस्य । भ—नास्ति ।
७. ल—सुतो राम । भ—श्रीमान् ।
८. ज ल भ—कृशाश्वः ।
९. ज ल भ—कृशाश्वस्य ।
१०. ल भ पुत्रस्तु ।
११. ल भ—काकुत्स्थ जनमे० ।
१२. ब ल भ—पुत्रो महातेजाः ।
१३. ल भ—अध्यास्ते ।
१४. ल भ—प्रमितिर्नाम ।
१५. ल भ—दुर्जयः ।
१६. ल—विश्वग्वायोःप्रसादेन विशालाः सर्वपार्थिवाः ।
भ—विष्वग्वायोः ,, ,, ,, ।

इक्ष्वाकवः सर्वे एव ख्याता वैशालका नृपाः ।
२०] दीर्घायुषो महात्मानो वीर्यवन्तो[1] महाबलाः[2] ॥२०॥ [१८
इहाद्य रजनीं राम सुखं वत्स्यामहे वयम्[3] ।
२१] श्वः प्रभाते तु जनकं ध्रुवं द्रक्ष्याम राघव ।[4] ॥२१॥ [१९
सुमतिस्तं[5] ततः श्रुत्वा विश्वामित्रमुपागतम्[6] ।
२२] प्रत्युद्गम्य महात्मानं पूजयामास पार्थिवः ॥[7]२२॥ [२०
पाद्यार्घ्यासनदानेन सोपाध्यायगणस्तदा ।[8]
२३] प्राञ्जलिः कुशलं चैनं पृष्ट्वेदं वाक्यमब्रवीत्[9] ॥२३॥ [२१
पूतोऽस्म्यनुगृहीतोऽस्मि[10] यस्य मे विषयं मुनिः ।
२४] संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम[11] ॥२४॥ [२२
अद्य मे सफलं जन्म संपूर्णश्च[12] मनोरथः ।
२५] यत्त्वां[13] कुशलिनं ब्रह्मन् पश्यामि समुपागतम् ॥२५॥ [N

इत्यार्षे रामायणे बालकाण्डे सुमतिसमागमो
नाम[14] त्रिचत्वारिंशः सर्गः ॥ ४३ ॥[15]

---

१. ल भ—वीर्यवंतः ।
२. ल—सुधार्मिकः । भ—सुधार्म्मिकाः ।
३. ल—वत्स्यामः सुसुखा वयम् । भ—वत्स्यामः ससुखा वयं ।
४. ज—श्वःप्रभाते तु जनकं द्रक्ष्याम ध्रुवमेव हि ।
ल भ— ,, नरश्रेष्ठ जनकं द्रष्टुमर्हसि ।
५. ल भ—अथासौ प्रमिती राजा । अथासौ प्रमती राजा ।
६. भ—॰मित्रमुपागमत् ।
७. ल भ—श्रुत्वा नरवरः श्रेष्ठः पुरात्प्रत्युद्ययौ तदा ।
८. ल भ—पूजां च परमां कृत्वा सोपाध्यायः सबांधवः ।
९. ल भ—पृष्ट्वा विश्वामित्रमथाब्रवीत् ।
१०. ल भ—धन्योस्म्यनु॰ ।
११. ल भ—मया ।
१२. ल भ—संवृतत्तश्च ।
१३. कै रा ज भ—यस्त्वां ।
१४. कै—नामाष्टाचत्वारिंशः । रा ब—नाम ।
ज—नाम पञ्चत्रिंशः ।
१५. ल भ—सर्गसमाप्तिर्न दृश्यते ।

पृष्ट्वा तु कुशलप्रश्नं परस्पर[2]मशेषतः ।
१] कथान्ते सुमतिर्वाक्यं विश्वामित्रमभाषत ॥[3]१॥ [१
इमौ कुमारौ भगवन्[4] कुतः कस्य च शंस मे । [२ पू
२] किमर्थं च त्वया सार्धं रमेते देवरूपिणौ ॥२॥[5] [६ पू
सिंहर्षभगती वीरौ शार्दूलवृषभाविव । [२ उ
३] पद्मपत्रविशालाक्षौ वरायुधधरावुभौ ॥३॥
अश्विनाविव रूपेण समुपस्थितयौवनौ । [३
४] यदृच्छया क्षितिं प्राप्तौ देवलोकादिहागतौ ॥४॥
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा सुतौ । [४
५] भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरम् ॥५॥

---

१. ज—कुशलं प्रश्नं । ल भ– कुशलं तत्र ।

२. ल भ—० रसमागमे ।

३. ल भ—कथां ते प्रमतिर्वाक्यं व्याजहार महामुनिम् ।

४. ज—भवतः ।

५. ल भ—इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ।

६. ल भ—गजसिंहगती ।

७. रा—०लवृषलाविव ।

८. कै—वीरेण । रा—वीर्येण ।

९. रा—०दिह स्थितौ । ल भ—दिवामरौ ।

१०. रा—प्राप्तं ।

११. ल भ—मुने ।

१२. ब ल भ—सूर्यचन्द्राविवाम्बरं ।

---

* ल—प्रमितिः ।

परस्परस्यं[1] सदृशौ प्रमाणस्थितिचेष्टितैः[2] । [५
६] वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः ॥६॥ [६ उ
तस्यैतद्वचनं[3] श्रुत्वा यथावृत्तं न्यवेदयत् । [७ पू
७] सिद्धाश्रमकथां चैव राक्षसानां वधं तथा[4] ॥७॥ [८ उ
राक्षसानां वधं श्रुत्वा सुमतिर्भृशविस्मितः[5] । [N
८] अतिथी पूजयामास पुत्रौ दशरथस्य तौ ।[7] ॥८॥ [९ उ
ततः परमसत्कारं सुमतेः[8] प्राप्य राघवौ ।
९] उषित्वा[9] च निशां तत्र जग्मतुर्मिथिलां पुरीम् ॥[10]९॥ [१०
ते[11] दृष्ट्वा दूरतः सर्वे जनकस्य पुरीं शुभाम्[12] ।
१०] मुनयो हृष्टमनसः शशंसुः साध्विति ॥१०॥[13] [११
मिथिलोपवने तस्मिन्नाश्रमं प्रेक्ष्य राघवः ।
११] पप्रच्छ मुनिशार्दूलं किमिदं निर्जनं वनम् ॥[14]११॥ [१२

---

१. ब ल भ—परस्परेण ।
२. रा—स्थिति चेष्टितौ । ज—चेष्टितौ ।
३. ल भ—तस्य तद्वचनं
४. ल भ—रक्षसां वधमेव च ।
५. ज ब ल भ—विश्वामित्रवचः ।
६. ब—स मुनि० । ल भ—विस्मितः स महायशाः ।
७. ल—बभूव दृष्ट्वा सदृशौ पुत्रौ दशरथस्य वै ।
भ—बभूवत्वीदृशौ ,, ,, तौ ।
ल भ—अथ तौ पूजयामास नृपतिः स यथाविधि ।
८. ल—प्रमितेः । भ—प्रमतेः ।
९. ब—दर्शित्वा ।
१०. ल भ—व्युष्य तत्र निशामेकां जग्मतुर्मिथिलां तदा ।
११. ल भ—दृष्ट्वा तु मुनयः ।
१२. ल भ—शुभां पुरीं ।
१३. भ ल—साधु साध्विति संहृष्टा मिथिलां समपूजयन् ।
१४. ल भ—पुराणं निर्जनं चैव पप्रच्छाथ महामुनिम् ।

श्रीमान्[1]विरलच्छायो मुनिसंघै[2]र्विवर्जितः ।
१२] श्रोतुमिच्छामि भगवन् कस्यासीदयमाश्रमः ॥१२॥ [१३
पू१३] इति तस्य वचः श्रुत्वा विश्वामित्रोऽभ्यभाषत ।[3] [१४
[4]अहं ते कथयिष्यामि शृणु यस्यायमाश्रमः ।[5]
१४] यथा शून्यो यथा चायं शप्तः कोपान्महात्मनः[6] ॥[7]१३॥ [१५
गौतमस्याश्रमः[8] पुण्यो ह्य[9]यमासीन्महात्मनः ।
१५] नित्यपुष्पफलो[10]पेतैः पादपैरुपशोभितः ॥[11]१४॥ [१६
स चेह तप आतिष्ठदहल्यासहितो मुनिः ।

---

१. भ—श्रीमांस्तु विर०

२. रा—मुनिसंग ।

३. ल भ—तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः ।
प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥
क रा ज—कथाज्ञो मुनिशार्दूलः प्रहसन्वाक्यमुत्तमं ।
विनयावनतं धीरं धर्मज्ञं सत्यवादिनं ।
रामं कमलपत्राक्षमाभाष्य मधुरं वचः ॥

४. ब—हन्त ।

५. ल भ—हन्त ते वर्णयिष्यामि† शृणु तत्त्वेन राघव ।

६. रा ज—०न्महात्मना ।

७. ल भ—यथायमाश्रमः पूर्वं शप्तः कोपान्महात्मना ।

८. ब—०पुण्यः । ल—गौतमस्य नरश्रेष्ठ ।
भ—गौतमस्य नरश्रेष्ठः ।

९. ब भ—पूर्वमासीन्महामुनेः । ल—पूर्वमासीन्महामुने ।

१०. ब—०फलोपेतः ।

११. ल भ—आश्रमोऽयं महापुण्यः सुरैरपि सुपूजितः ।

---

† भ—वर्तयिष्यामि ।

१६] संवत्सरसहस्राणि बहूनि रघुनन्दन ॥[1] १५॥ [१७
अहल्यया[2] रघुश्रेष्ठ तरुणादित्यरूपया ।
N] तदस्याश्चाश्रमं कृत्वा रम्यरूपं पुरन्दरः ॥१६॥[3] [N
तस्यान्तरं विदित्वाऽथ कामार्तस्त्रिदशेश्वरः ।
१७] मुनिवेशधरो भूत्वा अहल्यामिदमब्रवीत् ॥[4] १७॥ [१८
ऋतुकालप्रतीक्षोऽपि[6] न प्रतीक्षे[7] सुमध्यमे ।
१८] सङ्गमं शीघ्रमिच्छामि पृथुश्रोणि सह त्वया ॥१८॥ [१९
मुनिवेशधरं शक्रं सा ज्ञात्वाऽपि परन्तप ।[8]
१९] मतिं[9] चकार दुर्मेधा देवराजकुतूहलात्[10] ॥१९॥[5] [२०
अब्रवीच्च सुरश्रेष्ठं कृतार्थं सा वचस्तदा ।
२०] कृतार्थाऽस्मि सुरश्रेष्ठ गच्छ शीघ्रमलक्षितः ॥२०॥[11] [२१

---

१. ल—स चेह तप आतिष्ठदहल्यामिदमब्रवीत् ।
२. ज—अहल्याया ।
३. ब ल भ—नास्ति ।
४. भ—सोहल्यामिद० ।
५. ल—नास्ति ।
६. ब ल—ऋतुकालः प्रतीच्योपि । भ—ऋतुकालप्रतीच्योपि ।
७. भ—प्रतीक्ष्ये ।
८. ल—मुनिवेशधरो भूत्वा सोहल्यामिदमब्रवीत् ।

संवत्सरसहस्राणि बहूनि रघुनन्दन ॥

तस्यान्तरं विदित्वाथ सहस्राक्षः पुरन्दरः ।

मुनिवेषधरं ज्ञात्वा सहस्राक्षं तथापि सा ॥

९. ब—रतिं ।
१०. रा—०कुतूहलम् । भ—देवराजे कुतू० ।
११. ल भ—अब्रवीच्च सुरश्रेष्ठं गच्छ शीघ्रमरिंदम ।

आत्मानं मां च देवेश सर्वथा रक्ष मानद ॥

उ२१] तामिन्द्रः प्रहसन् वाक्यमहल्यामिदमब्रवीत् ।[1] [२२उ
सुश्रोणि[2] परितुष्टोऽस्मि गमिष्यामि क्षमस्व मे[3] ।।२१।। [२३
२२] एवमुक्त्वा ततोऽहल्यां निष्क्रामन्नुटजान्[4]मुनेः ।
संभ्रमात् त्वरितो राम[5] शङ्कितो गौतमं प्रति ।।२२।। [२४
२३] ददर्श सहसाऽऽयान्तं गौतमं दीप्ततेजसम् ।
देवैरपि सुदुर्धर्षं तपोवीर्यबलाश्रयात् ।।२३।।[6] [२५
२४] पुण्यतीर्थोदकक्लिन्नमाज्यक्लिन्नमिवानलम् ।[7]
N] समित्कलापं सकुशमादायायान्तमाश्रमम् ।।[8]२४।। [२६
दृष्ट्वैव च तदा शक्रो विषादमगमत् परम्[9] ।[10] [२७
२५] सोऽपि[11] दृष्ट्वैव देवेन्द्रं[11] मुनिवेष[12]धरं मुनिः ।।२५।।
दुर्वृत्तं वृत्तसंपन्नो रोषाद् वचनमब्रवीत् । [२८

१. ल—सहस्राक्षस्तथेत्युक्त्वा त्वहल्यां† देवरूपिणीम् ।

२. ल भ—उवाच ।

३. ल भ—यथासुखम् ।

४. ल भ—निश्चक्रामोटजात्तदा ।

५. ल भ—समं संचरन् राम ।

६. ल भ—गौतमं तु ददर्शाथ प्रविशंतं शचीपतिः ।
देवदानवदुर्द्धर्षं तपोबलसमन्वितम् ।।

७. ब—पुण्यतीर्थोदकक्लिन्नं दीप्यमानमिवानलं ।
ल भ—तीर्थोदकपरिक्लिन्नं ,, ,,

८. ल भ—गृहीतसमिधं विप्रं सकुशं पुरुषर्षभ ।

९. रा—पुरम् ।

१०. ल भ—दृष्ट्वा सुरपतिस्त्रस्तो विषसाद भयान्वितः ।

११. ल भ—दृष्ट्वा सहस्राक्षं ।

१२. भ—मुनिवेष० ।

†भ—०त्त्वा अहल्यां ।

२६] मम रूपसमं[1] रूपं कृतवानसि दुर्मते[2] ॥२५॥
अकर्तव्यमिदं यस्मात् तस्मात् त्वं विकलो भव[3] । [२९
२७] गौतमेनैवमुक्तस्य सरोषेण[4] महात्मना ॥२६॥
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् । [३०
२८] व्यथितश्च[5] तदा सोऽभूद्धतौजा विकलीकृतः[6] ॥[7]२७॥
धर्षितस्तपसोग्रेण[8] कश्मलं[9] चैनमाविशत् । [३१
२९] तं शप्त्वैवं मुनिवरो भार्यां तामपि शप्तवान् ॥[10]२८॥
वर्षपूगानसंख्येयांस्त्वं पापे दुष्टचारिणि । [३२
३०] तप्यमाना निरालम्बा सततं भस्मशायिनी ॥२९॥
अदृश्या सर्वभूतानां[11] वनेऽस्मिंस्त्वं निवत्स्यसि[12] । [३३
३१] यदा त्विदं[13] वनं घोरं रामो दशरथात्मजः[14] ॥३०॥

---

१. ब ल भ—रूपं समास्थाय ।

२. रा—भूपते ।

३. रा ज ब—०विफलो भव । ल भ—विफलस्त्वं भविष्यसि ।

४. ल भ—कुपितेन ।

५. रा—वृषितश्च ।

६. ज—विफलीकृतः ।

७. ल भ—नास्ति ।

८. कै—ऋषितस्तप० ।

९. रा—कश्मलं ।

१०. ल—तथाचोक्त्वा† सहस्राक्षं भार्यामपि च शप्तवान् ।

११. ल भ—०तानामाश्रमे त्वं ।

१२. ज—न वत्स्यसि ।

१३. ल भ—चेदं ।

१४. ल भ—दाशरथिर्विभुः ।

---

†भ—०चोक्त्वा ।

आगमिष्यति तं दृष्ट्वा धुतपापा[1] भविष्यसि । [३४
३२] तस्यातिथ्यं[2] सुदुर्मेधे कृत्वा लोभविवर्जिता ॥३१॥[3]
मत्समीपं मुदोपेता समुपैष्य[4]स्यसंशयम् ।[5] [३५
३३] एवमुक्त्वा महातेजाः शप्त्वा भार्यां मनीषिणीम् ॥[6] ३२॥[7]
उ३४] हिमवच्छि[8]खरं गत्वा[9] तपस्तेपे महामना[10]: ॥३३॥ [३६

इत्यार्षे रामायणे बालकाण्डे[11] शक्राहल्ययोः[12] शापो[12] नाम[13] चतुश्चत्वारिंशः[13] सर्गः ॥ ४४ ॥

---

१. ज—धूतपाया । ब—पदा पूता ।
२. रा—तस्यातिथिं ।
३. ल भ—आगमिष्यति दुर्द्धर्षस्तदा पूता भविष्यसि ।
तस्यातिथ्येन दुर्वृत्ते लोभमोहाविवर्जिता ॥
४. ब—समुपैष्यसि संशयं ।
५. ल—तदा काले मुदा युक्ता स्वं रूपं धारयिष्यसि ।
भ—तदाकालमुदा युक्तं स्वरूपं धारयिष्यसि ।
६. ब ल भ—एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीं ।
७. ल भ—अतः परमधिकः पाठः—
पुण्यं देशं समासाद्य सिद्धचारणसेवितम् ।
८. ल—हिमवच्छिखरे । भ—हिमवच्छिषरे ।
९. ल भ—रम्ये ।
१०. ल भ—महातपाः ।
११. कै ब—आदिकाण्डे । भ—नास्ति ।
१२. ल भ—इन्द्राहल्याशापो ।
१३. कै—नामोनपंचाशः । रा—०एकोनपंचाशः ।
ज—०षट् त्रिंशः ।

विकलस्तु[1] कृतः शक्रो देवानग्निपुरोगमान् ।
१] अब्रवीद् दुर्मना राम सहसिद्धर्षिचारणान् ॥[2]१॥ [१
कुर्वता तपसो विघ्नं प्राप्तेयं[3] विक्रिया मया ।
२] गौतमात् क्रोधमुत्पाद्य सुरकार्यचिकीर्षुणा ॥[4]२॥ [२
अफलोऽहं[5] कृतस्तेन क्रोधेन[6] च निराकृतः ।
३] शापमोक्षेण तेनास्य तपोविघ्नः कृतो मया ॥[7]३॥ [३
तस्मात्[8] सुरगणाः[9] सर्वे सर्षिसंघाः सचारणाः ।
४] सुरकार्यं[10] तु संकलं सफलं[11] कर्तुमर्हथ ॥४॥ [४
शतक्रतुवचः श्रुत्वा देवा अग्निपुरोगमाः ।[12]
५] ऊचुः पितृगणान् वाक्यमिदं तत्र समागतान् ॥[13]५॥ [५

---

१. ज—विफलस्तु । ब ल भ—अफलस्तु ।
२. ल भ—अब्रवीत्तत्र वचनं सर्षिसंघान्‡ सचारणान् ।
३. ब ल भ—गौतमस्य महात्मनः ।
४. ब ल भ—क्रोधमुत्पाद्य तु*मया*सुरकार्यमिदं कृतम् ।
५. ब ल भ—अफलोस्मि ।
६. ब ल भ—क्रोधास्त्र ।
७. ब ल भ—शापमोक्षेण महता तपोस्यापहृतं मया ।
८. कै रा ज—तन्मां ।
९. ब ल भ—सुरवराः ।
१०. ब ल भ—सुरसाहाय्यकर्तारं ।
११. ब—मां फलं ।
१२. ल भ—तस्य तद्वचनं श्रुत्वा पितृदेवाः समागताः ।
१३. ल भ—पितृन् ×देवानुवाचाग्निः सहितान्समरुद्गणान् ।

---

‡ ल—सर्षिसंगान् । *भ—तरसा । ×भ—पितृदे०

एष मेषः[1] सवृषणः[2] शक्रश्चावृषणीकृतः ।
६] अस्येमौ वृषणौ छित्त्वा महेन्द्राय प्रयच्छत[3] ॥[4]६॥[5] [७
अफलस्तु[6] ततो[7] मेषः परां पुष्टिमुपैष्यति[8] । [८
७] भवतामुपयोगेन तच्चास्य[9] तु[10] महाफलम् ॥७॥[11] [९
श्रुत्वाऽथाग्निपुरोगाणां[12] देवानां पितरो वचः ।[13]
९] उत्कृत्य[14] मेषवृषणाविन्द्रायोपददुस्तदा ॥[15]८॥ [१०
ततः[16] प्रभृति काकुत्स्थ पितरः[17] क्रव्य[18]भोजिनः ।

१. ज—एवमेषः । ल भ—अयं हि मेषो ।

२. ल भ—वृषणी ।

३. कै—प्रयच्छतु ।

४. भ—अस्यापहृत्य वृषणं महेन्द्राय प्रयच्छथ ।

५. ल—अस्यापहृत्य वृषणं सहस्राक्षे समादधुः ।
तदा प्रभृति काकुत्स्थ पितृदेवसमागताः ॥

६. ल भ—अफलश्च ।

७. रा—तमो । ल भ—कृतो ।

८. ल भ—पुष्टिं गमिष्यति ।

९. ल भ—तद्वयस्य ।

१०. रा—तु महाबलम् । ल भ—सुमहत्फलं ।

११. कै रा ज—तस्मान्मेषस्य वृषणौ छित्वा तौ दातुमर्हथ ।
इंद्राय सुरकार्यार्थं विफलाय पितामहाः ॥

१२. ज—०पुरोगाणां ।

१३. ल भ—अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ।

१४. ब—उत्पाट्य ।

१५. ल भ—मेषवृषणं सहस्राक्षे समादधुः† ।

१६. भ—तदा ।

१७. भ—पितृदेवाः ।

१८. रा ब—क्रव्यभोजनाः । भ—समागताः ।

†ल—महादधुः ।

१०] अफलं[1] भुञ्जते मेषं सफलं तु न भुञ्जते ॥९॥ [११
इन्द्रश्च[2] मेषवृषणस्ततः प्रभृति राघव ।
११] गौतमस्य प्रभावेण[3] बभूवामितेजसः[4] ॥१०॥ [१२
तस्मात् प्रसाद्य रामाशु गौतमं मुनिसत्तमम् ।[5]
१२] तारयेमां महाभागामहल्यां[6] शापवैकृताम्[7] ॥११॥ [१३
विश्वामित्रवचः श्रुत्वा रामः[8] सौमित्रिणा सह ।
१३] विश्वामित्रं पुरस्कृत्य प्रविवेशाश्रमं ततः[9] ॥१२॥ [१४
स ददर्श महाभागां तपसा द्योतितप्रभाम्[10] ।
१४] सेन्द्रैरपि सुरैः साक्षाद्नालक्ष्यां समागतैः ॥[11] १३॥ [१५
प्रयत्नान्निर्मितां[12] धात्रा दिव्यां[13] मायामयीमिव । [१६पू
१५] धूमेनाभिपरीताङ्गीं[14] दीप्तामग्निशिखामिव ॥१४॥ [१७उ
तुषारेणावृतां[15] साभ्रां पूर्णचन्द्रप्रभामिव । [१६उ
१६] मध्येऽम्भसो[16] दुराधर्षां दीप्तां सूर्यप्रभामिव ॥१५॥ [१७पू

---

१. ल भ—ते ।
२. ल भ—इन्द्रश्च ।
३. रा ज ल भ—प्रभावेन ।
४. ल भ—तपसः सुमहत्फलम् ।
५. ब ल भ—तस्माद्गच्छामहे तस्य गौतमस्याश्रमं× द्रुतम् ।
६. ल—०भागां चाहल्यां ।
७. ब—शापवैकृतात् । ल भ—कामरूपिणीम् ।
८. ल भ—राघवः सहलक्ष्मणः ।
९. ल भ—प्रविवेश महावनम् ।
१०. ल भ—०ध्युषितप्रभाम् ।
११. ल—एकामथ समासाद्य दुर्द्धर्षामसुरैः ‡सुरैः ।
१२. रा—०न्निर्मितं । ज—०न्निर्मिता ।
१३. रा—दिव्ये ।
१४. ज—०नापिपरीतांगीं ।
१५. ल—तुषवेणावृतां ।
१६. ब—मध्येनभो । ल—नभोमध्ये ।

×ल भ—आश्रमं पुण्यकर्मणः । ‡भ—दुर्दर्शामसुरासुरः ।

सा हि गौतमवाक्येन दुर्निरीक्षा बभूव ह ।[2]
१७] त्रयाणामपि लोकानां यावद् रामस्य दर्शनम्[3] ॥१६॥ [१८
[4]दृष्ट्वैव राघवौ तस्याः पादौ जगृहतुस्तदा ।
१८] सा चैतौ[5] पूजयामास[6] स्मृत्वा गौतमभाषितम् ॥१७॥[7] [१९
पाद्यार्घ्यासनसत्कारै[8]र्यथावत् प्रीतमानसा[9] ।[10]
१९] प्रतिजग्राह रामश्च पूजां तां विधिवत् तदा ॥[11] १८॥ [२०
दध्वनुर्[12]देववाद्यानि पुष्पवृष्टिः पपात च ।[13]
२०] गन्धर्वाप्सरसां चैव[14] महानासीत् समागमः ॥१९॥ [२१
साधु[15] साध्विति देवाश्च तदाऽहल्यामपूजयन्[16] ।
२१] विशुद्धां तपसोग्रेण तदा रामसमागमे ॥[17] २०॥ [२२

---

१. भ—दुर्निरीक्ष्या ।
२. ज—नास्ति ।
३. ल—दर्शनात् ।
४. भ—राघवौ तु ततस्तस्याः ।
५. रा ज भ—च तौ ।
६. भ—प्रतिजग्राह ।
७. ल—नास्ति ।
८. रा—०सत्कार्यै० ।
९. रा—०मानसः ।
१०. ल—नास्ति ।
११. ल भ—प्रतिजग्राह रामस्तु शास्त्रदृष्टेन कर्मणा ।
१२. ब—दध्वनु० ।
१३. ल भ—पुष्पवृष्टिर्महत्यासीद्दिव्यदुंदुभिनिःस्वनः†
१४. ल—चापि । भ—वापि ।
१५. रा ल—साध्व० ।
१६. रा—०मयोजयन् ।
१७. ल—तपोबलविशुद्धा सा गौतमस्य वशान्वगात् ।
भ— „ द्धां तां „ वशानुगां ।

---

†भ—०सीद्देवदुंदुभिनिस्वनः ।

गौतमश्च महातेजा दृष्ट्वा दिव्येन चक्षुषा । [२३पू
२२] स्वमाश्रमपदं राममागतं प्रत्यपूजयत् ॥२१॥[1] [N
समेत्य भार्यया[2] चैव[3] पूतयाऽहल्यया तदा । [N
२३] तथैवं सहितो भूयस्तपस्तेपे महायशाः ॥२२॥[4] [२३उ
रामोऽपि परमां पूजां गौतमादृषिसत्तमात्[5] ।
२४] अवाप्य विधिवत् तस्माज्जगाम मिथिलां प्रति ॥[6]२३॥ [२४

इत्यार्षे रामायणे बालकाण्डे[7] अहल्यादर्शनं नाम[8]
पञ्चचत्वारिंशः[9] सर्गः[10]॥ ४५[11]॥

१. ब ल भ—गौतमश्च† महातेजा अहल्यासहितः सुखी ।
राम संपूज्य विधिवत्तपस्तेपे महातपाः ॥
२. रा—सूतया० ।
३. रा—तदैव । ज—तथैव ।
४. ल भ—नास्ति ।
५. ल भ—गौतमस्य महामुनेः ।
६. ल भ—सकाशाद्विधिवत्प्राप्य जगाम मिथिलां तदा ।
७. कै ब—आदिकाण्डे ।
८. भ—अहल्यामुक्तिर्नाम ।
९. कै—पंचाशत्तमः । रा ब भ—नास्ति । ज—सप्तत्रिंशः ।
१०. भ—सर्गाः ।
११. ज—॥३७॥ भ—॥३६॥
ल—सर्गसमाप्तिर्न दृश्यते ।

†ल भ—गौतमस्तु ।

ततः प्रागुत्तरां[1] गत्वा दिशं रामः सलक्ष्मणः ।
१] विश्वामित्रं पुरस्कृत्य यज्ञवाटं ददर्श ह ॥१॥[2] [१
तं रामो मुनिशार्दूलं[3] दृष्ट्वा यज्ञमभाषत ।
२] अहो समृद्धिर्यज्ञस्य जनकस्य महात्मनः ॥२॥[4] [२
पू३] बहूनीह[5] सहस्राणि नानादेशनिवासिनाम् ।[6]
दृश्यन्ते ब्राह्मणानां च निवासा[7] विविधाः कृताः[7] ॥[8]३॥[9] [३
४] देशः परीक्ष्यतां ह्यद्यो वत्स्यामो यत्र वै[10] सुखम्[10] ।[11] [४उ

---

१. ज—प्रागुत्तरं ।

२. अस्य श्लोकस्यादौ पाठोऽयमधिकः—

ब ल—विश्वामित्रं पुरस्कृत्य पश्यं देशं निमेस्तथा ।

भ— ,, ,, पश्यन्देशन्दिशस्तथा ।

३. ज—मुनिशार्दूल ।

४. ल भ—रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः ।

साध्वयं सुसमृद्धोस्य जनकस्य †महाक्रतुः ॥

५. ल—बहवः शतसाहस्त्रये ।

६. भ—बहवः शतसाहस्रा नानादेशनिवासिनः ।

७. ज—निवासाश्च पृथक् कृताः ।

८. ल भ—ब्राह्मणानां समेतानां *वेदभाषाविचारिणां ।

९. अतः परमधिकः पाठः—

ल—यज्ञवाटाश्च बहवः शकटीशतसंकुलाः ।

भ—यज्ञभागाश्च ,, शकटीशत ,, ।

१०. कै ज—वयम् । रा—यसम् ।

११. ल—देशे विधीयतां ब्रह्मन् यत्र वासं सुखी भवेत् ।

भ—देशोपि चीयतां ,, ,, वासः ,, ,,

---

†भ—महान् क्रतुः । *भ—देशभा०

इति[1] रामवचः श्रुत्वा विश्वामित्रो महामना:[2] ॥४॥

५] निवेशमकरोद् देशे विविक्ते सलिलाप्लुते[3] । [५

विश्वामित्रमृषिं प्राप्तं श्रुत्वा स मिथिलेश्वरः ॥[4]५॥

६] शतानन्दं पुरस्कृत्य पुरोहितमकल्मषम्[5] । [६

ऋत्विग्भिः सहितश्चान्यैरादायार्घ्यं[6] त्वराऽन्वितः ॥[7]६॥

७] विश्वामित्राय सत्कृत्य[8] ददौ मन्त्रपुरस्कृतम् । [७

प्रतिगृह्य स[9] तां पूजां जनकान्मुनिसत्तमः[10] ॥७॥

८] पप्रच्छानामयं चैव यज्ञसामृद्ध्यमेव च [८

तांश्चैवान्यान् मुनीन् सर्वानागतान् स पुरोहितः ॥८॥[11]

९] यथान्यायं[12] यथायोग्यं पर्यपृच्छदनामयम् ।[13] [९

अथ राजा मुनिश्रेष्ठं[14] कृताञ्जलिरभाषत[15] ॥९॥

---

१. ल भ—रामस्य वचनं ।

२. ल भ—महायशाः ।

३. ल भ—सलिलाश्रिते ।

४. ल भ—विश्वामित्रं मुनिं प्राप्तं जनकः सह मंत्रिभिः ।

५. ल भ—पुरोधसमनिंदितम् ।

६. ब—०रामायार्घ्यं ।

७. ल भ—ऋत्विक् परिवृतस्तूर्णमर्घ्यमादाय धर्मवित् ।

८. ल भ—धर्मेण ।

९. ल भ—तु ।

१०. ल भ—जनकस्य महात्मनः ।

११. ल भ—पप्रच्छ कुशलं राज्ञो राष्ट्रे †वापि निरामयम् ।
तांश्चैव +समुनिः सर्वानुपाध्यायपुरोधसः ॥

१२. ब—यथान्यार्घ्यं ।

१३. ल भ—समागच्छद् यथान्यार्घ्यं*यथाविधियथार्चनम् ।

१४. ज—मुनिं श्रेष्ठं । भ—मुनिवरं ।

१५. रा—०रभाषित ।

---

†भ—चापि । +भ—सुमतिः । *भ—यथान्यायं ।

१०] आसनं भगवन् [1]क्लृप्तमुपवेष्टुमिहार्हसि ।[2] [१०
जनकेनैवमुक्तो[3] विश्वामित्रोऽथ[3] महामुनिः ॥१०॥
११] निषसाद[4] ततश्चैनं[4] स राजा सह मन्त्रिभिः । [११
उपविष्टमुपेत्येदं कृताञ्जलिरभाषत ॥[5]११॥ [१२
१२] अमृतस्यैवं[6] संप्राप्तिरद्य मे भगवन्[7] मुने । [N
१३] अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥१२॥[8] [१३पू
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं[9] महामुने ।
१४] यज्ञस्यावभृथं पुण्यं द्रष्टाऽसि सपदानुगः॥[10]१३॥ [१४
द्वादशाहं च शेषं मे यज्ञस्याहुर्द्विजातयः ।[11]

---

१. कै रा ज ब—क्लृप्तमुप० ।

२. ल भ—आसने भगवानास्तां श्रमं मोक्तुमिहार्हसि× ।

३. ल भ—जनकस्य वचः श्रुत्वा निषसाद ।

४. ल भ—पुरोहितो द्विजाश्चैव ।

५. ल भ—आसने तु यथान्याय्य†मुपविष्टं यथाविधि ।

६. ज ब—अमृतस्येव । रा—अमृतसेव ।

७. ब—भगवां ।

८. ल भ—दृष्ट्वा नरपतिस्तत्र विश्वामित्रमथाब्रवीत् ।
अद्यायं सफलो यज्ञो महर्षे देवतैः कृतः ॥
अद्य यज्ञफलं प्राप्तं तव सन्दर्शनान्मया ।

९. ल भ—मुनिपुंगवः ।

१०. ल भ—यज्ञावसाने* संप्राप्तो द्रष्टुं मुनिवरैः सह ।

११. ल भ—महर्षे द्वादशाहं तु शेषमाहुर्मनीषिणः ।

× भ—मोक्तुं त्वमर्हसि ।

† भ—यथान्यायमु० । * भ—यज्ञावसानं ।

१५ ततो भागार्थिनो देवानिह द्रक्ष्यस्युपागतान्[1] ॥१४॥[2] [१५

उष्यतां[3]मिह मत्प्रीत्यै सहैभिर्ब्रह्मवादिभिः ।

१६] एतान्यहानि सुसुखं[4] ततो यास्यथ सत्कृताः ॥१५॥[5] [N

एतौ[6] च मुनिशार्दूल कुमाराविव पावकौ ।

१७] काकपक्षधरौ कस्यौ किमर्थं चाभ्युपागतौ[7] ॥१६॥ [२०

व्यूढोरस्कौ महाबाहू खड्गतूणधनुर्धरौ ।

१८] अश्विनोः सदृशौ रूपे कस्यैतौ प्रियदर्शनौ ॥[8]१७॥ [१८

किमर्थं सुकुमाराङ्गावरण्यं[9] संश्रितावुभौ ।[10]

१९] बालावेवानवद्याङ्गौ श्रोतुं कौतूहलं मम ॥[11]१८॥ [N

तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः[12] ।

२०] न्यवेदयन्महात्मानौ सुतौ[13] दशरथस्य तौ ॥१९॥ [२४

---

१. ज—द्रक्ष्याम्युपा० ।

२. ब—यज्ञ भागार्थिनो देवां द्रष्टुमर्हसि कौशिक ।

ल भ—यज्ञभागार्थिनो देवान् ,, ,,

३. रा—उषितामिह ।

४. रा ज—ससुखं ।

५. ल भ—नास्ति ।

६. ल भ—इमौ ।

७. ल भ—वीरौ कस्येमौ मुनिपुंगव ।

८. ल भ—अश्विनाविव रूपेण कस्येमौ देववर्णिनौ ।

९. ज—०वारण्यं ।

१०. ल भ—किमर्थं च मुनिश्रेष्ठ प्रपन्नौ दुर्गमान्पथः* ।

११. ल—बलाववहितौ ब्रह्मं श्रोतुमिच्छाम्यसंशयम् ।

भ— ,, ब्रह्मन् श्रोतुमिच्छामि संशयं ।

१२. ल भ—महामुनिः ।

१३. ल भ—पुत्रौ ।

---

* भ—दुर्गमान्पथ ।

तदागमनमव्यग्रं[1] राक्षसानां च तद्वधम्[2] ।
२१] सिद्धाश्रमनिवासं च विशालस्य च दर्शनम् ॥२०॥ [२५
गौतमस्यापि शापान्तमहल्यायाश्च दर्शनम् ।
२२] रामस्य धनुषश्चैव जिज्ञासाऽर्थमुपागमम् ॥२१॥[3] [२६
इति सर्वं महातेजा जनकाय महात्मने ।[4]
२३] निवेद्य विररामाथ[5] विश्वामित्रो महामुनिः ॥२२॥[6] [२७

इत्यार्षे रामायणे बालकाण्डे[7] जनकदर्शनं नाम[8]
षट्चत्वारिंशः[8] सर्गः[9] ॥४६॥

---

१. ब ल भ—०मस्युग्रं ।
२. ज ल भ—तं ।
३. ल भ—गौतमाश्रमकार्यं च गौतमस्य च दर्शनम् ।
महाधनुषि जिज्ञासा कार्यं चैषां महात्मनाम् ॥
४. ल भ—एतत्सर्वं महातेजाः कौशिको जनकाय वै ।
५. ल भ—विररमाशु ।
६. ल भ—अतः परमाधिकः पाठः—
मुनिमध्ये स्थितः प्राज्ञो वसूनामिव पावकः ।
७. क रा ब—आदि काण्डे ।
८. क रा—नामैकपंचाशत्तमः । ज—नाम अष्टत्रिंशः ।
ब—नाम ।
९. ल भ—सर्गसमाप्तिर्न दृश्यते ।

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
१] हृष्टरोमा भृशं भूत्वा शतानन्दो महातपाः[1] ॥[2]१॥ [१
गौतमस्य सुतो ज्येष्ठस्तपसा[3] द्योतितप्रभः[4] ।
२] रामसन्दर्शनं प्राप्य विस्मयं परमं ययौ[5] ॥२॥ [२
स निषण्णावुभौ दृष्ट्वा सदृशौ रामलक्ष्मणौ ।[6]
३] शतानन्दो मुनिश्रेष्ठं[7] विश्वामित्रमभाषत[8] ॥३॥ [३
अपि त्वया[9] मुनिश्रेष्ठ मम माता तपस्विनी ।
४] दर्शिता राजपुत्रस्य[10] रामस्य च महात्मनः[11] ॥४॥ [४
अपि रामाय मे माता पूजाऽर्हाय महामुने ।
५] पूजां कृतवती सम्यगहल्या भृशदुःखिता ॥५॥[12] [५

---

१. ज—महामुनिः ।

२. ल भ—हृष्टरोमा महातेजाः क्षणेन समपद्यत ।

३. ज—ज्येष्ठस्तपसः ।

४. रा ज—द्योतितः प्रभुः ।

५. ल भ—परं विस्मयमागतः ।

६. ल भ—स निषण्णौ तु तौ दृष्ट्वा सुखासीनौ नृपात्मजौ ।

७. ल—मुनिश्रेष्ठो । ज—नास्ति ।

८. भ—०मित्रमुवाच ह । ज—नास्ति ।

९. ल भ—०ते मुनिशार्दूल । ज—मुनिश्रेष्ठ ।

१०. ल भ—राजपुत्राय ।

११. ल—तपोदीर्घमुपागता । भ—तमोदीर्घमुपागता ।

१२. ल भ—नास्ति ।

अपि रामाय कथितं पुरावृत्तं महामुने ।
६] मम मातुर्महाबुद्धे दैवेन दुरनुष्ठितम् ॥६॥[1] [६
अपि कौशिक माता मे सङ्गता गुरुणा पुनः ।
७] शापाग्निदग्धा पित्रा मे रामदर्शननिर्मला ॥७॥[2] [७
अपि प्रीतेन मनसा गुरुर्मे कुशिकात्मज[3] ।
८] पूतां दीर्घेण तपसा मातरं मेऽभ्यनन्दत[4] ॥८॥[5] [N
अपि मे गुरुणा ब्रह्मन् पूजितोऽसि[6] यथाऽर्हतः[7] ।
९] इहागतो[8] महाभाग पूजां प्राप्य[9] महात्मनः[11] ॥९॥ [६
तच्छ्रुत्वा[10] वचनं तस्य विश्वामित्रो[12] महातपाः[9] ।
१०] प्रत्युवाच शतानन्दं वाक्यं[13] वाक्यविदां वरः[13] ॥१०॥[14] [१०

---

१. ल भ—अपि माता वियुक्ता* मे तस्माच्छापात्सुदारुणात् ।
२. ल भ—अपि × कौशिक भद्रं ते गुरुणा चापि‡ संगता ।
माता मुनिगणश्रेष्ठ रामसंदर्शनादमु ॥
३. कै—कुशिकात्मजा ।
४. कै रा—मेभ्यनन्दन ।
५. ल भ—नास्ति ।
६. रा—पूजितासि ।
७. ल भ—यथार्हणम् ।
८. ज—इहागतौ ।
९. ल भ—महातेजाः ।
१०. ल भ—कृत्वा ।
११. ल—महात्मनां ।
१२. भ—शतानंदस्य धीमतः ।
१३. भ—वाक्यज्ञो वाक्यकोविदः ।
१४. ल—नास्ति ।

---

* भ—विमुक्ता । × ल—अयि । ‡ भ—वापि ।

नातिक्रान्तमिदं[1] ब्रह्मन् यत् कार्यं तत् कृतं मया ।
११] सङ्गता गुरुणा पत्नी भार्गवेणेव रेणुका ॥११॥[2] [११
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः ।
१२] शतानन्दस्ततो[3] राममिदं वचनमब्रवीत् ॥१२॥ [१२
स्वागतं ते रघुश्रेष्ठ दिष्ट्या प्राप्तोऽसि[4] मे प्रभो ।
१३] विश्वामित्रेण सहितो यज्ञवाटं महात्मना ॥[5]१३॥ [१३
अचिन्त्यो ह्यसि[6] धर्मात्मा राम त्वममितद्युतिः[7] ।
१४] विश्वामित्रो महातेजा[8] यस्य ते परमो गुरुः ॥१४॥ [१४
नास्ति धन्यतरो राम त्वदन्यो भुवि कश्चन[9] ।
१५] यस्य ते हितकामोऽयं विश्वामित्रस्तपोनिधिः ॥[10]१५॥ [१५
श्रूयतां[11] च पुरावृत्तं कौशिकस्य महात्मनः ।

---

१. ब—०मिमं ।
२. भ—नातिक्रमो मुनिश्रेष्ठ सर्वमेतन्मया कृतं ।
संगता मुनिना पत्नी रेणुकेव महात्मना ॥
ल—नास्ति ।
३. ल भ—शतानंदो महातेजा रामं ।
४. ल भ—दृष्टोसि राघव ।
५. ल भ—विश्वामित्रं पुरस्कृत्य तं चाश्रममुपागतः ।
६. ल भ—ह्येष ।
७. ल भ—महर्षिरमितप्रभः ।
८. ल भ—०तेजास्तवायं† परमा गतिः ।
'भ' पुस्तके पुनरपरहस्तेन शोधितः ।
९. ल भ—त्वयेह भुवि यस्य ते ।
१०. ल भ—गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ।
११. ल भ—श्रूयतामभिधास्यामि ।

---

†भ—०स्तवेयं ।

१६] यद्वीर्यो यत्प्रभावोऽयं यद्धर्मश्च महायशाः ।[1][2] [१६
राजाऽभूदेष धर्मात्मा दीर्घकालमरिन्दमः ॥१६॥
१७] धर्मज्ञश्च[3] क्रियावांश्च[4] प्रजानां पालने रतः । [१७
पितामहसुतस्त्वासीत्[5] कुशो नाम महातपाः ॥१७॥
१८] कुशस्य पुत्रो बलवान् कुशनाभः[6] सुधार्मिकः । [१८
कुशनाभसुतश्चासीद्[7] गाधिरित्येव विश्रुतः[8] ॥१८॥
१९] गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः । [१९
विश्वामित्रस्तु धर्मात्मा पालयन् मेदिनीमिमाम्[9][10] ॥१९॥
२०] बहून्[11] वर्षगणान् राम राजा राज्यमकारयत् । [२०
कदाचित् स[12] महातेजा योजयित्वा वरूथिनीम्[13] ॥२०॥
२१] अक्षौहिणीपरिवृतः[14] परिचक्राम मेदिनीम्[15] । [२१
सरितः पर्वतांश्चैव वनानि नगराणि च ॥२१॥

---

१. के रा ज—यद्वीर्यश्च ।
२. ल भ—यथाबलं यथावृत्तं तन्मे निगदतः शृणु ।
३. ब ल—वदन्यश्च । कृतज्ञश्च ।
४. ल—प्रजानां च हिते । भ—प्रजाभ्यश्च हिते ।
५. के रा ज—०सुतश्चासीत् ।
६. के रा—कुशनाभश्च । ज—कुशनाभस्तु ।
७. ल भ—कुशनाभसुतस्त्वासीत् ।
८. के रा ज—०धिर्नाम महामतिः ।
९. के रा ज—तस्य ।
१०. ल—पृथिवीमिमाम् ।
११. के रा ज—वर्षायुतान्यनेकानि ।
१२. रा ज ब ल भ—सु० ।
१३. के रा ज—षडंगिनीम् ।
१४. के—०परिवृता ।
१५. ल—पर्यट्रच्छद्रच्छद्वसुंधराम् । भ—ययौ गच्छद्वसुंधरां ।

२२] विचरन् क्रमशो राजा आजगाम महायशाः । [२२
वसिष्ठस्याश्रमपदं नानापुष्पफलद्रुमम् ॥२२॥
२३] नानामृगगणाकीर्णं सिद्धचारणसेवितम् । [२३
देवर्षिगणसङ्कीर्णं ब्रह्मर्षिगणपूजितम् ॥२३॥
तपश्चरद्भिः संसिद्धैरग्निकल्पैर्महर्षिभिः । [२५
२४] सततं संकुलं श्रीमद् ब्रह्मकल्पैर्महात्मभिः ॥२४॥
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ।
२५] फलमूलाशिभिर्दान्तै र्जितक्रोधैर्जितेन्द्रियैः ॥२५॥ [२६
संप्रक्षालैरश्मकुट्टैर्दन्तोलूखलिभिस्तथा । [N
२६] ऋषिभिर्बालखिल्यैश्च जपहोमपरायणैः ॥२६॥ [२७पू

१. भ—विचिन्वन् ।
२. भ—तदागच्छन् ।
३. भ—०फलप्रभं ।
४. ल—०कीर्यं ।
५. ल भ—देवर्षिगणपूजितं ।
६. ल भ—बहुपुष्पफलं रम्यं यक्षराक्षसवर्जितम् ।
७. ल भ—देवदानवगन्धर्वकिंनरैरुपशोभितम् ।
८. ल—अतः परमधिकः पाठः—
प्रशांतहरिणाकीर्णं नानाविहगनादितम् ।
९. ल भ—तपश्चरण० ।
१०. ल भ—०र्महात्मभिः ।
११. कै—०महर्षिभिः ।
१२. कै ल—अभक्षै० ।
१३. ल भ—०पर्णाशिभिस्तथा ।
१४. कै—०दिभिर्दांतै० । ल भ—फलमूलाशनै० ।
१५. ल भ—०जितरोषै० ।
१६. भ—०लिभिस्तदा ।
१७. ल भ—०बालखिल्याद्यैर्जप० ।

वसिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
२७] अपश्यद् यजतां[1] श्रेष्ठो विश्वामित्रो महाबलः[2] ॥२७॥ [२८
वातोद्भुतं तपनवाहनिभं[3] नियम्य
वल्गावशेन तुरगं च शशांकशुभ्रम् ।
दिव्यप्रभानिकरकुण्डललोलमान-[4]
N] कर्णस्तुरंगमवरान्नृप उत्ततार ॥२८॥ [N

इत्यार्षे रामायणे बालकाण्डे[5] वसिष्ठाश्रमवर्णनं[6] नाम[6]
सप्तचत्वारिंशः[7] सर्गः ॥ ४७ ॥[8]

---

१. ल भ—०जपतां ।
२. कै—महाबला: ।
३. ज—वातोद्धतमुपवमवाहानिभं । ल-वातोन्नतं तपनवाहसमं ।
भ—वातोद्धतं पवनवेगसमं ।
४. ल—दीप्यत्प्रभा० । भ—०कुंडलशोभमान० ।
५. कै ब—आदिकाण्डे । भ—नास्ति ।
६. ल भ—०दर्शनं नाम । कै ब रा—नास्ति ।
७. कै रा ब—द्विपंचाशत्तमः । ज—एकोनचत्वारिंशः ।
८. ज—॥ ३९ ॥ भ—॥ ३७ ॥

N] वसिष्ठं तु तदा तस्मिन्नाश्रमे[1] मुनिसत्तमम्[2] । [N
दृष्ट्वा तु परमप्रीतो विश्वामित्रो महामना[3]ः ॥१॥

१] प्रणतो विनयाद् वीरो वसिष्ठं जपतां[4] वरम् । [१
स्वागतं च[5] तवेत्युक्त्वा वसिष्ठेन महात्मना ॥२॥

२] आसनं तेन विधिवत् प्रदत्तं जगतीपतेः[6] । [२
उपविष्टाय च तदा विश्वामित्राय धीमते ॥३॥

३] वृस्यां[7] वन्यं[8] मुनिवरः फलमूलमुपाहरत्[9] । [३
प्रतिगृह्य वरां पूजां वसिष्ठाद् राजसत्तमः ॥४॥

४] तदा[10]ऽग्निहोत्रे शिष्येषु पर्यपृच्छदनामयम् । [४
विश्वामित्रो महातेजा वनस्पतिगणे तथा ॥५॥

५] सर्वत्र कुशलं[11] चोक्त्वा वसिष्ठो मुनिसत्तमः । [५
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ॥६॥

---

१. रा—तस्मिन्नाश्रमं ।

२. कै—०सत्तम ।

३. ल—महामुनिः ।

४. कै ज—यजतां । रा—वदतां ।

५. ल भ—भवतेत्युक्त्वा ।

६. ल भ—जगतीपतौ ।

७. रा—यस्यां । ल—वृष्यं ।

८. ल—वंद्यं ।

९. कै—०मुपाहरन् ।

१०. रा—तदग्नि० ।

११. ल—कुशिलं ।

६] पप्रच्छ जप[1]तां श्रेष्ठो गाधेयं ब्रह्मणः सुतः । [६
कच्चित् ते कुशलं राजन् कच्चिद् धर्मेण रञ्जयन् ॥७॥

७] प्रजाः पालयसे नित्यं राजवृत्तेन धार्मिक[2] । [७
कच्चित् ते सुभृता भृत्याः कच्चित् तिष्ठन्ति शासने ॥८॥

८] कच्चित् ते विजिता सर्वे रिपवो रिपुसूदन । [८
कच्चित् ते कुशलं कोशे मित्रेषु च परन्तप ॥९॥

९] कुशलं ते नरव्याघ्र पुत्रपौत्रे[3]षु चानघ । [९
सर्वत्र कुशलं राजा[4] वसिष्ठं[5] प्रत्युवाच ह ॥१०॥

१०] विश्वामित्रो महातेजास्तमथो[6] विनयान्वितः । [१०
कृत्वा तौ सुचिरं कालं धर्मिष्ठां तां कथां तदा[7] ॥११॥

११] मुदा परमया युक्तावभिनन्द्य[8] परस्परम् । [११
ततो वसिष्ठो भगवान् कथान्ते मुनिसत्तमः ॥१२॥

१२] विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव[9] । [१२
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ॥१३॥

१३] तव चैवाप्रमेयस्य यथाऽर्हं प्रतिगृह्यताम् । [१३
सत्क्रियां हि भवांस्तात प्रतीच्छतु ममोद्यतां[10] ॥१४॥

---

१. रा—०जगतां । ल भ—अपृच्छजपतां ।

२. कै रा—धार्मिकः ।

३. भ—पुत्रेषु ।

४. ब ल भ—राज्ये ।

५. ल भ—भवतः ।

६. ल भ—महातेजा वसिष्ठं ।

७. ल—बहुवृत्तां तु संकथाम् ।
भ—बहुवृत्तांतसंकथां ।

८. कै ल—०भिवंद्य ।

९. ल—प्रहसन्निह ।

१०. ल भ—ममोद्यतां ।

१४] राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः । [१४
एवमुक्तो वसिष्ठेन विश्वामित्रो महीपतिः ॥१५॥
१५] कृतमित्यब्रवीद् राजा पूजा[1] चानेन[2] मे कृता । [१५
फलमूलेन भगवन्[3] विद्यते यत् तवाश्रमे ॥१६॥
१६] पाद्येनाचमनीयेन[4] भगवन्[5] दर्शनेन च । [१६
सर्वथा[6] च महाबाहो[7] पूजाऽर्हेणास्मि पूजितः ॥१७॥
१७] गमिष्यामि नमस्तुभ्यं पश्य मैत्रेण चक्षुषा । [१७
एवं स्तुवन्तं[8] राजानं वसिष्ठः पुनरेव च ॥१८॥
१८] न्यमन्त्रयदमेयात्मा[9] पुनः पुनरुदारधीः । [१८
वाढमित्येव गाधेयो[10] वसिष्ठं प्रत्यभाषत ॥१९॥
१९] यथा प्रियं भगवतस्तथाऽस्तु मुनिसत्तम । [१९
एवमुक्तो महातेजा वसिष्ठो जपतां[11] वरः ॥२०॥
२०] आजुहाव ततः प्रीतः शबलां[12] धुतकल्मषः[13] । [२०
एह्येहि शबले क्षिप्रं शृणु[14] चैव वचो मम ॥२१॥

---

१. भ—प्रजा ।
२. ल भ—नाथेन । रा—चान्नेन ।
३. भ—भगवान्विद्यते ।
४. ल—पाद्ये आचमनीये च ।
५. कै भ—भगवद्दर्शनेन ।
६. ल—सर्वदा ।
७. ज—महाबुद्धे ।
८. ब ल भ—भवन्तं ।
९. रा—निमंत्र० । ल भ—न्यमंत्रयत धर्मात्मा ।
१०. कै ब—०मित्येवागाधेयो ।
११. रा—जगतां ।
१२. कै ज ल भ—कल्माषां । रा—कल्मषां ।
१३. ल भ—धूतकल्मषः ।
१४. ब ल—शृणुष्व वचनं । भ—शृणु चेदं वचो ।

२१] सबलस्यास्य राजर्षेः कर्तुं व्यवसितो ह्ययम्[1] ।
भोजनेन महार्हेण[2] सत्कारं[3] तद्विधत्स्व मे ॥२२॥ [२१
२२] यस्य यस्य यथाकामः[4] षड्रसेष्वभिवांछितः[5] ।
तत् सर्वं कामधुग्[6] देवि पूरयस्व[7] कृते मम ॥२३॥ [२२
वरेणान्नेन पानेन[8] चोष्यलेह्येन चाप्यमुम्[9] ।
२३] राजानं सपरीवारं[10] शबले[11] मत्प्रियेच्छया ॥२४॥ [२३
N] यथा सर्वो जनस्तुष्येत् स्वाशितस्तु[12] यथा भवेत् । [N
एवमुक्ता वसिष्ठेन शबला शत्रुसूदन[13] ॥२५॥
५४,१] विदधे कामधुक्[14] कामं[15] यथा यस्येप्सितं तथा । [५३,१
इक्षूंश्च मधु लाजांश्च[16] मैरेयं च वरासवम् ॥२६॥

---

१. ब—०स्म्यहं ।
२. ल—महार्घ्येण ।
३. ल—संकरं ।
४. रा ल भ—यथाकामं ।
५. रा—षड्रसेषुभिवां० । ल—षट्सुभीष्टो रसेष्विह ।
भ—यद्यभीष्टो रसेष्विह ।
६. ज ल—कामदुग्देवि ।
७. ज ल भ—पूरय त्वं ।
८. ज—मामेन ।
९. ल—चाप्ययम् । भ—चान्ययं ।
१०. ल—सुपरीवारं ।
११. ल भ—सबलो । भ—पुनः कृतः ।
१२. ब—स्वशितस्तु । ल भ—स्वाशितश्च ।
१३. ल—रघुनंदन ।
१४. कै—कामयुक्कामं ।
१५. कै—मयु० ।
१६. रा ज—०लाजांश्च । ल—०जालं च ।

२] एतानि[1] च महाऽर्हाणि[2] भक्ष्यांश्चोच्चावचान् बहून् । [२
वाष्पाढ्यस्यौदनस्यापि[3] राशीन् पर्वतसन्निभान् ॥२७॥
३] मिष्टान्नानि[4] तथाऽपूपान् दधिकुल्यास्तथैव च । [३
नानास्वादुरसानां च षाडवानामितस्ततः[5] ॥२८॥
४] भाजनानि सुपूर्णानि[6] गौडानां च सहस्रशः । [४
सर्वमासीत्[7] सुसन्तुष्टं हृष्टपुष्टजनायुतम्[8] ॥२९॥
५] विश्वामित्रबलं राम[9] वसिष्ठेनाभिनन्दितम्[10] । [५
यस्य यस्य यथा कामस्तस्य[11] तस्य तथा तथा ॥३०॥ [N
६] अभिवर्षति कामांश्च शबला शत्रुसूदन । [N
एवमस्य बलं सर्वं सर्वकामैः प्रपूजितम्[12] ॥३१॥
७] विश्वामित्रस्य[13] राजर्षे हृष्टपुष्टजनायुतम्[14] ।
सान्तःपुरः[15] सहामात्यः परितुष्टो नृपोत्तमः ॥३२॥ [६

---

१. भ—पानानि ।
२. ल—महार्घाणि ।
३. ल भ—०दनस्यान्न ।
४. ल भ—मृष्टान्नानि ।
५. ज—वाडवाना० । ल—०मितस्तथा ।
भ—षड्रसाना० ।
६. ज—सुपर्णानि ।
७. रा—०स्वसंतुष्टं । भ—सर्वमासीत्तु संहृष्टं ।
८. भ—०जनाकुलं ।
९. रा—सर्वं । ज—नाम ।
१०. भ—वशिष्ठेना० ।
११. ल भ—कामं तस्य ।
१२. भ—सुपूजितं ।
१३. ल भ—सर्वं तत्रास्य ।
१४. रा ब—राजर्षेर्हृष्टपुष्ट० ।
१५. भ—सांतःपुर० ।

८] संपौरो मन्त्रिसहितः सभृत्यबलवाहनः ।
युक्तः परमहर्षेण वसिष्ठमिदमब्रवीत् ॥३३॥ [७
९] पूजितोऽहं त्वया ब्रह्मन् पूजनार्हेण कामतः ।
श्रूयतामभिधास्यामि वाक्यं वाक्यविदां वर ॥३४॥ [८
१०] गवां शतसहस्रेण दीयतां शबला मम । [९
रत्नं हि भगवन्नेषा रत्नहारी हि पार्थिवः ॥३५॥
११] तस्मान्मे शबलां देहि धर्मतो द्विजसत्तम । [१०
एवमुक्तस्तु भगवान् वसिष्ठो मुनिसत्तमः ॥३६॥
१२] विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् । [११
नाहं शतसहस्रेण गवां कोटिशतैरपि[10] ॥३७॥
१३] राजन् दास्यामि शबलां राशिभी रजतस्य हि[12] । [१२
न परित्यागमर्हेयं मत्सकाशादरिन्दम ॥३८॥
१४] शाश्वती शबलेयं मे कीर्तिरात्मवतो यथा । [१३

---

१. ल भ—पौरैः स ।
२. ब—पूजितोयं ।
३. भ—महाब्रह्मन् ।
४. कै—०वन्नेषां । ल भ—०वन्नेतद्रत्न० ।
५. ल—ममेषा धर्मतो द्विज । भ—ममैषा धर्म्मतो द्विज ।
६. रा—एवमुक्त तु ।
७. रा—भगवन् ।
८. भ—वशिष्ठो ।
९. भ—धर्म्मात्मा ।
१०. ल भ—नापि कोटिशतैर्गवाम् ।
११. रा भ—राशीभी ।
१२. ल—ह ।
१३. ज ब—मत्सकाशमरिन्दम ।
१४. कै—शकलेयं । रा—शवलेयं ।
१५. रा—०रात्मवृत्तो ।

अत्र कव्यं च हव्यं च[1] प्राणयात्रा तथैव मे ॥३९॥
१५] आसन्न[2]मग्निहोत्रं च बलिर्होम[3]स्तथैव च । [१४
स्वाहाकारवषट्कारौ विद्याश्च विविधा नृप ॥४०॥
१६] आपन्नो[4] ह्यत्र राजर्षे सर्वमन्यदसंशयम् । [१५
पू१७] सर्वस्वमेतत्[5] सत्यं ते मम पुष्टिकरं तथा[6] ॥४१॥ [१६पू
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत् ततः ।
१८] संरब्धतर[7]मत्यर्थं वाक्यं वाक्यविशारदः[8] ॥४२॥ [१७
सुवर्णकक्ष्याग्रैवेयान्[9] सर्वाभरणभूषितान् ।
१९] ददामि कुञ्जरांस्तुभ्यं सहस्राणि चतुर्दश ॥४३॥ [१८
हैरण्यानां तथाऽश्वानां श्वेतानां वै[10] चतुर्युजाम् ।
२०] लक्षणैरुपपन्नानां[11] किङ्किणीजालमालिनाम् ॥४४॥ [१९
हयानां देश[12]जातीनां कुलजानां महौजसाम् ।
२१] सहस्रमेकं दश च ददामि तव सुव्रत ॥४५॥ [२०

---

१. ल—हव्यं च कर्तव्यं । भ—हव्यं च कव्यं च ।

२. ब ल—आयतुमग्नि० । भ—आयत्तम० ।

३. कै—बहिर्होमस्त० । ज ल—बलिहो० ।

४. रा—आसन्ना० । ब ल—आयत्ता० । भ—आयत्तास्तत्र ।

५. ल भ—सर्वस्वमेव ।

६. ब—सदा । ल—मुदा ।

७. ल—संरभततरमत्यर्थं ।

८. ल—वाक्यविदां वर ।

९. रा—स्ववर्णकक्षाग्रै० । ज—सुवर्णकक्षाग्रैवेयान् ।
ल—हैरणकक्ष्यांग्रै० । भ—हैरण्यकक्षाग्रै० ।

१०. ल भ—च ।

११. ज—अश्वाश्चैरुप० ।

१२. रा—दशजातीनां । ज ल भ—देशजाता० ।

नानावर्णविभक्तानां[1] वयःस्थानां तथैव च ।
२२] ददाम्येकां[2] गवां कोटिं दीयतां शबला मम ॥४६॥ [२१
एवमुक्तस्तु भगवान्[3] विश्वामित्रेण धीमता[4] ।
२३] नैव दास्यामि शबलामिति राजानमब्रवीत् ॥४७॥[5] [२३
उ२४] एतदेव हि मे सर्वमेतदेवं[6] हि जीवितम् । [२४उ
दर्शश्च[7] पौर्णमासश्च[8] यज्ञश्चैवाप्तदक्षिणः[9] ॥४८॥
२५] एतदेव हि मे राजन् क्रियाश्च विविधास्तथा । [२५
पू२६] एतन्मूलाः[10] क्रियाः सर्वा मम राजन् न संशयः ॥४९ ।[२६पू

इत्यार्षे रामायणे बालकाण्डे[11] वसिष्ठविश्वामित्रसंवादे[12] धेनुप्रभावो नाम अष्टचत्वारिंशः[13] सर्गः[14] ॥४८॥

---

१. ल भ—०विरक्तानां ।
२. रा—ददाभेकां । ज—दास्याम्येकां ।
३. रा—भगवन् ।
४. भ—वै तदा ।
५. ल भ—अतः परमधिकः पाठः—
एतदेव हि मे धर्ममेत†देवहि मे धनम् ।
६. भ—सत्यमे० ।
७. ज ल भ—दर्शश्च ।
८. ल—पौर्णमासी च ।
९. रा—०वाप्तदक्षिणम् ।
१०. ल भ—एतत्पूर्णाः ।
११. कै ब—आदिकांडे ।
१२. ल भ—नास्ति ।
१३. कै—चतुष्पंचाशत्तमः । रा—चतुपंचाशत्तमः ।
ज—चत्वारिंशः । ल भ—नास्ति ।
१४. भ—॥३८॥

---

† भ—सर्वमेत० ।

कामधेनुं वसिष्ठो हि न तत्याज यदा मुनिः ।
१] ततोऽस्य शबलां राजा विश्वामित्रस्तदाऽहरत् ॥१॥ [१
नीयमाना तु शबला राम राज्ञा बलीयसा ।
२] ध्यायन्ती चिन्तयामास रुदती शोकविह्वला ॥२॥ [२
परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ।
३] सोऽहं दीना राजभृत्यैर्ह्रियै परमदुःखिता ॥३॥ [३
किं मयाऽपकृतं तस्य महर्षेर्भावितात्मनः ।
४] यन्मामनागसं साध्वीं भक्तां त्यजति धार्मिकः ॥४॥ [४
इति सा चिंतयित्वा तु निःश्वस्य च पुनः पुनः ।
५] प्रययावेथं वेगेन वसिष्ठं प्रति राघव ॥५॥ [५
निर्धूय तान् राजभृत्यान् शतशोऽथ सहस्रशः ।

---

१. ज—नीयमानस्तु ।
२. ब ल—रुदंती ।
३. ल भ—शोककर्षिता ।
४. ब—किमर्थं ।
५. ल भ—याहं ।
६. ल—भृत्या । भ—हृता ।
७. ब—ह्रियै । भ—ह्रीये ।
८. रा—०पहृतं ।
९. ल—च ।
१०. ल भ—प्रययौ साथ ।
११. ल भ—विधूय ।
१२. भ—राजभृतः ।

६] जगामानिलवेगा सा पादमूलं महात्मनः[1] ॥६॥ [६
गत्वा तु रुदती[2] शोकादिदं वचनमब्रवीत् ।
७] शोकसन्तप्तहृदया श्वसन्ती[3] च[3] सुदुःखिता ॥७॥ [७
किं मयाऽपकृतं ब्रह्मंस्त्वयि ब्रह्मविदां[4] वर ।
N] यन्मामनागसं शिष्टां भक्तां त्यजसि धार्मिक ॥८॥ [N
N] श्रुत्वा तु शबलावाक्यं वसिष्ठ[5] इदम[5]ब्रवीत् । [९ पू
न त्वां[6] त्यजामि[7] शबले नहि मेऽप[8]कृतं त्वया ॥९॥
१०] एष त्वां नयते राजा बलान्मम महाबलः । [१०
न हि तुल्यं बलं भद्रे[9] राज्ञो[10] मम विशेषतः[10] ॥१०॥
११] बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च । [११
इयमक्षौहिणी पूर्णा गजवाजिरथाकुला ॥११॥
१२] पत्तिध्व[11]ज[11]शरौघैश्च तथैव[12] बलवत्तरैः[13] । [१२

---

१. ल—महात्मना ।
२. कै—रुरुती ।
३. ल—सबाष्पा च । भ—स्वसा यद्वत् ।
४. ल भ—धर्मभृतां ।
५. रा—वसिष्ठमिद० । ल—वसिष्ठश्चैवमब्रवीत् । भ—वसिष्टश्चेदम० ।
६. रा—तु ।
७. ल—त्यजसि ।
८. रा—मे परमं ।
९. भ—विप्रे ।
१०. व ल—राज्ञां विप्रैर्महाबलैः । भ—क्षत्रियैः सुमहाबलैः ।
११. ल—नरौघैश्च । भ—०रथौघैश्च ।
१२. ल—यथैष । भ—यथैव ।
१३. ज—बलवत्तराः ।

N] विश्वामित्रो महावीर्यस्तेजश्चास्य दुरासदम् ॥१२॥ [N
एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् ।
१३] वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभम् ॥१३॥ [१३
न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः ।[3]
१४] ब्रह्मन् ब्रह्मबलं दिव्यं क्षात्रात् तु बलवत्तरम् ॥[4]१४॥ [१४
अप्रमेयं बलं तेऽस्ति नायं तु बलवत्तरः ।
१५] विश्वामित्रो महातेजास्तेजस्तत्र दुरासदम् ॥[8]१५॥ [१५
नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मबलवत्तरम् ।[11]
१६] बलं दर्पं च यावद्धि नाशयामि दुरात्मनः ॥१६॥ [१६
एवमुक्तस्तया राम वसिष्ठः सुमहातपाः ।
१७] सृज त्वमिति होवाच बलं परबलार्दनम् ॥१७॥ [१७
तस्या हंभारवोत्सृष्टाः पह्लवाः शतशो नृपाः ।

---

१. ल—०तेजस्तु च । भ—०तेजसा च ।
२. भ—दुराषदः ।
३. ल—न बलं क्षत्रिये प्राहुर्ब्राह्मणो बलवत्तरः ।
भ—न बलं क्षत्रियस्यास्य ब्राह्मणो ,, ।
४. ल भ—क्षत्रात्तु ।
५. कै रा ज—नास्ति ।
६. ल—नायं हि । भ—नाम्योस्ति ।
७. रा ज—महातेज० ।
८. ल भ—नास्ति ।
९. रा—नियुंक्ष्व ।
१०. ल भ—ब्रह्मबलसंवृतः ।
११. ल—अतः परमाधिकः पाठः—
ब्रह्मन् ब्रह्मबलं दिव्यं क्षत्रात्तु बलवत्तरम् ।
१२. भ—वशिष्ठः ।
१३. भ—परबलार्दन ।
१४. ल भ—शतशस्तदा ।

१८] अत्राशयन् बलं सर्वं विश्वामित्रस्य पश्यतः ॥१८॥ [१९
राजा तु परमायस्तः क्रोधविस्तारितेक्षणः[1] ।
१९] पह्लवान्[2] नाशयामास शस्त्रैरुच्चावचैस्तथा ॥१९॥ [२०
विश्वामित्रहतान् दृष्ट्वा पह्लवान् शतशस्तदा ।
२०] भूय एवासृजद् घोरान् शकान् यवनमिश्रितान्[3] ॥२०॥ [२१
तैरासीदावृता[4] भूमिः शकैर्[5]यवनमिश्रितैः ।
२१] प्रधावद्भिर्महावीरैः[6] पद्मकिञ्जल्कसन्निभैः ॥२१॥ [२२
पू२२] दीर्घासिपट्टिशधरैर्हेमवर्मायुधावृतैः[7] । [२३पू
N] शैलस्थैर्विकृताकारैर्भीमवेगपराक्रमैः ॥२२॥ [N
उ२२] निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः । [२३उ
उ२३] अथास्त्राणि महातेजा विश्वामित्रो ह्यवासृजत् [२४पू
N] येषां विसृज्यमानानां त्रस्येदपि[8] शतक्रतुः ॥२३॥ [N

इत्यार्षे[9] रामायणे बालकाण्डे कामधेनुप्रकोपो[10] नाम[10]
एकोनपंचाशः[11] सर्गः[12] ॥४९॥

---

१. ल भ—क्रोधपर्याकुलेक्षणः ।
२. रा—पह्लवान् ।
३. रा—यवन्यमिश्रितान् ।
४. ल—०रासीत्संभृता । भ—०संवृता ।
५. ल—सर्वा । भ—सेना ।
६. ल भ—०महावीर्यैः ।
७. ल—हेमवर्णैरिवावृता । भ—रिवावृतं ।
८. रा ज—मस्येदपि । कै—पुनः शोभितः ।
९. कै ब—नास्ति ।
१०. कै रा ब—नास्ति ।
११. कै— पंचपंचाशत् । रा ब—पंचपंचाशः ।
ज—एकचत्वारिंशः ।
१२. ल भ—सर्गसमाप्तिर्न दृश्यते ।

ततस्तान् व्याकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान् ।
१] वसिष्ठश्चोदयामास[1] त्वं धेनो सृज योधिनः ॥१॥ [१
तस्या हंभारवाज्जाताः[2] कांभोजा रविसन्निभाः ।
२] उरसस्त्वभिसंज्ञाताः[3] पह्लवाः[4] शस्त्रपाणयः ॥२॥ [२
योनिदेशाच्चै[5] यवनाः शकृत्स्थानाच्छकास्तथा[6] ।
३] म्लेच्छास्तु रोमकूपेभ्यस्तुषाराः[7] सकिरातकाः ॥३॥ [३
तैस्तु निःषूदितं[8] सैन्यं विश्वामित्रस्य तत्क्षणात् ।
४] सपदातिगणं[9] साश्वं सरथं रघुनन्दन ॥४॥ [४
दृष्ट्वा निसूंदितं[10] सैन्यं वसिष्ठेन महात्मना ।
५] विश्वामित्रसुतानां च शतं नानाविधायुधर्म[11] ॥५॥ [५

---

१. ल भ—वसिष्ठो नोदयामास ।

२. ल—हंभारवाज्ञाताः । भ—हंभारवोत्सृष्टाः ।

३. ल—हृदयादाभिसंजाताः । भ—हृदयादाभिसंज्ञाताः ।

४. ल—कांभोखाः । भ—कांवोजाः ।

५. ल—योविदेशाच्च ।

६. ल भ—शकृत्स्थानात्तथा शकाः ।

७. भ—०स्तुसराः ।

८. के रा—०निष्पूदितं । ज—निसूदितं ।
ल—तैतैर्निसूदितं । भ—तच्चैर्निसूदितं ।

९. ब ल भ—सपदातिगजं ।

१०. ब—निःसूदितं । भ—निषूदितं ।

११. ब—नानाविधायुतं ।

अभ्यधावत् सुसंरब्धं[1] वसिष्ठं जपतां[2] वरम् । [५
६] हुंकारेणैव तान् सर्वान् निर्ददाह महामुनिः ॥ ६॥ [६
गजाश्वरथपादाता वसिष्ठेन महात्मना ।
७] भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तदा ॥७॥ [७
दृष्ट्वा विनाशितान् पुत्रान् भग्नं च सुमहद्बलम्[3] ।
८] सव्रीडश्चिन्तयानश्च[4] विश्वामित्रोऽभवत् तदा[5] ॥८॥ [८
समुद्र इव निर्वेगो भग्नदंष्ट्र[6] इवोरगः ।
९] उपरक्त इवादित्यः सद्यो निश्चेष्टतां[7] गतः ॥९॥ [९
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ।
१०] हतामात्यो[8] हतोत्साहो निर्वेगः[9] समपद्यत[10] ॥१०॥ [१०
पुत्रमेकं तु राज्ये च नियुज्य परिपाल्यताम् ।[11]
११] [12]पृथिवीति महातेजा वनमेवान्वपद्यत ॥११॥ [११
गत्वा हिमवतः पार्श्वं किन्नरैरुपशोभितम् ।

---

१. ल भ—सुसंक्रुद्धं ।

२. रा—जयतां ।

३. भ—सुमहाबलं ।

४. रा भ—०श्चिंतयामास ।

५. भ—०मित्रस्तदानघ ।

६. भ—भग्नदंत ।

७. भ—निःप्रभतां ।

८. कै—हतामान्यो । रा—हतामान्यो

९. भ—निर्वेदं ।

१०. कै ल—समुपद्यत ।

११. भ—पुत्रमेकं तु राज्याय निवेद्य परिपालने ।

१२. भ—पृथिवी वीरधर्मेण ।

१२] महादेवप्रसादार्थमतप्यत महत्तपः ॥ १२॥[1] [१२
ऊर्ध्वबाहुः स राजर्षिः पादाङ्गुष्ठाग्रसंस्थितः।
N] अभक्षयद् वर्षशतं वायुमात्रं भुजङ्गवत् ॥१३॥ [N
तत् तस्य तादृशं दृष्ट्वा तपस्त्रैलोक्यपावनम्[2]।
N] प्रीतात्मा[3] स्वयमेवास्य स्वयम्भूर्दर्शनं ययौ[4] ॥[5] १४॥ [N
उ१३] आगत्य[6] वरदो देवो विश्वामित्रमभाषत। [N
किमर्थं क्रियते[7] राजंस्तपो ब्रूहि चिकीर्षितम्[8] ॥१५॥[9]
१४] वरदोऽस्मि वरो यस्ते कांक्षितः[10] सोऽभिधीयताम्। [१४
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः ॥१६॥[11]
१५] प्रणिपत्य महादेवमिदं वचनमब्रवीत्। [१५
यदि तुष्टोऽसि मे देव धनुर्वेदः प्रदीयताम् ॥ १७॥[12]

---

१. ल—देवानां हि प्रसा०।
भ—०प्रसादार्थं तपस्तेपे सुदुः करं।
२. ल भ—०लोक्यतापनम्।
३. रा—प्रेतात्मा।
४. ब ल—ददौ।
५. भ—केनचित्त्वथ कालेन महादेवो वृषध्वजः।
६. ब—आदित्य०।
७. भ—तप्यते।
८. भ—विवक्षितं।
९. ल—नास्ति।
१०. भ—कांक्षितोस्त्यभिधीयतां।
११. ल—नास्ति।
१२. ल—स तं प्रणम्य विधिवद्भगवंतमभाषत।
यदि तुष्टो महादेव धनुर्वेदो ममानघ॥

१६] साङ्गोपाङ्गः सोपनिषत् सरहस्यस्तथैव च[1] [१६
यानि देवेषु[2] चास्त्राणि दानवेषु तथा नृषु[3] ॥१८॥
१७] गन्धर्वयक्षरक्षःसु[4] प्रतिभान्तु च तानि मे ।
भवत्प्रसादाद्[5] भवतु देवदेव ममेप्सितम् ॥१९॥ [१७
१८] एवमस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ।[6] [१८
प्राप्य चास्त्राणि दिव्यानि विश्वामित्रो[7] महातपाः[8] ॥२०॥
१९] हर्षेण महताऽऽविष्टो[9] दर्पपूर्णस्तथाऽभवत् । [१९
विवर्धमानो[10] वीर्येण समुद्र इव पर्वणि ॥२१॥
२०] हतमेव तदा मेने[11] वसिष्ठमृषिसत्तमम् । [२०
आगत्य[12] चाश्रमपदं तान्यस्त्राणि[13] ततोऽसृजत्[14] ॥२२॥
२१] तैस्तत् तपोवनं सर्वं निर्दग्धमभवत् तदा । [२१

---

१. ल—सरहस्यः प्रदीयतां । भ—सरहस्यो वृषध्वज ।

२. ल—वेदेषु ।

३. ब ल—तथर्षिषु । भ—सुरारिषु ।

४. भ—यक्षगंधर्वरक्षस्सु ।

५. भ—तव प्रसादाद्भगवन् ।

६. भ—एवमुक्तस्तु देवेश तथेत्युक्त्वा दिवं गतः ।

७. ल भ—राजर्षिर्विश्वामित्रो ।

८. भ—महायशाः ।

९. भ—महता युक्तो ।

१०. रा—विवर्धमाणो ।

११. ल—०तदाज्ञासीद् । भ—हतं मेने तदा धीमान् ।

१२. ल—आगम्य । ज—आगत्या ।

१३. भ—मुमोचास्त्राणि ।

१४. ल—ततोसृजम् । भ—तस्य सः ।

उदीर्यमाणमस्त्रं तद्[1] विश्वामित्रस्य धीमतः ॥२३॥

२२] दृष्ट्वा विप्राश्च[2][3] ते भीता ऋषयः शतशस्तथा[4] ।[5] [२२

वसिष्ठस्य च ये शिष्यास्तथैव मृगपक्षिणः ॥[6] २४॥[6]

२३] प्राद्रवन्त[7] भयोद्विग्ना दिशः सर्वे सहस्रशः । [२३

वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ॥२५॥

२४] मुहूर्तं[8] चैव निःशब्दमासीद्[9] वै रघुनन्दन । [२४

अवदच्च[10] वसिष्ठस्तान् मा भैष्टेति[11] मुहुर्मुहुः ॥२६॥

२५] नाशयाम्येष गाधेयं नीहारमिव भास्करः । [२५

एवमुक्त्वा महातेजा वसिष्ठो जपतां[12] वरः ॥२७॥

२६] विश्वामित्रं[13] तदा वाक्यं सरोष[14]मिदमब्रवीत् । [२६

आश्रमं चिरसंवृद्धं यद्[15] विनाशितवानसि ॥२८॥

---

१. भ—०मेवं तु ।

२. ज—भीताश्च । ल—विप्राश्च । ।

३. ज ल—विप्रा ।

४. ल—शतशस्तदा ।

५. भ—दृष्ट्वा विप्रा द्रुता भीता ऋषयोथ सहस्रशः ।

६. भ—नास्ति ।

७. ल—विप्राद्रवंस्ततो[थो]द्विग्ना ।

८. भ—मुहूर्तादिव ।

९. ल—०मासीत्तरणसन्निभं ।
भ—०मासीदीरियासंनिभं ।

१०. भ—अब्रवीच्च ।

११. कै—भैष्टेति ।

१२. भ—वदतां ।

१३. ज—विश्वामित्रमिदं ।

१४. भ—सरोषादिदम० ।

१५. ल—यदि नाशितवानासि ।

२७] दुराचारोऽसि संमूढ[1] तस्मात् त्वं न[2] भविष्यसि । [२७
इत्युक्त्वा परमक्रुद्धो[3] दण्डं जग्राह सत्वरः[4] ।
२८] सधूममिव कालाग्निं यमदण्डमिवापरम् ।।[5] २६।। [२८

इत्यार्षे रामायणे बालकाण्डे[6] वसिष्ठाश्रमदाहो[7] नाम[7]
पञ्चाशः[8] सर्गः[9] ।। ५० ।।

---

१. भ—मे मूढ ।
२. भ—विनंक्षसि
३. रा—परम० क्रुद्धो ।
४. भ—दंडमुद्यम्य संस्थितः ।
५. भ—सधूम इव कालाग्निर्यमदण्ड इवापरः ।
६. भ—आदिकांडे ।
७. के रा—वसिष्ठाश्रमदाहस् । भ—वसिष्ठाश्रमदाहः ।
ल—०श्रमविनाशो नाम ।
८. के रा—षट्पंचाशत्तमस् । ज—द्विचत्वारिंशः ।
भ—नास्ति ।
९. भ—नास्ति ।

एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः ।
१] आग्नेयमस्त्रमुत्क्षिप्य तिष्ठ तिष्ठति[1] चाब्रवीत् ॥१॥ [१
तस्य तद्वचनं श्रुत्वा वसिष्ठः प्रत्यभाषत । [२उ
२] स्थितोऽस्म्येष[2] क्षत्रबन्धो[3] यद् बलं तन्निदर्शय[4] ॥२॥
नाशयाम्येष ते[5] दर्पमस्त्रस्यापि[5]स्य गाधिज[6] । [३
३] क्व च क्षात्रं[7] बलं मूढ[8] क्व च ब्राह्मं महद्[9] बलम् ॥३॥
पश्यं ब्राह्मं बलं दिव्यं मम क्षत्रियपांसन । [४
४] तच्चास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुत्तमम् ॥४॥
ब्रह्मदण्डहतं शान्तमग्निवेग इवाम्भसा । [५
५] रौद्रं च वारुणं चैव शैवं[12] पाशुपतं तथा ॥५॥

---

१. भ—तिष्ठेत्यथाब्रवीत् ।
२. भ—स्थितोस्म्ययं ।
३. ज—क्षात्रबंधो । ब ल—क्षत्रनिध ।
४. ल भ—तद्धि दर्शय ।
५. ल—ते दर्पमस्त्रस्याप्यत्र । भ—दर्प ते शस्त्रस्याप्यद्य ।
६. रा—गाधिप ।
७. ज—क्षात्रबलं । भ—क्षत्रबलं ।
८. रा—मूढं ।
९. भ—महाबलं ।
१०. ल—क्वाचि[द्] ।
११. भ—तथास्त्रं ।
१२. क—सैवं । भ—पद्मं ।

[1]अवासृजत् तथैषीकं' [2]कुपितो गाधिनन्दनः । [६

६] [3]मानसं [3]मानवं चैव गांधर्वं [4]स्वापनं तथा ॥६॥

[5]जृम्भणं [6]मोहनं चैव [7]सन्तापनविलापनम् ।[8] [७

७] शोषणं [9]दारणं चैव वज्रमस्त्रं [10]च° दुर्जयम् ॥७॥[11] [८ पू

पू ८] दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च । [९ उ

उ ९] धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ॥[12]८॥[13] [१०पू

[14]ब्रह्मपाशं कालपाशं [15]वारुणं पाशमेव च । [८ उ

१०] [16]पैनाकमस्त्रं दयितं शुष्कार्द्रे [17]अशनी तथा ॥९॥[18] [९ पू

---

१. भ—ऐषीकं चैव चिक्षेप ।

२. ल भ—रुषितो ।

३. भ—मानवं भानवं ।

४. ल—स्थापनं ।

५. भ—अशनं ।

६. ज—मोहणं ।

७. भ—संतापनविलापनं ।

८. ज—अतः परममधिकः पाठः—

शोषणं दारुणं चैव संतापनविलापनं ।

९. ज भ—दारुणं । ब ल—दाहनं ।

१०. ज ल—सुदुर्जयं । भ—सुदारुणं ।

११. रा—नास्ति ।

१२. ल भ—नास्ति ।

१३. रा—नास्ति ।

१४. ल—ब्राह्मपाशं ।

१५. ज—पाशं वारुणमेव च ।

१६. ल—पिनाकमस्त्रं ।

१७. ज—चाशनी तथा । ब—अशनीद्वयं ।

ल—चाशनीद्वये ।

१८. रा भ—नास्ति ।

पू११] वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ।[3] [१०
उ८] शक्तिद्वयं च व्यसृजत् कङ्कालं मुसुलं तथा ॥१०॥[6]
पू९] स्थावरं च महाऽस्त्रं वै[7] कालास्त्रमतिदारुणम् ।[8]
उ११] त्रिशूलास्त्रं च दयितं[9] कपालमथ किङ्किणीम्[10] ॥११॥ [११
एतान्यस्त्राणि दिव्यानि विश्वामित्रस्त्ववासृजत् ।
१२] वसिष्ठे सुमहाभागे तदद्भुतमिवाभवत् ॥१२॥ [१२
ब्रह्मदण्डेन सर्वाणि जग्राह ब्रह्मणः सुतः ।[14]
१३] शान्तेषु तेषु ब्रह्मास्त्रमगृह्णाद् गाधिनन्दनः ॥१३॥ [१३
तदस्त्रमुद्यतं दृष्ट्वा देवाश्चाग्निपुरोगमाः ।
१४] देवर्षयश्च वित्रस्ता गन्धर्वाश्च महोरगाः ॥१४॥ [१४

---

१. ल—मथने वैनमस्त्रं ।
२. ज—ब्रह्मशिरस्तथा ।
३. भ—नास्ति ।
४. भ—चिक्षेप ।
५. भ—कालेन० ।
६. रा—नास्ति ।
७. ल—च ।
८. भ—नास्ति ।
९. भ—त्रिशूलमस्त्रं घोरं च ।
१०. ज भ—किंकिणी ।
११. ज ब ल—प्रेषयामास । भ—तु महाभागे ।
१२. भ—तानि दण्डेन ।
१३ भ—न्यवधीद् ।
१४. भ—तेषु शान्तेषु ब्रह्मास्त्रं प्राक्षिपद् गाधिनन्दनः ।
१५. ल—वसिष्ठाग्निपुरोगमाः ।
१६ भ—संभ्राता ।
१७. भ—गन्धर्वा समहोरगाः ।

त्रैलोक्यमासीत् सन्त्रस्तं[1] ब्रह्मास्त्रे समुदीरिते ।
१५] तद्युक्तमस्त्रं[2] घोरं[3] तु[3] ब्राह्मं ब्राह्मेण[4] तेजसा ॥१५॥ [१५
वसिष्ठोऽग्रसदव्यग्रो[5] ब्रह्मदण्डेन राघव । [१६
१६] ब्रह्मास्त्रं ग्रसमानस्य[6] वसिष्ठस्य महात्मनः[7] ॥१६॥
त्रैलोक्यमोहनं रौद्रं रूपमासीत् सुदारुणम्[8] । [१७
१७] सर्वेभ्यो रोमकूपेभ्यो वसिष्ठस्य महात्मनः ॥१७॥[9]
मरीचयो[10] विनिष्पेतुः[10] सधूमज्वलनप्रभाः[11] । [१८
१८] जज्वाले[12] ब्रह्मदण्डश्च[12] वसिष्ठस्य करोऽग्रतः[13] ॥१८॥
सधूम इव कालाग्निर्यमदण्ड इवापरः । [१९
१९] ततो[14]ऽस्तुवंस्तु ऋषयो[14] वसिष्ठं जपतां वरम् ॥१९॥

---

१. ब ल—संतप्तं । भ—सविघ्नं ।
२. के ल—तमुक्तमस्त्रं । ज—उद्युक्तमस्त्रम् ।
  भ—तमत्युग्रं ।
३. भ—महाघोरं ।
४. भ—ब्राह्मेन ।
५. ल—वसिष्ठो जग्रसे सर्वान् । भ—०दस्युग्रो ।
६. भ—ग्रसतस्तस्य ।
७. ल—महात्मना ।
८. भ—सुदुष्करं ।
९. के रा ज—नास्ति ।
१०. भ—मरीचय इवोत्पन्नाः ।
११. रा—सधूमस्स्वनलप्रभाः । ज—सधूमा ज्वलनप्रभाः ।
  ल—सधूमज्वलनार्चिषः । भ—०ज्वलनार्चिवः ।
१२. भ—प्रजज्वाल ब्रह्मदण्डो ।
१३. भ—करोस्थितः ।
१४. के ज—ततोस्तुवन्स्म० । रा—ततस्तुवन् महर्षयो ।
  भ—ततोस्तुवंस्तं मुनयो ।

अमोघं ते बलं ब्रह्मंस्तेजो धारय तेजसा । [२०

२०] निगृहीतस्त्वया राजा विश्वामित्रो महातपाः ॥२०॥ [२१ पू

विश्वामित्रोऽपि निकृतो[1] विनिःश्वस्येदमब्रवीत् । [२२उ

२२] धिग्बलं क्षत्रियबलं ब्रह्मतेजो महद्बलम्[2] ॥२१॥

एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि वै[3] । [२३

२३] एतद्बलं[4] समीक्ष्याहं सर्वेन्द्रियसमाहितः[5] ॥२२॥

तपोबलं समास्थास्ये[6] तद्वै[7] ब्रह्मप्रवर्तकम्[8] । [२४

२४] एवमुक्त्वा महातेजा राष्ट्रमुत्सृज्य[9] दुःखितः ।[10]

उ२५] स जगाम तदा[11] रामं तपश्चरणनिश्चितः ॥[12] २३॥ [N

इत्यार्षे रामायणे बालकाण्डे[13] विश्वामित्रप्रतिज्ञा[14] नाम[14]

एकपञ्चाशः[15] सर्गः[16] ॥५१॥

---

१. रा—०मित्रोपनिकृतो ।

२. भ—बलं बले ।

३. ब ल भ—मे ।

४. भ—तदेतद्बलमालोक्य ।

५. रा—०समान्वितः । ज—०समाहृतः ।

६. ल—समास्थाय ।

७. भ—यत्र ।

८. ल—ब्रह्म प्रवर्तते । भ—ब्रह्मकारिणां ।

९. भ—महातेजाः शस्त्रमुत्सृज्य ।

१०. ल—नास्ति ।

११. भ—महाराजा ।

१२. ल—एवं सुनिश्चयं कृत्वा ब्राह्मणो धृतमानसः ।

१३. कै ब भ—आदिकांडे ।

१४. ज—विश्वामित्रप्रतिहतिर्नाम । भ—०मित्रप्रतिज्ञा ।

१५. कै रा—सप्तपंचाशत्तमः । ज—त्रिचत्वारिंशः । भ—नास्ति ।

१६. ज—॥४३॥ भ—॥४४॥ ल—सर्गसमाप्तिर्न दृश्यते ।

सोऽतप्यत[1] तपो घोरं विश्वामित्रो[2] महामुनिः । [N
१] विनिःश्वस्य विनिःश्वस्य कृतवैरो महामनाः[3] ॥[4]१॥ [१ उ
दिशं तु दक्षिणां[5] गत्वा महिष्या[6] सह कौशिकः[7] । [२ पू
२] फलमूलाशनो दान्तः परमं चाकरोत् तपः ॥[8]२॥ [३ पू
ब्रह्मर्षित्वमभिप्रेप्सु[9] वसिष्ठस्पर्धया विभुः[10] ।[11] [N
३] दृष्ट्वा ब्रह्मतपोयोगं वसिष्ठस्यात्मनोऽधिकम् ॥३॥
तताप परमं राम तपोवनमुपाश्रितः ।
४] ब्राह्मणः स्यामिति मतिं[12] समाधाय[13] महातपाः[14] ॥[15]४॥ [N

---

१. ल—अतप्यत ।

२. भ—विश्वामित्रस्ततो मुनिः ।

३. ल—महातपाः ।

४. ज—नास्ति ।

५. ल—दक्षिणां तु दिशं । भ—दक्षिणां दिशमास्थाय ।

६. ज—महिष्यः ।

७. ल—राघव ।

८. भ—फलमूलाशनस्तत्र चचार सुमहत्तपः ।

९. रा—०मभिप्रेप्स्य । भ—०मनुप्रेप्सुर्व० ।

१०. भ—मुनिः ।

११. ल—नास्ति ।

१२. भ—मनः ।

१३. ज—समाधाय ।

१४. भ—महामनाः ।

१५. ल—नास्ति ।

तत्रास्य[1] जज्ञिरे पुत्राश्चत्वारो लोकविश्रुताः ।[2]
५] हविःष्यन्दो मधुष्यन्दो[3] दृढनेत्रो महोदरः ॥[4]५॥ [३ ख
इत्यस्य शासतो राज्यमष्टौ पुत्रा महाबलाः ।
६] जज्ञिरे राजशार्दूल वीर्यवन्तो महौजसः ॥[5]६॥ [N
वर्षाणां तत्र पूर्णे[6]थ स[7]हस्रे तपतां वरः ।
७] जज्वाल तपसा धीमान् कौशिकोऽग्निरिवोत्थितः ॥७॥[9] [N

इत्यार्षे रामायणे बालकाण्डे[10] विश्वामित्रप्रशंसा नाम[11]
द्विप[11]ञ्चाशः सर्गः[12] ॥५२॥[13]

---

१. ब—ततोस्य ।
२. ल—अजायंत ततश्चास्य पुत्रा धर्मपरायणाः ।
३. ल—महिष्यंदो ।
४. कै—हविष्यंदमधुष्यंददृढनेत्रमहोदराः ।
रा—हविष्यन्द „ „
ज—हविःष्यन्द „ „
भ—हरिस्कंदमधुस्कंददीर्घनेत्रमहोदया
५. भ—तदा च ।
६. भ—नास्ति ।
७. ज—पूर्णे च ।
८. ज—सहस्रं ।
९. भ—कौशिकोग्निरिव ज्वलन् ।
१०. ल—नास्ति ।
११. कै ब—आदिकांडे ।
१२. कै रा—नामाष्टपंचाशत्तमः ।
ज—नाम चतुश्चत्वारिंशः । ब—नाम ।
भ—नास्ति ।
१३. भ—नास्ति ।
१४. ज—॥४४॥ भ—॥४१॥
ज—सर्गसमाप्तिर्न दृश्यते ।

पूर्णे वर्षसहस्रेऽथ ब्रह्मा[1] लोकपितामहः ।
१] आगम्य[2] गाधिजं[3] राम सोऽब्रवीन्मधुरं वचः ॥१॥[4] [४
जितो राजर्षिलोकैस्ते सुमहान्[5] कुशिकात्मज ।
२] अनेन तपसा युक्तं राजर्षि[6] त्वां समर्थये ॥२॥ [५
एवमुक्त्वा[8] महातेजा जगाम सह दैवतैः ।
३] त्रिविष्टपाद् ब्रह्मलोकं जगाम प्रभुरव्ययः ॥[10]३॥ [६ उ
विश्वामित्रस्तु[11] तच्छ्रुत्वा ह्रिया किञ्चिदवाङ्मुखः[12]।
४] दुःखेन महता युक्तः समन्युरिदमब्रवीत् ॥४॥[13] [७
तपश्च सुमहत् तप्तं राजर्षिरिति चैव मे[14]।[15]

---

१. ब—ब्रह्मलोकपितामहाः । भ—ब्रह्मलोकाऽपितामहः ।
२. ज—आगत्य ।
३. रा—गाधिकं ।
४. ल—पूर्णे वर्षसहस्रे तु तपसा द्योतितप्रभम् ।
आजगाम ततो द्रष्टुं ब्रह्मा लोकपितामहः ।
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ।
५. ब ल—राजर्षिवंशस्ते ।
६. ब ल—तपसा ।
७. रा ज—राजर्षि ।
८. ल—एवमुक्तो ।
९. रा—रितिचैव मे ।
१०. भ—त्रिविष्टपाद्देवलोकं लोकानां प्रभुरीश्वर ।
११. भ—विश्वामित्रोपि ।
१२. के ल—०दवांमुखः । भ—किंचित्पराङ्मुखः ।
१३. रा—नास्ति ।
१४. ल—राजर्षीति मां विदुः । भ - ०चैव मां ।
१५. रा—नास्ति

५] अद्यापि भगवानाह नास्ति शङ्के तपः फलम् ॥५॥[1] [८
एवमुक्त्वा महातेजा भूय एव महामुनिः[2] ।
६] तपश्चकार[3] काकुत्स्थ परमं परमात्मवान् ॥६॥ [९
एतस्मिन्नेव काले[4] तु सत्यधर्मपरायणः[5] ।
७] त्रिशङ्कुरिति[6] राजाऽऽसीदिक्ष्वाकुकुलनन्दनः[7] ॥७॥ [१०
तस्य बुद्धिः समुत्पन्ना यजेयमिति[8] राघव ।
८] गच्छेयं[9] स्वशरीरेण[10] राम[11] स्वर्गमिति[12] प्रभो ॥८॥
स वसिष्ठं समाहूय मतिमेतां[13] न्यवेदयत् ।[14]
९] अशक्यमेतदित्युक्तो[15] वसिष्ठेन[16] च धीमता[16] ॥९॥ [१२

---

१. ल—देवास्सार्षिगणाः सर्वे नास्ति मन्ये तपःफलम् ।
२. भ—महातपाः ।
३. ज भ—तपश्चचार ।
४. भ—एतस्मिन्नंतरे काले ।
५. ल—सत्यवादी महायशाः ।
६. ल—त्रिशंगर्नाम । भ—त्रिशंकुर्नाम ।
७. भ—राजाभूदि० ।
८. भ—यजेयामिति ।
९. ब ल—इच्छेयं ।
१०. ल—सशरीरेण ।
११. ब ल—गंतुं । भ—रमे ।
१२. भ—स्वर्गे इति ।
१३. ब—मंत्रमेतं ।
१४. ल—वसिष्ठं स समाहूय मंत्रयित्वा स राघव ।
भ— ,, ,, मतिमेनां न्यवेदयत् ।
१५. ल—अशक्यमिति चाप्युक्तो । भ—नास्ति ।
१६. भ—नास्ति ।

प्रत्याख्यातो वसिष्ठेन[1] प्रययौ दक्षिणां[2] दिशम् । [१३पू

१०] वसिष्ठस्य शतं यत्र पुत्राणां तप्यते[3] तपः[4] ॥१०॥

त्रिशङ्कुः[5] स महातेजाः शतसंख्यांस्तपस्विनः[6] ।

११] वसिष्ठपुत्रान् ददृशे तप्यमानान् महत् तपः ॥११॥[7] [१४

सोऽभिवाद्य[8] महातेजाः सर्वानेव कृताञ्जलिः ।[9] [१५

१२] कुशलं चाव्ययं चैव पृष्ट्वा चैताननामयान् ॥१२॥ [N

अब्रवीत् स[10] महाभागो[11] गुरुपुत्रान् नराधिपः ।

१३] प्रत्याख्यातो वसिष्ठेन ह्रिया किंचिदवाङ्मुखः[12] ॥[13] १३॥[१५पू

शरणं[14] वः प्रपन्नोऽहं[15] शरण्यान्[16] शरणप्रदान्[17] । [१६पू

१४] त्रातुमर्हथ मां सर्वे प्रपन्नं शरणागतम् ॥[18] १४॥ [N

---

१. भ—नास्ति ।

२. ल—दक्षिणामुखः ।

३. ज—ताप्यते ।

४. ल—वसिष्ठा दीर्घतपसस्तप्यंते पत्र वे तपः ।
 भ—वसिष्ठस्य शतंपुत्राः तप्यंत परमं तपः ।

५. ल—त्रिशंकुस्तु ।

६. रा—शतसंख्यां तपस्विनः ।

७. भ—त्रिशंकुरथ पुत्राणां वसिष्ठस्य शतं ततः ।
 ददर्श दीर्घतपसः तपतस्तप उत्तमं ॥

८. रा—सोपिवाद्य ।

९. भ—सोभिगम्यांजलिं कृत्वा तानुवाच तपोधनान् ।

१०. भ—चैतांस्ततो वचः ।

११. ल—स महाभाग । भ—सुमहातेजा ।

१२. के—०दवांमुखः । भ—किंचित्पराग्मुखाः ।

१३. ल—नास्ति ।

१४. ल—वा ।

१५. ल—प्रपद्येहं

१६. के—शरण्यो । ल—शरण्याः ।

१७. रा—शरणाप्रदान् । ल—शरणागतः । भ—शैरणार्थं ।

१८. ल—नास्ति ।

प्रत्याख्यातोऽस्मि गुरुणा[1] वसिष्ठेन महात्मना । [१६
१५] यष्टुकामो महायज्ञं तमनुज्ञातुमर्हथ[2] ॥१५॥
गुरुपुत्रानहं सर्वान् नमस्कृत्य[3] पुरोधसः । [१७
१६] शिरसा प्रणतो भूत्वा याचे[4] वस्तपसि[5] स्थितान् ॥१६॥
ते[6] मां भवन्तः सिद्धार्थो[7] याजयन्तु[8] तपोधनाः ।
१७] सशरीरो यथा स्वर्गं यज्ञेन समवाप्नुयाम् ॥[9]१७॥ [१८
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः ।
१८] गुरुपुत्रानृते सर्वान्[10] नाहं[10] पश्यामि तत्त्वतः ॥१८॥ [१९
इक्ष्वाकूणां च सर्वेषां वसिष्ठः[11] प्रवरो[12] गुरुः[12] । [२०पू
१९] तस्मादनन्तरं सर्वे भवन्तो गुरवो[13] मम ॥१९॥[14] [२१

इत्यार्षे[15] रामायणे बालकाण्डे[16] त्रिशङ्कुप्रत्याख्यानं[16] नाम[17] त्रिपञ्चाशः[17] सर्गः ॥[18] ५३ ॥

---

१. ल—भद्रं वो । २. ज—तदनुज्ञातु० । ल—तन्मेनुज्ञातु० ।
३. भ—पुरस्कृत्य । ४. ल—ये वै । ५. रा—व तपसे । भ—वै तपसि ।
६. रा—तेषां । ७. ल—सिद्धयर्थं । ८. कै—यजयन्तु ।
९. रा—नास्ति । १०. रा—सर्वानहं । भ—नाहं सर्वान् ।
११. ल भ—पुरोधाः ।
१२. रा—प्रभवो गुरुः । ल भ—परमा गतिः । १३. ल—दैवतं ।
१४. ल भ—अतः परमाधिकः पाठः—
भवद्भिः संपरित्यक्तः प्रणिपत्य गुरोः सुतान् ।
अन्यं गुरुमुपाश्रिष्ये यज्ञार्थं कृतमानसः ।*
१५. कै ब भ—आदिकांडे ।
भ—अतः परमाधिकः पाठः—शतानन्दवाक्ये ।
१६. रा—०प्रत्याख्यानो ।
१७. कै रा—नामोनषष्टितमस्सर्गः ब—नाम सर्गः ।
ज—नाम पंचचत्वारिंशः सर्गः । भ—नास्ति ।
१८. ज—॥४५॥ भ—॥४२॥ ल—सर्गसमाप्तिर्न दृश्यते ।

---

* भ—कृतात्मनः

त्रिशङ्कोर्वचनं श्रुत्वा ततः क्रोधसमन्वितम्[1] ।
१] ऋषिपुत्रशतं[2] राम[3] राजानमिदमब्रवीत्[4] ॥१॥ [१
प्रत्याख्यातोऽसि दुर्बुद्धे गुरुणा ब्रह्मवादिना[5] ।
२] तदतिक्रम्य वचनं कस्मादस्मानुपागतः ॥[6] २ ॥ [२
मूलमुत्सृज्य कस्मात् त्वं शाखामिच्छसि सेवितुम्[7] ।
३] नैतत् ते साधु यद्राजन्नस्मानिच्छसि सेवितुम्[8] ॥[9] ३॥[10] [N
इक्ष्वाकूणां हि[11] सर्वेषां पुरोधाः परमा गतिः ।
४] न[12] ते क्षमं तु तत् तस्य वचोऽतिक्रम्य वर्त्तितुम् ॥४॥[10]
अशक्यमिति यत्[13] प्राह[13] वसिष्ठो भगवानृषिः ।
५] तदस्माभिः कथं शक्यं कर्तुं[14] राजन्[14] बलादिव ॥[15] ५॥ [४

---

१. भ—०समन्विताः ।
२. भ—ऋषिपुत्राः समं ।
३. रा—नाम ।
४. भ—०मब्रुवन् ।
५. ळ भ—सत्यवादिना ।
६. ळ—न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ।
७. ज—०मिच्छामि । भ—शाखां सेवितुमिच्छसि ।
८. भ—याजकान् ।
९. ज—नास्ति ।
१०. ळ—नास्ति ।
११. भ—च ।
१२. भ—अतः क्षमं न ते ।
१३. ळ—चोवाच ।
१४. भ—कर्तुमद्य बलादिह ।
१५. ळ—तमद्य वयमाहर्तुं कथं शक्ता क्रतुं तव ।

बालिशोऽसि सुमन्दात्मन् गम्यतां स्वपुरं पुनः ।
६] याजने भगवानेव शक्तोऽसौ न वयं हि ते ॥६[3]॥ [५
तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् ।
७] राजा मन्युसमाविष्टो गुरुपुत्रानुवाच तान् ॥७॥ [७
प्रत्याख्यातो वसिष्ठेन भवद्भिस्तदनन्तरम् ।
८] अन्यां गतिं गमिष्यामि यष्टुं विदितमस्तु वः ॥८॥ [८
ऋषिपुत्रास्तु तच्छ्रुत्वा क्रोधपर्याकुलाक्षरम् ।
९] शेपुस्तं परमक्रुद्धाश्चण्डालस्त्वं भविष्यसि ॥९॥ [९
इति शप्त्वा च राजानं विविशुस्ते स्वमाश्रमम् । [१०
१०] अथ रात्रौ व्यतीतायां तस्यां राजा बभूव सः ॥१०॥

१, भ—अनुशिक्षासि मंद त्वं ।

२. रा—यजने ।

३. ल—बालिशस्त्वं नृपश्रेष्ठ गुरुपुत्रान् य इच्छसि ।
तपोरतांश्चालायितुं गम्यतामिष्टतो नृप ।

४. ल--स्नेहपयाकुला: । भ—क्रोधव्याकुलिताक्षः ।

५. रा—राजमन्यु० ।

६. ल—गुरुपुत्रानथाब्रवीत् । भ --मुनिपुत्रा० ।

७. ल - गुरुपुत्रैस्तथैव च

८. ल—स्वास्ति वोस्तु तपोधनाः । भ—यच्चद्विदितम० ।

९. ल—वसिष्ठपुत्रास्तच्छ्रुत्वा ।

१०. ल—वाक्यं घोराक्षरं तदा । भ—घोराक्षरपदं वचः ।

११. ज—परमं क्रुद्धा० । भ—०श्चांडालस्त्वं ।

१२. रा—०शप्त्वा तु । रा—इत्येवमुक्त्वा ।

१३. ल—रात्र्यां । भ—रात्र्यं ।

१४. ल—राजा चंडालदर्शनः ।

चण्डालदर्शनो राम सद्य एव दुराकृतिः ।[१]
११] अधो नीलाम्बरधरो रक्ताम्बरकृतोत्तरः ।।११।। [१२
संरब्धताम्रघोराक्षः करालो हरिपिङ्गलः ।
१२] ऋक्षचर्मनिवासी च लोहाभरणभूषितः ।।१२।।[४] [N
तं दृष्ट्वा सचिवास्तस्य सद्यश्चण्डालतां गतम् ।
१३] दुद्रुवुः स्वपुरं राम पौरा ये चानुयायिनः ।।१३।। [१३
एक एव ततो राजा जगामाकुलचेतनः ।
१४] शापजेन सुदुःखेन दह्यमानो दिवानिशम् ।।१४।।[१०]
विश्वामित्रं महात्मानं ततः शरणमाययौ ।[१०] [१४
१५] स्पर्धमानं वसिष्ठेन शरणार्थी तपोधनम् ।।१५।। [N
विश्वामित्रोऽपि दृष्ट्वैव राजानं तु तथागतम् ।
१६] चण्डालरूपिणं राम कारुण्यं समुपागतम् ।।१६।।[१२] [१५

---

१. ल—नास्ति ।

२. भ—०धरोत्तरः ।

३. के—ऋक्षिरान्मनिवासी ।

४. ल—विचित्रमाल्याभरण आयसाभरणस्तथा ।

५. ल—मंत्रिणः सर्वे ।

६. ल—साक्षाच्चंडालतां ।

७. रा—गतिम् ।

८. ब भ—सुपुरं ।

९. भ—लज्जाव्याकुलचेतनः ।

१०. ल—अथैक एव राजा स जगाम परमासवान् ।
दह्यमानं दिवारात्रौ महामुनिम् ।

११. ज ब—समुपागमत् । भ—समुपागतः ।

१२. ल—विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम् ।
चंडालरूपिणं घोर ततः कारुण्यमीयिवान् ।

कारुण्याच्च महातेजा वाक्यं वाक्यविशारदः ।
१७] अब्रवीद् गतलक्ष्मीकं राजानं घोरदर्शनम्[१] ॥१७॥ [१६
किमागमनकृत्यं[२] ते[२] इक्ष्वाकुकुलनन्दन ।
१८] अयोध्याऽधिपते[३] वीर[३] शापाच्चण्डालतां[४] गतः ॥१८॥ [१७
अथ तद्वाक्यमाकर्ण्य राजा चण्डाल[५]दर्शनः ।
१९] अब्रवीत् प्राञ्जलिर्वाक्यं[६] विश्वामित्रं तपोधनम्[७] ॥१९॥ [१८
प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ।
२०] इमं विपर्ययं प्राप्तः काममप्राप्य कांक्षितम् ॥[८]२०॥ [१९
सशरीरो दिवं यायामिति मे[९] सौम्य[१०] निश्चयः ।
२१] महायज्ञफलेनेति[११] तं च[११] न[१२] प्राप्तवानहम्[१२] ॥२१॥ [२०

---

१. ल—घोरदर्शिनं ।

२. कै—०कृत्यं त । ल० गमनहेतुस्ते ।

३. रा—अयोध्याधिपतिर्वीरः ।

४. भ—शापाश्चांडालतां गत ।

५. ज—चांडाल० । पुनरपरहस्तेन कृतः ।

६. ल—वाक्यज्ञो ।

७. रा—तपोनिधिम् । ल—वाक्यकोविदः ।

८. ल—अनवाप्तश्च तं काममहं प्राप्तो विपर्ययं ।

९. ल—मा ।

१०. रा ब—सोम्य निश्चयः । ज—सोम्यनिश्चयः ।

ल भ—सौम्यदर्शन ।

११. ल—मयास्योदाहृतो यज्ञस्तं च ।

भ—महायज्ञफलेनेति तच्च ।

१२. रा—न शप्तवानहम् । भ—नैवाप्यते मया ।

अनृतं नोक्तपूर्वं हि[1] विश्वामित्र मया क्वचित्[1] ।
२२] कृच्छ्रेऽपि[2] वर्तमानेन[2] क्षत्रधर्मेण ते[3] शपे[3] ॥२२॥ [२१
यज्ञैर्बहुभिरिष्टं[4] मे[4] प्रजा[5] धर्मेण पालिताः[5] ।
२३] गुरवश्च महात्मानः[6] शीलवृत्तेन[7] तोषिताः ॥२३॥ [२२
धर्मे प्रयतमानस्य[8] शुद्धवाग्बुद्धिकर्मणः[9] ।
२४] परितोषं न[10] गच्छन्ति गुरवो[11] मुनिपुङ्गव[11] ॥२४॥ [२३
दैवमेवं[12] परं मन्ये पौरुषं नात्र[13] कारणम् ।[14]
२५] शुभाशुभफलप्राप्तौ नराणामिति मे मतिः ॥[15] २५॥ [२४
तस्य मे परमार्तस्य[16] दैवोपहतकर्मणः[17] ।
२६] शरणार्थं प्रपन्नस्य प्रसादं कर्तुमर्हसि ॥[18] २६॥ [२५

---

१. ल—न भविष्यं कदाचन ।
२. ल—कृच्छ्रेष्वपि गतः सौम्य ।
३. ज—ते शपं ।
४. ल—०र्बहुविधैरिष्टं । भ—यज्ञैर्मयेष्टं विविधैः ।
५. भ—धर्मतः पालिता मही ।
६. ल—महाभागाः । भ—मया सर्वे ।
७. ल—शीलधर्मेण ।
८. ल—प्रयतमानानां । भ—प्रपद्यमानस्य ।
९. ल—शुद्धवाग्बुद्धिकर्मणां ।
१०. ज— नु ।
११. ल—रिपवो मुनिसत्तम ।
१२. ल भ—दैवमत्र ।
१३. ल भ—नास्ति ।
१४. ब ल—दैवमाक्रमते बुद्धिं दैवं हि परमा गतिः ।
१५. ल—नास्ति ।
१६. ल—परमार्तस्य ।
१७. ल—प्रसादं मुनिपुंगव ।
१८. ल—कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ।
भ—शरणागतस्य भगवन्प्रसादं कर्तुमर्हसि ।

नान्यां[1] गतिं प्रपश्यामि[2] नान्यः शरणदोऽस्ति[3] मे ।
२७]दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥२७॥[4] [२६

दावानलोपद्रुतपत्रसंघो
यथा तरुर्हर्षमुपैति दृष्ट्वा[5] ।
वर्षासु मेघं तडिदुज्ज्वलाङ्गं[6]
N] तथा ऋषिं प्राप्य नृपस्त्रिशंकुः[7] ॥२८॥ [N

इत्यार्षे रामायणे बालकाण्डे[8] त्रिशंकुवाक्यं[9] नाम
चतुष्पञ्चाशः[10] सर्गः ॥ ५४ ॥[11]

---

१. कै—नान्यं ।
२. ल—गतिमुपास्यामि ।
३. कै—शरणश्चोस्ति । ल—शरणमस्ति ।
४. भ—नास्ति ।
५. ब—दृष्ट्वा ।
६. ब—तमिरुज्ज्वलांगं ।
७. ल—नृपस्त्रिशंगः ।
८. कै ब भ—आदिकांडे ।
९. ल—त्रिशंकुशापो ।
१०. कै रा—षष्ठितमः । ज—षट्चत्वारिंशः ।
ब ल भ—नास्ति ।
११. ज—॥ ४६ ॥ भ—॥ ४३ ॥

उक्तवाक्यं तु राजानं विश्वामित्रो महामुनिः ।
१] अब्रवीन्मधुरं वाक्यं त्रिशङ्कोर्[1]हर्षवर्धनम् ॥१॥ [१
इक्ष्वाको स्वागतं वत्स[2] जानामि त्वां सुधार्मिकम्[3] ।
२] शरणं ते भविष्यामि वत्स्यसि[4] त्वं[5] ममाश्रमे ॥२॥ [२
सर्वानामन्त्रयिष्यामि[6] त्वत्कृते[7]ऽत्र तपोधनान् ।
३] कांक्षितस्यास्य[8] ते राजन् सिद्धये यज्ञकर्मणः[9] ॥३॥[10] [३
गुरुशापकृतं[11] रूपं [12]यदिदं धार्यते त्वया ।
४] संसिद्धस्त्वमनेनैव रूपेण स्वर्गमेष्यसि ॥[13]४॥ [४

---

१. ज—त्रिशंकुं ।
२. ब—तेस्ति । ल—तेस्तु ।
३. के—सुधार्मिकाम् । रा—स्वधार्मिकम् ।
ब—सुधार्मिकां ।
४. ब ल भ—वसेह ।
५. ल—नृपसत्तम ।
६. ज भ—सर्वानामंत्रयिष्येहं ।
७. भ—त्वत्कृते तु ।
८. भ—वांछितस्यास्य ।
९. रा—०कर्मणा । भ—०कर्मणि ।
१०. ल—अहमामंत्रये सर्वानृषीन्परमधार्मिकान् ।
यज्ञसाहाय्यकरणो ततो यक्ष्यसि निर्वृतः ॥
११. भ—गुरुणा प्रकृतं ।
१२. भ—यदेतद्धार्यते त्वया । ल—०त्वयि वर्तते ।
१३. ल—अनेनैव च रूपेण सशरीरो गमिष्यसि ।

हस्तप्राप्तमहं मन्ये स्वर्गं ते नृपसत्तम ।
५] यत् त्वं मां समुपागम्य त्रिदिवं गन्तुमिच्छसि ॥[1]५॥ [५
एवमुक्त्वा महातेजाः पुत्रानाहूय सर्वशः[2] ।
६] शिष्यांश्च सुहृदश्चान्यानुवाचेदं वचस्तदा ॥[3]६॥ [६ पू
आनयध्वमिह क्षिप्रं यज्ञद्रव्याण्यशेषतः ।
७] मदीयेनैव[4] यज्ञोऽयं द्रव्येणास्य भविष्यति ॥७॥[5] [N
शिष्यानुवाच चाहूय सर्वानेव तदा वचः ।[6]
८] सर्वानृषीनानयध्वं समुपेत्याज्ञया मम ॥८॥[6] [६ उ
यश्च यद् वचनं ब्रूयान् मम वाक्यप्रचोदितः[7] । [७ पू
९] तन्मे भवद्भिरावेद्यं यथाप्रोक्तमशेषतः ॥[8]९॥ [८
शिष्यास्ततोऽस्य ते जग्मुर्दिशः सर्वास्तदाज्ञया ।[10]
१०] आमन्त्र्य चाप्युपावृत्ता न चिरेण तपोधनाः[11] ॥[12]१०॥

---

१. ल—हस्तमात्रमहं मन्ये स्वर्गंति वनरेश्वर ।
यस्त्वं कौशिकमाज्ञाय शरण्यं शरणं गतः ।
भ—नास्ति ।
२. ल—विश्वामित्रो महामुनिः ।
३. ल—शिष्यांश्च सुहृदश्चैव ऋत्विजस्सपुरोधसः ।
४. कै—मदीयेनैव ।
५. ल—अनोदयन्महातेजा यज्ञसंभारकारणं ।
६. ल—शिष्यांश्च सर्वानानाय वाक्यज्ञो वाक्यमब्रवीत् ।
गत्वा मुनिवरान्सर्वान्समानयत सत्वरम् ॥
७. ल—मद्वाक्यपरिनोदितः ।
८. ल—तत्सर्वमखिलेनोक्तं समाख्येयं विनामृतम् ।
९. भ—सर्वे तदाज्ञया ।
१०. ल—ततस्तद्वचनं श्रुत्वा दिशो जग्मुः पृथक् पृथक् ।
११. भ—तपोधनान् ।
१२. ल—आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ।

प्रोचुः[1] प्राञ्जलयोऽभ्येत्य विश्वामित्रमिदं वचः ।
११] तत्र चामन्त्रिताः[2] सर्वे मुनयोऽस्माभिराज्ञया ॥११॥[3] [१०
आज्ञा प्रतिगृहीता तैः सर्वैरेव तपोधनैः ।
१२] अस्माभिरुक्तैरभ्येत्य[4] वर्जयित्वा महोदयम् ॥१२॥[5] [११
वसिष्ठस्य च पुत्राणां शतं क्रोधसमाकुलम्[6] ।
१३] यदुवाच वचो घोरं शृणु तन्मुनिपुंगव ॥१३॥[7] [१२
क्षत्रियो याजको यत्र चण्डालस्य[8] विशेषतः[9] ।
१४] कथं सदसि भोक्ष्यन्ते[10] हविस्तत्र सुरोत्तमाः[11] ॥१४॥ [१३
ब्राह्मणा वा[12] महात्मानो भुक्त्वा चण्डालभोजनम्[13] ।
१५] कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पातिताः[14] ॥१५॥ [१४

---

१. भ—उचुः ।

२. ज—उवाचमंत्रिताः । भ—उपोपामंत्रिताः ।

३. ल—ते तु शिष्याः समागम्य मुनिं ज्वलनतेजसं ।
अब्रुवन् वचनं सर्वे यथोक्तं ब्रह्मवादिभिः ।

४. रा—ऽरभ्येति । ज—ऽरभ्यर्च्य ।

५. ल—श्रुत्वा ते वचनं सर्वे समायांति द्विजातयः ।
भगवन्सर्वदेशेभ्यो वर्जयित्वा महोदयम् ॥

६. भ—क्रोधे समाकुले ।

७. ल—वासिष्ठं च शतं सर्वे शृणु तन्मुनिपुंगव ।

८. भ—चांडालस्यापि ।

९. के ल—विशेषतः । भ—यत्नतः ।
"के" पुस्तके पुनरपरहस्तेन कृतः ।

१०. ल—भोक्तारो । भ—भोज्यं तद् ।

११. ल—सुरर्षयः । भ—सुरोत्तमैः ।

१२. ल—हि ।

१३. रा भ—चांडालभोजनम् ।

१४. रा—घातिताः । भ—पाविताः ।

निष्ठुरं वचनं प्राहुरेते[1] संरक्तलोचनाः ।
१६] वासिष्ठा नरशार्दूल सर्वे ते समहोदयाः[2] ॥[3]१६॥[4] [१५
इति तेषां वचः श्रुत्वा शिष्याणां मुनिपुङ्गवः ।
१७] क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥१७॥[5] [१६
ये[6] दूषयन्त्यदुष्टं मां वासिष्ठा[7] मन्दचेतसः ।
१८] भस्मीभूता[8] दुरात्मानः कालस्य वशमागताः ॥१८॥ [१७
अद्य ते कालपाशेन नीता वैवस्वतक्षयम् ।
१९] सप्तजातिशतान्येवं[9] मृता[10] यास्यन्ति[11] सर्वशः ॥[12]१९॥ [१८
स्वमांसनियताहारा[13] पुक्कसा[14] नाम निर्घृणाः ।
२०] विकृताश्च विरूपाश्च लोकाननुचरन्त्विति ॥२०॥ [१९

---

१. रा—०रैक्यं । भ—०रेतत् ।

२. रा—स महोदयः ।

३. भ—वासिष्ठं मुनिशार्दूलं सर्वे ते समहोदयाः ।

४. ल—एतद्वचनैर्नैष्ठुर्यं कृतं रक्तविलोचनैः ।
वासिष्ठैर्नरशार्दूलैः सर्वैः सह महोदयैः ॥

५. ल—तेषां तद्वचनं श्रुत्वा यथोक्तं मुनिपुंगवः ।
क्रोधात् सरक्तनयनः सरोषमिदमब्रवीत् ।

६. रा—प्रदुष्टयंत्यदुष्टं ।

७. ल—तप उग्रमुपागतं ।

८. ल—भस्मभूता ० । भ—० भूतात्मनः सर्वे ।

९. भ—०शतान्येव ।

१०. भ—मृतयः ।

११. व—यास्यंतु । भ—संतु ।

१२. ल—सप्तजातीशतास्मतुंम्यत्तपा संतु सर्वशः ।

१३. रा—०हाराः । ज—सुमांसनियताहाराः ।
ल—स्वमांसुनिरताहाराः ।

१४. के ज—मुष्टिका ।

महोदय[1]श्च दुर्बुद्धिरदुष्टं मां प्रदूषयन् ।[2]
२१] दूषितः[3] सर्वलोकेषु निषादत्वमवाप्स्य[4]ति ॥२१ [२०
प्राणाति[5]पातनिरतो निरनुक्रोशतां गतः ।
२२] दीर्घं[6] कालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति ॥२२॥ [२१
एतावदुक्त्वा वचनं विश्वामित्रो महा[7]मुनिः ।
२३] विरराम महातेजास्तस्मिन् मुनिसमागमे ॥[8]२३॥[9] [२२

इत्यार्षे रामायणे बालकाण्डे[10] वासिष्ठशापो[11]
नाम[12] पञ्चपञ्चाशः[13] सर्गः ॥५५॥[14]

---

१. ब—महोदरश्च ।

२. ल—महोदयश्च दुर्बुद्धिर्मामदूष्यं प्रदूषकृत् ।
भ— ,, दुष्टं मां च दूषयन् ।

३. कै—दूषितः । ल—दूषतः ।

४. कै रा—०मवाप्स्यसि । ल—निषाद इति विश्रुतः ।

५. ल—तिपातेनिरतो । भ—०तिपातिनि० ।

६. ज ल भ—दीर्घकालं ।

७. ल—महातपाः ।

८. ल—विरराम महातेजा मुनिमध्ये महामतिः ।

९. ज ल—अतः परमधिकः पाठः—
सक्रोधं विषमुत्सृज्य गाधितो रघुनंदन ।

१०. कै ब भ—आदिकांडे ।

११. कै—०शापे । रा—वसिष्ठशापे ।
भ—शतानंन्दवाक्ये वसिष्टानुशापो ।

१२. कै रा—नास्ति ।

१३. कै रा—एकषष्टः । ज—सप्तचत्वारिंशः ।

१४. ज—॥४७॥ भ—॥४४॥
ल—सर्गसमाप्तिर्न दृश्यते ॥

१उ] तपोबल[1]हतान् कृत्वा[2] वासिष्ठान्[3] समहोदयान्[4] ।
ऋषिमध्ये परं वाक्यं विश्वामित्रोऽभ्यभाषत ॥[5]१॥ [१

२] अयमिक्ष्वाकुदायादस्त्रिशंकु[6]रिति विश्रुतः ।
धार्मिकः[7] सत्यसन्धश्च मां चैव शरणं गतः ॥२॥ [२

३] स्वेनानेन शरीरेण स्वर्गं[8] गन्तुमभीप्सति ।
तदिदं[9] मुनयः सर्वे समनुज्ञातुमर्हथ ॥[10]३॥ [३

४] विश्वामित्रवचः श्रुत्वा तत्र[11] ते मुनिसत्तमाः ।
मिथः संमन्त्रयामासुर्विश्वामित्रभयार्दिताः ॥[12]४॥ [४

५] अयं कुशिकदायादस्तपस्वी क्रोधनो[13] भृशम् । [५ पू
न विग्रहः सहानेन क्षमोऽस्माकं शरीरिणाम् ॥५॥[14] [N

---

१. भ—तपोबलात् हतान् ।
२. ल—दृष्ट्वा ।
३. रा—वसिष्ठान् ।
४. ल—महातेजा ।
५. ब—अस्मात् श्लोकात्पूर्वमित्थं पाठः—
.........मुत्सृज्य.........रघुनंदन ।
६. ल—०स्त्रिशङ्कु० ।
७. ल—धर्मज्ञश्च कृतज्ञश्च ।
८. ल—लोकं जिगीषति ।
९. भ—तदिमं ।
१०. ल—अथैवं भाषिते वाक्यं महायज्ञफलैषिणा ।
११. ल—सर्व एव महर्षयः । भ—ततस्ते मुनि० ।
१२. ल—ऊचुः समेत्य वचनं धर्मज्ञा धर्मयंत्रिताः ।
१३. रा—क्रोधरो ।
१४. ल—कुशिकदायादो मुनिः परमकोपनः ।
यदाह वचनं सम्यगेतत्कार्यमसंशयम् ॥

६] अग्निकोपो[1] हि भगवान् शापं दास्यति रोषितः[2] ।
तस्मात् प्रवर्ततां[3] यज्ञो यथैवोक्तं महर्षिणा ।।६।। [६
७] क्रियतां च तथा यत्नः सशरीरो यथा दिवम् ।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ।।७।। [७
८] ततः प्रववृत्ते यज्ञः सर्वसंभारसंभृतः[4] ।
अध्वर्युरभवत्[5] तत्र विश्वामित्रो महातपाः[6] ।।८।। [८
९] ऋत्विजश्चाभवंस्तत्र[7] मुनयः संशितव्रताः ।[8] [९ पू
तस्य यज्ञे तदा तस्मिंस्त्रिशङ्कोर्भूरितेजसः[9] ।। ९।।[10]
१०] विश्वामित्रोऽथ भगवान् मन्त्रवन्मन्त्रकोविदः[11] ।
चकारावाहनं[12] यज्ञे भागार्थं त्रिदिवौकसाम् ।।[13] १०।। [१०
११] नाभ्यगच्छन्[14] यदाहूता भागार्थं तत्र[15] देवताः । [११
ततः क्रोधसमाविष्टो विश्वामित्रो महामुनिः ।।११।।

---

१. ल—अग्निरूपा ।
२. रा—रोषतः ।
३. रा—प्रावर्ततां ।
४ ल—सर्वांगः सर्वाधिष्ठितः । भ—सर्वसंपद्भिः संवृतः ।
५. ल—याजकश्च महायज्ञे । भ - अध्वर्युश्चाभवत्तस्य ।
६. ज—महामुनिः ।
७. भ—ऋत्विजाश्चाभवंस्तस्य ।
८. ल—ऋत्विजश्चानुपूर्व्येण मंत्रवन्मंत्रकोविदः ।
९. भ —०रमितौजसः ।
१०. ल—नास्ति ।
११. भ—०मंत्रपारगः ।
१२. ब—चकार वाहनं ।
१३. ल—चक्रुरावाहनं तत्र देवानां देवसंमिताः ।
१४. ज—नाभिगच्छन् ।
१५. ल—न चाजग्मुस्तुतास्तत्र भागार्थं सर्वदेवताः ।

१२] स्व[1]मुद्यम्य सं[2]क्रुद्धस्त्रिशङ्कुमिदमब्रवीत् । [१२
पश्य मे तपसो वीर्यमू[3]र्जितस्य नरेश्वर ॥१२॥
१३] एष त्वां स्व[4]शरीरेण नयामि स्वर्गमोजसा । [१३
उ१४] बाल्यात् प्रभृति यत्किञ्चिन् मया सम्यक् तपश्चितम् ॥[5] १३॥
ते[6]जसा तस्य तपसः[7] सशरीरो दिवं व्रज । [१४
१५] उक्तवा[8]क्ये मुनौ चै[9]वं सशरीरो नृपस्तदा ॥१४॥
ययौ स्वर्गं खमाविश्य मुनीनां पश्यतां तदा । [१५
१६] त्रिदिवं तं[10] गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥१५॥[11]
स[12]ह सर्वैः सुरगणैरिदं वचनमब्रवीत् । [१६
१७] त्रिशङ्को प[13]त भूमौ त्वं [14]न [15]त्वं स्वर्गे कृतालयः ॥१६॥

---

१. कै रा ज ल—स्वचमु० ।
२. ल—सक्रोधस्त्रिशंकुं तं वचोऽब्रवीत् ।
भ—भगवांस्त्रिशंकुमिदं० ।
३. रा—वरिमूर्जि० । ल—वीर्यं पूजितस्य ।
४. ज ल भ—सशरीरेण ।
५. ल—बाल्यात्प्राभृति यद्यस्ति किंचिन्मे तपसः फलम् ।
६. ल—तेजस्तस्य ।
७. ज—तपसा । ल—महतः ।
८. ज—उक्तवाक्यं ।
९. ब भ—०चैवं । ल—मुनावेवं । भ—तु ।
१०. ब—ते ।
११. ल—स्वर्गंजगाम विप्राणां तत्र पश्यतां ।
देवलोकगतं दृष्ट्वा त्रिशंकुं पाकशासनः ।
१२. भ—स तु ।
१३. भ—यात । शुद्धेपि मूलपाठे यकारभावनया दीर्घमात्रा—
विन्यासः प्रामादिकः पत इत्यस्यैव संगतेरिति तु हृदयम् ।
१४. भ—नास्ति ।
१५. ल—स्वर्गं । भ—स्वर्गं ।

गुरुशापोपहतो मूढः शीघ्रमवाक्(शि)राः । [१७
१८] एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतद्[1] दिवः[1] ॥१७॥
उपक्रोशन्[2] स पाहीति विश्वामित्रमवाक्शिराः ।[3] [१८
१९] तच्छ्रुत्वा वचनं तस्य पाहीति पततो[4] मुनिः ॥[5] १८॥
विश्वामित्रो भृशं क्रुद्धस्तिष्ठ तिष्ठत्युवाच[6] तम्[6] ।[7] [१६
२०] ततो[8] ब्रह्मतपोयोगात् प्रजापतिरिवापरः ॥१९॥
पू२१] असृजद् दक्षिणे मार्गे सप्तर्षीनपरांस्ततः ।[9] [२०
पू२२] नक्षत्रचक्र[10]मपरं[10] चासृजत्[11] क्रोधमूर्च्छितः ॥२०॥[12]

---

१. ल—०तद्भुवि । भ—त्रिशंकुः प्रापतद्दिवः ।

२. रा—उदक्रोशन् । भ—उपाक्रोशन् ।

३. ब ल—त्रायस्वेति विक्रोशन्विश्वामित्रं तपोधनम् ।

४. रा ज—पतितो ।

५. ल—तस्य तद्वचनं श्रुत्वा पतमानस्य मंत्रिणः ।

६. रा—तिष्ठेति चाब्रवीत् ।

७. ल—रोषमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ।

८. ल—ऋषिमध्ये च काकुत्स्थ ।

९. ल—ततो दक्षिणमार्गस्थान्सप्तर्षीनपराजितः
भ—सृष्ट्वा दक्षिणमार्गस्थान्स ऋषीनपरान् प्रभुः ।

१०. रा—नक्षत्रचर्ममपर ।
ल—नक्षत्रमालामपरां । भ ०वर्गमपरं ।

११. के रा ज भ—स्रष्टुं समुपचक्रमे ।

१२. अतपरमाधिकः पाठ :—
ल—दक्षिणां दिशमास्थाय मुनिमध्ये महातपः ।
सृष्ट्वा नक्षत्रमालां च क्रोधेन कलुषीकृतः ।
भ—स्रष्टस्य दक्षिणे मार्गे तेजोब्रह्मबलाश्रयात् ।
सृष्टवा च नक्षत्रगणं क्रोधसंरक्तलोचनः ।

३२३] इन्द्रादीनपरान्[1] देवान् स्रष्टुं समुपचक्रमे ।[2] [२२
ततः परमसंभ्रान्ताः सदेवर्षिगणाः[3] सुराः ॥२१॥
२४] विश्वामित्रं महात्मानमूचुः सानुनयं वचः । [२३
अयं राजा[4] शुचिः सौम्य[5] गुरुशापपरिक्षतः ॥२२॥
२५] सशरीरो दिवं गन्तुं[6] नार्हत्यकृत[7]याचनः । [२४
प्रमाणानि च पाल्यानि[8] यत्नतो हि भवादृशैः ॥[9]२३॥
२६] प्रमाणैः[10] स्थापितां संस्थां नातिक्रमितुमर्हसि[11] ।[12] [N
इति तेषां वचः श्रुत्वा देवानां मुनिपुङ्गवः ॥[13]२४॥
२७] अब्रवीत् स्नेहवद्[14] वाक्यमिदमाभाष्य देवताः । [२५
सशरीरस्य विबुधास्त्रिशङ्कोरस्य धीमतः ॥२५॥[15]

---

१. भ—०परालोकान् ।
२. ल—देवानपि च संक्रुद्धः सृष्टमेवाकरोन्मतिम् ।
३. ज—सर्षिदेवगणाः सुराः । ल—सर्षिसंघाः सुरासुराः ।
४. ज भ—राजात्मजः ।
५. के ब—सोम्य । रा—सम्यग् ।
६. ल—यांतं ।
७. ल—नार्हत्येष महायशाः । भ—०कृतपावनः ।
८. रा—माल्यानि ।
९. ल—नास्ति ।
भ—प्रमाणानि पुराणाद्यैः परिपाल्यानि यत्नतः ।
१०. भ—पुराणे ।
११. ब भ—०क्रामितुमर्हसि ।
१२. ल—नास्ति ।
१३. ल—तासां तु वचनं श्रुत्वा देवतानां महाद्युतिः ।
१४. रा—स्नेहयाद् । भ—सुसहृद् ।
१५. ल—अब्रवीन्मधुरं वाक्यं वाक्यज्ञः सर्वदेवताः ।
सशरीरस्य भद्रं व इक्ष्वाकोरमितप्रभाः ॥

२८] आरोहणं प्रतिज्ञाय नानृतं कर्तुमुत्सहे ।[1] [२६
गमनं सशरीरस्य त्रिशङ्कोर्मत्परिग्रहात् ॥२६॥
२९] नक्षत्राणि च सर्वाणि ध्रुवाणीमानि सन्तु वः । [२७
यावल्लोका धरिष्यन्ति तावत् स्थास्यन्त्यमून्यपि ॥२७॥
३०] एवं प्रतिज्ञां विहितां समनुज्ञातुमर्हथ । [२८
बभूवुर्विबुधा भीता एवमस्त्विति राघव ॥२८॥[10]
३१] ज्योतींष्येतानि तिष्ठन्तु वैश्वानरपथाद् बहिः । [३०
अवाक्शिरा एव चायं त्रिशङ्कुरिह तिष्ठतु ॥२९॥[15] [३१.उ
३२] दक्षिणस्यामभितो दिशि स्वप्रभया ज्वलन् ।

---

१. ल—आरोहणप्रतिज्ञां मे नानृतां कर्तुमर्हथ ।

२. ल—स्वर्गस्तु ।

३. ब ल—०मेदनुग्र०

४. रा ज ल भ—ध्रुवानीमानि । ब—०ध्रुवाणीमाणि ।

५. रा—वा । भ—नः ।

६. ल—स्थितान्येतानि वै यथा ।
भ—तावत्स्थास्यत्यसावपि ।

७. भ—सर्वे मे समर्थयितुमर्हथ ।

८. भ—तमूचुर्वि० ।

९. कै—एवमिच्छति ।

१०. ल—सत्कृतानि सुराः सर्वं तदनुज्ञातुमर्हथ ।
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवम् ।
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वतः ।

११. ल—नक्षत्राणि च । भ—तिष्ठंत्वेतानि ।

१२. कै—सर्वाणि । पुनरपरहस्तेन कृतः । ल—सर्वाणि ।
भ—ज्योतींषि ।

१३. कै ब—अवाक्छिरा । रा—अर्वाक्शिरा ।

१४. ज—त्रिशंकुरिव ।

१५. ल—नास्ति ।

विश्वामित्रस्तु तच्छ्रुत्वा देवानां वचनं तदा ॥३०॥[1] [N

३३] बाढमित्यब्रवीत्[2] तत्र सर्वैर्देवैरभिष्टुतः[3] । [३३

ततो देवा ययुः सर्वे यथागतमरिन्दम ॥३१॥[4]

३४] ऋषयश्च महात्मानो यज्ञस्यान्ते तपोधनाः ।[5] [३४

इत्यार्षे रामायणे बालकाण्डे[6] त्रिशंकुस्वर्गारोहण

नाम[7] षट्पंचाशः[8] सर्गः[9] ॥५६॥[10]

---

१. ल—विश्वामित्रश्च धर्मात्मा सर्वदेवैरभिष्टुतः ।

२. भ—०वीद्वाक्यं ।

३. भ—सर्वदेवैर० ।

४. ल—ऋषिभिश्च महातेजा बाढमित्यब्रवीद्वचः ।

ततो देवा महात्मान ऋषयश्च तपोधनाः ।

५. ल—नास्ति ।

६. कै ब भ—आदिकांडे ।

७. भ—नास्ति ।

८. ज—अष्टचत्वारिंशः । कै रा भ—नास्ति ।

९. भ—नास्ति ।

१०. ज—॥४८॥ भ—॥४२॥

ल—सर्गसमाप्तिर्न दृश्यते ।

मुनीन्[1] प्रतिगतान् दृष्ट्वा विश्वामित्रस्तपोधनः ।
१] अब्रवीन्मुनिशार्दूलः सर्वांस्तान् वनवासिनः ॥१॥[2] [१
महान् विमर्दो[3] वृत्तोऽयं दक्षिणामभितो दिशम् ।
२] दिशमन्यामितो यामस्तप्स्यामो[4] यत्र[4] वै तपः ॥२॥ [२
पश्चिमायां[5] दिशि सुखं[5] पुष्करारण्यमाश्रिताः[6] ।
३] वयं तपः[7] करिष्यामः परं[7] तद्धि तपोधनाः[8] ॥[9]३॥[10] [३
एवमुक्त्वा महातेजाः पुष्करारण्यमाश्रितः[11] ।
४] तप उग्रं दुराधर्षं तेपे मूलफलाशनः[12] ॥४॥ [४
अथ तत्रापि वसतो विश्वामित्रस्य राघव ।

---

१. कै—मुनींद्रतिगतां ।
२. ल—नास्ति ।
३. ज ल—विमंदो ।
४. भ—यामस्तप्स्यामस्तत्र ।
५. भ—पश्चिमां दिशमास्थाय ।
६. ज—०माश्रितः ।
७. रा—०वरं । भ—तपश्चरिष्यामः परं ।
८. भ—तपोधनं ।
९. ज—नास्ति ।
१०. ल—पश्चिमायां विशालायां पुष्करेषु तपोधनः ।
सुखं तपश्चरिष्यामः परं वित्तं तपोधनम् ॥
११. ल—पुष्करेषु तपोधनः ।
१२. रा—०फलाशनाः । ल—परमदारुणम् ।

५] अम्बरीषस्य राजर्षेर्यष्टुं[1] मतिरजायत ॥५॥[2] [५
तस्यापि[3] यजमानस्य नरमेधेन भूपतेः ।
६] प्रोक्षितं मन्त्रवद् यूपात् पशुमिन्द्रो जहार ह ॥६॥[5] [६
७ उ] तस्मिन् हृते पशौ विप्रा राजानमिदमब्रुवन् । [N
पशुर्यः प्रोक्षितो राजन् केनापि स हृतो बलात् ॥७॥[6]
८] अरक्षितारं[7] च नृपं घ्नन्ति देवा[8] नरेश्वर[9] । [७
प्रायश्चित्तं महद्ध्येतत्[10] तं[11] त्वं पशुमुपानय[12] ॥८॥[13]
९] अन्यं[14] वाऽप्यानय क्रीत्वा यावत्कर्म प्रवर्तताम्[15] । [८

---

१. रा—०रिष्टुं । भ—०ट्टेष्टुं ।
२. ल—एतस्मिन्नेव काले तु अयोध्याधिपतिर्नृपः ।
अम्बुरीष इति ख्यातो यष्टुं समुपचक्रमे ॥
३. भ—तस्य वै ।
४. भ—तं ।
५. ब—तस्यापि यजमानस्य पशुमिन्द्रो जहार ह ।
ल—तस्य वै „ „ „ „ ।
भ—अत: परमधिक: पाठः—
नरं लक्षणसंपन्नं पशुत्वे विनियोजितं ।
६. ल—प्रणष्टे च पशौ तस्मिन् विप्रो राजानमब्रवीत् ।
पशुरभ्याहतो राजन्प्रनष्टस्तव दुर्नयात् ।
७. ल—राजानं ।
८. ल—दोषा ।
९. के ल—नरेश्वरम् ।
१०. भ—महच्चैतत् ।
११. ज—तत्त्वं ।
१२. भ—पशुमिहानय ।
१३. ल—नास्ति ।
१४. ल—आनयस्व पशुं शीघ्रं । भ—अन्यस्यानयनं कृत्वा ।
१५. भ—प्रवर्तत ।

उपाध्यायवचः श्रुत्वा स[1] राजा[1] बहुशस्तदा[2] ॥९॥

१०] अन्वेष्टुं पशुमारेभे पुरुषं लक्षणान्वितम् ।[3] [९

देशान् जनपदांश्चैव[4] नगराणि वनानि[5] च ॥१०॥

११] आश्रमांश्च तथा पुण्यान् प्रविशन्[6] वै महामनाः[6] । [१०

अन्वेषमाणः सोऽपश्यद् ऋचीकं नाम राघव ॥[7]११॥

१२] बहुपुत्रं दरिद्रं च द्विजं गृहनिवासिनम् । [११

अभिगम्याम्बरीषस्तं विप्रं[8] वचनमब्रवीत् ॥१२॥[9]

१३] तपःस्वाध्यायनिरतं पृष्ट्वा कुशलमादितः । [१२

गवां शतसहस्रेण सुतमेकं[10] प्रयच्छ मे ॥१३॥[11]

१४] नरमेधे महायज्ञे पश्वर्थं[12] भो द्विजोत्तम ।

बहुपुत्रो दरिद्रश्च वृद्धश्चासि[13] द्विजोत्तम ॥१४॥[14] [N

---

१. ल—ऐक्ष्वाकः ।

२. ल—सोमितप्रभः । भ—नाभगात्मजः ।

३. ल—अन्वियेष महाबाहुः पशुं गोभिः सहस्रशः ।

४. ल—०श्चापि ।

५. रा—वनानि नगराणि ।

६. रा भ—प्राविशद्वै० । ल—प्रविचिन्वन्महायशाः ।

७. ल—स पुत्रसहितं तातमभार्यां रघुनंदन ।

८. ज—अविगम्या० । भ—०रीषस्तमृषिं ।

९. ल—भृगुतुङ्गे समासीनमृचीकं तं ददर्श ह ।

अम्बरीषो महातेजाः प्रणिपत्याभिवाद्य च ।

१०. ज—पुत्रमेकं ।

११. ल—सर्वत्र कुशलं पृष्ट्वा ऋचीकं तं महामुनिम् ।

उवाच च महातेजा प्रणम्याभिप्रसाद्य च ॥

१२. रा—मे ।

१३. भ—०श्चापि ।

१४. ल—ब्रह्मर्षितपसा दीप्तं राजर्षिरमितप्रभः ।

भगवं शतसहस्रेण दद्यास्त्वं यदि मे सुतम् ।

१५] यदि ते रोचते ब्रह्मन् सुतमेकं प्रयच्छ मे[1] । [N
बहवो विचिता[2] देशा न लभे यज्ञियं[3] पशुम् ॥१५॥[4]
१६] दातुमर्हसि मूल्येन[6] सुतमेकं[7] द्विजोत्तम[5] । [१४उ
पशोरर्थे[8] कृतार्थः स्यामहं काश्यप सुव्रत ॥[9]१६॥ [१३उ
१७] इत्युक्तोऽथाम्बरीषेण ऋचीको रघुनन्दन ।
न विक्रेष्याम्यहं पुत्रं ज्येष्ठमित्यब्रवीद्वचः ॥[10]१७॥ [१५
१८] ऋचीकवचनं श्रुत्वा माता तेषां यशस्विनी[11] ।
उवाचर्चीकपुत्राणां तं राजानमिदं वचः ॥१८॥[12] [१६
१९] अविक्रेयं सुतं ज्येष्ठं भगवानाह काश्यपः ।

---

१. भ—परित्यज ।

२. रा ज—विदिता । भ—०भिसृता ।

३. ज—याज्ञियं ।

४. ल—पशोरर्थे कृतार्थोऽस्मि अहं काश्यप सुव्रत ।
सर्वे परिसृता देशा याज्ञिय न लभे पशुं ।

५. भ—दीक्षितोऽहं च ।

६. रा भ—मूलेन ।

७. ल—यावत्कर्म प्रवर्तते ।

८. कै रा ज—पशोरथ ।

९. ल—नास्ति ।

१०. ल—एवमुक्तो महातेजा ऋचीकस्तमुवाच ह ।
नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥

११. ज—यदृच्छया ।

१२. ल—ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मना ।
उवाच नरशार्दूलं तं राजानं महाव्रतम् ॥
भ—नास्ति ।

ममाप्येकं[1] कनीयांसं सुतं[2] विद्धि परं[2] प्रियम् ॥१९॥[3] [१७
२०] पितृणां वल्लभा ज्येष्ठाः प्रायेण हि सुता नृप ।[4]
मातृणां हि कनीयांसस्तस्माद् रक्ष्या हि मे सुताः ॥[5]२०॥[१८
२१] उक्तवाक्ये मुनावेवं[6] मुनिपत्न्यां तथैव च ।
शुनःशेपो[7] महाप्राज्ञो[8] मध्यमो वाक्यमब्रवीत् ॥२१॥ [१९
२२] ज्येष्ठः पितुरविक्रेयः कनीयान्मातुरेव च ।
विक्रेयं[9] मध्यमं मन्ये राजपुत्रं[10] नयस्व माम् ॥२२॥ [२०
२३] गवां शतसहस्रेण शुनःशेपं[11] नरेश्वरः[11] ।
गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥२३॥ [२२

---

१. ज—ममाप्येवं ।

२. भ—राजन् विद्धि सुतं ।

३. ल—अविक्रेयं सुतं ज्येष्ठं पिता प्राह महाद्युते ।
ममाप्येवं कनीयांसं तस्माद्रक्ष्या हि मे सुताः ॥

४. कै भ—पितृणां वल्लभो ज्येष्ठः प्रायेण तु नरश्रेष्ठ ।
भ— ,, ,, ज्येष्ठः ,, हि सुतो नृप ।

५. भ—मातृणां च कनीयांश्च तस्माद्रक्ष्यौ सुतौ नृप ।

६. भ—मुनौ तस्मिन् ।

७. ल—शुनः शेहो । भ—शुनः शेफ ।

८. भ—इदं तत्र ।

९. ल—विक्रीयं ।

१०. भ—राजशाशु ।

११. भ—शुनः शेफं ततो नृपः ।

रथमारोप्य तं राम शुनःशेपं[1] त्वराऽन्वितः ।
२४] आजगाम ततो यज्ञं समापयितुमात्मनः ॥[2] २४॥ [२३

इत्यार्षे रामायणे बालकाण्डे शतानन्दवाक्ये शुनःशेपविक्रियो
नाम सप्तपञ्चाशः[7] सर्गः[8] ॥५७॥

---

१. भ—शुनः शेफं ।

२. ल—अम्बरीषस्तु राजर्षी रथमारोप्य सत्वरः ।
शुनः शेहं महातेजा जगाम च यथागतम् ।
स्वयं च मदनं प्राप्तः पुष्करे समागमत् ॥

३. भ—आदिकांडे । के रा ब—नास्ति ।

४. ज भ—नास्ति ।

५. रा—०विक्रेयो । ज ब—विक्रियो । भ—विक्रयः ।

६. के रा—नाम त्रिषष्टितमः । ब—नाम । भ—नास्ति ।
ज—नाम एकोनपंचाशत्तमः ।

७. भ—नास्ति ।

८. ज—॥४१॥ भ—॥४६॥ ल—असमाप्तः सर्गः ।

शुनःशेपं[1] तमादाय स राजा श्रान्तवाहनः ।
१] व्यश्रमत् पुष्करे तीर्थे[2] मध्यमे रघुनन्दन ॥१॥[3] [१
तस्य विश्राम्यतस्तत्र[4] शुनःशेपो[5] महामतिः[6] ।
२] पुष्करं ज्येष्ठमागम्य[7] विश्वामित्रं ददर्श ह ॥२॥ [२
स दीर्ण[8]हृदयो दीनो[9] विक्रयेण श्रमेण च ।
३] जगाम शिरसा पादौ मुनेर्वाक्यमुवाच ह[10] ॥३॥[11] [३
न मेऽस्ति माता न पिता न सुहृन्न[12] च बान्धवैः[13] ।

---

१. भ—शुनः शेफं ।

२. कै रा—तीरे ।

३. रा—शुनः शेहं नरश्रेष्ठो गृहीत्वाथ महाबलः ।
विश्रम्य पुष्करे राम मध्यमे रघुनंदन ॥

४. रा—०मतस्तस्य । ल—विश्रमतस्तत्र ।
भ—विश्रमतस्तस्य ।

५. ल—शुनः शेहो । भ—शुनः शेफो ।

६. ल—महातपाः भ—महामुनिः ।

७. ज—तीर्थमा० ।

८. कै—चीर्ण० ।

९. ज—भीतो ।

१०. व—च ।

११. ल—विघूर्णमानहृदयो लज्जया च श्रमेण च ।
पपातांके मुनेस्तत्र वचनं चेदमब्रवीत् ॥

१२. ल—ज्ञातिर्न ।

१३. रा ल—बांधवाः ।

४] त्रातुमर्हसि मां त्यक्तं बन्धुभिः शरणागतम् ॥४॥[2] [४
राजा च कृतकार्यः स्याज्जीवेयं चाप्यहं यथा ।
५] भवतो वीर्यमाश्रित्य तथा त्वं कर्तुमर्हसि ॥५॥[3] [६
नाथो मे त्वमनाथस्य भव भव्येन[4] चेतसा[4] ।
६] पितेव पुत्रं कृपणं त्रातुमर्हसि मां मुने ॥६॥[5] [७
तस्यैतद्[6] वचनं श्रुत्वा विश्वामित्रस्तपोधनः[7] ।
७] सान्त्वयित्वा शुनःशेपं[8] स्वान् पुत्रानिदमब्रवीत्[9] ॥७॥ [८
यत्कृते पितरः पुत्रानिच्छन्ति गुणवत्तरान् ।
८] दुर्गसन्तारणार्थाय तस्य कालोऽयमागतः ॥८॥[10] [९
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
९] अस्य जीवितदानेन प्रियं[11] मे[12] कर्तुमर्हथ[12] ॥९॥ [१०

---

१. ल—सोम्य तस्मे त्वं मुनिपुंगव ।

२. ल—अतः परमधिकः पाठः—

त्रात[1] त्वं हि मुनिश्रेष्ठ पितेव मम सुव्रत ।

३. ल—राजा च कृतकृत्यः स्यादयं यज्ञफलार्जितं ।

स्वर्गलोकमुपाश्नीयात्तव सौम्याभिदर्शनात् ॥

४. भ—दिव्येन तेजसा ।

५. ल—मम नाथो ह्यनाथस्य भव व्यमनचेतसः ।

पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥

६. ल—तस्य तद् ।

७. ल—विश्वामित्रो महातपाः ।

८. ल—बहुविधं । भ—शुनः शेफं ।

९. ल—पुत्रानिदमुवाच ह ।

१०. ल—यत्कृते पितरः पुत्रा जयंति शुभार्थिनः

परलोके हितार्थाय तस्य कालोयमागतः ॥

११. के ब—पुत्रं ।

१२. ल—कुरुत पुत्रकाः ।

सर्वे सुकृतकल्याणाः[1] सर्वे सुचरितव्रताः[2] ।
१०] ते यूयं मन्नियोगेन मोक्षयध्वं मुनेः सुतम् ॥१०॥[3] [११
अध्वराग्नेः समिद्धस्य गत्वा तृप्तिं प्रयच्छत ।
११] मोक्षयध्वमिमं चैव पशुत्वान्मम शासनात् ॥११॥[4] [N
शरणं मामनुप्राप्तमृचीकस्य मुनेः सुतम् । [N
१२] स्यादविघ्नो यथा तस्य राजर्षेः[5] क्रियतां तथा ॥१२॥[6] [१२पू
इति पित्राऽनुसृष्टास्ते[7] मधुच्छन्दादयस्तदा ।
१३] साभिमानमिदं[8] वाक्यमूचुः पितरमप्रियम्[9] ॥[10] १३॥ [१३
कथमात्मसुतांस्त्यक्त्वा त्राता परसुतानसि[11] ।[12]
१४] भगवन्न[13] कार्यमेतत्ते स्वमांसस्येव भक्षणम्[14] ॥१४॥ [१४
इति तेषां वचः श्रुत्वा पुत्राणां मुनिरप्रियम् ।

---

१. ज ब—च कृत कल्याणाः ।

२. ज—च चरित० । ल—धर्मपरायणाः ।

३. ल—नास्ति ।

४. ल—पशुत्वे राजसिंहस्य तृप्तिमग्नेः प्रयच्छत ।

५. कै—राजर्षे ।

६. ल—नाथता च शुनःशेफे यज्ञे चाविघ्नता भवेत् ।
देवतास्तर्पिताश्च स्युर्मम स्याच्च वचः कृतम् ।
मुनेस्तु वचनं श्रुत्वा मधुष्यंदादयस्ततः ।

७. भ—०सुशिष्टास्ते ।

८. रा—स्वाभिमान० ।

९. ज—पितरमप्ययं ।

१०. ल—साभिमानं मुनिश्रेष्ठं सलीलमिदमब्रुवन् ।

११. रा भ—०तानपि ।

१२. ल—कथमात्मसुतं त्यक्त्वा त्रायसेऽन्यसुतं प्रभो ।

१३. ब ल—अकार्यमेतत्पश्यामः ।

१४. ल—भोजने ।

१५] क्रोधसंरक्तनयनः पुत्रांस्तानशपत् क्रुधा[1] ॥१५॥[2] [१५
निःसाध्वसमिदं वाक्यं धर्माद[3]भिहितं बहिः[4] ।
१६] यस्मात् पुमांसमु[5]द्दिश्य युष्माभिरवमन्य माम् ॥[6]१६॥ [१६
स्वमांसवृ[7]त्तयस्तस्माद् वासिष्ठा इव जातिषु ।
१७] गता वर्षसहस्रं वै कुत्सिता विचरिष्यथ ॥[9]१७॥ [१७
इति शापाग्निना दग्ध्वा[10] पुत्रान् स्वान् कुशिकात्मजः ।
१८] शुनःशेपमु[11]वाचेदं वचनं परिसान्त्वय[12]न् ॥१८॥[13] [१८
यदा तात[14] पशुत्वे त्वं प्रोक्षितः स्यास्तदा जपेः । [१९

---

१. कै—क्षुधा । भ—तदा ।

२. ल—तेषां तद्वचनं श्रुत्वा सुतानां मुनिपुंगवः ।
क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ।

३. रा— धर्मादपिहितं । ब—धर्मतोभिहितं ।

४. ब ल—मया ।

५. रा ल—स्वमांसमुद्दिश्य । भ—स्वमांसमुद्दिष्टं ।

६. ल—स्वमांसमिति यत्प्रोक्तं दारुणं लोमहर्षणं ।

७. ल—स्वमांसभोजिनस्त० ।

८. भ—पातिताः ।

९. ब—पूर्णं वर्षसहस्रं वै पृथिवीमनुवत्स्यथ ।
ल—,, ,, ,, ,, मनुवत्स्यथ ।
भ—पतिताः सहस्रवर्षाणां भ्रंशिता विचरिष्यथ ।

१०. रा—दग्धान् ।

११. भ—शुनः शेफमिदं वाक्यमुवाच ।

१२. रा—परिसंत्वयत् ।

१३. ल—दत्वा शापं च सोयुक्तं दारुणं लोमहर्षणम् ।
अथाब्रवीच्छुनः शेपं कृत्वा रक्षां निरामयां ।

१४. भ—पशुत्वे पुत्र ।

१९] इमं मन्त्रं मया प्रोक्तमिन्द्राभिष्टवसंयुतम् ॥१९॥[1] [२० पू
जपन्तमेनं[2] मन्त्रं त्वां मोक्षयिष्यति वासवः । [N
२०] पशुत्वादस्य चाविघ्नं भविष्यति महीपतेः[3] ॥२०॥[4] [N
शुनःशेपोऽथं[5] तन्मन्त्रमधीत्य[6] त्वरितं तदा[7] ।
२१] उपेत्य हृष्टो राजानमम्बरीषमभाषत ॥२१॥[8] [२१
एहि राजन्नितः शीघ्रं नय मां यज्ञमात्मनः ।
२२] त्वं[9] मां मन्त्रयुतं प्रोक्ष्य दीक्षामेतां समापय ॥२२॥[10] [२२
तद् वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः[11] ।
२३] जगाम नृपतिः श्रीमान्[12] स[13] देवयजनं तदा ॥२३॥ [२३

---

१. ल—पवित्रपाशैराविष्टो रक्तमाल्यानुलेपनः ।
वैष्णवं रूपमासाद्य ध्यायन्मां मनसा मुहुः ।

२. भ—जपंतं मन्त्रमेवं ।

३. रा—महीपते ।

४. ल—इमे च गाथे द्वे योगी गाथेस्त्वं मुनिपुत्रक ।
अम्बरीषस्य यज्ञार्थं ततः सिद्धिमवाप्स्यसे ॥

५. भ—शुनः शेफोथ ।

६. ज—मन्त्रं तदधीत्य । भ—तं मन्त्रमधीत्य ।

७. भ—त्वरितस्तदा ।

८. ल—शुनः शेफश्च ते कृत्वा पाठे गाथे समाहितः ।
त्वरया राजसिंहं तमम्बरीषमुवाच ह ।

९. भ—पशु मां मन्त्रतः ।

१०. ल—राजसिंह नरश्रेष्ठ गच्छ शीघ्रमतः परम् ।
निवर्तय मया सौम्य अविघ्नेन महाक्रतुम् ॥

११. ल—०समुत्सुकः ।

१२. ज ल—०शीघ्रं । भ—नृपतिर्धीमान् ।

१३. ल—यज्ञवाटमतन्द्रितः । भ—स्वमेव यजनं० ।

सदस्यानुमतं[1] सोऽथ पवित्रं[2] कृतलक्षणम् ।
२४] शुनःशेपं[3] पशुं यूपे बबन्ध मुनिर्यन्त्रितम्[4] ॥२४॥[5] [२४
स यूपबद्धस्तुष्टाव[6] देवेन्द्रं हरिवाहनम् ।
२५] भागार्थिनमनुप्राप्तं स्वरेणोच्चैर्विनादयन्[7] ॥२५॥[8] [२५
तस्मै[9] प्रीतः सहस्राक्षस्तदा[10] प्रादादभीप्सितम् ।
२६] आयुरिष्टं यशश्चाग्र्यं[11] शुनःशेपाय[12] राघव ॥[13]२६॥ [२६
स राजा तु क्रतुफलं तदा प्राप यथेप्सितम् ।[14]
२७] धर्म्यं[15] यशः श्रियं[16] चाग्र्यं सहस्राक्षप्रसादतः ॥२७॥[17] [२७

---

१. भ—स तस्यानुमते ।

२. भ—पवित्री ।

३. भ—शुनः शेफं ।

४. ज—०मुनिर्म० । भ—निबवन्धानुमंत्रितं ।

५. ल—सदस्यानुमतो राजा पवित्रीकृतलक्षणः ।
एकं रक्ताम्बरं कृत्वा यूपमूले न्ययोजयत् ।

६. ज—यूपवद्धं ।

७. भ—स्तावनार्थे विनोदयन् ।

८. ल—स वद्धो वाग्भिरुग्राभिरभिष्टुत्य महौजसम् ।
इन्द्रमिन्द्रानुगांश्चैव यथावन्मुनिपुंगवः ॥

९. ल—ततः ।

१०. ल—०स्तस्य स्तुतिभिरीप्सितः ।

११. भ—यशश्रेष्टं ।

१२. भ—०शेफाय ।

१३. ब—नास्ति । ल—दीर्घमायुस्ततः प्रादाच्छुनःशेहाय राघव ।

१४. ब—नास्ति ।
ल—स च राजा नरश्रेष्ट तस्य यज्ञस्य लब्धवान् ।
भ—,, ,, क्रतुफलं तदवाप यथेप्सितं ॥

१५. रा ज—धर्मं । भ—धर्मे ।

१६. रा—प्रियाचाग्र्यं । भ—प्रियं चाग्र्यं ।

१७. ल—फलं बहुगुणं राम सहास्राक्षप्रसादजं ।

विश्वामित्रोऽपि धर्मात्मा चचारोग्रं तपस्तदा[1] ।
२८] पुष्करेष्वेव वर्षाणां सहस्रं नियतव्रतः ॥[3]२८॥ [२८

इत्यार्षे रामायणे बालकाण्डे[4] विश्वामित्रमाहात्म्ये[5]
अम्बरीषयज्ञो[6] नाम अष्टपञ्चाशः[6] सर्गः[7] ॥५८॥

१. ल—तप्तवां ।
२. ल—सुमहत्तपः । भ—महत्तपः ।
३. ल—उग्रं परमनाधृष्यं ब्राह्मण्ये कृतमानसः ।
सहस्रं शरदामेकं पुष्करेषु तदानघ ॥
४. कै भ—आदि काण्डे ।
५. रा ज—नास्ति ।
६. कै—०यज्ञश्चतुःषष्टितमः ।
रा—चतुषष्टितमः । ज—नामपञ्चाशत्तमः ।
भ—नाम ।
७. ज—॥५०॥ भ—॥४७॥
ब ल—सर्गसङ्ख्यातिर्न दृश्यते ॥

पूर्णे[1] वर्षसहस्रे तु व्रतस्नातं[2] महामुनिम् ।
१] अभ्यागच्छन्[3] सुरा[4] रामं[5] तपोवनसमाहितम् ॥१॥ [१
तत्रैनमब्रवीद्[6] ब्रह्मा[7] पुनः सुरुचिरं वचः ।
२] ऋषिश्रेष्ठो मतो[8] नस्त्वं निवर्तस्व तपोधन ॥[9] २॥ [२
इत्युक्त्वाऽनन्तरं ब्रह्मा जगामाशु यथागतम् ।[10]
३] विश्वामित्रोऽपि तच्छ्रुत्वा चचारैव पुनस्तपः[11] ॥३॥ [३
तत्र[12] चैनं[12] तपस्यन्तं कालस्य महतस्ततः[13] ।

---

१. रा—०वर्षे सह० । भ—पूर्णवर्षसहस्रेथ ।
२. के रा ज—०स्नानं । ल—०श्रांतं ।
३. के रा ज भ—अभ्यगच्छन् ।
४. रा—दुरा राम । ब ल—सुराः सर्वे ।
५. ब—तत्तपोबलविस्मितः । ल—तत्तपोबलविस्मिताः ।
भ—तपोबल० ।
६. ल—अब्रवीच्च महातेजा ।
७. ज ब—पुरः । ल—ब्रह्मा । भ—मुनिं ।
८. रा—मनतस्त्वं ।
९. ल—ऋषिस्त्वमपि भद्रं ते वर्जितं कर्मभिः शुभैः ।
भ—ऋषिस्त्वमसि भद्रं ते स्वर्जितैः कर्मभिः शुभैः ।
१०. ल—एवमुक्त्वाथ देवेशस्त्रिदिवं पुनरभ्यगात् ।
भ—एवमुक्त्वा तु ,, पुनरन्वगात् ।
११. ल—धर्मात्मा तपः परमतप्यत ।
१२. भ—तत्रैवाथ ।
१३. भ—०स्तपः

४] आजगामाप्सरा[1] राम तं वै[2] लोभयितुं रहः ॥ ४॥[3] [४
मेनका नाम सुश्रोणी विश्वामित्राश्रमं प्रति ।
५] पुष्करे सा सुचार्वङ्गी मेनका[4] निर्जने वने ॥[5] ५॥ [४
N] जलप्रक्लिन्नवसना[6] स्नातुं समुपचक्रमे । [४
तां[7] ददर्शाद्भुताकारां मेनकां कुशिकात्मजः ॥६॥
६] रूपेणाप्रतिमां राम[8] श्रियं मूर्तिमतीमिव[9] । [५
तां दृष्ट्वा चारुसर्वाङ्गीं मेनकां निर्जने वने ॥[10] ७॥ [६
७] जलप्रक्लिन्नवसनां[11] मनोहरतराकृतिम्[12] ।[13]
कन्दर्पवशगोऽभ्येत्य मुनिर्वचनमब्रवीत् ॥[14] ८॥ [६
८] का त्वं कस्य कुतो वेदं वनं भद्रेऽभ्युपागता ।

---

१. भ—०माश्रमं ।
२. भ—प्रलोभ० ।
३. ल—ततः कालस्य महतो मेनका नाम याप्सराः ।
४. भ—नास्ति ।
५. ल—नास्ति ।
६. ल—पुष्करे तु नरश्रेष्ट । भ—नास्ति ।
. ल—तामपश्यन्महातेजा ।
८. भ—चैव ।
९. ल—राजन्तीमिव विद्युतम् ।
१०. ल—नास्ति ।
११. भ—जलेन क्लिन्नवसनां ।
१२. भ—मनोहरकृताकृतिं ।
१३. अतः पारम्भिकः पाठः—
भ—क्वणत्कनककेयूरनादापूरितादिङ्मुखां ।
ल— ,, कीयूरनादपूरिदिंमुखां ।
१४. ल—कन्दर्पदर्पवशगो मुनिस्तामिदमब्रवीत् ।

एहि विश्रम्यतां भीरु ममाश्रमपदं प्रति ॥[2]९॥[3] [७

९] मेनका तद् वचः श्रुत्वा विश्वामित्रमभाषत ।[4]

अप्सरा मेनका नाम त्वत्प्रीत्याऽहमुपागता ॥१०[6]॥ [N

१०] रोचते यदि ते ब्रह्मन्ननुरक्तां भजस्व माम् ।

इति तां रुचिरं वाक्यं भाषमाणामनिन्दिताम् ॥११॥[7] [N

११] पाणौ गृहीत्वा भगवानाश्रमं प्रविवेश ह ।[7] [N

---

१. ज—विश्राम्यतां ।

२. ब—नास्ति ।

३. ल—नास्ति ।

भ—मेनके स्वागतं तेस्तु वसेहाद्य मया सह ।
अनुगृह्णीष्व मां भद्रे मदनेन प्रमोहितं ॥

४. भ—इत्युक्ता सा वरारोहा कौशिकेन महात्मना
उवाच प्रश्रितं वाक्यं प्रणयात्प्रीतिवर्द्धनं ।

५. भ—त्वत्प्रीत्यर्थं० ।

६. ल—नास्ति ।

७. ल—नास्ति ।

ब ल—अतः परमाधिकः पाठः—

मेनके स्वागतं तेस्तु वसेहाद्य मया सह ।
अनुगृह्णीष्व मां भद्रे मदनेन प्रमोहितं ॥
इत्येवमुक्ता कुशिकात्मजेन
सा मेनका नाम मनोहरांगी* ।
तत्रावसत्तस्य वचोनुरोधात् ।
कंदर्पभार्येव मनोभवेन ॥
इत्यार्षे रामायणे बालकांडे विश्वामित्रतपो
नाम सर्गः ॥

इत्युक्ता सा वरारोहा तत्रावासमगात्तदा ।
तपसस्तु महाविघ्नो विश्वामित्रमुपागमत् ॥

---

*ल—मनोरमाङ्गी ।

तानि[1] वर्षाण्यतीतानि[1] पञ्च पञ्च च[2] राघव[2] ॥१२॥ [९पू
१२] विश्वामित्रस्य रमतः क्षणवद्[3] व्यतिचक्रमुः[3] ।
क्षतविज्ञान[4]बुद्धिर्हि तया मुनिरसौ तथा[5] ॥१३[6]॥ [N
१३] तानि वर्षाण्यतीतानि बुबोधैकमहर्[7]यथा ।
अथ काले गते तस्मिन् बुद्ध्वा[8] बुद्ध्वाऽऽत्मविक्रियाम् ।१४[9] [N
१४] जगादैवं तदा वाक्यं विश्वामित्रस्तपोधनः[10] ।
सोऽमर्षस्तच्च[11] मे ज्ञानं तत्तपः स च[12] निश्चयः[12] ॥१५॥[13] [N
१५] नष्टान्येकपदेनेह सर्वथा किमपि स्त्रिया[14] ।
अनया[15] लोभयित्वा [16]मां तपोपहरणं कृतम् ॥१६॥[13] [N

---

१. ल—तस्यां वसत्यां वर्षाणि । भ—तया च सह वर्षाणि ।
२. के—चराणि च ।
३ भ—क्षणबुध्यातिचक्रनुः ।
४. ज—क्षणवि० । भ—हृतविज्ञा० ।
५. ज भ—तदा । ज पुस्तके पुनः शोधनम् ।
६. ल—विश्वामित्राश्रमे रम्ये सम्यक्परिचचार ह ।
स तेषु बुद्धिरुत्पन्ना सामर्षा रघुनन्दन ॥
७. भ—०कमहो यथा ।
८. भ—बुद्ध्या ।
९. ल—विघ्नोयं देवविहितस्तपसो मे महात्मनः ।
अथ काले गते तस्मिन्विश्वामित्रो महायशाः ।
१०. रा ब—०स्तपोधनाः ।
११. भ—सर्वार्थस्तच्च ।
१२. भ—विनिश्चयः ।
१३. ल—संत्रस्तहृदयस्तत्र चिंताशोकसमन्वितः ।
सर्वं शुशोच कर्मेदं तपोपहरणं मम ॥
१४. भ—स्त्रियः ।
१५. ज—आनयित्वा ।
१६. भ—मे ।

१६] इन्द्रप्रियं चिकीर्षन्त्या तस्मादेनां सजाम्यहम् ।[1] [N
ततस्तां[2] मधुरै र्वाक्यै र्विसृज्य कुशिकात्मजः ॥१७॥
१७] पुष्कराणि परित्यज्य जगामोत्तरपर्वतम् । [१४
नैष्ठिकीं बुद्धिमास्थाय जेतुं[3] कामममर्षितः ॥१८॥[4]
१८] कौशिकीतीरमासाद्य तपस्तेपे[5] सुदारुणम् । [१५
सहस्रमपरं राम वर्षाणाममितद्युतिः ॥१९॥[6]
१९] चचार दुश्चरं तेन[7] देवा भयसमन्विताः । [१६
समेत्य मन्त्रयामासुः सर्षिसंघाः सवासवाः ॥२०॥[8]
२०] महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः[9] । [१७
मा च नस्तपसोग्रेण तापयत्वेवमुद्यतः ॥[10]२१॥

१. ल—नास्ति ।
ब ल—अतः परमाधिकः पाठः—
अहोरात्रापदेशेन गताः संवत्सरा दश ।
काममोहाभिभूतस्य विघ्नोयं प्रत्युपास्थितः
स निःश्वसन्मुनिश्रेष्ठः पश्चात्तापेन मूर्च्छितः ।
भीतामप्सरसं दृष्ट्वा वेपमानां कृतांजलिं ॥
२. कँ—ततस्त्वां । ब ल—मेनकां ।
३. भ—स जेतुं काममागतः ।
४. ल—उत्तरं पर्वतं राम विश्वामित्रोभ्ययात्पुनः ।
कृत्वा सुनिश्चितां बुद्धिं कामं जेतुं महायशाः ।
५. ल—तपे [पो ?] तप्यत दारुणं ।
६. ल—तस्मिन्वर्षसहस्रं तु तप्यमानो महत्तपः ।
७. रा—राम । भ—ते तु ।
८. ल—उत्तरे पर्वते राम देवानामभवद्भयम् ।
ते मन्त्रयातुः सहिताः सार्षिसंघाः सुरासुराः ।
९. ल—कौशिकात्मजः ।
१०. ल—नास्ति ।

२१] निवर्ततामयं[1] ब्रह्मंस्तपसोग्र्यादिति प्रभो । [N
देवानां[2] निश्चयं[3] श्रुत्वा[4] ब्रह्मा लोकपितामहः[5] ॥२२॥
२२] अब्रवीन्[6] मधुरं वाक्यं विश्वामित्रं महामुनिम् । [१८
महर्षे विनिवर्तस्व तपसः[7] कुशिकात्मज ॥[8]२३[9]॥
२३] महत्त्वमृषिमुख्यानां[10] ददामि तव सुव्रत । [१९
ब्रह्मणस्तद्[11] वचः श्रुत्वा विश्वामित्रस्तपोधनः[12] ॥२४॥ [२०
२४] प्राञ्जलिः प्रणतो वाक्यं प्रत्युवाच महायशाः । [२१
ब्रह्मर्षिशब्दं भगवन् दुर्लभं तपसार्जितम्[13] ॥२५॥[14]

---

१. भ—विवर्त्यतामयं ।

२. ल—देवतानां ।

३. ब—वचनं । ल—वचः ।

४. ज—कृत्वा ।

५. ल—सर्वलोकपितामहः ।

६. ब—अब्रवन् ।

७. रा—तपसा ।

८. ल—महर्षे स्वस्ति ते वत्स तपसोग्रेण कर्षितः ।

९. भ—अब्रवीद्राधिजं ब्रह्मा वरं याचस्व सुव्रत ॥

१०. रा—महत्त्वमृद्धिमुख्यानां ।

ल—महर्षित्वं दुरावापं ।

११. ल—पितामहवचः ।

१२. रा ब—०स्तपोधनाः ।

१३. कै रा ल भ—तपसोर्जितम् ।

१४. ल—प्रांजलिः प्रयतो भूत्वा विश्वामित्रस्ततोब्रवीत् ।
महर्षिशब्दमतुलं तपोबलसमन्वितम् ॥

भ—प्रत्युवाच रघुश्रेष्ठ विश्वामित्रो महातपाः ।
महर्षिशब्दं भगवन्दुर्लभं तपसार्जितं ।

२५] लभेयं[1] त्वत्प्रसादेन यदि मेऽस्ति तपश्चितम्[2] ।[3] [२२
तमुवाच ततो ब्रह्मा न तावत् त्वं जितेन्द्रियः ॥२६॥ [२३
२६] कामक्रोधावनिर्जित्य[4] कथं ब्रह्मत्वमिच्छसि ।
जयेन्द्रियाणि[5] तावत् त्वं कामक्रोधौ च कौशिक ॥२७॥[6] [२३
२७] ततः परं[7] त्वं ब्रह्मत्वं समवाप्स्यसि दुर्लभम् ।
इत्युक्त्वा प्रययौ ब्रह्मा पुनरेव यथागतम् ॥२८॥ [N
२८] विश्वामित्रोऽपि तत्रैव तेपे घोरतरं तपः ।
ऊर्ध्वबाहु निरालंब एकपादप्रतिष्ठितः ॥२९॥[8]
२९] वायुभक्षः स्थितः[9] स्थाने एकस्मिन् स्थाणुवत् स्थिरः ।[10] [२४
[11]घर्मे पञ्चतपा[12] भूत्वा वर्षास्वभ्रावकाशिकः ॥३०॥
३०] शिशिरे जलशायी च भूत्वा तेपे महत् तपः । [२५उ

१. भ—लभे यत्प्रसादेन ।

२. भ—तपास्विता ।

३. ल—यदि मे भगवानाह ततोऽस्मिन्नजितेन्द्रियः ।

४. भ—कामक्रोधमनिर्जित्य ।

५. ज—जितेन्द्रियाणि ।

६. ल—इन्द्रियाणि जयेत्युक्त्वा जगाम त्रिदिवं पुनः ।
यतस्वेति मुनिश्रेष्ठमुक्तवांस्तं दिवं व्रजेत्

७. ज—परत्व ।

८. ल—विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ।
ऊर्ध्वः बाहुर्निरालंबो वायुभक्ष्यस्ततोऽभवत् ॥

९. कै भ—स्थितः ।

१०. ल—नास्ति ।

११. ल भ—ग्रीष्मे ।

१२. कै—पंचतपः । ल—पंचतपो ।

१३. ल—०स्वाकाशगोभवत् । भ—०भ्रावकाशगः ।

एवं वर्ष[1]शतं साग्रं घोरं तप उपाश्रितः[2] ॥३१॥[3] [२६

३१] समेता[4] दिवि काकुत्स्थ देवा भयमुपागमन् । [N

संभ्रमं परमास्थाय[5] ततः शक्रः सुराधिपः[6] ॥३२[7]॥

३२] चिन्तयित्वा तपोविघ्नमुपायं[8] रघुनन्दन । [२७

आहूयाप्सरसं रम्भां मरुद्गणयुतः[9] प्रभुः ।[10]

३३] उवाचात्म[11]हितं वाक्य[12]महितं कौशिकस्य च[13]॥[14]३३॥ [२८

इत्यार्षे रामायणे बालकाण्डे[15] विश्वामित्रतपो[16] नाम[16]

एकोनषष्टितमः[17] सर्गः[18] ॥५९॥[19]

---

१. ब—वर्षसहस्रेण ।

२. भ—उपासतः ।

३. ल—सलिले शिशिरं सर्वमहोरात्राणि सर्वशः ।

एवं वर्षसहस्रेण तपोतप्यत दारुणम् ।

४. भ—समस्ता ।

५. भ—परमापन्नस्ततः ।

६. भ—सुरेश्वरः ।

७. ल—ततस्तपसि संसक्ते विश्वामित्रे महामुनौ

संभ्रमः सुमहानासीत्सुराणां वासवस्य च ।

८. कै—०मपायं ।

९. भ—०द्गणवृतः ।

१०. ल—रम्भामप्सरसं शक्रः सह सर्वैर्मरुद्गणैः ।

११. ल—स उवाच हितं ।

१२. रा—वाक्यं मिहितं । ल—वाक्यं सहितं ।

१३. भ—तु ।

१४. ल—अतः परमधिकः पाठः-वरारोहे गुणैः सर्वैरप्सरोभि र्विशिष्यते ।

१५. कै—आदि काण्डे भ—नास्ति ।

१६. कै रा—नास्ति । भ—विश्वामित्रमाहात्म्ये ।

१७. कै रा—पंचषष्टितमः । ज—एकपंचाशत्तमः । भ—नास्ति ।

१८. भ—नास्ति ।

१९. ज—॥५१॥ भ—॥४८॥ ब ल—सर्गसमाप्तिर्न दृश्यते ॥

सुरकार्यमिदं रम्भे कर्तुमर्हसि भामिनि[1] ।
१] लोभयस्व तपस्यन्तं कौशिकं [2]गुणसंपदा ॥[3]१॥ [१
एव[4]मुक्ता ततो [5]रम्भा सहस्राक्षेण धीमता ।
२] प्राञ्जलिः प्रणतोद्विग्ना प्रत्युवाच सुराधिपम् ॥[6]२॥ [२
कोपनश्च तपस्वी च विश्वामित्रः शचीपते ।
३] स कोपं[7] नियतं देव मय्युत्स्र[8]क्ष्यति कोपि[9]तः ॥३॥[10]
[11]तस्मात् त्वं मे सु[11]रपते प्रसादं कर्तुमर्हसि । [३
४] तेनासादयित[12]व्यानि [13]तपांसि [14]जयतां वरे ॥४॥ [N

---

१. ल—कर्त्तव्यं सुमहत्त्वया ।

२. भ—रूपसंपदा ।

३. ल—प्रलोभ्य कौशिकं भद्रे कामक्रोधवशं नय ।

४. ल—तथोक्तामप्सरा राम ।

५. भ—प्रणता मूर्द्ध्ना ।

६. ल—वित्रस्ता प्राञ्जलिर्भूत्वा प्रत्युवाच सुरेश्वरम् ।

७. ब—शापं ।

८. कै—मय्युत्प्रक्ष्यति । ब—मय्युद्दास्यति ।
भ—समुत्सृजति ।

९. भ—कोपनः ।

१०. ल—अयं सुरपते क्रोधी विश्वामित्रो महाद्युतिः ।
शापमुत्स्रक्ष्यति देवतानां भयप्रदः ॥

११. ज—तस्मान्मे त्वं सुर० । ल—ततो मे भगवन्साधु ।

१२. भ—नाभ्युत्थापयितव्यानि ।
ब ल—न मे सदायित० ।

१३. ब ल—तेजांसि ।

१४. ब ल—च तपांसि च । भ—तपतां वर ।

तामुवाच[1] ततः शक्रो[2] वेपमानां कृताञ्जलिम् । [४ उ
५] मा भैषीः[3] कुरु रम्भे त्वं प्रियं मे प्रियभाषिणि ।।५[4]।। [५
कोकिलो हृदयग्राही काले[5] कुसुमितद्रुमे[6] ।
६] अहं[7] कन्दर्पसहितः स्थास्ये[8] तव समीपतः ।।६।। [६
मनोहरं[9] तु रम्भोरु कृत्वा रूपमथाद्भुतम् ।
७] तमृषिं रुचिरापाङ्गे[10] गच्छ लोभयितुं वने ।।७।।[11] [७
इत्युक्ता देवराजेन रम्भा सुरुचिरानना ।
८] कृत्वा रूपं मनोहारि विश्वामित्रमलोभयत् ।।८।।[12] [८
इन्द्रोऽपि कोकिलो भूत्वा वल्गु व्याहरते वने[13] ।

---

१. रा ज—तमुवाच ।

२. ल—सहस्राक्षो ।

३. भ—त्वं रम्भे कुरु मा भैषीः ।

४. ल—रंभे मा भूत्तव भयं कुरुष्व वचनं मम ।

५. रा-काली । ल —माधवे ।

६. ल—रुचिरे ऋतौ ।

७. ब ल—अयं ।

८. ल— स्थोतः ।

९. भ —मनोरमम् ।

१०. भ—रुचिरापांगि ।

११. ल—त्वं च रूपं बहुगुणं कृत्वा परमभास्वरं ।
तमृषिं कौशिकं भद्रे मोहनार्थमुपाह्वय ।।

१२. ल—सा श्रुत्वा वचनं तस्य रूपमप्रतिमं भुवि ।
कृत्वा बहुगुणं रूपं विश्वामित्रमुपाद्रवत् ।।

१३. भ—इंद्रोपि कोकिलो भूत्वा कंदर्पसहितस्तदा ।
वर्णरागहितस्तत्र तस्थौ राम विलोकयन् ।।
कोकिलस्य वचः श्रुत्वा वर्णं व्याहरतो वने ।

६] रम्भागीतस्वनं चैव मधुरं सुमनोहरम्[1] ।।९[2]।। [N
मारुतं च सुखस्पर्शं दिव्यपुष्पाधिवासितम्[3] ।[4]
११] आयान्तं समभिप्रेत्य कामिनां मदवर्धनम् ।।१०।। [N
सहसा हृतचित्तात्मा मदनेन महामुनिः ।
१२] गीतस्वनेनानुसृतो[5] रम्भां दृष्ट्वा मनोहराम् ।।११।। [N
शब्देनापहृतस्तेन[6] रम्भासन्दर्शनेन च ।
१३] स्मृत्वा चात्मतपोभङ्गं[7] मुनिः शङ्कामुपागमत् ।।१२।। [१०
सहस्राक्षस्य तत्कर्म दृष्ट्वा[8] च[9] ध्यानचक्षुषा ।
१४] रम्भां कोपसमाविष्ट इदं वचनमब्रवीत् ।।[10]१३।। [१२

---

१. ज—स्वमनोहरम् ।

२. नवमश्लोकादारभ्य द्वादशश्लोकपर्यन्तमित्थं पाठः—

ब—कोकिलाशब्दसंश्रुत्य वसंतपत्रतः स्वनं ।
...............न मन ....विश्वामित्रो...... ।
अथ......... गीते............ मेन सः ।
...... नन च रंभाया मुनिः मोहमुपागमत् ।
ल—कोकिलस्य च संश्रुत्य वल्गु व्याहरतः स्वनम् ।
तां प्रहृष्टेन मनसा विश्वामित्रोभ्यवैक्षत ।
अथ तस्य सशब्देन गीतेनाप्रतिमेन सः ।
दर्शनेन च रंभाया मुनिः संमोहमागमत् ।।

३. ज—दिव्यगंधाधिवासि० ।

४. भ—अरंभंतमभिप्रेक्ष्य कामिनामविदद्बलं ।

५, भ—गीतध्वनिं चानु० ।

६. भ—०पहृतस्तत्र ।

७. भ—०तपोभ्रंशं ।

८. ब ल—विज्ञाय ।

९. ब ल - मुनिपुंगवः । भ—ज्ञानचक्षु० ।

१०. ल—नास्ति ।

यस्माल्लोभयसे रम्भे मामात्मगुणसंपदा[1] ।
१५] तस्माच्छैलमयी भूत्वा स्थास्यसीह[2] तपोवने ॥[3]१४॥[4] [१३
वर्षाणामयुतं पूर्णं मच्छापकलुषीकृता ।
१६] ब्राह्मणस्तु तपः सिद्ध[5] उद्धर्ता ते भविष्यति ॥१५॥[6] [१४
रम्भां शैलमयीं कृत्वा विश्वामित्रो महामुनिः ।
१७] सन्तापमगमत् तीव्रं कोपस्य[7] वशमागतः ॥१६॥[8] [१५
दृष्ट्वा तथागतां रम्भां सद्यः[9] शैलमयीं रुषा ।
१८] कन्दर्पसहितं चैव दृष्ट्वा[10] नष्टं पुरन्दरम् ॥१७॥[11] [N
तपोऽपहारं च पुनः कृतं दृष्ट्वा तया[12] पुनः[12] ।

---

१. ल—कामक्रोधजयैषिणं । भ—स्वमात्म० ।

२. रा—यास्यसीह । ज—स्थास्यसेह ।

३. ल—दशवर्षसहस्राणि शैले स्थास्यसि दुर्भगे ।

४. ब ल—अतः परमधिकः पाठः—

ब्रह्मादयो महाभागास्तपोबलसमन्विताः ।
उद्धरिष्यन्ति रंभे त्वां मत्क्रोधकलुषीकृताम् ॥

५. ज—ब्रह्मणस्तु तपः सिद्धा ।

६. ल—नास्ति ।

७. भ—क्रोधस्य ।

८. ल—एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ।
अशक्नुवन्वारयितुं क्रोधसंतापमागतम् ॥

९. भ—शप्तां ।

१०. भ—व्यवस्थं च ।

११. ल—तस्य चिंताद्यपेतस्य रंभा वै शैलमागता ।
व्रीडितश्चापि कंदर्पो जगामाशु यथागतम् ॥

१२. ज—तयात्मनः । भ—तपोधनः ।

१६] अजितेन्द्रियोऽस्मीति भृशं जगर्हात्मानमात्मना ॥१८॥ [१९
अथ हैमवतीं त्यक्त्वा दिशं रम्यां महामुनिः ।
२०] पूर्वां दिशमुपागत्य तपस्तप्तुं प्रचक्रमे ॥१९॥ [६९,१

---

१. भ—असंयतेंद्रियोस्मीति ।

२. रा—० मात्मनः ।

३. ल—क्रोधेन च महातेजास्तपसो हरणात्कृतः ।
इंद्रियैरजितै राम न लेभे शांतिमात्मनः ॥

४. ल भ—राम ।

५. ल भ—त्यक्त्वा ।

६. ल—० मपाक्रम्य । भ—० मुपागम्य ।

७. ल—तपस्तेपे सुदारुणम् ।

८. ब ल—अतः परमाधिकः पाठः—
तां दृष्ट्वा शापसंयुक्तां रंभां शैलमयीं कृतां ।
अभ्यागच्छन्मुनिश्चिंतां तपोपहरणे कृते ॥
नैव कोपं करिष्यामि संवत्सरशतान्बहून् ।
स्वयं च शोषयिष्यामि स्वमात्मानं यतेन्द्रियः ॥

ब—तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं महदूर्जितम् ।
ल—तावत्यावद्धि ,, ,, ब्रह्मण्यं महदूर्जितम् ।
ब—अनुच्छ्वसन्न भुंजन्वै तिष्ठेयं शाश्वतीः समाः ।
ल— ,, ,, तिष्ठेय ,, ,, ॥

ब ल—न हि मे तप्यमानस्य क्षयं यास्यति वासवः ।
ब—मौनं वर्षसहस्रं तु कृत्वा मनसि सुस्थिरं ।
ल—,, वर्षसहस्राय ,, ,, ॥
ब—अकरोदप्रतिसमां प्रतिज्ञां रघुनंदन ।
ल— ,, प्रतिज्ञं ,, ।
न हि मे तप्यमानस्य क्रोधमात्सर्यवार्जितः ॥

मौनं वर्षसहस्रं[1] तु कृत्वा स[2] कृतनिश्चयः ।

२१] वज्रस्थानमुपाश्रित्य[3] तस्थौ गिरिरिवाचलः ॥२०॥[4] [२

इत्यार्षे रामायणे बालकाण्डे[5] रम्भाशापो[6] नाम[6]
षष्टितमः[7] सर्गः[8] ॥ ६० ॥[9]

---

१. भ—वर्षसहस्राणि ।

२. कै—सु— ।

३. भ—वज्रासनमुपावृत्य ।

४. ल—पूर्णवर्षसहस्रे तु काष्ठभूतं महामुनिम् ।
विघ्नैर्बहुभिराभूतं कोपो नांतरमाविशत् ।
गत्वा च परमं हर्षं तप आतिष्ठदुत्तमम् ।
अथ वर्षसहस्रेण व्रतदीक्षेण आगतः ।
इन्द्रो द्विजाति गत्वेतं यथातिष्ठमयाचत ।
निःशेषमन्नं भगवन्भूक्तं च महातपाः ।
तथैव मौनमकरोदनुच्छ्वासं च राघवः ।

५. कै ब भ—आदिकांडे ।

६. कै ब भ—रंभाशापः । रा—रंभाशाप ।

७. कै रा—षट्षष्टितमः । ज—द्विपंचाशत्तमः ।
ब भ—नास्ति ।

८. भ—नास्ति ।

९. ज—॥ ५२ ॥ भ— ॥ ४१ ॥
ल—सर्गसमाप्तिर्न दृश्यते ।

स्थाणुभूते स्थिते तस्मिन् मुनौ मौनव्रताश्रिते[1] ।
१] अविशन्नान्तरं[2] कामो न क्रोधो ददृशे मुनेः[3] ॥१॥[4] [३
अक्रोधनमकामं च तं दृष्ट्वा शान्तचेतसम् ।
२] तपसोग्रेण संसिद्धिं परां गतमरिन्दम[5] ॥२॥[6] [N
संभ्रान्तमनसो भीता[7] ब्रह्माणं[8] तपसां[9] निधिम् ।
३] ऊचुरभ्येत्य विबुधाः सर्वे शक्रपुरोगमाः ॥३॥[10] [९
उपायै र्विविधै र्विप्रो विश्वामित्रस्तपोनिधिः[11] ।
४] क्रोधितो लोभितश्चैव तपसा च विवर्धितः[12] ॥४॥[13] [१०पू

---

१. रा ज भ—मौनव्रतान्विते ।
२. भ—आवेष्टुं न च तं ।
३. भ—मुनिं ।
४. ल—अथ वर्षसहस्रेण निरुच्छ्वासो भवं मुनिः ।
निरुच्छ्वासो मुनेस्तस्य मूर्ध्नि धूमो ह्यजायत ॥
५ ज भ—गतिम० । भ—पुनरपरहस्तेन विन्यस्तः ।
६. ल—त्रैलोक्यं येन संभ्रांतमादीपितमिवाभवत् ।
ततो देवर्षिगंधर्वाः पन्नगासुरराक्षसः ॥
७. भ—भूत्वा ।
८. ज—ब्राह्मणं ।
९. रा ज भ—तपसो ।
१०. ल—मोहितास्तेजसैवासंस्तपसा मंदरश्मयः ।
कश्मलापहताः सर्वे पितामहमथाब्रुवन् ॥
११. भ—० मित्रः तपोधनः ।
१२. कै—विवर्धतः ।
१३. ल— बहुभिः कारणैर्देव विश्वामित्रो महामुनिः ।
क्षोभितः क्रोधितश्चैव तपसा... विवर्द्धते ॥

न ह्यस्य वृजिनं[1] किञ्चिद् दृश्यते स्वल्पमप्यथ । [१०उ
५] न दीयते यदा[2] तस्मै[2] मनसो यदभीप्सितम्[3] ॥५॥[4]
विनाशयति लोकांस्त्रींस्तेजसा स चराचरान्[5] ।[6] [११
६] व्याकुलाश्च दिशः सर्वा न च सूर्यः प्रकाशते ॥६॥
सागराः क्षुभिताः[7] सर्वे[7] विदीर्यन्ते च पर्वताः[8] । [१२
७] कम्पते पृथिवी[9] चैवं वायुर्वाति[10] भृशाकुलः[11] ॥७॥[12] [१३पू
बुद्धिं[13] न कुरुते यावदेष वै[14] तपसां निधिः[15] । [१५पू
८] देवराज्यपरिप्राप्तौ दीयतां तावदीप्सितम् ॥[15]८॥[16] [१६उ

---

१. कै—रंजिनं ।

२. ल—यदेतस्मै ।

३. ल—हि मदीप्सितम् ।

४. भ—श्लोकादस्मादारभ्य सप्त मश्लोकपर्यन्तं नास्ति पाठः ।

५. कै—चराचरम् ।

६. ल—नाशयिष्यंति लोकांश्च नेष सचराचरम् ।

७. ज—क्षुधिताः सर्वे । ल—०श्चैव ।

८. ल—सर्वतः ।

९. ल—प्रकम्पते च पृथिवी ।

१०. ज—० श्चाति ।

११. ल—भृशाविलः ।

१२. ल—अतः परमाधिकः पाठः—

ब्रह्मविप्रानभजते नास्तिको जायते नरः ।
त्रैलोक्यमपि संमूढं स प्रक्षुभितमानसं ॥

१३. ज—च ।

१४. भ—प्रतपतां वर ।

१५. भ—एवं ब्राह्मं परिप्राप्तं ल...तां तावदीप्सितं ।

१६. ल—बुद्धिं न कुरुते देव यावदेव जगत्क्षये ।

तावत्प्रसाद्यो भगवानग्निरूपो महाद्युतिः ।
कालाग्निरिव निः शेषस्त्रैलोक्यं प्रदहेदयं ।
देवराज्यं चिकीर्षेद्वा दीयतामस्य यद्धितम् ॥

ततः सुरगणाः सर्वे पितामहपुरःसराः ।[1]
९] विश्वामित्रमुपागम्य वाक्यमूचुरिदं तदा[2] ॥९॥ [१७
ब्रह्मर्षे विनिवर्तस्व तपसोऽग्र्यादितः[3] परम् ।
१०] ब्रह्मर्षित्वमनुप्राप्तस्तपसा ह्यसि[4] दुर्लभम् ॥१०॥[5] [१८पू
प्रीतः स्वच्छन्दमरणं[6] ददानि[7] च तवेप्सितम् ।
११] स्वस्ति[8] प्राप्नुहि[9] भद्रं ते तपसोऽग्र्यादुपारम[10] ॥११॥ [१८उ
पितामहवचः श्रुत्वा तत् तदा मधुराक्षरम् ।
१२] कृताञ्जलिरिदं[11] वाक्यमुवाच मुनिपुङ्गवः ॥१२॥[12] [१९

---

१. ल—०पुरोगमाः ।
२. ल—विश्वामित्रं महात्मानमूचुः सानुनयं वचः ।
३. भ—तपसोग्रात्परंतप ।
४. भ—स्वति ।
५. ल—महर्षे स्वस्ति ते साधो तपसा स्म सुतोषिताः ।
ब्रह्मण्यं रूपमोग्रेण प्राप्तवानसि कौशिक ।
६. भ—० चरणं ।
७. भ—ददामि ।
८. कै—स्वस्ति ।
९. भ—चाप्नुहि ।
१०. ल—गच्छ सौम्य यथासुखं । भ—०सोग्राद्०‌ ।
११. भ—विश्वामित्रस्तदा ।
१२. ल—श्लोकादस्मादारभ्याष्टादशश्लोकपर्यन्तमित्थं पाठः—
पितामहवचः श्रुत्वा सर्वेषां च दिवौकसां ।
कृत्वा प्रणामं विधिवद्व्याहरत्तान्महामुनिः ॥
ओंकारश्च वषंकारा वेदाश्चायांतरित्यशः ।
चत्रवेदविदां श्रेष्ठो ब्रह्मवेदवतामपि ॥
ब्राह्मपुत्रो वसिष्ठोयमेवमेवब्रवीत्तमाम् ।
ततः प्रसाद्य तं देवा विश्वामित्रमथाब्रवन् ।
महर्षिस्त्वं न संदेहः सर्वं संपत्स्यते तव ॥
इत्युक्ता देवताः सर्वा जग्मुस्त्रिभुवनास्तदा ।
सर्वं चकार ब्रह्मर्षिरेवमास्त्विति चाब्रवीत् ॥
अपूजयत् ब्रह्मर्षि वसिष्ठं जपतां वरम् ।
ब्राह्मण्यमेवमेतेन प्राप्तं राम महात्मना ॥

यदि प्राप्तं मया ब्रह्मन् ब्राह्मण्यं तपसो बलात् ।
१३] ततो ब्रह्म[1] च वेदाश्च सत्यं च वरयन्तु माम् ॥१३॥ [२०
सिद्धिर्धृतिः[2] स्मृतिश्चैव विद्या मेधा यशः[3] क्षमा ।
१४] तपो[4] दमश्च शान्तिश्च सर्वज्ञत्वं कृतज्ञता[5] ॥१४॥ [N
असंमोह इति प्राहु ब्रह्म ब्रह्मविदो जनाः ।
१५] अद्रोहः सर्वभूतानामपकल्मषसंज्ञितः[6] ॥१५॥ [N
तन्मा[7] भजतु[8] विप्रेशं[9] ब्रह्माव्ययमनुत्तमम् ।
१६] तपसा च यदि प्राप्तं ब्राह्मणत्वं यथेप्सितम् ॥१६॥ [N
तमेवंवादिनं ब्रह्मा प्रत्युवाच तपोनिधिम् ।
१७] प्रतिभास्यन्ति[10] ते वेदा ब्रह्म चाव्ययमुत्तमम् ॥१७॥ [N
अधिकस्त्वं मतो मेऽद्य[11] सर्वब्रह्मविदां मुने ।
१८] इत्युक्त्वैनं ततो ब्रह्मा ययौ सुरगणैर्वृतः ॥१८॥ [२३
विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् ।
१९] कृतकृत्यश्चचारेमां पृथिवीं सिद्धमानसः ॥[12][13]१९॥ [२४

---

१. ब—ब्रह्मा ।
२. भ—सिद्धिर्वृद्धिः ।
३. भ—शमः ।
४. भ—तपो दमो दया चांतिः ।
५. के रा—कृतज्ञया ।
६. भ—०मसंकल्पमसज्ञिता ।
७. रा भ—तन्मां ।
८. ज—व्रजतु ।
९. ज—विप्रर्षे । भ—विश्वेश ।
१०. ज—०भास्यंति ।
११. भ—अधिकं त्वामहं मन्ये ।
१२. के अ—सिद्धिमा० ।
१३. ल—कृतकार्यो मही सर्वां चचार तपसि स्थितः ।

एष ब्रह्मविदां श्रेष्ठ एष ब्रह्म[1]विदां वरः ।
२०] एष विग्रहवान् धर्म एष सिद्धिमतां वरः ॥२०॥[2] [२६
२१उ] शतानन्द[3]वचः श्रु[3]त्वा रामलक्ष्मणसन्निधौ ।[4]
जनकः प्राञ्जलिर्भूत्वा विश्वामित्रं ततोऽब्रवीत् ॥[5]२१॥ [२७
२२] धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे [6]त्वं [6]महामुने ।
यज्ञं काकुत्स्थसहितो द्रष्टुमभ्याग[7]तः स्वयम् ॥२२॥[8] [२८
२३] [9]गुणाः [9]सुबहवः [10]प्राप्तास्त्वत्सन्दर्शनजा म[10]या ।
सदश्च पावितमिदं त्वद्गुणौघै[11]स्तपोनिधे ॥[12]२३॥ [N

---

१. ज भ—तेजस्विनां ।

२. ल—एष धर्मपरो नित्यं वीर्यस्य च परायणम् ।
एष सत्ये दमे शौचे वेदे च परिनिष्ठितः ॥

३. ल—इत्युवाच शतानंदो ।

४. ल—इत्यार्षे रामायणे विश्वामित्रब्राह्मण्यलाभो नाम सर्गः ।

५. ल—ततः कथांते वाक्यज्ञो [वाक्यं] मधुरमब्रवीत् ।

६. ल—मुनिपुंगव ।

७. रा—०मभ्यायतः ।

८. ल—यज्ञं काकुत्स्थसहितः प्राप्तवानसि धार्मिक ।
ल—सहितो द्विजमुख्यैश्च बहुभिः सुमहायशाः ।
पावितोहं त्वया ब्रह्मन्दर्शनेन महामुने ।
भ—काकुत्स्थसहितो द्रष्टुं यज्ञमभ्यागतः स्वयं ।

९. ल—गुणा बहुविधाः । भ—गुणाश्च बहवः ।

१०. रा—प्राप्ता त्वत्संद० । ल भ—प्राप्तास्तव सन्दर्शनान्मया ।

११. भ—सद्गुणैस्ते तपोधन ।

१२. ल—बाष्टि ।

२४] विप्रभावश्च ते ब्रह्मन् कीर्त्यमानो महातपाः[1] ।[2]
[3]श्रुतो मया [3]महातेजा रामेण च महात्मना ॥२४॥ [३०

२५] सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः । [३१
अप्रमेयं [4]तव तपो [4]ह्यप्रमेयं च ते बलम् ॥२५॥

२६] अप्रमेया गुणाश्चापि[5] नित्यं ते पुरुषर्षभ । [३२
तृप्तिराश्चर्यभूता[6]नां [7]कथानां नास्ति[7] मे वि[8]भो ॥२८॥

२७] कर्म[9]कालो मुनिश्रेष्ठ[10] लम्बते रविमण्डलम् । [३३

२८पू] श्वः प्रभाते मुनिश्रेष्ठ द्रष्टुमे[11]ष्याम्यहं पुनः ॥२७॥[12] [३४पू
एव[13]मुक्त्वा [13]मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ।

२९] प्रदक्षिणमुपावृत्य विश्वामित्रं ततो ययौ ॥[14]२८॥ [३६

---

१. कै ब—महातपः । भ—महत्तपः ।

२. ल—विप्रभावं च ते ब्रह्म कीर्त्यमानं मया श्रुतम् ।

३. ल—श्रुतं भुवि मया चाद्य ।

४. ल—च ते रूपमप्रमेयं ।

५. ल भ—गुणाश्चैव ।

६. ल—०भूताभिः ।

७. ल—कथाभिर्नास्ति ।

८. रा भ—प्रभो ।

९. ल—कर्मकाले ।

१०. ज ल—नरश्रेष्ट ।

११. ल—द्रष्टुमर्हाम्यहं । भ—प्रष्टुमेष्यामि वै ।

१२. ल—अतः परमधिकः पाठः—
गन्ताहं जपतां श्रेष्ट मामनुज्ञातुमर्हसि ।
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभं ।
विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥

१३. ल—पूजितो मुनिना तेन ।

१४. ल—प्रदक्षिणं तमकरोत्सोपाध्यायः सबान्धवः ।

विश्वामित्रोऽपि धर्मात्मा सह[1]रामः सलक्ष्मणः ।
३०] [2]स्वं वास[2]मुपचक्राम पूज्यमानो द्वि[3]जातिभिः ॥२६॥[4] [३७

इत्यार्षे रामायणे बाल[5]काण्डे विश्वामित्रब्रह्मत्वप्रा[6]प्तिकथनं
ना[7]म (एकषष्टि[8]तमः) स[9]र्गः ॥६१॥

---

१. ल भ—सरामः सहलक्ष्मणः ।

२. ब भ—स्ववास० । ल—सुवाटमभिचक्राम ।

३. ज ल—महर्षिभिः ।

४. ल—अतः परमधिकः पाठः—

तता जगाम स्वगृहं स राजा
सहर्षचित्तो मुनिमर्चयित्वा ।
स तद्वियोगतृषितो महर्षिः
कृच्छ्रेण रात्रिं गमयांबभूव ॥

५. भ—आदिकांडे ।

६. ल—विश्वामित्रचरितं समाप्तम् ।
भ—विश्वामित्रब्रह्मत्वलाभः ।

७. ल भ—नास्ति ।

८. कै रा—सप्तषष्टितमः । ज—त्रिपंचाशत्तमः ।
ब ल भ—नास्ति ।

९. ल भ—नास्ति ।

ततः प्रभाते विमले कृतकर्मा[1] नराधिपः ।
१] विश्वामित्रं महात्मानमुपायात्[2] सहराघवम् ॥१॥ [१
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन[3] कर्मणा[4] ।
२] राघवौ च महात्मानौ ततो वाक्यमुवाच ह[5] ॥२॥ [२
भगवन् स्वागतं तेऽस्तु किं करोमि महातपः ।
३] भवानाज्ञापयतु मामाज्ञाप्यो भवतो ह्यहम् ॥३॥[6] [३
एवमुक्तस्तु धर्मात्मा जनकेन महात्मना ।[6]
४] प्रत्युवाच मुनिर्धीरो[7] वाक्यं वाक्यविशारदः[8] ॥४॥ [४
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ।
५] द्रष्टुकामौ धनुर्दिव्यं यदेतत त्वयि तिष्ठति ॥५॥ [५
एतद् दर्शय भद्रं ते कृतकामौ नृपात्मजौ[9] ।
६] दर्शनादस्य धनुषो यथेष्टं ते[10] करिष्यतः ॥६॥ [६
इत्युक्तो जनको राजा प्रत्युवाच कृताञ्जलिः ।[11]
७] श्रूयतां धनुषस्तत्त्वं यदर्थं[12] मयि तिष्ठति ॥७॥ [७

१. ल—कृतकृत्यो ।
२. ल—०माजुहाव सराघवम् ।
३. रा—जनकेन महात्मना ।
४. रा—नास्ति ।
५. ज ल—महामुने । भ—महत्तपः ।
६. रा—नास्ति ।
७. ल—मुनिवरो ।
८. ल—वाक्यविदांवर ।
९. ज—नृपात्मज ।
१०. ल—प्रकरिष्यति । भ—वै करिष्यतः ।
११. ल—एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम् ।
१२. ल—यदाहं चेह । भ—यदेतन्मयि ।

देवरात[1] इति ख्यातो निमेः षष्ठो महीपतिः ।
८] न्यासभूतमिदं तस्मै[2] धनुर्दत्तं महात्मना ॥[3]८॥ [८
दक्षयज्ञवधे पूर्वं धनुषा[4]ऽनेन शङ्करः[5] ।
९] विध्वंस्य[6] त्रिदशान् सर्वानिदं किल तदोक्तवान् ॥[7]९॥ [९
यस्माद् भागार्थिनो भागं न कल्पयथ मे सुराः ।
१०] तस्मादङ्गानि[8] सर्वाणि धनुषा शातयामि[9] वः ॥१०॥[10] [१०
तस्मै देवा भयोद्विग्ना रुद्राय प्राणमंस्तदा ।
११] प्रसादयामासुरेनं[11] तेषां तुष्टोऽभवद् भवः ॥११॥[12] [११
प्रीतश्चापि ददौ तेषां तान्यङ्गानि महौजसाम् । [१२
१२] धनुषा यानि यान्यासन् शातितानि[13] महात्मना ॥१२॥[14] [N

---

१. भ—देवराज ।

२. भ—तस्य ।

३. ल—न्यासोयं तस्य तु पुरा हस्ते दत्तं महद्धनुः ।

४. ल—धनुरायस्य ।

५. रा—शंकराः । ल—यत्नतः ।

६. रा—विध्वंसि ।

७. ल—विध्वंस्य त्रिदशान् रुद्रः सलीलमिदमब्रवीत् ।

८. ब—यस्मादंगानि ।

९. रा—शांतयामि ।

१०. महार्हं मयि यद्भागं यत्प्रयच्छथ देवताः ।
शातयामि वरास्त्रैस्तु तेषामस्त्राणि वै पुनः ।

११. ज—०मासुरेवं । भ—०दयांचक्रुरेनं ।

१२. नास्ति ।

१३. कै रा—शांतितानि ।

१४. ल—नास्ति ।
भ—प्रीतियुक्तस्तु सर्वेषां ददौ तेषां महात्म ां ।
घातितानि महार्हाणि तेषामंगानि वै मुने ॥

तदेतद् देवदेवस्य धनुर्दिव्यं[1] महात्मनः । [१३
१३] तिष्ठत्यद्यापि भगवन् कुलेऽस्माकं सुपूजितम् ॥[2]१३॥
वीर्यशुल्का च मे कन्या दिव्यरूपगुणान्विता । [१४उ
१४] भूतलादुत्थिता पूर्वं नाम्ना सीतेत्ययोनिजा ॥१४॥[3] [१४पू
तां नृपा वरयामासुरागत्यागत्य वै पुरा ।
१५] वीर्यशुल्का प्रदेयेति तानहं चाब्रुवं नृपान् ॥१५॥[3] [१५
ततो नृपतयः सर्वे प्रार्थयन्तः सुतां मम ।[4] [N
१६] वीर्यजिज्ञासया तेषां मया सन्दर्शितं धनुः[5]॥१६॥
न शेकुश्चापि ते ब्रह्मन्नुद्धर्तुं मम ते धनुः ।[6] [१९
१७] तेषामल्पमहं मत्वा[7] वीर्यं तत्र महामुने ॥[8]१७॥ [२०पू

---

१. ल भ—धनूरत्नं ।
२. ल भ—नास्ति ।
३. ल भ—अथ वाहयतः क्षेत्रं फलाग्रादुत्थिता मम ।
ल——सर्वलक्षणसंपन्ना नाम्ना सीतेति मे सुता ।
भ—— संयुक्ता ,, ,, विश्रुता ।
ल भ—भूतलादुत्थितां तां तु वर्धमानां ममात्मजाम्
आगत्यावरयन् सर्वे राजानो मुनिपुंगव ।
तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षितां ।
वीर्यशुल्कामकथयं ते बुभूषश्च तत्त्वतः ॥
४. ल—ततः सर्वे नृपतयः समेत्य मुनिपुंगव ।
भ—ते च ,, ,, ,, ,,
ल—मिथिलामप्युपेयुस्ते वीर्यं जिज्ञासितं स्वकं ।
भ— ०मभ्युपेयुस्ते ,, ,, ,, ।
५. ल भ—तेषां जिज्ञासमानानां मया धनुरुपाहृतं ।
६. ज—नास्ति ।
ल—न शक्ता धारणे तस्य धारणे तोलने तथा ।
भ—,, ,, ग्रहणे ,, ,, ,, ,, ।
७. ज—तत्र मत्वा वीर्यं ।
८. ल भ—तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा तपोधन ।

नृपतीन् संहितान्[1] सर्वान्[2] प्रत्याख्यायितवांस्तदा । [२०उ

१९पू] ततस्ते[3] परमक्रुद्धा राजानस्ते[4] महाबलाः ॥ १८ ॥[5] [२१पू

२०उ] रोषेण महताऽऽविष्टा मिथिलामभ्यपीडयन् । [२२उ

संवत्सरं च ते पूर्णं रुरुधुः कृतनिश्चयाः ॥ [6]१९ ॥

२१] अवरोधेन तेषां च यदा क्षीणोऽस्मि सर्वशः । [२३

तदा प्रसादयाञ्चक्रे देवदेवमुमापतिम् ॥ २० ॥[7]

२२] प्रसादाद् भगवान् प्रीतश्चतुरङ्गं बलं ददौ । [२४

ततो भग्ना नृपतयः प्रतिजग्मुर्महामुने ॥ २१ ॥[8]

२३] अल्पवीर्यबलोत्साहा अल्पसत्त्वाभिमानिनः ।[9] [२५

तदेतन् मुनिशार्दूल दिव्यं[10] परमभास्वरम्[11] ॥ २२ ॥

---

१. रा—संहितान् ।

२. ल—सर्वांस्तांस्तथाख्यातवानहम् ।
  भ—सर्वांस्तान्प्रत्याख्यातवानहं ।

३. ल भ—ततः परमकोपात्ते ।

४. ज ल भ—राजानः सुमहाबलाः ।

५. ल भ—अतःपरमधिकःपाठः—
  अरुन्धन्मिथिलां सर्वे वीर्यसंदेहमागताः ।
  आत्मानमवधूतं ते विज्ञाय मुनिपुंगव ॥

६. ल—ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः ।
  भ— „ संवत्सरः पूर्णः „ „ „

७. ल भ—साधनानि मुनिश्रेष्ठ ततोहं भृशदुःखितः ।
  ततो देवगणाः सर्वे तपसा मे प्रसादिताः ॥

८. ल भ—प्रददुस्ते च सुप्रीताश्चतुरंगं बलं मम ।
  ततो नृपतयो भीता वध्यमाना ययुर्दिशः ॥

९. ल—अवीर्या वीर्यसंदिष्टा निःसत्वाः पापकारिणः ।
  ······अवीर्यसंदिग्धाः निसत्वाः पापचारिणः ॥

१०. ल. भ—धनुः ।

११. कै—०भासुरम् ।

२४] दर्शयाम्यद्य रामाय लक्ष्मणाय च कार्मुकम् ।[1] [२६
कुर्यादारोपणं रामो धनुषश्चास्य चेदयम् ॥[2]
२५] ददाम्ययोनिजामस्मै सीतां दशरथस्नुषाम् ॥ २३ ॥ [२७

इत्यार्षे रामायणे बालकाण्डे जनकवाक्यं
नाम द्विषष्टितमः सर्गः ॥६२॥

१. ल भ—नास्ति ।
२. ल भ—यदि त्वारोपयं कुर्याद्रामोस्य धनुषः स्वयं ।
३. ल भ—सुतामयोनिजां सीतां दद्यां ।
४. के रा—नामाष्टषष्टितमः । अ—नाम चतुःपंचाशत्तमः ।
५. ल भ—सर्गसमाप्तिर्न दृश्यते ।

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ।
१] धनुर्दर्शय रामाय त[1]दिति प्राब्रवीन्नृपम् ॥ १ ॥[2] [१
सुरोप[3]मस्तु जनकः सोऽमात्यां[4]नादिदेश ह ।
२] रामसन्दर्शनार्थं तद्धनुरानीयं[5]तामिति ॥ [6]२ ॥ [२
जनकेन समादिष्टाः प्रविश्य सँचिवाः पुरीम्[7] ।
३] धनुरानाययामासुः पुरुषैराप्तकारिभिः ॥ ३ ॥[8] [३
पुरुषाणां शतान्यष्टौ व्यापृतानां महौजसाम् ।[9]
४] मञ्जूषामष्टचक्रां तां गुर्वीमूहुः कथञ्चन ॥ [10]४ ॥ [४
समानीय[11] [12]च मञ्जूषामायसीं य[13]त्र तद्धनुः ।

---

१. ब—तदेतत्

२. ल भ—श्लोकस्यास्यादावयमित्थं पाठः—
पौरुषं ह्यभिरूपं हि शंखे क्षीरमिवार्पितम् ।

३. भ—सुरोपमोथ ।

४. ल—सोमात्यां व्यादिदेश । भ—सोमात्याम्व्या० ।

५. ज—०रादीयतामिति ।

६. ल भ—धनुरानीयतां दिव्यं रामलक्ष्मणयोरिति ।
यत्तद्बलपरीक्षार्थं सर्वेषां पृथिवीक्षिताम् ॥

७. ल भ—मिथिलां ।

८. ल—तद्धनुर्वै पुरस्कृत्य निर्जग्मुः पार्थिवालयम् ।
भ— ,, ,, ,, पार्थिवालयात् ॥

९. ल भ—शतानि पंच पुंसां तु व्यायतानां महात्मनां ।

१०. ल—मंजूषामष्टचक्राः वामूहुः कृच्छ्रात्कथंचन ।
भ— ,, चक्रां कामूहुः ,,

११. ल—तमानीय । भ तामानीय ।

१२. ल भ—तु ।

१३. ज ल भ—तत्र ।

५] सुरोपमं तु जनकं[1] तमूचुरिति मन्त्रिणः ॥ ५ ॥ [५
तदेतद्[2] धनुरानीतमाज्ञया ते नराधिप ।
६] दर्शयैतद्देवरस्य राघवस्य च भास्वरम्[3] ॥६॥ [६
तेषामेतदुपश्रुत्य जनकः प्रश्रितं वचः ।[5]
७] विश्वामित्रमुवाचेदं[6] तौ चोभौ रामलक्ष्मणौ ॥७॥ [७
ब्रह्मन् धनुरुपानीतं[7] यत् तु तिष्ठति नो गृहे ।[8]
८] राजभिर्यन् न शकितमुद्धर्तुमपि सारवत् ॥[9]८॥ [८
नैतत् पूरयितुं शक्ताः सेन्द्राः सुरगणा अपि ।[10]
९] न यक्षोरगरक्षांसि देवदेवादृते शिवात् ॥[11]९॥ [९

---

१. ल भ—जनकमूचुस्ते नृपमंत्रिणः ।
२. ज—तद्वेतद् ।
३. कै—भासुरम् ।
४. ल—इदं धनुर्धरं राजन्सर्वलोकेषु पूजितम् ।
भ—„ धनुर्वरं „ „ ।
ल—मिथिलैश्च महाभाग दर्शयैतन्महामुनेः ।
भ—मैथिलेय महाभाग „ ।
५. ल भ—तेषां तद्वचनं श्रुत्वा कृतांजलिरुवाच ह ।
६. ल भ—विश्वामित्रं तदा राजा ।
७. कै—धनुरुपानीयं ।
८. ल—इदं धनुर्धरं ब्रह्मं जनकेनाभिपूजितम् ।
भ—„ इदं धनुर्वरं दिव्यं जनकैरभिपूजितम् ।
९. ल—राजभिः सुमहावीर्यैरशक्यं तोलने तदा ।
भ— „ „ रशक्तैः पूरणे तदा ।
१०. ल भ—नेदं सुरगणैः शक्यमसुरैर्वा महामुने ।
११. ल भ—गन्धर्वयक्षप्रवरैः साकिन्नरमहोरगैः ।
एकैको वा समस्ता वा शक्ता मतिमतां वर ।
सज्यं कर्तुं मुनिश्रेष्ठ कुत एव तु मानुषाः ।

न शक्तिर्मानुषाणां तु धनुषोऽस्य प्रपूरणे ।
१०] कुत एव हि सन्धाने शक्ति र्वा स्याद्धि कर्षणे ॥१०॥[1] [१०
११] इदं मम धनुर्दिव्यं तत्रानायितमाज्ञया ।[2]
विश्वामित्रस्तु धर्मात्मा श्रुत्वा जनकभाषितम् ॥११॥[3] [११
१२] अभ्यभाषत[4] काकुत्स्थं प्रहृष्टेनान्तरात्मना ।
गृहाणैतन्[5] महाबाहो यत्नमातिष्ठ[6] राघव ॥१२॥[7] [N
१३] वत्स राम धनुर्दिव्यमिदं पश्येत्युवाच ह ।[8] [१२
मुनेस्तु वचनाद्[9] रामो यत्र तिष्ठति तद्धनुः ॥१३॥[10]
१४] मञ्जूषां तां समाश्रित्य विश्वामित्रमभाषत । [१३

---

१. ल भ अगतिर्मानुषाणां हि धनुषोस्य प्रपूरणे ।
ल—आरोपणे समायोगे वेदने तोलनेपि वा ।
भ— ,, ,, वेधने तोलने तथा ।

२. रा—तत्रानयितमाज्ञया ।

३. ल भ—तदेतद्धनुषां श्रेष्ठमानीतं मुनिगौरवात् ।
दर्शयैतन्महाभाग त्वनयो राजपुत्रयोः ।

४. रा—अभ्यभाषित ।

५. ल भ—गृहाणेदं ।

६. ल भ—दिव्यं धनुरनुत्तमम् ।

७. अतः परमाधिकः पाठः—
ल—धारणे कर्षणे वास्य* यत्नमातिष्ट राघव ।

८. ल—वत‡ राम धनुः पश्येस्येवं राघवमब्रवीत् ।

९. ल भ—वचनं श्रुत्वा ।

१०. ल—मंजूषां तामुपाश्रित्य दृष्ट्वा च धनुरब्रवीत् ।
भ— ,, समुपाश्रित्य ,, तद्धनुरब्रवीत् ।

---

* भ—चास्य ।

‡ भ—वत्स ।

इदं धनुरहं[1] दिव्यं तोलयिष्यामि[2] पाणिना ॥ १४ ॥[१४
१५] यत्नवांश्च[3] भविष्यामि सज्जोऽस्म्यस्य विकर्षणे[4] ।
बाढमित्येव तं राजा मुनिश्च समभाषत ॥ १५ ॥ [१५
१६] सलीलमिव तं[5] रामस्तोलयित्वैकपाणिना ।
पश्यतामभितस्तत्र सदस्यानां समन्ततः ॥[6] १६ ॥ [१६
१७] आनम्य नातियत्नेन सज्यं चक्रे हसन्निव ।[7]
सज्यं कृत्वा ततश्चैतत् पूरयामास वीर्यवान् ॥१७॥[8] [१७
१८] पूर्यमाणं बभञ्जाथ मध्ये रामबलाद् धनुः ।
तस्य शब्दो महानासीद् गिरेरिव विदीर्यतः ॥१८॥[10] [१८पू
१९] वज्रस्येव विमुक्तस्य शक्रेण[11] नगमूर्धनि ।[12] [N

---

१. ल—धनुर्धरं । भ—धनुर्वरं ।

२. ल—सम्प्रक्ष्याम्यद्य । भ—संस्पृक्ष्याम्यद्य ।

३. भ—यत्नवांस्तु ।

४. ल भ—तोलने पूरणे तथा ।

५. ज—तद्रामस्तोल० ।
ल भ—तद्रामो जग्राह वचनान्मुने: ।

६. ल भ—पश्यतां च सहस्राणां बहूनां रघुनंदन (भ-०नंदनः ।)।

७. भ—आरोपयन् स धर्मात्मा सलीलमरिसूदनः ।

८. ज—०धनुश्चैतत् । ल भ—आरोप्य च महाबाहुः ।

९. कै—अतः परमधिकः पाठः—
बभंज पूरयंश्चैतन्मध्ये रामो बलादिव ।

१०. ल भ—बभंज च नरश्रेष्ठ धनुर्मध्ये महायशाः ।
तस्य शब्दोऽभवद्भीमो निर्घातसमनिःस्वनः ॥

११. रा—शक्रेन ।

१२. ल—भूमिश्चचकम्पे सुमहां दीर्यमाणो गिरीरिव ।
भ—भूमिश्चकंपे सुमहान्दीर्यमाणो गिराविव ।

निपेतुस्तेन शब्देन सर्वशो मोहिता जनाः ॥[1]१९ ॥
२०] विश्वामित्रं वर्जयित्वा राजानं तौ च राघवौ ।[2] [१९
प्रत्याश्वस्ते जने तस्मिन् राजा विस्मयमागतः ॥ २० ॥
२१] उवाच प्राञ्जलिर्वाक्यं विश्वामित्रमिदं तदा । [२०
भगवन् श्रुतपूर्वो मे रामो दशरथात्मजः ॥ २१ ॥
२२] अत्यद्भुतमिदं कर्म स चायं कर्तुमर्हति ।[7] [२१
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ॥ २२ ॥
२३] सीता भर्तारमासाद्य रामं दशरथात्मजम् । [२२
वीर्यशुल्का प्रदाने मे प्रतिज्ञा सफलीकृता ॥[9]२३ ॥
२४] सीतां दास्यामि रामाय प्राणेभ्योऽपि प्रियामहम् ।[10] [२३
भवतोऽनुमते तस्मादितो यान्तु महामुने ॥[11]२४ ॥

---

१. ल भ—निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।

२. ल—विज्ञायि* च मुनिवरं राजानं तौ च राघवौ ।

३. ल भ—विगतसाध्वसः ।

४. ज—० तथा । ल—वाक्यज्ञो नरपुंगवः ।
भ—वाक्यज्ञो मुनिपुंगवं ।

५. ल भ—श्रुतपूर्वं ।

६. कैं—अत्युद्भुत० ।

७. ल—अत्यद्भुतमाचिन्त्यं च ह्यतर्कितमिदं× मया ।

८. भ—सुतां ।

९. ल—न मे सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ।
म—मम ,, ,, ,, ,,

१०. ल भ—सीता प्राणैर्बहुमता देया रामाय मे सुता ।

११. ल—भवतोनुमता ब्रह्मं शीघ्रं गच्छन्तु मंत्रिणः ।
भ—भवतोनुमते ब्रह्मान् ,, ,, ,,

---

*भ—वर्जयित्वा ।

×भ—अतर्कितमिदं ।

२५] दूता ममाज्ञया शीघ्रा[1] अयोध्यां जवनैर्हयैः ।[2] [२४
विज्ञाप्य चैव राजानमानयन्तु पुरं मम ॥[3]२५ ॥
२६] प्रदानं वीर्यशुल्कायाः सीतायाः कथयन्तु चैव[4] । [२५
त्वया[5] गुप्तौ च काकुत्स्थौ वेदयन्तु[6] नृपाय वै[7] ॥२६॥
२७] एभिः प्रह्लादितं वाक्यैरानयन्त्विह तं नृपम् ।[8] [२६
कौशिकेन तथेत्युक्तो[9] राजा भृत्यानुपस्थितान्[10] ॥२७॥
२८] अयोध्यां प्रेषयामास स हि राजा त्वराऽन्वितः[11] । [२७

इत्यार्षे रामायणे बालकाण्डे[12] धनुर्भङ्गो नाम
त्रिषष्टितमः सर्गः[13] ॥६३॥[14]

---

१. ज—शीघ्रमयोध्यां । ब—शीघ्रा अवध्या ।
२. ल भ—मम कौशिक भद्रं ते त्वयोध्यां त्वरिता रथैः ।
३. ल—राजानं प्रश्रितैर्वाक्यैरानयंतु परं मम ।
भ— ,, ,, पुरं मम ।
४. ल भ—कथयंतु च सर्वशः ।
५. ल भ—मुनि० ।
६. रा—देवयन्तु ।
७. ल—च नित्यशः । भ—नृपाय तु ।
८. ल—आनयंतु च राजानं स्वालयं मम चानुगाः ।
भ—प्रीयमाणं तु राजानमायंत्वाशु शीघ्रगाः ।
९. ल—त्युक्त्वा ।
१०. ल भ—ह्याभाष्य मंत्रिणः ।
११. ल भ—धर्मात्मा मुनिशासनात् ।
१२. के ब—आदिकांडे ।
१३. के--ऊनसप्ततितमोध्यायः ।
रा—ऊनसप्ततितमो सर्गः ।
ज--पंचपंचाशत्तमः सर्गः । ब भ—सर्गः ।
१४. ल—सर्गसमाप्तिर्न दृश्यते ।

जनकेन समादिष्टा दूतास्ते श्रान्तवाहनाः।
१] मार्गे त्रिरात्रमुषिता अयोध्यां प्राविशन् पुरीम् ॥१॥ [१
ते राज्ञो विदिता दूता राजवेश्मप्रवेशिताः।
२] ददृशुस्तं महात्मानं तत्राथ नृपसत्तमम् ॥२॥ [३
दृष्ट्वैव तं च प्रणताः कृताञ्जलिपुटास्ततः।
५] ऊचुर्दशरथं वाक्यमिदं प्रियनिवेदिनः ॥३॥ [४
वैदेहो जनको राजा पृच्छति त्वां नराधिप।

---

१. अतः पूर्वमित्थं पाठः—
ल—यथा च क्षत्समाख्यातुमानेतुं च नृपं तदा।
भ— „ च तत्समा० „ „ „ „ ।
२. ल भ—शीघ्रवाहनाः।
३. ल भ—त्रिरात्रमुषिता मार्गे तेयोध्यां।
४. ल भ—राजवचनाद्।
५. ल—ददृशुर्देवसंकाशैर्वशिष्टाद्यैश्च मन्त्रिभिः।
भ—ददृशुर्देवसंकाशं वृद्धं दशरथं नृपं।
६. भ—अतः परमाधिकः पाठः—
शश्वत्प्रजाः प्रशासंतं धर्मज्ञैः सचिवैर्वृतं।
ऋत्विग्भिर्देवसंकाशैर्वसिष्ठाद्यैश्च मन्त्रिभिः।
७. ल—आश्वास्यमानं सुप्रीतैः शक्रमांगिरसैरिव।
भ—आशास्यमानं „ „ ।
ल भ—तं लोकपालप्रतिमं लोकपालं सुनिश्चितं।
बद्धांजलिपुटाः सर्वे दूता विगतसाध्वसाः।
ल—राजानं प्रयता वाक्यं मधुरं मधुराक्षरम्।
भ— „ „ „ वाक्यमब्रुवन् „ ।
८. ल—मैथिलो जनको राजन्सोग्निहोत्रपुरस्कृतः।

६] कुशलानामयं स्निग्धः[1] संसत्या सपुरोहितम् ॥[2]४॥ [५
मुहुर्मुहुर्मधुरया स्नेहसंसक्तया[3] गिरा।
७] जनकस्त्वां[4] महाराज पृच्छति त्वामनामयम् ॥[5]५॥ [६
पृष्ट्वा कुशलमव्यग्रो[6] वैदेहो मिथिलाधिपः ।
७] कौशिकानुमते[7] वाक्यं वाक्यज्ञस्त्वाऽब्रवीदिदम्[8] ॥६॥ [७
सुता मे वीर्यशुल्केति प्रख्याता[9] विदिता च ते ।[10]
८] राजभिर्हीनवीर्यैश्च पुराऽपि प्रथिता तथा ॥[11]७॥ [८
सेयं मम सुता राजन् विश्वामित्रस्य शासनात् ।
९] पुरीमिमां समागत्य तव पुत्रेण निर्जिता ॥८॥[12] [९
आनम्य[13] च धनुर्दिव्यं[13] मध्ये भग्नं महात्मना ।
१०] रामेण[14] बलमाश्रित्य[15] महत्यां जनसंसदि ॥९॥ [१०

---

१. रा—स्निग्धा ।

२. ल भ—कुशलं चाव्ययं चैव सोपाध्यायपुरोहितः ।

३. रा—०संसिक्तया । ल भ—०संपृक्तया ।

४. ज—जनकस्त्वामहं राज ।

५. ल भ—नृपतिस्त्वां महाराज राजानं परिपृच्छति ।

६. रा—कुशलमावृतो ।

७. ल भ—०नुमतो ।

८. ज—०ज्ञस्त्वब्रवीदिदं । ल भ—वाक्यज्ञ इदमब्र० ।

९. ज—प्रख्यातं ।

१०. ल—विहिता ते प्रतिज्ञा वै वीर्यशुल्का ममात्मजा ।
भ—विदिता ते प्रतिज्ञैषा वीर्यशुल्का ,,

११. ल भ—राजभिर्यो न विजिता निर्वीर्यैर्विमुखीकृतैः ।

१२. ल भ—तामिमां मत्सुतां राजन्विश्वामित्रपुरःसरः ।
यदृच्छया गतो वीरोत्तव निर्जितवां सुतः ।

१३. ल भ—तच्च दिव्यं धनुः श्रीमन् ।

१४. ल भ—राघवेण ।

१५. ल—महातेजो । भ—महाराजन् । पुनः कृतः ।

तस्मै सीता मया देया वीर्यशुल्का सुताय ते[१] ।
११] प्रतिज्ञां[२] तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥१०॥ [११
सोपाध्यायः सस्वजनः सवर्गः[३] सपदानुगः ।
१२] शीघ्रमर्हसि राजर्षे त्वमागन्तुमिह प्रभो ॥११॥[४] [१२
प्रीतिं च मम राजेन्द्र संवर्धयितुमर्हसि ।
१३] उभयोः पुत्रयोश्चैव वध्वौ ते कल्पिते मया ॥१२॥[५] [१३
इति त्वां जनको राजा विज्ञापयति पार्थिव ।[६]
१४] विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥१३॥ [१४
इति तेषां[७] वचः श्रुत्वा राजा परमहर्षितः[८] ।
१५] उवाचैवं वसिष्ठादीन् सर्वानेव पुरोधसः ॥[९]१४॥[१०] [१५
गुप्तः[११] कुशिकपुत्रेण कौसल्या[१२]ऽऽनन्दवर्धनः ।
१६] लक्ष्मणेन सह भ्राता[१३] स विदेहेषु तिष्ठति ॥१५॥ [१६

---

१. ल भ—महाद्युते ।
२. ज—प्रतिज्ञातं तु मिच्छामि ।
३. ज—सवेगः ।
४. ल भ—नास्ति ।
५. ल भ—पुत्रयोरुभयोरेवं प्रीतिं समुपलप्स्यसि ।
६. ल—एवं विदेहाधिपतिर्वाक्यं मधुरमब्रवीत् ।
भ—नास्ति ।
७. ल भ—दूतवचः ।
८. ल—परमाविस्मितः ।
९. ल भ—सोपाध्ययश्च राजेंद्रः पुरस्कृत्य पुरोहितं ।
वसिष्ठं वामदेवं च मन्त्रिणोन्यांश्च सोब्रवीत् ।
१०. भ—एवं विदेहाधिपतिर्वाक्यं मधुरमब्रवीत् ।
११. ल—गुप्तं ।
१२. भ—कौशल्या० ।
१३. ज ल—भ्राता ।

[1]दृष्टवीर्ये च काकुत्स्थे जनकः सुमहायशाः ।
१७] स संप्रदानं सीताया रामं कर्तुं किलेच्छति ॥[2]१६॥ [१७
यदि वो रोचते [3]ब्रह्मन् जनकः स मही[3]पतिः ।
१८] [4]संबन्धे तत्र गच्छामस्ततः शीघ्रमितो वयम् ॥[5]१७॥ [१८
बाढमित्येव तच्छ्रुत्वा वसिष्ठप्रमुखा द्विजाः ।[6]
१९] ऊचुः परमसंहृष्टाः श्वः प्रयास्याम इत्यपि ॥[7]१८॥ [१९
ते चापि रजनीं तत्र दूताः परमसत्कृताः ।[8]
२०] ऊषुर्[9]विदेहराजस्य सर्वकामैः प्रपूजिताः ॥१९॥ [२०

इत्यार्षे रामायणे बालकाण्डे जनकदू[10]तवाक्यं नाम
चतुःषष्टि[11]तमः सर्गः ॥६४॥

---

१. ल—दृष्टमात्रं । भ—दृष्टमात्रे ।
२. ल भ—संप्रदानं सुतायाश्च राघवे कर्तुमिच्छति ।
३. ल भ—वृत्तं जनकस्य महात्मनः ।
४. के ज ब—संबन्धी ।
५. ल भ—गच्छामस्तां पुरीं शीघ्रं मा भूत्कालस्य पर्ययः ।
६. ल—मन्त्रिणो बाढमित्याहुः सह सर्वैः महर्षिभिः ।
भ— „ बाढमित्यूचुः „ सर्वैर्मनीषिभिः ।
७. ल भ—प्रीतश्चाप्यभवद्राजा श्वो भूत इति चाब्रवीत् ।
८. ल भ—मन्त्रिणो जनकस्यापि रात्रिं परमसत्कृताः ।
९. के—व्यूषुर्वि० । ल भ—ऊषुः प्रमुदितास्तत्र ।
१०. ल भ—दूतवाक्यं ।
११. के रा—सप्ततितमः । ज—षट्पंचाशत्तमः ।
ब ल भ—नास्ति ।

तस्यां[1] रात्रौ[2] व्यतीतायां सोपाध्यायो नराधिपः ।
१] राजा दशरथः[3] श्रीमान् सुमन्त्रमिदमब्रवीत् ॥१॥ [१
अद्य सर्वे धनाध्यक्षा धनमादाय[4] पुष्कलम् ।
२] निर्यान्त्वग्रे समारोप्य नानारत्नचयान् मम ॥[5] २ ॥ [२
चतुरङ्गं च मे[6] सर्वं[7] बलं निर्यातु[8] सर्वशः ।[9]
३] ममाज्ञासमकालं च युज्यतां[10] युग्यमुत्तमम् ॥ ३ ॥ [३
वसिष्ठो वामदेवश्च जाबालिः[11] कश्यपो भृगुः ।
४] मार्कण्डेयश्च[12] दीर्घायुर्मुनिः कात्यायनस्तथा ॥ ४ ॥ [४
एते द्विजाः प्रयान्त्वग्रे स्यन्दनैः[13] सहिता मया ।

---

१. ल भ—अथ ।

२. ज ल भ—रात्र्यां ।

३. ल भ—दशरथो हृष्टः ।

४. कै—धनमाधाय ।

५. ल—व्रजंत्यग्रे सुविहिता नानारत्नसमन्विताः ।
 भ—व्रजंत्वग्रे " "

६. रा—ते ।

७. ज—शीघ्रं ।

८. ब—निर्यान्तु ।

९. ल भ—चतुरंगं बलं चापि शीघ्रं निर्यातु सर्वशः ।

१०. ल—यातु युग्यमनुत्तमम् । भ—यानयुग्यमनुत्तमं ।

११. रा—शयोगुरुः । ल—जावालिरथ काश्यपः ।
 भ—जाबालिरथ काश्यपः ।

१२. कै ब—मार्कांडेयश्च । रा—पुनः शोधनेन मूलसंगतः ।

१३. ल भ—स्यंदनं योजयाशु मे ।

५] यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति माम्॥५॥ [५
ईत्याकर्ण्य नरेन्द्रस्य सेना सा चतुरङ्गिणी।
६] राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वगात्॥ ६ ॥ [७
चतुर्भिस्तानहोरात्रैर्विदेहानुपजग्मिवान्।
७] ददर्श मिथिलां रम्यां जनकेनोपशोभिताम्॥ ७ ॥
८पू] प्रत्युद्गम्याथ जनकस्तेषां पूजामकल्पयत्।[6] [८
N] स तं राजानमासाद्य वृद्धं दशरथं नृपम्॥ ८॥
८उ] उवाच जनकः प्रीतः शतानन्दसमन्वितः।[9] [९
स्वागतं ते महाराज दिष्ट्या प्राप्तोऽसि मे[10] गृहम्॥९॥
९] पुत्रयोरुभयोः[11] प्रीतिं दिष्ट्या प्राप्स्यसि राघव। [१०

---

१. ल भ—वचनात्तु।

२. ल भ—निर्ययौ।

३. ल भ—पृष्ठतोन्वयात्।

४. ल—०वैदेहानभ्युपेयिवान्।
भ—०विदेहानभ्युपेयिवान्।

५. ब—जनकस्तेजा

६. ल भ—नास्ति।

७. रा—समं। ल भ—ततो।

८. ल—तदा।

९. ल भ—जनको मुदितो राजा प्रहर्षं परमं ययौ।
उवाच च नरश्रेष्ठो नरश्रेष्ठं मुदान्वितः।
जनकः श्लक्ष्णया वाचा वृद्धं दशरथं नृपं।

१०. ल भ—राघव।

११. ल भ—प्रीतिः प्राप्यतां वीर्यनिर्जिता।

दिष्ट्या प्राप्तो महाराज[1] वसिष्ठो भगवानयम्[2] ॥१०॥[3]

१०] मार्कण्डेयादयश्चैव[4] दिष्ट्या प्राप्ता महर्षयः ।[5] [११

दिष्ट्या मे[6] निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम् ॥११॥

११] राघवैः सह संबन्धं कृत्वा प्रार्थितसद्गुणैः । [१२

अद्य मे सफलं जन्म प्राप्तं चाद्य क्रियाफलम् ॥१२॥[7] [N

१२] अद्य पूतोऽस्मि राजर्षे त्वत्संबन्धात् सबान्धवः ।

अमीषां च महर्षीणामद्याभ्यागमनादहम् ॥ १३ ॥[8] [N

१३] सविशेषतरं पूतो राजन्नाप्यायितस्त्वया ।[9] [N

श्वः प्रभाते महाराज निवर्तयितुमर्हसि[10] ॥ १४ ॥

१४] यज्ञस्यावभृथे पुण्यमुद्वाहमृषिभिः सह ।[11] [१३

तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा[12] ॥[13]१५ ॥

---

१. ल भ—महातेजा ।

२. ल भ—भगवानृषिः ।

३. के—दशमश्लोके एकादशश्लोके चेत्थं पाठः—

पुत्रयोरुभयोः प्रीतिं दिष्ट्या मे पूजितं कुलम् ।

४. ब—मार्काण्डेयादय० ।

५. ल भ—सह सर्वैर्द्विजगणैर्देवैरिव शतक्रतुः ।

६. ल—संनिर्जिता ।

७. ल—राघवै सह संबन्धाद्वीर्यश्रेष्ठैर्महाबलैः ।

भ—राघवैः ,, संबंधाद्वीर्यश्रेष्ठैर्महाबलै ।

८. कै रा—०मघाभ्यागमना० ।

९. ल भ—नास्ति ।

१०. ल—निवापयतु । भ—निवर्तयितुमर्हषि ।

११. ल—यज्ञस्यांते महाराज विवाहमृषिसंमतं ।

भ— ,, ,, ,, सम्मितं ।

१२. ज—दशरथस्तथा ।

१३. ल भ—ततस्तद्वचनं श्रुत्वा मुनिमध्ये नराधिपः ।

१५] ऋषिमध्य उवाचैवं जनकं मिथिलाधिपम् ।[3] [१४
राजन् प्रतिग्रहीतारः स्मृता दातृवंशाः किल ॥१६॥[6] [N
१६] यद् वक्ष्यसि यदा चैवं तत्कर्तारस्तदा वयम् ।
श्लक्ष्णं चैवानुरूपं च वचनं प्रियवादिनः ॥[10] १७ ॥ [N
१७] तद् राज्ञो जनकः श्रुत्वा परं विस्मयमागतः ।[12] [१६
ततः सर्वे मुनिगणाः परस्परसमागमे ॥ १८ ॥
१८] हर्षमेत्य परं तत्र निशां तामवसंस्तदा ।[13] [१७
कथयन्तः कथा हृद्याः पुण्यश्रवणकीर्तनाः ॥[14] १९ ॥
१९] परस्परप्रभावज्ञाः पूजयन्तः परस्परम् । [N
विश्वामित्रं च दृष्ट्वैव राजा दशरथस्तदा ॥ २० ॥ [N

---

१. ज—ऋषिमध्ये ।
२. के—मिथिलं जनकाधिपम् ।
३. ल भ—वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिः ।
४. रा ज—प्रतिगृहीतारः ।
५. ब—दातृवशात् ।
६. ल—प्रतिग्रहो दातृवशः श्रुतमेतत्पुरा मया ।
भ— ,, ,, ,, ममया पुरा ।
७. ल भ—यथा ।
८. ल—धर्मज्ञ । भ—धर्म्मज्ञ ।
९. ज—तत्कारश्च तदा । ल भ—तत्करिष्यामहे ।
१०. ल—तद्धर्मिष्टं च वचनं वरिष्टं सत्यवादिनः ।
भ—तद्धर्मिष्टं वरिष्ठं च वचनं सत्यवादिनः ।
११. ज ल—तद्राज्ञे ।
१२. ल—श्रुत्वा विदेहाधिपतिः परं विस्मयमागमत् ।
भ— ,, ,, ,, विस्मयमागतः ।
१३. ल भ—नास्ति ।
१४. ल भ—कथयंतः कथां दिव्यां हृद्यां श्रोत्रसुखावहाम् ।
१५. ल भ—तु ।

२०] शिरसा प्रणतः प्रीत्या[1] ववन्दे हृष्टमानसः ।
भवन्तं नाथमासाद्य पावितोऽस्मीति चाब्रवीत्[2] ॥२१॥ [N
२१] विश्वामित्रोऽपि चैवैनं प्रीतिमानिदमब्रवीत् ।
पूत[3] एवासि राजर्षे त्वमेतैः[4] कर्मभिः शुभैः ॥२२॥ [N
२२] अनेन चापि पुत्रेण रामेणाक्लिष्टकर्मणा[5] ।
पूतोऽसि श्लाघनीयश्च[6] देवानामपि सम्मतः[7] ॥२३॥ [N
२३] एष ते नृपते पुत्रो रामो निर्यातितो मया ।
लक्ष्मणेन सह भ्रात्रा[8] कुशली रघुनन्दन ॥२४॥ [N
२४] इत्युक्तो मुमुदे राजा विश्वामित्रेण धीमता ।
तौ चापि पुत्रावाघ्राय परिष्वज्य च पीडितः[9] ॥२५॥[10] [N
२५] उवास स निशां तत्र सुसुखी[11] हृष्टमानसः ।[12]

---

१. ल भ—प्रणतो भूत्वा ।

२. ल—पूर्वतोस्मि च तेजसा ।
भ—पूतोस्मि तव तेजसा ।

३. ल—पूर्व ।

४. ल—सुकृतै । भ—स्वकृतैः ।

५. ल भ—रामेणामिततेजसा ।

६. ल भ—श्लाघनीयोसि ।

७. ल भ—संगमे ।

८. ज ल—भ्राता ।

९. ल भ—निर्पीडितौ ।

१०. अतः परमाधिकः पाठः—
ल—हर्षेण महताविष्टस्तां निशामनयच्चिवाम् ।
भ— ,, ,, निशामवतस्थिवान् ।
ल—स तैः पुत्रैः परिवृतो निशां परमहर्षितैः ।
भ—,, ,, ,, ,, ,, परमहर्षितः ।

११. रा—ससुखी ।

१२. ल भ—स ह्यवास भृशं प्रीतो जनकेन सुपूजितः ।

जनकोऽपि तदा राजा क्रिया[2] धर्मेण धर्मवित्
२९] कृत्वा यज्ञोचिताः सर्वास्तां रात्रिमवसत् सुखम् ॥[3]२९॥ [२०

इत्यार्षे रामायणे बालकाण्डे दशरथसमागमो नाम[4]
पञ्चषष्टितमः सर्गः ॥६५॥[5]

१. रा—ततो० । ल भ—महातेजाः ।

२. भ—क्रियां ।

३. ल—यज्ञश्च सुतयोश्चैव कृत्वा रात्रिमुवास ह ।
भ—यज्ञस्य " " " ।
ल भ—रामजामातरं लब्ध्वा हृष्टः परमधार्मिक ।

४. कै रा—नामैकसप्ततितमः ।
ज—नाम सप्तपंचाशत्तमः । व—नाम ।

५. ल भ—सर्गसमाप्तिर्न दृश्यते ।

ततः प्रभाते जनकः कृतपूर्वाह्णिकक्रियः ।[1]
१] उवाच मधुरं वाक्यं[2] शतानन्दं[3] पुरोधसम्[4] ॥ १ ॥ [१
भ्राता ममानुजः श्रीमान् वीर्यवानाज्ञया मम ।[5]
२] कुशध्वज इति ख्यातो योऽध्यास्ते नगरं शुभम् ॥२॥ [२
[6]चर्याट्टालकपर्यन्तं पिबन्निक्षुमतीं नदीम् ।
३] सांकाश्यं दिव्यसांकाश्यं[7] विमानमिव पुष्पकम् ॥३॥ [३
तमहं द्रष्टुमिच्छामि नानार्थो[8] हि स मे मतः ।
४] प्रीयते हि महासत्त्वः स मया राजसत्तमः ॥[9]४॥ [४
तस्याथ शासनाद् दूतास्तं गत्वा शीघ्रयायिनः ।[10]
५] आनयामासुरव्यग्रा विष्णुमिन्द्राज्ञया यथा ॥[11]५॥ [६
स तस्य शासनाद् भ्रातुराजगाम कुशध्वजः ।[12]

---

१. ल—कृतकामः महर्षिभिः । भ—कृतकामो महर्षिभिः ।
२. ल भ—वाक्यं वाक्यज्ञः ।
३. भ—शातानंदं ।
४. ज—पुरोहितं ।
५. ल भ—भ्राता मम महातेजा वीर्यवानतिधार्मिकः ।
६. कै भ—चयाज्वालकपर्यंतं ।
७. कै—०सांकाशं । ज ल—दिव्यसंकाशं ।
८. ल भ—यज्ञगोप्तारमेव तु ।
९. ल—प्रीति सोपि महातेजाः प्रीतियुक्तो महायशाः ।
भ—प्रीतः ,, ,, ,, ,,
१०. ल भ—शासनात्ते नरेंद्रस्य प्रयाताः शीघ्रवाहनाः ।
११. ल—आनयामासुरध्वास्ता विष्णुमिंद्राज्ञयेव तं ।
भ— ,, रव्याग्रा ,, ,,
१२. ल भ—आज्ञया तु नरेंद्रस्य आगतः स कुशध्वजः ।

६] ददर्श चोपसृत्याशु[1] जनकं भ्रातृवत्सलम्[2] ॥ ६ ॥ [८
सोऽभिवाद्य शतानन्दं जनकं च महीपतिम् ।[3]
७] अभ्यतिष्ठदनुज्ञातो राजार्हं परमासनम् ॥[4] ७॥ [९
सहोपविष्टौ[5] तौ तत्र प्रेषयामासतुस्तदा ।
८] मन्त्रिश्रेष्ठं समाहूय सुदामानं समाहितौ ॥८॥[6] [१०
गच्छ मन्त्रिवराभ्येत्य शीघ्रं दशरथं नृपम् ।
९] आनयेह सहामात्यं सपुत्रं सपुरोधसम् ॥९॥[7] [११
उपकार्यां[8] स गत्वा तमिक्ष्वाकुकुलनन्दनम् ।
१०] दृष्ट्वा दशरथं प्रह्वः[9] सोऽभिवाद्येदमब्रवीत् ॥१०॥[10] [१२

---

१. रा.—चोपसृत्याश्च । ल भ—च महात्मानं ।

२. ल भ—धर्मवत्सलं ।

३. ल भ—अभिवाद्य महात्मानं शतानंदं सपार्थिवं ।

४. ल—राज्यार्हं परमं दिव्यमध्यारोहत्तदासनम् ।
भ—राजार्हं ,, दिव्यमध्यरोहत्तदासनं ।

५. ज—तत्रैव ।

६. ल भ—उपविष्टौ सुखासीनौ महाभागौ महाबलौ ।
ल—मंत्रिमुख्यं सुदामानं प्रेषयामासतुस्तदा ।
भ—मंत्रिश्रेष्ठं ,, ,,

७. ल भ—आमंत्रयस्व शीघ्रं तमिक्ष्वाकुममितप्रभं ।
आत्मजैः सह दुर्द्धर्षं सोपाध्यायं समंत्रिणम् ॥

८. रा ज—उपकार्यं ।

९. के रा—प्राह्वः ।

१०. ल भ—उपकार्यंकृतं तं तु इक्ष्वाकुकुलनंदनं ।
ल—दृष्ट्वा दशरथं प्राह सोभिवाद्य महामतिः ।
भ— ,, ,, ,, ,, कृतांजलिः ।

अयोध्याऽधिपते देवं वैदेहो मनुजेश्वरः ।[1]
११] त्वां द्रष्टुमिच्छति क्षिप्रं सोपाध्यायं सबान्धवम्॥[2] ११॥ [१३
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ।
१२] सबन्धुरगमत् तत्र यत्र[3] राजा स मैथिलः ॥१२॥ [१४
तमासाद्य[4] च राजानं राजा दशरथस्ततः[5] ।
१३] वाक्यं वाक्यविदां श्रेष्ठो[6] वैदेहमिदमब्रवीत् ॥१३ [१५
विदितं ते यथाऽस्माकमिक्ष्वाकुकुलदैवतम् ।[7]
१४] प्रवक्ता धर्मकार्येषु[8] वसिष्ठो भगवानृषिः ॥१४॥ [१६
विश्वामित्राभ्यनुज्ञातः सर्वैश्चैव महर्षिभिः[9] ।
१५] एष वक्ष्यति नः सर्वं यथाधर्मं[10] यथाक्रमम् ॥१५॥ [१७
तूष्णींभूते दशरथे वसिष्ठो[11] भगवानृषिः[12] ।
१६] उवाचेदं वचो धर्म्यं जनकं सपुरोहितम् ॥[13] १६॥ [१८
आकाशप्रभवो ब्रह्मा शाश्वतो नित्यमव्ययः ।
१७] तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥१७॥ [१९

---

१. ल—वीर विदेहस्त्वां नरेश्वर । भ—वीर वैदेहस्त्वां नरेश्वर ।
२. ल भ—द्रष्टुमिच्छति धर्मेण सोपाध्यायः सबान्धवः ।
३. ल भ—स राजा यत्र ।
४. ल भ—समासाद्य ।
५. ज—०रथस्तदा । ल भ—सोपाध्यायगणैर्वृतम ।
६. ल भ—वै वाक्यकुशलो ।
७. ल भ—विदितोयं यथा राजान्निक्ष्वाकुकुल दैवतम् ।
८. ल—वक्ता सर्वेषु लोकेषु । भ—वक्ता सर्वेषु कालेषु ।
९. ल भ—सर्वैश्च परमार्षिभिः ।
१०. ल—धर्मात्मा यथायोगं । भ—धर्मात्मा यथायोग्यं ।
११. ल—वसिष्ठं ।
१२—ल भ—वाग्विदां वरः ।
१३. ल भ—उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम् ।

मारीचादङ्गिरास्तस्मात् प्रचेतास्तनयोऽभवत् ।[1]
१८] मनु[2] प्रचेतसः[2] पुत्र इक्ष्वाकुस्तु[3] मनोः सुतः[3] ॥१८॥[4] [२०
स इक्ष्वाकुरयोध्यायां राजाऽभूत् प्रथमः पुरि ।
१९] इक्ष्वाकोस्तु सुतः श्रीमान् विकुक्षिरुदपद्यत[5] ॥१९॥ [२१
विकुक्षेस्तु महातेजा बाणः[6] पुत्रो व्यजायत[6] । [२२उ
२०] बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥२०॥[7] [२३पू
अनरण्यात् पृथुर्जज्ञे त्रिशङ्कुश्च[8] पृथोरपि । [२३उ
२१] त्रिशङ्कोरभवत् पुत्रो धुन्धुमारो महायशाः ॥२१॥
धुन्धुमारसुतो राजा युवनाश्वो महाबलः ।
२२] युवनाश्वसुतश्चासीन्मान्धाता पृथिवीपतिः ॥२२॥ [२४
मान्धातुः[9] सुमहातेजाः[9] सुसन्धिः[10] समपद्यत ।
२३] सुसन्धेर्ध्रुवसन्धिश्च[11] द्वितीयश्च[12] प्रसेनजित् ॥२३॥ [२५

---

१. ल भ—मारीचेः कश्यपाज्जज्ञे विवस्वांल्लोकभावनः ।

२. ल भ—मनुर्विवस्वतः ।

३. भ—श्राद्धदेवः प्रतापवान् ।

४. ल—तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ।
   भ—बाणस्य तु महातेजा ,, ,, ।

५. ल भ—विकुक्षिः समपद्यत ।

६. ल—बाणः पुत्रः प्रतापवान् ।
   भ—बाणपुत्रः ,, ।

७. ज—विकुक्षेस्तु महातेजा अनरण्यः प्रतापवान् ।

८. ल भ—त्रिशंकुस्तु ।

९. रा—मांधातुश्च महा० । भ—मांधातुस्तु ।

१०. ब भ—सुगन्धिः ।

११. ल—०सान्धिस्तु । भ—सुगन्धेरूर्द्धसान्धिस्तु ।

१२. ल भ—द्वितियस्तु ।

यशस्वी ध्रुवसन्धेस्तु[1] भरतो नाम वीर्यवान्[2] ।
२४] भरतात् तु महातेजा असितः समजायत ॥२४॥[3] [२६
२५उ] सह तेन गरेणैव ततः स[4] सगरोऽभवत् ।[5] [३७उ
सगरादसमञ्जास्तु अंशुमानसमञ्जसः ॥२५॥[6]
२६] दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः । [३८

---

१. भ—तूर्ध्वसंधेस्तु ।

२. ल भ—नामतः ।

३. भ—अतः परमाधिकः पाठः—

यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ।
हैहयास्तालजंघाश्च शूराश्च शशाबिन्दवः ।
तांस्तु स प्रतियुध्यान्हि युद्धे राजा प्रवासितः ।
हिमवंतमुपागम्य भार्याभ्यां सहितस्तदा ।
असितोल्पको राजा मंत्रिभिः सहितस्तदा ।
द्वे चास्य भार्ये गार्भिण्यौ बभूवतुरिति श्रुतिः ।
एका गर्भविघातार्थं सपत्न्यै सागरं ददौ ।
ततः शैलवरं रम्यं बभूवाभिरतो मुनिः ।
भार्गवश्चावनो नाम हिमवंतमुपाश्रितः ।
तत्र चैका महाभागा भार्गवं देववर्चसं ।
पद्मपत्रविशालाक्षी कांक्षती परमं सुतं ।
तमृषिं साभ्युपागम्य कालिंदी चाभ्यवादयत् ।
स तामभ्यवदद्विप्रो पुत्रेप्सुं पुत्रजन्मनि ।
तव कुक्षौ महाभागे सुपुत्रः संभविष्यति ।
महावीर्यो महातेजा अचिरादुद्भविष्यति ।
गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ।
च्यवनं तु नमस्कृत्य राजपुत्रं व्यजायत ॥

४. भ—तस्मात्स ।

५. ल—महातेन गरेणैव तस्मात्स सुगभोभवत् ।

६. ल भ—सगरस्यासमंजोभूदसमंजसुतोंशुमान् ।

भगीरथात् ककुत्स्थश्च[1] ककुत्स्थाच्च[2] रघुस्तथा[3] ॥२६॥ [३९

२७] रघोस्तु वंशे तेजस्वी प्रवृद्धः[4] पुरुषादकः ।
कल्माषपादो ह्यभवच्छृंखलस्तस्य[5] चात्मजः ॥२७॥ [४०

२८] सुदर्शनः शृंखलस्य अग्निवर्णः सुदर्शनात्[6] ।
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगादभवन्मनुः[7] ॥२८॥

२९] मनोस्तु सुश्रुतो ह्यासीदम्बरीषस्तु सुश्रुतात् ।[8] [४१
अम्बरीषस्य पुत्रोऽभून् नहुषः पृथिवीपतिः ॥२९॥

३०] नहुषस्य[9] ययातिश्च[10] नाभागश्च[11] ययातिजः । [४२
अजो नाभागपुत्रस्तु तस्माद्दशरथोऽभवत् ॥३०॥

३१] राज्ञो दशरथस्यैतौ तनयौ रामलक्ष्मणौ ।[12,13] [४३
आमनोरतिशुद्धानां राज्ञाममिततेजसाम् ॥३१॥ [N

---

१. ल भ—ककुत्स्थस्तु ।

२. ल भ—ककुत्स्थात्तु ।

३. ल—रघुः स्मृतः । भ—रघुः पुनः ।

४. ल भ—विवृद्धः ।

५. ल भ—राजाभूत्खनकस्तस्य ।

६. ल भ—सुदर्शनस्तु खनकादग्निवर्णः ।

७. ल भ—शीघ्रगस्याभवन्मुनिः ।

८. ल भ—मुनेः प्रस्तुकोह्यासीदंबरीषः प्रसुस्तकात् ।

९. ल—नहुषाच्च ।

१०. ल भ—ययातिस्तु ।

११. भ—नाभागस्तु ।

१२. ल—यथागतः ।

१३. ल भ—नृपाद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ।

३२] ककुत्स्थेक्ष्वाकुसगररघुप्रवरजन्मनाम् ।[1]
उदाराचारसत्त्वानां क्षत्रधर्मानुपालिनाम् ॥३२॥[2] [N

३३] कुले जलनिधिप्रख्ये जातयोर्वृत्तशालिनोः ।[3] [N
रामलक्ष्मणयोरर्थे वरयाम्यात्मजे तव ॥३३॥[4] [४५

३४] सदृशाभ्यां तु सदृशे सुते त्वं दातुमर्हसि ।[5][6]
इत्युक्तो जनको राजा कृताञ्जलिरभाषत ॥[7]३४॥ [N

३५] अस्माकमपि राजर्षे कुलं त्वं श्रोतुमर्हसि ।[8]
३६पू] कन्यादाने हि[9] वक्तव्यं कुलं निरवशेषतः ॥३५॥ [N

इत्यार्षे रामायणे बालकाण्डे कुलप्रशंसनं[10] नाम
षट्षष्टितमः[11] सर्गः ॥६६॥[12]

---

१. रा ज—काकुत्स्थे० ।
२. ल भ—नास्ति ।
३. ल भ—कुलवंशानुरूपिण्यौ कुलवंशानुरूपयोः ।
४. ल—वरयोरात्मजे ।
५. ल भ—नरश्रेष्ठ सदृशे ।
६. अतः परमित्थं सर्गसमाप्तिपरः पाठः—
ल—इत्यार्षे रामायणे आदिवंशकीर्तनं नाम सर्गः ।
भ—इत्यार्षे रामायणे वंशकीर्तनो नाम सर्गः ॥५१॥
७. ल भ—एवमुक्तोथ जनकस्तमुवाच कृतांजलिः ।
८. ल भ—श्रोतुमर्हसि धर्मज्ञ कुलं नः शृण्वतां वर ।
९. ल भ—प्रदाने स्वस्य ।
१०. कै—कुलप्रवंशकीर्तनं ।
ज—रघुवंशवर्णनं ।
११. कै—द्विसप्ततितमः । रा—द्विसप्ततितमः ।
ज—अष्टपंचाशत्तमः । ब—नास्ति ।
१२. ल भ—३४ श्लोकस्य पूर्वार्द्धे एव समाप्तः ।

तत आभाष्य जनको वसिष्ठं वदतां वरम् ।
१] नृपं दशरथं चेदं प्रोवाच वचनं तदा ॥१॥[1] [१
राजाऽभूत् त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ।
२] निमिः परमधर्मात्मा सर्वसत्त्ववतां वरः ॥२॥[2] [३
तस्य पुत्रो मिथिर्नाम बभूवानुपमद्युतिः ।
३] तस्यापि जनको नाम जनकस्याप्युदावसुः ॥३॥ [४
उदावसोरभूत् पुत्रः प्रथितो नन्दिवर्धनः ।[7]
४] नन्दिवर्धनतश्चासीत सुकेतुर्नाम पार्थिवः ॥४॥[8] [५
सुकेतोरभवत् पुत्रो देवरातो महाबलः ।
५] देवरातस्य तनयो बृहद्रथ इति श्रुतः ॥५॥[8] [६
बृहद्रथस्य च सुतो महावीर्यः प्रतापवान् ।[9]

---

१. भ—वक्तव्यं कुलजातेन तन्निबोध नरेश्वर ।
ल—नास्ति ।
२. ल—राजाभूस्त्रिषु लोकेषु निमिः परमदुर्लयः ।
३. ल भ—जनितो नेमिपर्वते ।
४. भ—प्रथमो ।
५. ल भ—राजा ।
६. ज—०प्युदोवसुः । ल—जनकात्तु गदावसुः ।
भ—जनकात्तु रुदावसु; ।
७. ल—गदावशोरतु धर्मात्मा महावीर्यो व्यजायत ।
भ—रुदा ,, ,, ,, ,,
८. ल भ—नास्ति ।
९. ल भ—नास्ति ।

६] महावीर्यस्य धृतिमान् सुधृतिश्च[1] ततोऽभवत् ॥६॥ [७
सुधृतेरपि धर्मात्मा धृष्टकेतुः[2] सुतोऽभवत् ।
७] धृष्टकेतोरभूच्चापि हर्यश्वस्तनयस्तथा ॥७[3]॥ [८
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रसिद्धकः[4] ।
८] प्रसिद्धकस्य[5] धर्मात्मा राजा कृतिरथः[6] सुतः ॥७॥ [९
पुत्रः कृतिरथस्यापि[7] देवमीढ[8] इति श्रुतः[9] ।
९] देवमीढस्य[10] विबुधो विबुधस्यापि चान्धकः[11] ॥८॥ [१०
अन्धकस्य सुतश्चासीत् कृतिरात[12] इति श्रुतः ।[13]
१०] कृतिरातस्य[14] च[15] सुतः कृतिरोमा[16] व्यजायत ॥१०॥ [११

---

१. ल भ—सुधृतिस्तस्य चात्मजः ।
२. ल भ—०केतुरजायत ।
३. ल भ—धृष्टकेतोस्तु काकुत्स्थ हर्यश्व इति विश्रुतः ।
४. ल—हर्यश्वस्य महत्पुत्रो महत्पुत्रः प्रतद्धकः ।
भ— „ मरुत्पुत्रो मरुत्पुत्रात्प्रतंवकः ।
५. ल—प्रतद्धकस्य । भ—प्रतंवकस्य ।
६. ज—कृतिरथस्ततः । ल—कीर्तिरथस्तत ।
भ—कीर्तिरथः सुतः ।
७. ल भ—कीर्तिरथस्यापि ।
८. ज—देवमेढ ।
९. भ—श्रुतः ।
१०. ज—देवमेढस्य ।
११. ल भ—विबुधस्य महान्धकः ।
१२. ज—कृतरात ।
१३. ल भ—महांधकसुतो राजा कीर्तिराता महाबलः ।
१४. ल भ—कीर्तिरातस्य ।
१५. ल भ—काकुत्स्थ ।
१६. ज—कृतरोमा । ल भ महारोमा ।

कृतिरोम[1]सुतश्चापि स्वर्णरोमेति विश्रुतः ।[2]
११] स्वर्णरोमोद्भवश्चापि ह्रस्वरोमा सुतो[3] बली ॥[4]११॥ [१२
तस्य[5] पुत्रद्वयं जज्ञे[6] धर्मज्ञस्य महात्मनः ।
१२] ज्येष्ठोऽहमनुजश्चायं[7] भ्राता मम[8] कुशध्वजः ॥१२॥ [१३
मां तु[9] ज्येष्ठं ततो राज्ये ह्यभिषिच्य[10] पिता मम[11] ।
१३] कुशध्वजं यौव[12]राज्ये[13] त्यक्त्वा राज्यं[14] वनं गतः ॥१३॥ [१४
वृद्धे पितरि स्वर्याते ततोऽहं रघुनन्दन ।[15]

---

१. ज—कृतरोमसुतश्चासीत् ।

२. भ—महारोम्णस्तु धर्मात्मा ह्रस्वरोमा व्यजायत ।

ल—नास्ति ।

३. रा व—स्वतो ।

४. ल—सुवर्णरोमा काकुत्स्थ ह्रस्वरोमा व्यजायत ।
भ— ,, ,, ह्रस्वरोम्णो ,, ।

५. ल भ—यस्य ।

६. ल भ—राजन् ।

७. भ—तस्य ज्येष्ठाहमनुजो ।

८. ल भ—भ्राता मम ।

९. भ—नियोज्य सुतं ।

१०. ल भ—विनियुज्य ।

११. ज—पितामह । ल भ—नराधिप ।

१२. ल भ—समावेश्य ।

१३. ल—यौवराज्ये । भ—भ्रातरं मे ।

१४. ज—विना ।

१५. ल भ—गते पितरि तस्मिस्तु स्वर्गमावृत्य तिष्ठति ।

१४] भ्रातरं देवसङ्काशमपश्यं स्वशरीरवत् ॥१४॥
कस्यचित् त्वथ कालस्य सांकाश्यादागतो नृपः ।
१५] सुधन्वा बलवीर्याढ्यो मिथिलामवरोधकः ॥१५॥ [१६
स च मे प्रेषयद् दूतं यदेतत् ते धर्नुर्गृहे ।
१६] तिष्ठत्यभ्यर्चितं दिव्यमेतद् देहीति राघव ॥१६॥ [१७
तस्य प्रदाने धनुषः सोऽयुध्यत मया सह ।
१७] हतश्च स मया राजा सुधन्वा बलगर्वितः ॥१७॥ [१८
निहत्य समरे चाहं सुधन्वानं महीपतिम् ।
१८] सांकाश्ये भ्रातरं शूरमभ्यषिञ्चं कुशध्वजम् ॥१८॥ [१९

---

१. ल भ—०शं पालयामि ।

२. ल भ—कुशध्वजम् ।

३. ब—०संकाशादागतो नृप ।
ल भ—संकाश्यादागमत्पुरात् ।

४. ज—कस्यचित्त्वथ संकाश्यागतो नृपसत्तमः ।

५. कै—स धन्वा । ज—स्वधन्वा ।

६. ल भ—वीर्यवान् राजा ।

७. रा ल भ—प्रेषयत् ।

८. ल भ—शैवं धनुरनुत्तमम् ।

९. ल भ—प्रेषयाशु नरश्रेष्ठ रत्नभूतं ममेत्युत ।

१०. ज—प्रधाने ।

११. ल—तस्याप्रधाने काकुत्स्थ युद्धमासीन्मया सह ।
भ—तस्याप्रदाने । „ „ „ ।

१२. ल भ—प्रमुखो ।

१३. ल भ—मिथिलामवरोधकः ।

१४. ल भ—च नरश्रेष्ठ ।

१५. ल भ—नराधिपं ।

१६. ज भ—संकाश्ये । ल—संकाशे ।

१७. कै—शूरमभृषिं चं । रा—०मभिषिंचं ।
ज—०मभ्यासिञ्च्य ।

कनीयानेष[1] मे भ्राता सत्यस[2]न्धः कुशध्व[2]जः ।
१९] ददानि[3] सहितोऽनेन[4] वध्वौ तेऽहं[5] सुते नृप[5] ॥१९॥ [२०
सीतां रामाय तनयामूर्मिलां[6] लक्ष्मणाय च[6] । [२१
२०] वीर्यशुल्का[7] मम[7] सुता[7] सीता सुरसुतोपमा ॥२०॥ [२२
अयोनिजा समुत्पन्ना वेदीमध्यात्[8] सुमध्यमा ।[8]
२१] तां रामाय प्रयच्छामि पत्नीं वीर्यबलार्जिताम् ॥[9][10] २१॥[N
रामलक्ष्मणयो राजन् कुरु गोदानमङ्गलम्[11] ।
२२] पितृश्राद्धं[12] च भद्रं ते ततो वैवाहिकं कुरु ॥२२॥ [२३
वर्ततेऽद्य मघा[13] राजन् दिवसे तूत्तरे पुनः ।

---

१. ज—वलीयानेष ।

२. ल भ—ज्येष्ठोस्याहं महायशाः ।

३. रा भ भ—ददामि ।

४. ल भ—परमप्रीतो ।

५. ल भ—ते रघुनन्दन ।

६. ल भ—भद्रं ते लक्ष्मणाय तथोर्मिलाम् ।

७. ल भ—मया दत्ता ।

८. ब—देवीमध्यात् । वस्तुतस्तु मात्राविपर्ययपरो भ्रम एषः ।

९. ल—इति कन्ये प्रयच्छामि त्रिर्ददामि न संशयः ।
भ—इमे ,, ,, त्रिर्वामि ,, ,, ।

१०. ल भ—प्रदानं चानयोर्वध्वौ धर्मेणेक्ष्वाकुनन्दन ।

११. ल भ—गोदानमुत्तमं ।

१२. पितृकार्यं ।

१३. ज—महा ।

२३] फल्गुन्यं[1]ः प्रतिपत्स्यन्ते विवाहस्तत्र नोऽस्त्वयम् ॥२३॥[2] [२४

इत्यार्षे रामायणे[3] बालकाण्डे जनककुलाख्यानं[4] नाम
सप्तषष्टितमः[5] सर्गः ॥६७॥[6]

१. कै—फल्गुण्याः । रा—फल्गुण्या ।

२. ल भ—मयापि तु महाबाहो तृतीये दिवसे शुभे ।
   ल.—फल्गुणीविषये राजं कार्य्यं कन्यापवर्जनम् ।
   भ—फल्गुनीविषये राजन् ,, ,,
   ल—यथा व भ्रातृयोर्वीरधर्मकार्यसुखोदयम् !
   भ—यथावत्पुत्रयोर्वीर धर्मकार्थं सुखोदयम् ।
   ल भ—क्रियतां देवपूर्वं हि प्रथमं कार्यमुत्तमम् ।

३. कै ब—नास्ति ।

४. रा—सनत्कुमाराख्याने । ज—जनकवंशवर्णनम् ।

५. कै रा—त्रिसप्ततितमः । ज—एकोनषष्टितमः ।
   ब—नास्ति ।

६. ल भ—सर्गसमाप्तिर्न दृश्यते ॥

उक्तवाक्ये तु जनके[1] विश्वामित्रो महामुनिः ।
१] उवाच वचनं धीमान्[2] वसिष्ठसहितस्तदा ॥१॥ [१
उभे महोदधिप्रख्ये उभयोरपि वां[3] कुले ।[4]
२] ख्यात इक्ष्वाकुवंशे हि जनकानां तथैव च ॥[5]२॥ [N
सदृशोऽपत्यसंबन्धो युवयोरिति मे मतिः ।[6]
३] सीताया ऊर्मिलायाश्च रामलक्ष्मणयो[7]स्तथा ॥३॥ [३
वक्तव्यमस्ति नः किञ्चिद् भूयोऽपि शृणु तन् नृप । [४
४] भ्राता ते सदृशो योऽयं शूरो राजा कुशध्वजः ॥४॥[8]
तस्यास्ति किल[10] धर्मात्मन् रूपेणाप्रतिमं भुवि ।[11]
५] कन्याद्वयं राघवार्थे[12] तद् वयं वरयामहे ॥[13]५॥ [५

१. ल भ—वैदेहे ।
२. ल—धीरं वसिष्ठं सहितं नृपं ।
भ—धीरो वसिष्ठसहितो नृप ।
३. ज—मां ।
४. ल भ—अचिंत्यान्यप्रमेयानि कुलानि कुलपुंगव ।
५. ल भ—नृपेक्ष्वाकुविदेहानां नैषां तुल्योऽस्ति कश्चन ।
६. ल—सदृशो धर्मसम्बन्धो रूपसम्पत्तथैव च ।
भ—सदृशो धर्मसम्बन्धे ,, ,,
७. ल भ—रामलक्ष्मणयोरिति ।
८. ल भ—वक्तव्यं ते नरश्रेष्ठ वचनं श्रूयतामिदं ।
९. ल भ—भ्राता ह्येष यवीयांस्ते धर्मात्मा हि कुशध्वजः ।
१०. रा.—कुल ।
११. ल भ—अस्य धर्मात्मनो नित्यं रूपेणाप्रतिमं भुवि ।
१२. ज—राघवाम ।
१३. ल भ—सुताद्वयं नरश्रेष्ठ वध्वर्थं वरयामहे ।

धर्मतो भरतस्यार्थे शत्रुघ्नस्य च धीमतः ।
६] वध्वौ मे संप्रयच्छ त्वं यदि ते[1] रुचिता वयम् ॥६॥[2] [६
पुत्रा दशरथस्यास्य चत्वारोऽमितपौरुषाः ।[3]
७] लोकपालोपमा वीराः सर्वे सत्यपराक्रमाः ॥[4]७॥ [७
एषामर्थे वयं राजन् भवन्तं वरयामहे ।
८] सदृशोऽसि प्रभावेण राघवाणां महीपते ॥[7]८॥ [N
सम्बन्ध उभयोर्भ्रात्रो युवयोः सदृशस्त्वयम् ।[8]
९] इक्ष्वाकुभि धर्मशीलैः सदृशैर्वा प्रजापते ॥[9]९॥ [८
इत्युदारं वचः श्रुत्वा विश्वामित्रवसिष्ठयोः ।[10]
१०] जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुङ्गवौ ॥१०॥ [९
सदृशः कुलसम्बन्धो भवद्भ्यामुपवर्णितः ।[11] [१०उ

---

१. रा—तैरुचिता ।

२. ल भ—भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ।
ल—इत्युक्त्वा मुनिशार्दूलं वरयामासतुर्नृपम् ।
भ— ,, मुनिशार्दूलौ ,, नृप ।

३. ल—पुत्रौ दशरथस्येतौ रूपयौवनशालिनौ ।
भ— ,, दशरथस्येमौ ,,

४. ल भ—भरतश्च महातेजाः शत्रुघ्नश्चापराजितः ।

५. ल भ—तयोरर्थे महाराज ।

६. कै रा ज ब—राघवानां

७. ल भ—कुशध्वजसुताभ्यां च प्रदानमभिरोचय ।

८. ल भ—उभयं हि नरश्रेष्ठ सम्बन्धेनानुगृह्यतां ।

९. ल—इक्ष्वाकुकुलमस्त्यग्र्यं भवताश्च यशस्विनः ।
भ—इक्ष्वाकुकुलमव्यग्रं भवतश्च यशस्विनः ।

१०. ल भ—विश्वामित्रवचः श्रुत्वा वसिष्टस्य च भाषितं ।

११. ल भ—सदृशात्कुलसंबन्धात्कृतवंतावनुग्रहम् ।

११] एवं भवत्विमे कन्ये कुशध्वजसुते उभे[1] ॥ ११ ॥
ददानि[2] भरतायैकां[3] शत्रुघ्नाय[4] तथाऽपराम् ।[5] [११
१२] इच्छाम्यहमतिप्रीतिं सम्बन्धं च पुनः पुनः ॥[6]१२॥ [N
१३पू] एकाहे राजपुत्राणां चत्वारो रघुनन्दनाः ।[7] [१२पू
१४उ] विवाहेषु प्रशंसन्ति नक्षत्रं वै विपश्चितः ॥[10]१३॥
एवमस्त्विति तत् तत्र वसिष्ठः प्रत्यभाषत ।[11] [N
एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृताञ्जलिः ॥१४॥
१५] उभौ मुनिवरौ राजा जनको वाक्यमब्रवीत् । [१४
वरधर्मः[12] कृतो ब्रह्मन्[13] शिष्योऽस्मि[14] भवतां सदा॥१५॥ [१५
१६] सामात्यः सबलश्चैव परवानस्मि चिन्त्यताम् । [N

---

१. ल—भवतु भद्रं वो । भ—भवतु भद्रं नः ।

२. ल भ—इमे ।

३. के—ददामि ।

४. ज—भरतायैव ।

५. ज—शत्रुघ्ना च ।

६. ल भ—पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ।

७. ल भ—एकाहेनैव सर्वासां कन्यानां मुनिपुंगवौ ।

८. रा—एकाले राज० । ज—०राजपुत्रीणां ।

९. ल भ—पाणिं गृह्णन्तु चत्वारो राजपुत्राः महाबलाः ।

१०. ल—उत्तरे दिवसे ब्रह्मं फल्गुणीनां मनीषिणः ।
भ— „ „ ब्रह्मन् फल्गुनीभ्यां „

११. ल—वैवाहिकं प्रशंसंते पूषा ह्यत्र तु दैवतम् ।
भ-- „ प्रशंसंति भगो ह्यत्र सुदैवतं ।

१२. के ज—वरधर्मकृतो । ल भ—वरधर्मकृतः ।

१३. ल भ—सर्वे ।

१४. ल भ—शिष्योहं ।

प्रभुर्दशरथो राजा ममास्य विषयस्य च ॥[1]१६॥
१७] भवन्तश्चापि सर्वे मे सर्वत्र प्रभविष्णवः । [N
विषयस्यास्य सर्वस्य राज्यस्य मम चेश्वराः ॥१७॥[2]
१८] भवन्तः क्रियतां तस्माद् भवद्भिः प्रणयो मम ।[3] [१६
[4]तथा [5]वदति वैदेहे[6] जनके [7]प्रश्रितं [8]वचः ॥१८॥
१९] राजा दशरथो हृष्टः प्रत्युवाच हसन्निव । [१७
२०उ] सर्वस्या अवने राजन् प्रभुरस्मि यथाऽऽत्थ माम् ॥[9]१९॥[N
अहं तव ममापि त्वं यत् तवास्ति ममैव तत् ।
२१] विश्वामित्रादयश्चापि ममेवं[10] तव चेश्वराः ॥२०॥[11] [N
सर्वतः प्रणयोऽस्माभिः कृतस्त्वयि महीपते ।
२२] करिष्यामश्च भूयोऽपि नास्ति नः स्वे विचारणा॥२१॥[12] [N
युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वरौ[13] ।
२३] प्रियौ संबन्धिनौ लब्धौ लोकेऽस्मिन् प्रथितौ मया॥[14]२२॥[N

---

१. ल भ—राज्ञो दशरथस्येयं यथायोध्यापुरी तथा ।
२. ल भ—प्रभुत्वे नास्ति संदेहो यथेष्टं कर्तुमर्हथ ।
३. ल भ—नास्ति ।
४. ल भ—एवं ।
५. ल भ—ब्रुवति ।
६. ज—वैदेही ।
७. ल—रघुनंदनः । भ—रघुनंदनाः ।
८. ल—महीपतिम् । भ—महीपतिः ।
९. ल भ—नास्ति ।
१०. ज—ममैव ।
११. ल भ—नास्ति ।
१२. ल भ—नास्ति ।
१३. ल भ—मिथिलेश्वर ।
१४. ल भ—उत्तमो राजवंशोयं युवाभ्यामभिपूजितः ।

स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामि स्वमालयम् । [१६पू
२४] गोदानादीनि कर्माणि कर्ता सर्वाण्यनन्तरम् ॥[1]२३॥ [N
धर्मार्थं वृद्धिकामानां मा नः कालोऽत्यगाद्यम्[2] ।
२५] सर्वेषामेव चास्माकमाज्ञां त्वं दातुमर्हसि ॥२४॥[3] [N
आपृच्छ्यैव दशरथो राजानं मिथिलेश्वरम् ।
२६] पुरस्कृत्य वसिष्ठादीन् निर्जगाम मुनींस्ततः ॥२५॥[4] [N
स गत्वा निलयं राजा कृत्वा[5] श्राद्धं महत्तदा ।
२७] पुत्राणां[6] प्रियपुत्रः[7] स चक्रे गोदानमङ्गलम् ॥२६॥[8] [२२
गवां शतसहस्रं हि ब्राह्मणेभ्यो नरेश्वरः ।[9][10]
२८] एकैकशो ददौ तत्र[11] पुत्रानुद्दिश्य तान्[12] पृथक् ॥२७॥ [२२

---

१. ल—शेषकर्माणि सर्वाणि विधास्ये इति चाब्रवीत् ।
भ—शेषकर्माणि पर्वाणि विधास्य इति चाब्रवीत् ।

२. कै रा—कालोऽतिगाद्यम् ।

३. ल भ—नास्ति ।

४. ल भ—आपृच्छ्य तं पुरस्कृत्य मुनिं दशरथो ययौ ।

५. ल भ—श्राद्धं कृत्वा सुपुष्कलं ।

६. ल भ—पुत्रार्थे ।

७. रा—प्रियपुत्रस्य ।

८. ज—गोदानसंकुलं । ल भ—०मुत्तमम् ।

९. ल भ—अतः परमाधिकः पाठः—
गवां शतसहस्राणि विधास्य इति चाब्रवीत् ।
ल—आपृच्छ्य जनकं राजा दानमत्यद्भुतं तथा ॥
भ— ,, ,, ,, दानमभ्युदयं ,, ॥

१०. ल—गवां शतसहस्राणि चत्वारि पुरुषर्षभ ।
भ— ,, ,, ,, पुरुषर्षभः ।

११. ल भ—राजा ।

१२. ल भ—धार्मिकः ।

पयस्विनीनां हि गवां सवत्सानां सुवर्चसाम् ।[1][2]
२९] ददौ शतसहस्राणि चत्वारि रघुनन्दनः[3] ॥२८॥[4] [२३
ततश्च कृतगोदानो वृतः पुत्रैर्महीपतिः ।[5]
३०] लोकपालैरिव बभौ वृतः[6] साक्षात् प्रजापतिः ॥२६॥[7] [२५

इत्यार्षे रामायणे बालकाण्डे गोदान-
विधिर्नाम अष्टषष्टितमः[8] सर्गः ।[9]

---

१. ज—स्ववर्चसां ।
२. ल भ—सुवर्णशृंगीः सुछन्नाः सवत्साः कांस्यदोहनाः ।
३. ल—वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः ।
भ—वित्तमन्यद्बहु वसु „ „ ।
४. ल भ—अतः परमधिकः पाठः—
ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ।
५. ल—स सुतैः कृतगोदानैर्वृतस्तु नृपतिस्तदा ।
भ—सुकृतः „ „ ।
६. ल भ—विभुर्वृतः सौम्यः ।
७. ल भ—अतः परमधिकः पाठः—
मुमुदे तत्र सुप्रीतः स्वर्गे शक्र इवामरैः ।
८. कै—चतुः सप्ततितमः । रा—चतुःसप्तति ।
ज—षष्टितमः । ब—नास्ति ।
९. ल भ—सर्गसमाप्तिर्न दृश्यते ।

यमेव दिवसं राजा चक्रे गोदानसत्क्रियाम्[1] ।
१] तमेव दिवसं तत्र[2] युधाजित्[3] प्रत्यपद्यत ॥१॥ [१
पुत्रः केकयराजस्य[4] शूरो भरतमातुलः ।
२] दृष्ट्वा पृष्ट्वा च कुशलं राजानं[5] परिषस्वजे[6] ॥२॥ [२
युधाजिच्चापि संपूज्य पर्यपृच्छदनामयम् ।
३] पृष्ट्वा चानामयं पश्चादिदं वचनमब्रवीत् ॥३॥[7] [N
N] केकयादिनिवासानामन्येषामपि पार्थिवः ।[7] [N
केकयाधिपती राजन् स्नेहात् कुशलमब्रवीत् ॥४॥
४] येषां कुशलकामोऽसि तेषां कुशलमुत्तमम् ।[8] [३
स्वस्त्रेयं[9] द्रष्टुकामो हि[10] त्वां[11] राजन् सहबान्धवम् ॥५॥

---

१. ज—गोदानमंगलं । ल भ—गोदानमुत्तमं ।
२. ल—शूरः । शूरो ।
३. ज—०प्रत्यदृश्यत । ल भ—जिदुपयातवान् ।
४. कै ल—कैकय० ।
५. भ—साक्षाद् ।
६. कै—०परिषष्वजे । ज—पश्चाद्राजानमब्रवीत् ।
भ—राजानमिदमब्रवीत् ।
७. ल भ—नास्ति ।
८. ल—येषां कुशलकामः स तेषां पृच्छन्त्यनामयं ।
भ— ,, ,, ,, ,, पृच्छत्यनामयं ।
९. कै रा—स्वश्रेयं । भ--स्वस्रीयं ।
१०. ल भ—मम राजेन्द्र ।
११. रा—०स सबांधवं । ज—त्वां च राजन् सबांधवम् ।
ल भ—द्रष्टुकामो महीपतिः ।

५] स्वपुरादागतः शीघ्रमयोध्यां रघुनन्दन । [४
श्रुत्वा चाहमयोध्यायामिहस्थं त्वां सबान्धवम् ॥[2]६॥ [५पू
६] त्वरावानुपयातोऽहं द्रष्टुं ते वृद्धिमीप्सिताम् ।[4] [६पू
तं[5] स राजा दशरथः प्रियातिथिमुपागतम् ॥७॥
७] दृष्ट्वा परमसत्कारैः पूजाऽर्हं प्रत्यपूजयत् । [७
ततस्तामुषितो रात्रिं सह पुत्रैर्महीपतिः ॥८॥
८] पुरस्कृत्य वसिष्ठादीन् मुनीन् यज्ञमुपाययौ । [८
युक्ते मुहूर्ते वैवाहे महाऽर्हैरभूषणैः ॥९॥
९] कृतकौतुकमङ्गल्यैः पुत्रैः दशरथो वृतः । [९
वसिष्ठं पुरतः कृत्वा तांश्चैवान्यान् महामुनीन् ॥[13]१०॥[१०पू

---

१. ल भ—तदर्थमुपयातोहमयोध्यां ।

२. ल भ—श्रुत्वा त्वहमयोध्यायां विवाहेषु समागमं ।

३. ज—वृद्धिमीप्सितं ।

४. ल भ—त्वरयाभ्युपयातोस्मि द्रष्टुकामः स्वसुः सुतम् ।

५. ल भ—अथ ।

६. ल भ—प्रियातिथिमुपस्थितं ।

७. ल—पूजार्हमपूजयत् । भ—पूजनार्हमपूजयत् ।

८. ल—०मुषतो ।

९. ल भ—पुत्रैर्महात्माभिः ।

१०. ल भ—मुनिं तदा पुरस्कृत्य यज्ञवाटमुपागमत् ।

११. ल भ—विजये ।

१२. ज—वरांवराविभूषणैः । ल—सर्वाभरणपूजितैः ।
भ—०भूषितैः ।

१३. ल भ—वसिष्ठमग्रतः कृत्वा सर्वांश्चैव द्विजर्षभान् ।

१०] यथान्यायमुपागम्य राजा वैदेहमब्रवीत् । [११
प्राप्ताः स्म राजन् भद्रं ते विवाहार्थं सदस्तव ॥११॥[1] [N
११] तत् साधु चिन्तयित्वाऽस्मान् प्रवेशयितुमर्हसि ।[2]
स्थिता हि ते वशे सर्वे वयमद्य सबान्धवाः ॥१२॥[3] [N
१२] स्ववंशधर्माद्युचितं[4] कुरु वैवाहिकक्रमम्[5] । [१३उ
इत्युक्तः[6] परमोदारं वाक्यं वाक्यविशारदः[7] ॥१३॥
१३] प्रत्युवाच ततो राजा मैथिलस्तं नराधिपम् ।[8] [१४
कः स्थितः प्रतिहारो मे कस्याज्ञा प्रतिपाल्यते ॥[9]१४॥
१४] स्वगृहे को विचारस्ते विश्रंभेण[10] प्रविश्यताम् । [१५
यज्ञभूमिमिमां प्राप्ताः कृतकौतुकमङ्गलाः ॥[11]१५॥

---

१. ल भ—उपगम्य वसिष्ठस्तु वैदेहमिदमब्रवीत् ।
राजा दशरथो राजन् कृतकौतुकमंगलः ॥
२. के—तत्साधु चिंतयितुमर्हसि ।
३. ल भ—पुत्रैर्नरवरश्रेष्ठ दातारमभिकांक्षति ।
दातृप्रतिगृहीतृभ्यां सर्वार्थाः प्रभवन्ति हि ।
४. रा—०धर्माद्युचितं । ल—स्वधर्मं प्रतिपद्यस्व ।
भ— स्वधर्मं प्रतिपद्यस्व ।
५. ज—वैवाहिकं क्रमं । ल भ—वैवाहमुत्तमं ।
६. रा—इत्युक्त्वा ।
७. ज—०वाक्यविदां वरः । ल भ—वसिष्ठेन महात्मना ।
८. ल—प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ।
भ— ,, ,, ,, परमधर्मतः ।
९. ल—प्रतीहारः स्थितः को मे । कस्याज्ञां संप्रतीक्षथः ।
भ— ,, ,, ,, ,, ,, संप्रतीक्षथ ।
१०. ल भ—यदा राज्यमिदं तव ।
११. ल भ—कृतकौतुककृत्यास्तु वेदीमूलमुपागताः ।

१५] मम कन्याश्चतस्रो हि[2] वह्नेर्दीप्ता इवार्चिषः । [१६
सज्जोऽहं त्वत्प्रतीक्षश्च वेद्यामस्यां स्थितो नृप ॥[3]१६॥
१६] अविघ्नं कुरु राजेन्द्र किमर्थं त्वं विलम्बसे । [१७
श्रुत्वैतज्जनकेनोक्तं वाक्यं दशरथो नृपः ॥१७॥
१७] प्रवेशयामास तदा वसिष्ठादीन् द्विजर्षभान् । [१८
ततो राजा विदेहानामुवाच रघुनन्दनम् ॥१८॥ [३२पू
१८] रामं कमलपत्राक्षं पूर्वं वेदीमुपागतम् । [N
इयं सीता मम सुता सहधर्मचरी तव ॥१९॥
१९] गृहाण पाणिना पाणिं त्वमस्या रघुनन्दन । [३३
